



THE

BAUDHĀYANA ŚRAUTA SŪTRA

BELONGING TO THE

TAITTIRĪYA SAṂHITĀ



EDITED BY

DR. W. CALAND

Extra Professor of Sanskrit at the University of Utrecht.

VOLUME II



CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,
AND PUBLISHED BY THE
ASIATIC SOCIETY, 57, PARK STREET,

1907.

PREFACE.

In preparing the text of this second volume of the Baudhāyana-śrautasūtra the editor has had to cope with many more difficulties than he had to do when preparing the text of the first volume. Indeed, a few months ago I was almost despairing of obtaining sufficient material for this volume. The fact is, that the tradition of these parts of the sūtra, describing for the greater part the rituals, partly obsolete, partly less observed than the darśapūrṇamāsa, agnyādheya and agniṣṭoma, is, throughout India, a very bad one. The MSS. of Bombay, Benares, Gwalior, Dhar and Ujjain are all together more or less corrupt and seem partly to derive from one archetype, in which not only were lost the right arrangement of the materials and the numbering of the praśnas, adhyāyas and khaṇḍikās, but the text of which was also hopelessly corrupt in many a passage. And no complete copy of Bhavasvāmins Vivaraṇa, which would have been of paramount use, seems to be extant. Although Professor Hultzsch has taken all possible pains to hunt up more MSS. from Southern India and has set to work two pandits to unearth more material, he has, alas, not succeeded. Professor Bhandarkar of Elphinstone College also was kind enough to provide me with more material, but it was of the same kind: on the whole corrupt from beginning to end.

Nearly despairing, I wrote to Dr. Thomas, Librarian-in-Chief to the India Office, requesting him to look over, for my sake, once more the Mackenzie Collection of Sanskrit MSS. preserved at the India Office. And he was so fortunate as to light upon one MS. (cp. *infra* the enumeration of the MSS.) containing a wholly independent tradition of the text I stood in need of so much. This MS., too, is far from faultless, but it throws light on many a difficult passage, and, what is the main point, the arrangement of the praśnas seems to be correct in this MS. Before I knew this Mackenzie MS., I had my doubts about which part of the sūtra constituted the so-called uttarā tatiḥ. In the MS. from Benares, where the praśnas are all numbered by a *secunda manus* (cp. my paper "Ueber das rituelle Sūtra des Baudhāyana," p. 12), the praśna coming after the dvādaśāha and gavām ayana, numbered here as the 17th, contains the atirātra, the sautrāmaṇī and the ekādaśinī. In the copy of Bhavasvāmins Vivaraṇa, known to me from the beginning up to the aupānuvākya (consequently giving the first fourteen praśnas complete), is found neither the aśvāmedha nor the dvādaśāha and gavām ayana, but immediately after the aupānuvākya comes the ekādaśinī. Now, as the MS. of Bhavasvāmin ends with the words: *iti bhavasvāmikṛte*

kalpavivaraṇe tatau dvitiyo 'dhyāyaḥ, and the Mackenzie MS. agrees exactly with this numbering, as it gives the number *dvitīyaḥ* precisely at the end of the passage treated lastly by Bhavasvāmin, there is no doubt at all that the Mackenzie MS. is *right* and that the uttarā tatiḥ begins with the atirātra and the *immediately following* ekādaśinī. This being the case, the statement of B and Be, that the 17th praśna should have contained the atirātra, sautrāmaṇī and ekādaśinī must be false. On account of the fact that the Mackenzie MS. agrees in this respect with Bhavasvāmin and that in other points this MS., of all those known to me, also seems to have preserved the correct order, I have adopted the arrangement of the materials as given by this MS. In consequence of this arrangement, the one adopted previously has been abandoned: thus the numbering of the praśnas and partially that of the adhyāyas in the text coming after the gavām ayana is wholly different from the numbering followed by me in citing passages from Baudhāyana in my above paper on this sūtra. But however valuable this Mackenzie MS. may be, it has not cleared up all the *dubia* regarding the arrangement of the materials. There are two more points to be settled. The first is a question analogous to a difficulty in the construction of the text of Vol. I (the place where the pravargya had to be put in), viz., the place to be assigned to the Kāṭhakasūtra. In the MSS. from Benares (Be) and Bombay (B) it is numbered as the 18th, in the MS. Haug it is numbered as the 21st. The Mackenzie MS. assigns a place to this praśna between the agnicayana and the vājapeya, without, however, giving a praśna-*number* to it.[1] As the contents of this praśna are mentioned neither in the Dvaidha- nor in the Karmāntasūtra, no further information is to be obtained from these texts. But as it is highly improbable that this praśna should have formed part of the uttarā tatiḥ, the number 18 assigned to it by Be and B can by no means be right. In accordance with the MS. Haug[2] and with the place occupied by this material in the brāhmaṇa (viz., *at the end* of the Taitt. Brāhm.) I have inserted it after the uttarā tatiḥ. In consequence of this new arraugment the numbers of the following praśnas (Dvaidha, Karmānta and Prāyaścitta) will have to be changed accordingly. By doing so I may come into collision with the original numbering, which, it seems, is unknown to us. But this is a point of minor importance.

Another question has also puzzled me greatly. In the uttarā tatiḥ, as handed down to us in the Mackenzie MS., two

---

1 Praśna *numbers* are not found in the Mack. MS.

2 This MS. gives as the number of the Kāṭhakapraśna: 21; the same MS. numbers the three Karmāntapraśnas: 22, 23, 24; and the Dvaidhapraśnas: 25, etc. This is obviously an error (cp. my paper on the Baudh. sūtra, p. 13, 14). But at any rate this MS. inserts the Kāṭhaka *immediately before* Dvaidha and Karmānta.

adhyāyas are found, the contents of which are entirely foreign to a śrautasūtra, viz. the adhyāyas 12 and 13 of praśna 17, treating of the samāvartana, a subject we would expect to be treated rather in the gṛhyasūtra. Now, the tradition of the gṛhyasūtra is in this respect not wholly consistent either. Most of the MSS. of the gṛhyasūtra have in the gṛhyasūtra proper (second praśna) a chapter commencing thus: *vedam adhītya snāsyann ity uktaṃ samāvartanam*, and in the so-called paribhāṣā-sūtra a chapter commencing: *vedam adhītya snāsyann ity upakalpayate*, etc. This last part is identical with the long passage found in the Mackenzie MS. of the śrautasūtra and here inserted as adhyāya 12 of the first uttarā tatiḥ praśna. This distribution of the material in the MSS. of the gṛhyasūtra cannot possibly be right, for obviously the passage *vedam adhītya snāsyann ity uktaṃ samāvartanam* refers to the passage *vedam adhītya snāsyann ity upakalpayate*, which therefore must have *preceded*. I possess a very good copy in Grantha writing of the whole gṛhyasūtra, kindly procured me by Professor Hultzsch. In this MS. the long passage commencing: *vedam adhītya snāsyann ity upakalpayate* (the passage given by the Mackenzie MS. as forming part of the śrautasūtra) stands where the chapter *vedam adhītya snāsyann ity uktaṃ samāvartanam* is inserted by the other MSS. Before the Mackenzie MS. came into my hands I thought this was all right. But not long ago I received one more copy of the gṛhyasūtra, copied from an original preserved at Madras. This MS. throws some light on this hitherto obscure point. Where the other MSS. (except the one from Madras, designed by me as M) have the chapter *vedam adhītya snāsyann ity uktaṃ samāvartanam*, this MS. reads: *vedam adhītya snāsyann ity uktaṃ samāvartanam; asya samāvartanasya nātra pāṭhaḥ, kiṃtu anyatra paṭhitam; atra saṃgṛhya vilikhitam atropayogāt;* then comes the text given by Mackenzie as xvii. 12 and 13, and the rest of the chapter *vedam adhītya snāsyann ity uktaṃ samāvartanam*. Now, as it is impossible that the passage referred to in the opening words *ity uktaṃ samāvartanam* could have *followed*, it seems highly probable that the treatment of the samāvartana was originally incorporated in the uttarā tatiḥ, and that here the Mackenzie MS. is right too. I possess now another copy of the complete gṛhyasūtra, which confirms this statement. This MS. gives in the second praśna the chapter *vedam adhītya snāsyann ity uktaṃ samāvartanam*, but in the paribhāṣā the text given by the Mackenzie MS. (as xvii. 12, 13) is *not* found. It is not improbable that the scribes of our śrautasūtra, finding the treatment of the samāvartana foreign to a śrautasūtra, omitted it and inserted it in a more proper place (the gṛhyasūtra), disturbing, in doing so, the first praśna of the uttarā tatiḥ. For it is remarkable that none of all the other MSS. of the śrautasūtra give for this praśna (the 17th) any adhyāya- or khaṇḍikā-number; the Mackenzie MS., on the other hand, gives the adhyāya- and khaṇḍikā-numbers, and, in accordance with this

fact, at the close of this praśna, all the pratikas of the adhyāyas and khaṇḍikās, including those of the chapters on samāvartana. How it occurred to the diasceuasts of the śrautasūtra to insert the samāvartana among the subjects treated in the śrautasūtra, I am, however, at a loss to explain.

So this Mackenzie MS. was of the greatest help in constituting the text of Vol ii. The tradition of the cayana, vājapeya and rājasūya chapters is in this MS. inferior to that of the following chapters. To these, however, it is of the greatest value: entire passages, omitted by all the other MSS., are found *here*, and in many a passage it is easy to prove that only the reading found in M. (Mackenzie) is right, over against the oftentimes unanimous reading of all the other MSS. As no complete copy of the Vivaraṇa seems to be available, we are thrown upon our own resources to understand the meaning of this text. Of some use are, of course, the cognate texts of Āpastamba and Hiraṇyakeśin, but, as these are much more real sūtras than the text of Baudhāyana, and consequently, on the whole, much shorter, the help procured from these texts is rather inefficient. In passages, where new words or unknown expressions occur, I have, therefore, as a rule, adhered to the reading of M. The corruption of the other MSS. is so great, that it is not worth while mentioning all their various readings. So, *e.g.*, in the description of the vrātyastomas: here the text of all the MSS., with the exception of M., is one hopeless confusion. It is highly to be regretted, that this Mackenzie MS. is not wholly complete: some final leaves are wanting; consequently the text of the important last chapters of the second uttarātatiḥpraśna had to be edited as well as possible after the corrupt MSS. This is all the more to be regretted as they contain the legends of Purūravas and Uśanas.

After the above remarks, the reader and student of the second volume of Baudhāyana will be indulgent to the editor, who thought it better to give a text, however imperfect, rather than postpone its publication *ad calendas graecas*, as, after years of inquiry, no more help seemed to be forthcoming.

After these preliminary remarks, I shall now give a list of the MSS. used in editing Vol. ii.

1. M, being No. xxviii. (new number: 92) of the Mackenzie Collection at the India Office, see Wilson, a descriptive catalogue of the Oriental MSS. collected by Lt.-Col. Mackenzie, Vol. i., p. 6; old palmleaf MS. in Nandināgari characters, 44 c.m. long, 2½ large, well-written but slightly injured; the pagination is continuous. It contains the following parts :—

(*a*) karmāntasūtra, one leaf numbered 2 and containing Karm. i., kh. 3 from : °*ta āvāpo bhavati taṃtraṃ tu* unto *jagatīti*, close of kh. 5; then on 20 leaves numbered 21-41, the rest of the Karmānta, beginning praśna ii., kh. 27, from : °*bṛhaspatibhyāṃ tvā juṣṭam* unto the end of the Karmānta.

(*b*) śulbasūtra foll. 42-50 *a*.

(c) cayanasūtra foll. 50a-72.
(d) kāṭhakasūtra foll. 73-77.
(e) vājapeya foll. 78-83.
(f) rājasūya foll. 83-93.
(g) iṣṭikalpa foll. 94-105.
(h) aupānuvākya foll. 106-122.
(i) aśvamedha foll. 123-137.
(k) dvādaśāha foll. 137-148.
(l) uttarā tatiḥ (first praśna) foll. 149-168.
(m) ekāhas (sec. praśna) foll. 168-182.

The MS. breaks off after the 10th adhy. of praśna xviii.

2. B. cp. Preface to Vol. i., p. vii.

3. Be (Be 115) cp. ib. p. vii, viii.

4. U, being a nearly complete collection of the Baudh.-sūtras, neatly written on paper in Nāgarī by the same hand. From Ujjain. The avāntaradīkṣā is not found in this collection. It contains on 158 leaves (numbered continuously) the contents of Vol. i.; the pravargya comes *after* the agniṣṭoma; it closes with kh. 17. Then come the agnicayana, vājapeya, etc. No praśna numbers are given here and in the following parts, which are all numbered separately; its colophon runs: *śake 1762 bhādrapada kṛṣṇa 2 ravivāsare taddine āṭhavele ity upanāmakagaṇeśabhaṭṭātmajarāmacandreṇa likhitam.* Through the kind mediation of Professor Bhandarkar I was allowed the use of this MS.

MSS. containing single parts :—

5. H cp. Preface to Vol. i., p. viii.: cayana, vājapeya, atirātra, aptoryāma, ekādaśinī, kāṭhaka, and sautrāmaṇī.

6. F cp. Preface to Vol. i., p. ix. (vājapeya).

7. D, being a collection of various parts of the sūtra found at Dhar, the loan of which was procured to me also by Professor Bhandarkar. Paper, Nāgarī writing, different handwriting. It contains the iṣṭikalpa in a rather good tradition, although badly written; the dvādaśāhapraśna, atirātra, uttarā tatiḥ, very badly written and in the same hopelessly corrupt tradition as the other MSS.

8. Tr, being a copy in Grantha writing on paper from an original in Trichinopoly, pretending to be a complete śrautasūtra (!). It contains: the whole of the text already published in Vol. i.; the pravargya, together with its prāyaścitta and the avāntaradīkṣā, precedes the agniṣṭoma. After the agniṣṭoma come: 1. cayana (foll. 225-276); 2. sautrāmaṇī (foll. 277-282); 3. vājapeya (foll. 282-297); 4. atirātra (foll. 297-305); 5. aptoryāma (foll. 305-306); 6. the three prāyaścitta praśnas (foll. 306-343). The praśna numbering of this copy is utterly worthless.

9. MS, being the sūtra passages of the cayana as found in the mahāgnisarvasva, in Grantha writting on palmleaves, belonging to the India Office (cp. Burnell, a catalogue of Sanskrit MSS., Part i., p. 27); MSc., the reading presented by the Mahāgnisarvasva commentary itself.

10. Bu, the text of the cayana as given in an appendix after the above mentioned MS. (Burnell 55), comprising the text up to kh. 24, breaking off after the words: *nihanty āvṛhyāśmānam upa.*

11. Be 11, cp. Preface to Vol. i., p. x., No. 9: dvādaśāha (without gavām ayana), rājasūya, vājapeya.

12. T, cp. Preface to Vol. i., p. x., No. 12: rājasūya only. Of the rājasūya MSS. B Be and U agree mostly; on the other hand Be 11 and T go together. M is independent.

13. Be 8, cp. Preface to Vol. i., p. x., No. 10 (here cited as B 4) contains the iṣṭikalpa.

14. Be, a copy of the aupānuvākya praśna from Benares (Nāgari, paper) on 14 foll., well-written but containing on the whole the same tradition as B and Be (115).

15. Be, a copy of the kāṭhakasūtra from Benares (see sūcipattra, p. 72, No. 10), paper, Nāgarī, 7 leaves.

16. Be (12), a copy of the atirātra from Benares (see sūcipattra, p. 72, No. 12), paper, Nāgari, 3 leaves.

17. G, an original MS. of the aupānuvākya from Gwalior on paper in Nāgari, procured on loan by Professor Bhandarkar.

18. T, a copy of the santrāmaṇi in the collection of Sanskrit MSS. preserved at Tübingen (M.a. i., 317) Nāgarī, paper.

19. MS and MSc, text and commentary of the ekādaśinīsūtra contained in the MS. of the Mahāgnisarvasva, cp. supra No. 9.

Other sources, which were of more or less help, are the Vivaraṇa of Bhavasvāmin up to the aupānuvākya, the Vivaraṇa of the atirātra, the aptoryāma and the santrāmaṇi, and lastly the Prayogasāra of Keśavasvāmin on the contents of which cp. my paper on the Baudh.-sūtra, p. 15.

My thanks are due, for procuring me the use of some of these MSS. and for taking pains in having copied others for me, to Dr. Thomas, Librarian-in-Chief of the India Office, to Professor Hultzsch, to Professor Bhandarkar at Bombay, to Mr. A. Venis at Benares, and to the British Government, which enabled me to collate some of the originals of the above mentioned manuscripts.

W. CALAND.

Utrecht, May 1906.

उखाः संभरिष्यन्नुपकल्पयतेऽश्वं च गर्दभं च तयोरेव रशने मौञ्ज्यौ वा कुशमय्यौ वाभ्रिं च ब्राह्मणसंपन्नां मृदं च भावितां करणीयां वल्मीकवपां कृष्णाजिनं च पुष्करपर्णं च योक्त्रमुदकुम्भꣳ हिरण्यमर्मकपालानि शर्करा अश्वाञ्जनपिष्टा अजलोमानि कृष्णाजिनलोमानि वैश्वꣳ सप्तदशꣳ सूनामधिकरणीमुखाहृतं कुशलमित्यथामावास्येन वा हविषेष्ट्वा नक्षत्रे वाश्वेन शालाꣳ शम्यान्यासे गर्तं खानयति । तद्भावितां मृदमवलेपयति । समां बिलेन करोति । तदुपसादयति कृष्णाजिनं च पुष्करपर्णं च योक्त्रमुदकुम्भꣳ हिरण्यमित्यथ विधुवति स्फ्येनोद्धृत्यावोक्ष्य वल्मीकवपां निदधाति । तां दक्षिणतो वैश्वो गोपायन्नास्ते । ऽथोत्तरꣳ शालाखण्डमश्वेन स्फ्येनोद्धृत्यावोक्ष्य सिकता निवपति । तं परिमण्डलं खरं करोत्यथैनꣳ सिकताभिराश्वाशिनं करोति । तं कुशतरुणकैर्दूर्वाग्रन्थिभिरिति संप्रच्छाद्याथैनं परिश्रयन्ति । तस्योदीचीं द्वारं कुर्वन्ति । तदुपसादयत्यर्मकपालानि शर्करा अश्वाञ्जनपिष्टा अजलोमानि कृष्णाजिनलोमानि सूनामधिकरणीमुखाहृतं कुशलमित्यथैतावश्वगर्दभावश्वेन शालां पत्यूखितौ तिष्ठतो ऽन्तर्वेद्यभ्रिं निदधात्युत्तरे वेद्यन्ते रशने । परिस्तृणन्ति । दक्षिणत उपविशतो ब्रह्मा च यजमानश्चाथ गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वाहवनीये सावित्राणि जुहोत्यन्वारब्धे यजमाने । ॥ १ ॥

युञ्जानः प्रथमं मन इति षडृचो ऽनन्तर्हिता देव सवितरि-

1

त्वृगेषेमं नो देव सवितरिति यजुरेतदृचा वा यजुषा वावस्यत्याऊतिं नवमीꣳ कृत्वोपतिष्ठत ऋचा स्तोमꣳ समर्धयेत्यथाभिमादत्ते देवस्य त्वा सवितुः प्रसव इति चतुर्भिः पर्यायैस्त्रामयेणाहवनीयं पर्याहृत्य दक्षिणत आसीनाय ब्रह्मणे प्रयच्छत्यथ रशनामादत्त इमामगृभ्णन्रशनामृतस्येति तयाश्वमभिदधाति प्रतूर्तं वाजिन्नाद्रवेत्येवमेव द्वितीयाꣳ रशनामादत्ते तया गर्दभमभिदधाति युञ्जाथाꣳ रासभं युवं योगेयोगे तवस्तरमिति द्वाभ्यामश्वं पूर्वं नयन्ति तमनुमन्त्रयते प्रतूर्वन्नेह्यवक्रामन्नशस्तीरित्यन्वञ्चं गर्दभं पूष्णा सयुजा सह पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वदच्छेहीति प्रदक्षिणौ वेश्मं कुर्वते वेश्मः पृच्छति पुरुषाः किमच्छेथेत्यग्निं पुरीष्यमङ्गिरस्वदच्छेम इतीतरे प्रत्याहुरथ वल्मीकवपामुपतिष्ठतेऽग्निं पुरीष्यमङ्गिरस्वद्भरिष्याम इत्यथोपातियन्त्यन्वग्निरुषसामग्रमख्यदन्वहानि प्रथमो जातवेदाः। अनु सूर्यस्य पुरुत्रा च रश्मीननु द्यावापृथिवी आततानेत्यथैतेनाश्वेन प्राचा मृदमाक्रमयत्यागत्य वाज्यध्वन आक्रम्य वाजिन्पृथिवीमिति द्वाभ्यामथास्य पृष्ठं सम्मृश्यते द्यौस्ते पृष्ठं पृथिवी सधस्थमात्मान्तरिक्षꣳ समुद्रस्ते योनिः। विख्याय चक्षुषा त्वमभितिष्ठ पृतन्यत इत्यथ यं यजमानो द्वेष्टि तमवख्याधस्पदं ध्यायत्यथैनं प्राञ्चमुत्क्रमयत्युत्क्रामोदक्रमीदिति द्वाभ्यामथैतं पदाग्रयमङ्गिरुपसृजति ॥ २ ॥

आपो देवीरुपसृज मधुमतीरयक्ष्माय प्रजाभ्यः। तासाꣳ स्थानादुज्जिहतामोषधयः सुपिप्पला इत्यथ स्रुचि चतुर्गृहीतं

गृहीत्वा दक्षिणेऽवान्तरशफे हिरण्यं निधाय संपरिस्तीर्याभिजुहोति जिघर्म्यग्निं मनसा घृतेनेत्यपरं चतुर्गृहीतं गृहीत्वोत्तरेऽवान्तरशफे हिरण्यं निधाय संपरिस्तीर्यैवाभिजुहोत्या त्वा जिघर्मि वचसा घृतेनेत्यथोद्धृत्य हिरण्यमभ्रिमादाय पदं परिलिखति परि वाजपतिः कविः परि त्वाग्ने पुरं वयं त्वमग्ने द्युभिरिति तिसृभिः खनति देवस्य त्वा सवितुः प्रसवे ज्योतिष्मन्तं त्वाग्ने सुप्रतीकमिति द्वाभ्यामथोत्तरतः पार्श्वतः संभाराणां प्राचीनाग्राणि तृणानि सꣳस्तीर्य तेषूपरि कृष्णाजिनं प्राचीनग्रीवमुत्तरलोमोपस्तृणात्यथापां पृष्ठमसीति पुष्करपर्णमाहरति तदुपरिष्टात्कृष्णाजिने निधायाथैनं संमृशति शर्म च स्थः संवसायामिति द्वाभ्यामथोद्धृत्य पुष्करपर्णमष्टाभिर्मृदꣳ हरति ॥ ३ ॥

पुरीष्योऽसि विश्वभरा इति तासां चतस्रो गायत्र्यश्चतस्रस्त्रिष्टुभः स पिण्डंपिण्डं वैवर्चा हरत्यपि वाष्टाभिरेकमेव पिण्डꣳ हरत्यथैतमवटं[1] विश्वलोपेन पूरयित्वाद्भिरुपसृजति सं ते वायुर्मातरिश्वा दधातूत्तानायै हृदयं यद्विलिष्टम्। देवानां यश्चरति प्राणथेन तस्मै च देवि वषडस्तु तुभ्यमित्यथोपरिष्टात्पुष्करपर्णं मृदि निधाय समुच्चित्य कृष्णाजिनस्यान्तान्योक्त्रेणोपनह्यति सुजातो ज्योतिषा सह शर्म वरूथमासदः स्वः। वासो अग्ने विश्वरूपꣳ संव्ययस्व विभावसो इत्यथैन-

---

1 Thus only M Bhāv.; अथैनमवटं all the other MSS.

मादायोपोत्तिष्ठत्युदु[1] तिष्ठ स्वध्वरोर्ध्व ऊ षु ण ऊतय इति द्वाभ्यामथैनमाहरति स जातो गर्भो असि रोदस्योरग्ने चारुर्विभृत ओषधीषु। चित्रः शिशुः परि तमांस्यक्तः प्र मातृभ्यो अधि कनिक्रदद्गा इत्यथैनं गर्दभ आसादयति स्थिरो भव वीड्वङ्ग आशुर्भव वाज्यर्वन्। पृथुर्भव सुषदस्त्वमग्नेः पुरीषवाहन इत्यथैनमुपतिष्ठते शिवो भव प्रजाभ्यो मानुषीभ्यस्त्वमङ्गिरः। मा द्यावापृथिवी अभिशूशुचो मान्तरिक्षं मा वनस्पतीनित्यश्वं पूर्वं नयन्ति तमनुमन्त्रयते प्रैतु वाजी कनिक्रददित्यन्वञ्चं गर्दभं नानदद्रासभः पत्वा। भरन्नग्निं पुरीष्यं मा पाद्यायुषः पुरा॥ रासभो वां कनिक्रदत्सुयुक्तो वृषणा रथे। स वामग्निं पुरीष्यमाशुर्दूतो वहादितः॥ वृषाग्निं वृषणं भरन्नपां गर्भं समुद्रियम्। अग्न आयाहि वीतय इत्यथेमे समोचन्त ऋतं सत्यमृतं सत्यमिति प्रदक्षिणी वेश्मं कुर्वते वैश्यः पृच्छति पुरुषाः किं भरथेत्यग्निं पुरीष्यमङ्गिरस्वद्भराम इतीतरे प्रत्याहुरथैनं खर उपावहरन्त्योषधयः[2] प्रतिगृह्णीताग्निमेतमोषधयः प्रतिमोदध्वमेनमिति द्वाभ्यामद्भिरभ्युक्ष्याश्वगर्दभावुत्सृजन्त्यपो रशने अभ्यवहरन्त्यपि वाद्भिरभ्युक्ष्य मुञ्चते॥ ४॥ प्रथमः॥

अथैनं विस्रंसयति वि पाजसा पृथुना शोशुचान इत्य-

१ Thus M Tr U; उप om. HB Ms. °पोत्तिष्ठ° Be.

२ उपावहरत्य° B Be.

थैनमद्भिरुपसृजत्यापो[1] हि ष्ठा मयोभुव इति तिसृभिरनुच्छन्दसमथैनमर्मकपालैः शर्कराभिरवाश्मनपिष्टाभिरजलोमैः कृष्णाजिनलोमैरिति सꣳसृजति मित्रः सꣳसृज्य पृथिवीमपश्चाय त्वा सꣳसृजामीति द्वाभ्यामथैनꣳ संभरति रुद्राः संभृत्य पृथिवीमिति । पिण्डं करोति मखस्य शिरो ऽसीति । यज्ञस्य पदे स्थ इत्यङ्गुष्ठाभ्यामुपनिगृह्णात्यथ तृतीयं मृदो ऽपच्छिद्य त्रीन्पिण्डान्करोति । तेषामेकमुखाहते प्रयच्छति सꣳसृष्टां वसुभी रुद्रैरित्यनुमन्त्रयते वसवस्त्वा कृण्वन्तु गायत्रेण छन्दसेत्यतिशिष्टायै मृदो ऽर्धं प्रयच्छति सिनीवाली सुकपर्देत्यनुमन्त्रयते रुद्रास्त्वा कृण्वन्तु त्रैष्टुभेन छन्दसेति । सर्वामन्ततो मृदं प्रयच्छत्युखां करोतु शक्त्येत्यनुमन्त्रयत आदित्यास्त्वा कृण्वन्तु जागतेन छन्दसा विश्वे त्वा देवा वैश्वानराः कृण्वन्त्वानुष्टुभेन छन्दसेत्यथ वै भवति प्रान्याभिर्यच्छत्यन्वन्यैर्मन्त्रयते मिथुनत्वाय । बुध्नं करोतीति । स यदेव निर्हरति निरनुलिम्पति तेन बुध्नदेशं प्रादेशमात्रीमूर्ध्वामपरिमितां तिरश्चीं करोत्यथास्यै व्यङ्गुले वा चतुरङ्गुले वा रास्नां पर्यस्यत्यदित्यै रास्नासीत्यथास्या अनुदिशमष्टावश्रीरुन्नयति । रास्नासन्धिषु चाश्रिसन्धिषु चाष्टौ स्तनान्करोति । नवाश्रिमभिचरतः कुर्यादिति ब्राह्मणमस्तनां नवमीं करोत्यथास्यै बिलं गृह्णात्यदितिष्टे बिलं गृह्णातु पाङ्क्तेन छन्दसेत्यथैनां खरे निदधाति कृताय

1 Thus M Be Tr HU (pr.m.), Bhav.; उपावसृजत्य॰ BU (sec. m.) Ms.

मा मखीमुखामित्यान्तादनुवाकस्यैवमेव द्वितीयां करोत्येवं तृतीयां तूष्णीं पञ्च चर्षभाङ्क्तिस्रश्च[1] मण्डलेष्टकाः । ॥ ५ ॥

अथ या मृदतिशिष्यते तया प्रवाते प्रतिलेपमुपवातयति । तासूपवातासूपकल्पयत एकविंशतिं वृष्णो अश्वस्य शकृत्पिण्डानभिमग्निं पचनमित्यथाश्वशकमादीप्य मुख्यामुखां धूपयति वसवस्त्वा धूपयन्तु गायत्रेण छन्दसेति प्रतिपद्य वरुणस्त्वा धूपयत्वित्यातो ऽन्तरतश्च बाह्यतश्च । सुधूपितां कृत्वा निदधात्येवमेव द्वितीयां धूपयत्येवं तृतीयां तूष्णीं पञ्च चर्षभाङ्क्तिस्रश्च मण्डलेष्टका । अथोत्तरेण शालामुद्दविलमिवावटं खानयत्यदितिस्त्वा देवी विश्वदेव्यावती पृथिव्याः सधस्थे ऽङ्गिरस्वत्खनत्ववटेति । तं पचनेनावस्तीर्य तस्मिन्मुख्यामुखां प्रवृणक्ति देवानां त्वा पत्नीर्देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थे ऽङ्गिरस्वद्दधतूख इत्येवमेव द्वितीयां प्रवृणक्त्येवं तृतीयां तूष्णीं पञ्च चर्षभाङ्क्तिस्रश्च मण्डलेष्टकास्ताः प्राचीर्वोदीचीर्वायातयत्यथैनाः पचनेनोपरिष्टात्संप्रच्छाद्य मृदावलिम्पति[2] । चतुरङ्गुलमनुदिशमादीपनायातिशिनष्ट्यथोपोषति[3] ॥ ६ ॥

धिषणास्त्वेति पुरस्ताद् ग्नास्त्वेति दक्षिणतो वरूत्रयस्त्वेति

---

१ Here and infra some of the MSS. present the fem.: ०चर्षभास्ति० (or च ऋषभास्ति०); again some of the MSS. om. the first च।

२ Thus (cp. Vol. I. 269, 8) MUH Be; अभिलिंपति B Bu Tr Ms Keś.

३ Before चतुर० Be B Bu Tr U (sec. m.) Ms ins. ताम्।

पश्चाज्जनयन्त्वित्युत्तरतो' ऽथैनाः परिददाति मित्रैतामुखां पचैषा मा भेद्येतां ते परिददाम्यभित्त्या इति' ता अह्ना वा रात्र्या वा पच्यन्ते' यदि प्रातरुपोषति सायमुपैति यदि सायं प्रातस्तांस्तु पक्वासूपकल्पयते गोपयश्छागापयो धृष्टिमश्मसंदावꣳ सतꣳ संदꣳशं खारीꣳ शिक्यं कृष्णाजिनमित्यथैतत्समादायाभ्यैत्यभीमां महिना दिवं मित्रो बभूव सप्रथाः। उत श्रवसा पृथिवीम्॥ मित्रस्य चर्षणीधृतः श्रवो देवस्य सानसिम्। द्युम्नं चित्रश्रवस्तममित्यथ धृष्टिमादाय मुख्याया उखाया अङ्गारानुद्वपति देवस्त्वा सवितोद्वपतु सुपाणिः स्वङ्गुरिः। सुबाहुरुत शक्त्येत्यथैनामुच्छ्रयत्युत्तिष्ठ बृहती भवोर्ध्वा तिष्ठ ध्रुवा त्वमित्यथैनामाग्नेये प्रतिष्ठापयत्यपद्यमाना पृथिव्याशा दिश आपृणेत्यथैनाꣳ संदꣳशेन परिगृह्य सते ऽवधाय छागापयसाच्छृणत्ति॥ ७॥

वसवस्त्वाच्छृन्दन्तु गायत्रेण छन्दसेति प्रतिपद्य विश्वे त्वा देवा वैश्वानरा आच्छृन्दन्त्वानुष्टुभेन छन्दसेत्यातो ऽन्तरतश्च बाह्यतश्च' स्वाच्छृणां कृत्वा गोपयसाभिविष्यन्दयत्येवमेव द्वितीयामाच्छृणत्त्येवं तृतीयां तूष्णीं पञ्च चर्षभाꣳस्तिस्रश्च मण्डलेष्टका' अथ यदि विधुर्वा प्रदरो वा जायते ऽश्मचूर्णानि छागापयसि संप्रकीर्य तैः प्रत्युष्योल्मुकेनाभितपति' सꣳ हैव रोहति' यद्यु वै सर्वश एव भिद्यत[1] एतान्येव[1] कपालान्य-

---

१ भिद्येत तान्येव Be; भिद्येतैतान्येव U Tr (but cp. Vol. I. 270, 14).

वाप्सनं पिष्ट्वा येषा स्वाप्रायश्चित्ताय परिशेते तया सꣳसृज्य हत्वा पक्वाच्छृत्य निदधाति तासां यदा क्षमय उपरमत्यथैनाः स्थाल्याꣳ समवधाय कृष्णाजिनेनोपरिष्टात्संप्रच्छाद्योत्तरे शालाखण्डे शिक्य आसजति ता आ कालात्परिशेरे ॥ ८ ॥ द्वितीयः ॥

अथैतस्मिन्नेव पूर्वपक्षे वायव्येन पशुना यजते तस्य तदुपकॢप्तं भवति यत्पशुना यक्ष्यमाणस्य संग्रामे हतयोरश्वस्य च वैश्यस्य च शिरसी दीक्षन्त ऋषभं पचन्ते दृषिं च वसां चाहरन्त्येतत्सर्पशिरो ऽथास्यैषा पूर्वेद्युरेव पाशुबन्धिकी वेदिर्विमिता भवति तां परिस्तीर्य सम्प्रयजुर्हरतीदमेव प्रसिद्धं पौरोडाशिकं चिर्यजुषा तूष्णीं चतुर्थं पूर्वं परिग्राहं परिगृह्णाति करणं जपत्युद्धन्त्युद्धतादाग्नीध्रमभिहरति यदाग्नीध्रमभिहरत्यथ चात्वालस्याहृता चात्वालं परिलिखत्युत्तरवेदेराहृतोत्तरवेदिं निवपत्युत्तरनाभिमुखस्याग्नेराहृताग्निं प्रणयत्यग्निवत्युत्तरं परिग्राहं परिगृह्य योयुपिला तिर्यञ्चꣳ स्फ्यꣳ कृत्वा संप्रैषमाह प्रोक्षणीरासादयेध्माबर्हिरुपसादय स्रुवꣳ[1] स्वधितिꣳ[1] स्रुचश्च संमृड्ढि तूष्णीं पृषदाज्यग्रहणीं पत्नीꣳ संनह्याज्येन च दध्ना चोदेहि प्रतिप्रस्थातः पशुशीर्षाणि विद्धीत्यध्वर्युरेव प्रसिद्धं पाशुबन्धिकं कर्म चेष्टत्यथ प्रतिप्रस्थाता याचत्येकविꣳशतिं

---

१ Some of the MSS. ins. च after स्रुवं and after स्वधितिं, some only after स्रुवं; M om. स्वधितिं and has स्रुवं स्रुचश्च; cp. Vol I. 112, 7.

माषान्पर्णशाखां मृत्पिण्डमुदपात्रमुल्कुषीँ[1] सप्तधा विहृतां वल्मीकवपाँ संदंशमित्येतत्समादाय पञ्चशीर्षाण्यभ्येति । दक्षिणत एतत्पुरुषशिर उपशेते ऽथेतराण्यथ प्राचीनावीतं कृत्वा सप्तभिर्माषैः पुरुषशिरः परिकीर्य चिरपतलैः पर्णशाखया परिकर्षति ॥ ९ ॥

अहरहर्नयमानो गामश्वं पुरुषं जगत् । वैवस्वतो न तृप्यति पञ्चभिर्मानवैर्यम इत्यपरैः सप्तभिः परिकीर्यैव परिकर्षति वैवस्वते विविच्यन्ते यमे राजनि ते जनाः । ये चेह सत्येनेच्छन्ते य उ चानृतवादिन इत्यपरैः सप्तभिः परिकीर्यैव परिकर्षति ते राजन्निह विविच्यन्ते ऽथा यन्ति त्वामुप । देवाँश्च ये नमस्यन्ति ब्राह्मणाँश्चापचित्यतीत्यथादत्ते दक्षिणेन वल्मीकवपाँ सव्येन संदंशेन पुरुषशिरः । प्राणैः प्राणान्संनिधायाग्रये वल्मीकवपां निदधात्यथैतत्पुरुषशिरो ऽभ्युक्ष्योत्लुप्य[2] प्रक्षाल्य मृदाभिलिम्पत्यनभिलिम्पन्प्राणानथेतराणि चये-

---

१ Thus (उल्कुषीँ or °षीं) Tr Bo H Bu U Bhav. (MS. Burnell), Ms and Msc (both the Burnell MS. and the MS. of Tübingen); उल्कर्षीं Bhav. (Cidambara MS.); उल्कर्षिं B; M उल्कुषीं or उल्कुषीं। According to the Bhāsya it is: सुमंवसा कृषीवल्का; Msc.: उल्का कृषैः समावसा दीर्घाकारोल्कुषी भवेदिति गोपालः।

२ Thus U (pr. m.) Bhav.; अभ्युक्ष्योल्लुप्य Tr; अभ्युल्लुप्य Bo U (sec. m); अभ्युल्लुप्य B Ms; अभ्युप्य only M; Bu is corr. and in H this whole chapter is missing.

शैव निक्षिपन्त्यभ्युत्कुष्यैव[1] प्रक्षाल्य मृदाभिलिम्पन्त्यनभिलिम्पन्तः प्राणानथैनान्यद्भिः प्रोक्षणतो[2] निदधाति । तान्या कालात्परिशेरे[3] । ॥ १० ॥

अथ पशोः सामिधेनीकल्पः । प्र वो वाजा अभिद्यव इत्येकादश । समाम्नाय ऋतवो वर्धयन्त्विति दश । तासां ज्योतिष्मतीमपोद्धृत्य नव धाय्यालोके दधात्यथ पृथुपाजवत्यौ धाय्ये दधात्यथ युक्ष्वा हि देवहूतमानित्येतां दधाति । ताः पराचीरनूच्यमानाश्चतुर्विꣳशतिः संपद्यन्ते । ज्योतिष्मतीं त्वेवोत्तमामन्वाहाथ हिरण्यगर्भः समवर्तताग्र इत्याघारमाघारयत्यथात आप्रीणामेव सौमाꣳसीर्ध्वा अस्य समिधो भवन्तीति द्वादश । तासां तानूनपातीमपोद्धृत्य नाराशꣳसीं वसिष्ठानां[4] दधात्यपो-

---

1 Thus only BU (sec. m.); Ms again अभ्युत्कुष्यैव ; thus also Bu with var. r: अभ्युत्कुष्यैव ; अभ्युक्ष्यैव M Tr. ; Bhav.: चैव संधापयति तापयित्वा प्रक्षाल्य मृदाभिलिम्पति ; as Bhav. has explained उत्कुष्य, supra p. 9, l. 14, by प्रताप्य रोमाणि दग्ध्वा perhaps here simply उत्कुष्यैव without अभि is to be read.

2 Thus M only in accordance with Bhav. (अद्भिः प्रोक्षणतः पशोः प्रोक्षणेन यद् यथा प्रोक्ष्यते तथा निदधाति) ; प्रोक्षन्दक्षिणतो Ms. and Msc. (but the commentary runs : अद्भिः प्रोक्षणाय दक्षिणतो निदधाति। पशुप्रोक्षणेन यथा प्रोक्षितानि भवन्ति तथा दक्षिणतः पशोर्निदधातीति यावत्) ; प्रोक्ष्यन्दक्षिणतो U ; प्रोक्ष्य दक्षिणतो Bu Tr B Be ; H om. the whole chapter.

3 The last sentence is omitted by M Tr U ; is it commented upon by Bhav. and Ms.

4 वासिष्ठानां some of the MSS.

हृत्य नाराशꣳसीं तानूनपातीमन्येषां गोत्राणामथ पीवो ऽन्नाꣳ राये ऽनु यमिति वपायै यः प्राणतो य आत्मदा इति पशुपुरोडाशस्य प्र वायुमच्छा नो नियुद्भिरिति हविष । इति[1] नु यदि मिश्रो भवति । यद्यु वै सर्ववायव्य[2] एव भवति पीवो ऽन्नाꣳ राये ऽनु यमित्येतासां द्वे वपायै द्वे पशुपुरोडाशस्य द्वे हविषो । ऽथ यदि सर्वप्राजापत्य[3] एव भवति यः प्राणतो य आत्मदा इत्येतासां द्वे वपायै द्वे पशुपुरोडाशस्य[4] द्वे हविषः । सर्वसꣳस्थां पशोः कुर्वन्त्यथैतानि पशुशीर्षाण्यभिपर्यग्निकृतान्युत्तरे शालाखण्ड शिक्येष्वासजत्यथैतत्सर्पशिर स्पन्द्यया विग्रथ्य शिक्यपाशे प्रबध्नाति । तान्या कालात्परिशेरे । ॥ ११ ॥ तृतीयः ॥

अथापरपक्षः प्रतिधीयते । स उपकल्पयत इष्टकाश्चाग्निदक्षिणाश्च [5]यदि रात्रिसत्रं चेष्यमाणो भवति । यद्यु वै संवत्सरसत्रं दीर्घो ऽध्वाजिरिति नाद्रियेत । स उपकल्पयत औदुम्बरीमुष्यासन्दीं तस्याः प्रादेशमात्राः पादा भवन्त्यरत्निमात्राणि शीर्षाण्यनूच्यानि सा मौञ्जीभी रज्जुभिर्व्यूता भव-

---

१ om. B Be U Ms.

२ Thus M, all the other MSS. सर्वो वा॰, but cp. xvi. 11 and 19.

३ Thus again only M ; सर्वः प्रा॰ the other MSS.

४ पशु॰ fails in some of the MSS.

५ All the MSS. exc. B and Ms insert अथ before यदि ; but the clause यदि रात्रिसत्रं चे॰ भ॰ seems to be the protasis of the foregoing स उपक॰ इष्ट॰ ; Msc. : ॰ग्निदक्षिणाश्चोपकल्पयत इति पूर्वेणान्वयः ।

त्येकसराभिः फलकाभिस्तीर्णा मृदावलिप्ता[1] षडुद्यामं द्वादशो-
द्यामं वा मौञ्जꣳ शिक्यं मुञ्जकुलायं क्रुमुकमाज्यसंयुतं वैक-
ङ्कतीं च शमीमयीं च समिधौ सप्तौदुम्बरीः समिधस्तिस्रो
नानावृक्ष्या एकविꣳशतिनिर्बाधꣳ रुक्मं। प्रज्ञाता आग्निष्टो-
मिकाः संभारा। जुष्टे देवयजने शाला कारिता भवत्यथैनं
तीर्थादानीय पवयित्वा विहविषमग्निदीक्षणीयामिष्टिं निर्वप-
त्याग्नावैष्णवमेकादशकपालमदित्यै घृते चरुं वैश्वानरं द्वादश-
कपालमिति। तस्यै तावन्त्युत्सीदन्ति यावन्ति दीक्षणीयाया।
अथाध्वर्युः प्रदक्षिणमावृत्य प्रत्यङ्ङुद्रुत्य पत्नीः संयाज्य प्राङेत्य
ध्रुवामाप्याय्याज्यस्थाल्यां प्रत्यवनीयाज्यस्थाल्याः स्रुवेणोपघात-
मग्निदीक्षाहुतीर्जुहोति ॥ १२ ॥

आकूतिमग्निं प्रयुजꣳ स्वाहा मनो मेधामग्निं प्रयुजꣳ
स्वाहा चित्तं विज्ञानमग्निं प्रयुजꣳ स्वाहा वाचो विधृतिमग्निं
प्रयुजꣳ स्वाहा प्रजापतये मनवे स्वाहाग्नये वैश्वानराय स्वाहे-
त्यथ स्रुचि चतुर्गृहीतं गृहीत्वाज्यस्य पूर्णाꣳ स्रुचमौद्ग्रहणं[2]
जुहोति विश्वे देवस्य नेतुर्मर्तो वृणीत सख्यं विश्वे राय इषु-
ध्यसि द्युम्नं वृणीत पुष्यसे स्वाहेत्यथैतत्पूर्णपात्रमन्तर्वेदि निनय-
त्यथाग्रेणाहवनीयं पर्याहृत्य यजमानाय प्रयच्छत्यथ सुख्या-

---

1 Thus MH Bhav.; मृदाभिलि॰ B Be U Ms. Msc.

2 Thus M Tr Be Bu U Ms; the other MSS. चोद्गृह॰ ; but cp. TS. vi. 1.2.4.

उखां याचति ' तस्याꣳ शकृत्पिण्डान्पूतितृणानीति संप्रकीर्याज्यस्रुवं प्रत्यस्याहवनीयस्यान्तमेष्वङ्गारेषु प्रवृणक्ति मा सु भित्था दृꣳहस्वेति द्वाभ्यामथैनां परिददाति मित्रैतामुखां तपैषा मा भेद्येतां ते परिददाम्यभित्त्या इत्यथ वै भवति यदि भिद्येत तैरेव कपालैः सꣳसृजेदिति ' सा यदि भिद्यत[1] एतान्येव[1] कपालान्यवाञ्जनं पिष्ट्वा येषा मृत्प्रायश्चित्ताय परिश्रिते तया सꣳसृज्य कृत्वा पक्त्वाच्छृद्य निदधात्यथान्यां प्रवृणक्त्यथ वै भवत्यम्बरीषादन्नकामस्यावदध्यादित्यथ वै भवति यं कामयेत यजमानं भ्रातृव्यमस्मै जनयेयमित्यन्यतस्तस्याहृत्यावदध्यादित्यथ वै भवति यो गतश्रीः स्यान्मथित्वा तस्यावदध्यादित्यथ वै भवति यो भूतिकामः स्याद्य उखायै संभवेत्स एव तस्य स्यादिति ' स य एवैष उखायै संतापाज्जायते तस्मिन्मुञ्जकुलायमवदधाति या ते अग्न ओजस्विनी तनूरोषधीषु प्रविष्टा तां त एतेनावयजे स्वाहेत्यथ क्रुमुकमाज्यसंयुतमवदधाति द्रुन्नः सर्पिरासुतिरित्यथ वैकङ्कतीं च शमीमयीं च समिधावादधाति परस्या अधि संवत इति वैकङ्कतीं परमस्याः परावत इति शमीमयीमथ सीद त्वं मातुरस्या उपस्थ इति तिसृभिर्जातमुपतिष्ठते ' ऽथ पञ्चौदुम्बरीः समिध आदधाति ॥ १३ ॥

---

१ भिद्येतैतान्येव U Be Ms, the others (exc. B which is corrupt and Bu, which is incomplete): भिद्यत एतान्येव; cp. supra p. 7, 20.

यदग्ने यानि कानि च यदत्त्युपजिह्विका रात्रिꣳरात्रिमप्रयावं नाभा पृथिव्या याः सेना अभीत्वरीरित्यथैनं पञ्चर्चेन रक्षोघ्नेनोपतिष्ठते कृणुष्व पाजः प्रसितिं न पृथ्वीमित्यथ तिस्रो नानावृक्ष्याः समिधोऽभ्यादधाति दꣳष्ट्राभ्यां मलिम्लूनित्याश्वत्थीं ये जनेषु मलिम्लव इति वैकङ्कतीं यो अस्मभ्यमरातीयादिति शमीमयीमथ सꣳशितं मे ब्रह्मोदेषां बाहू अतिरमित्युत्तमे औदुम्बरीं वाचयन्नेवाभ्यादधात्यथ कृष्णाजिने यजमानं वाचयति ' मुष्टी चैव न करोति वाचं च न यच्छत्यथैतामासन्दीं व्यस्तशिक्यपाशां जघनेनाहवनीयं निदधाति ' तस्यामिण्वाभ्यां परिगृह्योख्यमासादयति ॥ १४ ॥

मातेव पुत्रं पृथिवी पुरीष्यमग्निꣳ स्वे योनौ विभर्तूखा । तां विश्वैर्देवैर्ऋतुभिः संविदानः प्रजापतिर्विश्वकर्मा युनक्त्वित्यथासीन उत्तरनिर्बाधꣳ रुक्मं प्रतिमुञ्चते दृशानो रुक्म इत्यथ शिक्यपाशं प्रतिमुञ्चते विश्वा रूपाणि प्रतिमुञ्चते कविर्नक्तोषासेति द्वाभ्यां ' तूष्णीं कृष्णाजिनमुत्तरमथैनमवेक्षते सुपर्णोऽसि गरुत्मान्त्रिवृत्ते शिरो गायत्रं चक्षु स्तोम आत्मा साम ते तनूर्वामदेव्यं बृहद्रथन्तरे पक्षौ यज्ञायज्ञियं[1] पुच्छं छन्दाꣳस्यङ्गानि धिष्णियाः शफा यजूꣳषि नामेत्यथैनमुद्गृह्णाति सुपर्णोऽसि गरुत्मान्दिवं गच्छ सुवः पतेति ' पुरस्तादेवास्यैते

१ यज्ञायज्ञीयं Tr H ; M abbreviates.

दीर्घाः शिक्यपाशाः[1] कारिता भवन्ति । सो[2] ऽत्र[2] वैव[2] सति[2] क्रमते ऽपि वैनमुपोद्यच्छते ॥ १५ ॥

विष्णोः क्रमो ऽस्यभिमातिहा गायत्रं छन्द आरोह पृथिवीमनुविक्रमस्व निर्भक्तः स यं द्विष्म इति चतुर्भिरनुच्छन्दसं । तृतीये चतुर्थमनुवर्तयति । न चतुर्थाय प्रक्रामति । नाहवनीयमुपात्येत्यथाक्रन्ददित्येतामन्वाहाय दक्षिणमꣳसमभि पर्यावर्तते ऽग्ने ऽभ्यावर्तिन्नग्ने अङ्गिरः पुनरूर्जा सह रय्येति चतसृभिरथोदङ् पर्यावृत्य कृष्णाजिनमुन्मुच्य शिक्यपाशमुन्मुञ्चत उदुत्तमं वरुण पाशमस्मदित्यथैनमाहरत्या त्वाहार्षमग्ने बृहन्नुषसामूर्ध्वो अस्थादिति द्वाभ्यामथ यं कामयेत राजन्यꣳ राष्ट्रꣳ स्यादिति तं मनसा ध्यायेद्राष्ट्रमेव भवतीति ब्राह्मणमथैनं यथाहृतं प्रतिपर्याहृत्यान्तर्वेद्यासादयति सीद त्वं मातुरस्या उपस्थ इति चतसृभिः सहꣳसाभिरथ मुष्टी च करोति वाचं च यच्छत्यथास्मै व्रतं प्रदास्यन्वाचस्पतीयाꣳ समिधमभ्यादधाति वा जपति वाचस्पते ऽन्नस्य नो देहीत्यथोख्यमुपसमिन्द्धे येन देवा ज्योतिषोर्ध्वा उदायन्निति । स यावत्कालो ऽस्मै व्रतं प्रदास्यन्भवत्येवमेवाचस्पतीयाꣳ समिधमभ्यादधाति वा जपति वैवमुख्यमुपसमिन्द्धे । ऽथ प्रातरुदित

---

१ Thus M Tr Be BHU (sec. m.); °पाशः Ms. U (pr. m.) Bhav.

२ Thus M (only सतीं) Be BHU Bu Ms. Bhav. (one MS.); सोऽत्रैव-वसति Tr Bhav. (another MS.) Keś.; according to Msc. the words are: सो ऽत्र वा एव सति (sc. उख्ये)।

आदित्ये विसृष्टायां वाचि वात्सप्रेणोपतिष्ठते दिवस्परि प्रथमं जज्ञे अग्निरित्येतेनैकादशर्चेन । स एवमेव पूर्वेद्युः प्रक्रामत्युत्तरेद्युरुपतिष्ठते । ऽयास्योपवसथीये ऽहन्वात्सप्रꣳ संपद्यते । ॥ १६ ॥ चतुर्थः ॥

अथातः प्रयाणस्यैव मीमाꣳसा । दीक्षितं वायोगक्षेमो विन्दत्यन्यत्र वा देवयजनाद्दीक्षते सꣳसृजन्ति व्रते । संवध्नन्ति व्रतदुघयोर्वत्सावादधति यदाधेयं भवति नीडे गार्हपत्यं प्रउग आहवनीयमित्यथोख्यमुपच्छत[1] उदु त्वा विश्वे देवा इत्यथैनमनसः प्रउग आसादयति सीद त्वं मातुरस्या उपस्थ इति चतसृभिः सदꣳसाभिरथैतानामन्दीपादान्फलकेषु यथासुप्तु विनिवध्नन्ति । मध्यमे वꣳशे शिक्यपाशं प्रपश्नन्त्यपि वारण्योरग्नीन्समारोह्य प्रयाति भद्रादभि श्रेयः प्रेहि प्रेदग्ने ज्योतिष्मान्याहीति द्वाभ्यामथ यत्र उत्सर्जत्यक्रन्ददित्येतामन्वाहाथावसिते घृतानुषिक्ताꣳ समिधमभ्यादधाति समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम् । आस्मिन्हव्या जुहोतन स्वाहेति गायत्र्या ब्राह्मणस्य प्रप्रायामग्निर्भरतस्य शृण्व इति त्रिष्टुभा राजन्यस्य । स यावत्कृत्वः प्रयास्यन्भवत्येवमेवैतत्सर्वं करोति । ॥ १७ ॥

अथातो भक्षन एवातिदृष्टस्य मीमाꣳसा । भक्ष चेदतिवर्धेते स उपकल्पयते सतमथोदर्वीꣳ संदꣳशमित्यथैतत्समादाय

---

१ After आहवनीयम् M Tr H Bu om. इति; Msc.: दक्षिणतो दक्षिणाग्निं स्थापयतीति इतिशब्द सूचयति; in the collateral passage (Vol. I, p. 165, 11) however, no इति is found.

यत्रापस्तद्यन्ति सोख्या । अथैतमग्निꣳ संदꣳशेन परिगृह्य सते ऽवधायायोद्‌र्व्यासु भस्म प्रवेशयत्यापो देवीः प्रतिगृह्णीत भस्मैतदप्स्वग्ने सधिष्टव गर्भो अस्योषधीनामिति तिसृभिरनुच्छन्दसमथैनं ज्योतिष्मतीभ्यां प्रत्यवदधाति प्रसद्य भस्मना योनिं पुनरासद्य सदनमपश्चेति द्वाभ्यामथ पुनरूर्जा सह रय्येति द्वाभ्यां पुनरुदैत्ययोख्यमुपसमिन्द्धे[1] पुनस्त्वादित्या रुद्रा वसवः समिन्धतामित्यथैनं यथाहृतं प्रतिपर्याहृत्य यजमानायतने तिष्ठन्नुपतिष्ठते बोधा स बोधीत्यान्तादनुवाकस्य । स यावत्त्वो भस्मातिवर्धेत एवमेवैतत्सर्वं करोत्यथातः कालायैवोपशेते संभारेभ्यः । ॥ १८ ॥ पञ्चमः ॥

अथातः क्रयस्यैवोपवसथः पर्याप्लवते । स उपकल्पयते पञ्चशतमिष्टका अपरिमिता अपस्या नैर्ऋतीः कृष्णास्तिस्रस्तुषपक्वा भस्म पुरीषमूषान्सिकता इत्यथोपवसथीये ऽहन्देवयजनमध्यवस्यत्येदमगन्मापेतेति द्वाभ्यामथ महावेदिं विमिमीत एतानेव ज्यायसः प्रक्रमान्प्रक्रम्याक्ष्णया मानेन प्रमाय समन्तꣳ स्पन्द्यया परितनोति । पृष्ट्यामातनोत्यथैतमग्निं प्रत्यञ्चं यूपावटीयाच्छङ्कोर्विमिमीते पुरुषमात्रेण वेणुना[2] समपक्षपुच्छमरत्निना[2] पक्षौ द्राघीयाꣳसौ भवतः । षड्विधं वा सप्तविधं वा द्वादशविधं वा यावद्विधं वा चेष्यमाणो भवत्यथैनमक्ष्णया

---

१ उदैति only MH, cp. TS. v. 2.2.5; उदेति all the other MSS. —

२ वेणुनासपक्ष० and अरत्निना वा M.

मानेन प्रमाय समन्तꣳ स्फ्यया परितनोत्यनुस्फ्यं लेखां लिखत्यपोद्धृत्य स्फ्यां कर्षूः खानयन्त्युच्छ्रयन्त्यपरस्या । दक्षिणतस्य पश्चाच्च वर्षीयसीः कुर्वन्त्येतावदेवैतदहः कर्म क्रियते । वसन्त्येताꣳ रात्रिमथाध्वर्युरपररात्र आद्रुत्य सꣳप्राक्षि विस्तनव्रतं दोहयतेत्यथैतमग्निꣳ सते समुप्य दक्षिणतो ज्वलयन्त आसते । ऽथैतदग्न्यायतनꣳ मृत्पिण्डेन परिलेपयति । तस्मिꣳस्तस्तः प्राचीरिष्टका आयातयति द्वे पुरस्तात्समीची द्वे पश्चात्समीची । अथैनं प्रदक्षिणं त्रयोदशभिरिष्टकाभिः परिचिनोत्यन्विष्टकं लेखां लिखत्यपोद्धृत्येष्टकाः कर्षूः खानयन्त्युच्छ्रयन्त्यपरस्या । दक्षिणतस्य पश्चाच्च वर्षीयसीः कुर्वन्ति ॥ १९ ॥

अथ द्वाभ्यामात्मन्यग्निं[1] गृह्णीते मयि गृह्णाम्यग्रे अग्निं यो नो अग्निरिति । स्वयंचितिं जपति यास्ते अग्ने समिधो यानि धामेति । श्वेतमश्वमभिमृश्यान्तःशर्करमिमामुपदधाति प्रजापतिस्त्वा सादयतु तया देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यथ संभारान्निवपत्यग्नेर्भस्मासीति भस्माग्नेः पुरीषमसीति पुरीषꣳ संज्ञानमसि कामधरणमित्यूषान्मयि ते कामधरणं भूयादिति सिकता । अथैनान्संप्रयौति सं या वः प्रियास्तनुवः सं प्रिया हृदयानि वः। आत्मा वो अस्तु संप्रियः संप्रियास्तनुवो ममेत्यथैनान्कल्पयति कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधीः। कल्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रता इत्यथोर्ध्वचित उप-

---

1 Thus MB Be U Tr, Bhav.; आत्मन्नग्निं H.

दधाति चित स्थ परिचित ऊर्ध्वचितः श्रयध्वं तया देवतयाङ्गिरस्वद्ध्रुवाः सीदतेत्यथानुव्यूहत्याप्यायस्वेति गायत्र्या ब्राह्मणस्य सं ते पयाꣳसीति त्रिष्टुभा राजन्यस्य ' यथासुष्ठु यथाशर्करमनुव्यूहति ' तस्मिꣳश्चतस्रः प्राचीर्याजुषीरुपदधाति ॥ २० ॥

अयꣳ सो अग्निरग्ने दिवो अर्णमच्छा जिगास्यग्ने यत्ते दिवि वर्चः पृथिव्यां पुरीष्यासो अग्नय इति ' द्वे पुरस्तात्समीची इडामग्न इति दक्षिणामयं ते योनिर्ऋत्विय इत्युत्तरां ' द्वे पश्चात्समीची चिदसीति दक्षिणां परिचिदसीत्युत्तरामथैनं प्रदक्षिणं त्रयोदशभिर्लोकंपृणाभिः परिचिनोति लोकं पृण छिद्रं पृणाथो सीद शिवा त्वम् । इन्द्राग्नी त्वा बृहस्पतिरस्मिन्योनावसीषदन्निति ' तयादेवतं करोति तया देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यथ सूददोहसं करोति ता अस्य सूददोहसः सोमꣳ श्रीणन्ति पृश्नयः । जन्मन्देवानां विशस्त्रिष्वा रोचने दिव इत्यथावद्रुत्य कृष्णमश्वमभिमृश्य तनुपुरीषमुपदधाति पृष्टो दिवीति ' तयादेवतं कृत्वा सूददोहसं करोतीति न्वा इयं प्रथमा चितिर्निष्ठीयत ' एवमेव द्वितीया निष्ठीयत एवं तृतीयैवं चतुर्थ्येवं पञ्चमी ' तान्यदि[1] चेष्यत आदित्यो ऽभ्युदियादाचंयमो ऽध्वर्युँ यजमानो ऽन्वारभत ' उख्यमेवाध्वर्युरादत्ते प्रतिषमेधनीयं प्रतिप्रस्थाता ' तौ पुरस्तात्प्रत्यञ्चौ समितमिति चतसृभिः संनिवपतो ' ऽथ शिक्यादुखां निरूहति ॥ २१ ॥

---

१ Thus (तान्) M Tr. H Bhav. (तानध्वर्युँब्रह्मयजमानान् according to Bhav.); ता यदि B Be Bu U Ms (ताः पञ्च चितीः according to Msc.).

मातेव पुत्रं पृथिवी पुरीष्यमग्निं स्वे योनावभारुखा । तां विश्वैर्देवैर्ऋतुभिः संविदानः प्रजापतिर्विश्वकर्मा विमुञ्चत्विति । तां नावेक्षेतेत्याहुः शुक्त्वेव हि भवतीति । तस्मान्मन्यथावेक्षमाणो[1] दधिद्रप्सान्प्रास्यत्यसुं[2] ते शुचि दधामीति वा तूष्णीं वांऽथैनां सिकताभिः पूरयित्वा दर्भोपरिष्टात्संप्रच्छाद्योत्तरे शालाखण्डे निदधात्येवमेव द्वितीयां पूरयत्येवं तृतीयां । ता आ कालात्परिशेरे । ऽथ वैश्वानर्या शिक्यमादत्ते यदस्य पारे रजसः शुक्रं ज्योतिरजायत । तन्नः पर्षदति द्विष इत्यथ याचति नैर्ऋतीः कृष्णास्तिस्रस्तुषपक्वा आसन्दीं[3] रुक्मस्य प्रबन्धनमुदपात्रमित्येतत्समादाय दक्षिणया द्वारोपनिष्क्रम्य तां दिशं यन्ति यत्रास्य स्वकृतमिरिणं स्पष्टं भवति प्रदरो वा । तदेनत्पराचीनपाशं शिक्यं न्यस्यत्यग्ने[4] वैश्वानर स्वाहेति । शिक्यपाशमनु पराचीनैर्ऋतीरुपदधाति नमः सु ते निर्ऋते विश्वरूपे यत्ते देवी निर्ऋतिराबबन्ध यस्यास्ते अस्याः क्रूर आसञ्जुहोमीत्युपास्यत्यासन्दीं रुक्मस्य प्रबन्धनमथोपतिष्ठते ऽसुन्वन्तमयजमानमिच्छ देवीमहं निर्ऋतिं वन्दमान इति द्वाभ्यामथापो व्यतिषिच्य पराच्य पात्रमनवेक्षमाणा

१ अन्यथैवावेक्ष° Bhav.; अन्यथेवेक्ष° Tr.

२ °द्रप्सान् U (sec. m.) Ms, Dvaidha and probably also M; द्रप्सं Be H Tr U (pr. m.). Bhav., Keś.

३ M ins., perhaps rightly: शिक्यं।

४ Thus Tr Bu U (sec. m.) Ms Bhav.; निरस्यति MHB Be U (pr. m.)

ध्यायन्ति। हस्तपादान्प्रक्षाल्यैतेनैव यथेतमेत्य गार्हपत्यमुपतिष्ठन्ते निवेशनः संगमनो वसूनामित्याहवनीयमु हैक उपतिष्ठन्तेऽयमितोऽधि गार्हपत्यो भविष्यतीति। ॥ २२ ॥ षष्ठः ॥

अथ प्रायणीयेन चरति। प्रायणीयेन चरित्वा पदेन चरति। पदेन चरित्वा राजानं क्रीत्वोह्यातिथ्यं निर्वपत्यातिथ्येन प्रचर्य प्रथमाभ्यां प्रवर्ग्योपसद्भ्यां प्रचरत्यथोपनिष्क्रम्य[1] संप्रैषमाह सुब्रह्मण्य सुब्रह्मण्यामाह्वय चिस्तनव्रतं प्रयच्छतेत्याह्वयति सुब्रह्मण्यः सुब्रह्मण्यां। चिस्तनव्रतं प्रयच्छति[1]। स पुच्छादेवाग्रे चतुरः प्रतीचः प्रक्रमान्प्रक्रामति दक्षिणा पञ्चमं। तत्स्फ्यं निदधाति। स उपरवाणां कालो। ऽथ महावेद्या उत्तरादंसीयाच्छङ्कोर्वेद्यन्तेन द्वादश प्रतीचः प्रक्रमान्प्रक्रामत्युदञ्चं त्रयोदशं। तदाग्नीध्र उपसीदति। स उत्करस्य कालो। ऽथोपरवाणां कालात्सम्यजुर्हरतीदमेव प्रसिद्धं पौरोडाशिकं त्रियजुषा तूष्णीं चतुर्थं। पूर्वं परियाहं परिगृह्णाति। करणं जपत्युद्धन्त्युद्धतादाग्नीध्रस्त्रिर्हरति। यदाग्नीध्रस्त्रिर्हरत्यथाग्रेण शालां तिष्ठन्संप्रैषमाह वेदिकारा वेदिं कल्पयतेति। यथासंप्रैषं ते कुर्वन्त्यथ कार्ष्णाजिनीरुपानह उपमुञ्चन्ते चिते त्वेत्यध्वर्युराचिते त्वेति प्रतिप्रस्थाता मनश्चिते त्वेति ब्रह्मा तपश्चिते त्वेति यजमानश्चिते त्वा चिते त्वेत्येव वा सर्वे। ऽपि वा तूष्णीमेवाथ याचति धनुर्बाणवच्चतुरोऽश्मन ऐन्द्रीमिष्टकां विभक्तिमुदपात्रं दर्भस्तम्बं दूर्वामाज्यस्थालीं मसुवामित्येत-

१ The clause अथोपनिष्क्रम्य...प्रयच्छति is not found in M Tr H.

तमादायोत्तरे श्रोण्यन्ते सꣳसादयन्त्यथ[1] द्वाभ्यामात्मन्यग्निं[2] गृह्णीते मयि गृह्णाम्यग्रे अग्निं यो नो अग्निरिति। स्वयंचितिं जपति यास्ते अग्ने समिधो यानि धामेति। श्वेतमश्वमभिमृश्यान्तःशर्करमिमामुपदधाति प्रजापतिस्त्वा सादयतु तया देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यथादत्ते धनुर्बाणवच्चतुरो ऽश्मन इत्येतत्समादाय जघनेन दक्षिणेनाग्निं परीत्याग्रेण यूपावटीयꣳ शङ्कुं तिष्ठन्ननुरधिज्यं कृत्वायत्यान्तःशर्करमिषुं निहन्ति ॥ २३ ॥

इन्द्रस्य वज्रो ऽसि वार्त्रघ्नस्तनूपा नः प्रतिस्पश इत्याहत्याश्मानमुपदधाति यो नः पुरस्ताद्घायुरभिदासत्येतꣳ सो ऽश्मानमृच्छत्वित्यथ दक्षिणस्य पक्षस्य दक्षिणे पक्षोपप्लव[3] आयत्यान्तःशर्करमिषुं निहन्त्याहत्याश्मानमुपदधाति[4] यो नो दक्षिणत इत्यथ पुच्छस्यापरे पुच्छोपप्लव[3] आयत्यान्तःशर्करमिषुं निहन्त्याहत्याश्मानमुपदधाति यो नः पश्चादित्यथोत्तरस्य पक्षस्योत्तरे पक्षोपप्लव[3] आयत्यान्तःशर्करमिषुं निहन्त्याहत्याश्मानमुप-

---

१ Thus (plural) Tr U Be B Ms (sc. परिकर्मिणः according to Msc); ०सादयत्यथ MH.

२ Thus M Tr Be Ms; आत्मन्न० H; आत्मंन० B.

३ Instead of उपप्लव (cf. S'ulba-sūtra 6, where, however, the var. r. उपप्लव and उपप्लुव, cp. Lāṭy. I. 5,7, Drāhy. II. 1,10, are found) the MSS. have mostly उपप्लय or उपप्लव।

४ Here Bu breaks off; here and infra M Tr U (pr. m.) every time निहत्याहत्या०।

दधाति यो न उत्तरत इति ' द्विरूपदधातीति ब्राह्मणं ' तथादैवतं कृत्वा सूददोहसः[1] करोत्यथैतामैन्द्रीमिष्टकामाक्रमणं प्रत्युपदधाति स इं पाहि य ऋजीषी तरुत्रो यः शिप्रवान्वृषभो यो मतीनाम्। यो गोत्रभिद्वज्रभृद्यो हरिष्ठाः स इन्द्र चित्राꣳ अभितृन्धि वाजानिति ' तथादैवतं कृत्वा सूददोहसं करोत्यथ[2] दक्षिणतो विभक्तिमुपदधात्यग्न आयाहि वीतय इति ' तथादैवतं कृत्वा सूददोहसं करोत्यथाधिद्रुत्य[2] स्वयमातृण्णायꣳ शङ्कुमुदुह्योदपात्रमुपनिनीय दर्भस्तम्बमुपदधाति वात्वा समुद्र उपदधात्विति वा तूष्णीं वाथैनꣳ स्रुवाहुतिभिरभिजुहोति सजूरब्दो ऽयावभिरिति पञ्चभिरथ दूर्वामुपदधात्यायने ते परायणे दूर्वा रोहन्तु पुष्पिणीः। उत्सो वा तत्र जायातै ह्रदो वा पुण्डरीकवानिति[3] ' तथादैवतं कृत्वा सूददोहसौ करोत्यथास्यैतत्पुरस्तादेवौदुम्बरं युगलाङ्गलं कारितं भवति ॥ २४ ॥

[4]षड्गवं वा द्वादशगवं वा ' तस्य वरत्राः संस्पृशति सं वरत्रा दधातन निष्कृताहावमवटमिति द्वाभ्यां ' युनक्ति सीरा

---

१ ०दोहसं M Tr H.

२ Thus B Bhav. Ms.; the passage अथ दक्षिणतो…करोति (l. 7) is inserted by M Tr BHU infra l. 13 after ०दोहसौ करोति; but cp. the order, in which supra p. 21, 20 the substances are enumerated.

३ cp. Ath. V. vi. 106. 1.

४ cp. Pitṛmedhasūtra p. 22, 5 sqq.

युञ्जन्ति कवयो युगा युनक्त सीरेति द्वाभ्यां। कृषति लाङ्गलं पवीरवत् शुनं नः फाला इति द्वाभ्याम्। सीतां प्रत्यवेक्षते कामं कामदुघे धुक्ष्व इतेन सीतेति द्वाभ्याम्। स पुच्छादेवाग्रे तिस्रः प्राचीः सीताः कृषत्युत्तरायै श्रोणेर्दक्षिणमंसमभि तिस्रो। दक्षिणायै श्रोणेरुत्तरमंसमभि[1] तिस्रो। दक्षिणात्पक्षादुत्तरं पक्षमभि तिस्रो। ऽथैतान्विमुच्य प्रदक्षिणमावर्त्याऽद्भिरभ्युक्ष्योदीच उत्सृजति[2]। त एते ऽध्वर्योर्भवन्ति यदि दक्षिणावता यजते। यद्यु वै सक्तियो[3] ऽग्निर्यथागवं व्युदचन्ति[4]। यत्रैवानड्वाहस्त्युगलाङ्गलमथास्यैतत्पुरस्तादेवौदुम्बरे द्रोणे सर्वौषधं दध्नाज्येन समुदायुतं भवति। स पुच्छादेवाग्रे तिस्रः प्राचीः सीता वपति या जाता ओषधय इति तिसृभिरनुच्छन्दसमुत्तरायै श्रोणेर्दक्षिणमंसमभि तिसृभिर्दक्षिणायै श्रोणेरुत्तरमंसमभि[5] तिसृभिर्दक्षिणात्पक्षादुत्तरं[6] पक्षमभि पञ्चभिश्चतुर्दशभिर्वपतीति ब्राह्मणमथ दिग्भ्यो लोष्टान्समस्यति। यो ऽत एव प्राङ् हुत्वा बहिःशर्करालोष्टमादत्ते। तमन्तःशर्करं न्यस्यति ॥ २५ ॥

१ Thus MT Ms; श्रोणेरोत्तर॰ all the other MSS.

२ Thus M Tr UHB Be Keś. (the MS. of the India Office has twice उत्सृजंति, both times corrected into singular); उत्सृजंति Msc; cp. TS. v. 2.5.3.

३ Thus (or सक्थियो) all exc. MB Keś., which have सक्थियो।

४ Thus B; व्यादचन्ति Ms; व्युदंचंति M Tr Be U (pr. m.); व्युदंचति U (sec. m.).

५ Thus M (pr. m.) and Ms; the other MSS. श्रोणेरोत्तर॰।

६ Thus Ms only; all the other MSS. पक्षादोत्तरं।

मा नो हिꣳसीज्जनिता यः पृथिव्या इत्यथ दक्षिणं पक्षमनुद्रुत्य बहिःशर्करांल्लोष्टमादत्ते। तमन्तःशर्करं न्यस्यत्यभ्यावर्तस्व पृथिवीत्यथ पुच्छमनुद्रुत्य बहिःशर्करांल्लोष्टमादत्ते। तमन्तःशर्करं न्यस्यत्यग्ने यत्ते शुक्रं यच्चन्द्रमित्यथोत्तरं पक्षमनुद्रुत्य बहिःशर्करांल्लोष्टावादत्त इषमूर्जमहमित आदद इति। तयोरन्यतरमन्तःशर्करं न्यस्यत्या नो गोषु विशत्वौषधीष्विति। तां दिशमितरं निरस्यति यस्यामस्य दिशि द्वेष्यो भवति जहामि सेदिमनिराममीवामित्याददान एवैतां दिशमभि संपादयेदित्येतदेकं। यजुषा[1] यजुर्विपरिहरेदित्येतदपरमथ महावेद्या उत्तरादꣳसीयाच्छङ्कोर्विहन्तेन त्रीन्प्रतीचः प्रक्रमान्प्रक्रामत्युदञ्चं चतुर्थं। तच्चात्वालस्याकृता चात्वालं परिलिखत्युत्तरवेदेराकृतोत्तरवेदिं निवपत्युत्तरनाभिमुत्खाय सिकता निवपत्यग्ने तव श्रवो वय इति षड्भिरनुष्टुप्छन्दसमथोर्ध्वचित उपदधाति चित स्थ परिचित ऊर्ध्वचितः श्रयध्वं तया देवतयाङ्गिरस्वद्ध्रुवाः सीदतेत्यथानुव्यूहत्याप्यायस्वेति गायत्र्या ब्राह्मणस्य सं ते पयाꣳसीति त्रिष्टुभा राजन्यस्य। यथासुष्ठु यथाशर्करमनुव्यूहति। ॥ २६ ॥ सप्तमः ॥

अथैतां महाचितिꣳ संसादयन्त्यग्रेण[2] शालामुख्याभ्यां वा

---

१ MB Be Tr U Ms ins. वा; H om. this word as also the Dvaidhasūtra.

२ संसादयत्य॰ H Tr Bhav.

चर्मणि वा द्वाविꣳशतिं[1] च[1] दर्भपुञ्जीलानि पयःप्रोक्षं चाज्यप्रोक्षं चाश्वं चौत्तरवेदिकाꣳश्च संभाराञ्छार्दूलत्वचयोदग्राश्च[2] कुम्भेष्टकास्तावत एव हिरण्यशल्कान्स्तं[3] चोदकुम्भं च पुष्करपर्णं च रुक्मं च हिरण्मयं च पुरुषं स्रुचौ च सर्पशिरश्च सर्वं च स्वयमातृण्णानिकोतं दश च स्वकृत्या इष्टकाश्च या उ चान्या उपधास्यन्भवति ता दधि च मधुमिश्रं कूर्मं चौदुम्बरं चोलूखलमुसलꣳ सर्वौषधं चोखाश्च पशुशीर्षाणि चेति । द्वाविꣳशतिं[4] दर्भपुञ्जीलानि पयःप्रोक्षे ऽवधाय तैः प्रोक्षत्यग्नीन्नो ऽग्निभ्यो जुष्टान्प्रोक्षामीति वा तूष्णीं वाग्निनाग्निः समिध्यत इत्याज्यप्रोक्षेणाथ संप्रैषमाहाग्निभ्यः प्रणीयमानेभ्यो ऽनुब्रूहीति । यदि होता न कामयते यजमान एव पुरीष्यासो अग्नय इत्येतामेकां चिरन्वाहाथाग्निप्रथमाः[5] प्रतिपद्यन्ते[6] । ऽथैतेनाश्वेन प्राचाधिद्रवति ॥ २७ ॥

अभ्यस्थाद्विश्वाः पृतना अरातीरित्यथ दक्षिणमꣳसमभ्यवक्राम्यन्तमनुमन्त्रयते यदक्रन्दः प्रथमं जायमान इत्युत्तरे

---

१ om. HM ; च only found in U (sec. m.) and Ms.

२ Thus TB Be U (sec. m); शार्दूलत्वं चचयो॰ HU (pr. m.); शार्दूलत्वचर्म चयो॰ M.

३ Thus (॰शल्का॰) M Tr. Be U Ms ; ॰शकला॰ Be. ; शल्का॰ HU (pr. m.).

४ Most of the MSS. ins. च ।

५ अथाश्वप्रथमाः MH.

६ प्रपद्यते H.

श्रोण्यन्ते सꣳसादयन्त्य'थ[1] द्वाभ्यामात्मन्नग्निं[2] गृह्णीते मयि गृह्णाम्यग्रे अग्निं यो नो अग्निरिति ' स्वयंचितिं जपति यास्ते अग्ने समिधो यानि धामेति ' श्वेतमश्वमभिमृश्याधिद्रवत्यपामिदं न्ययनं नमस्त इति द्वाभ्याम'थ पुच्छसन्धौ चात्मसन्धौ च सतं निदधात्य'थोदकुम्भं[3] पर्यस्यत्यादत्ते दक्षिणेन कुम्भꣳ सव्येन कुम्भीꣳ सतात्पूरयित्वा हिरण्यगर्भौ प्रत्यस्य या एता दक्षिणादꣳसात्स्वयमातृण्णामभ्याद्रवन्ति तासु विषुवत्यनुसीतमुपदधाति ॥ २८ ॥

हिरण्यवर्णाः शुचयः पावका यासाꣳ राजा वरुणो याति मध्य इति द्वाभ्यामेवमेव पूरयित्वैवं प्रत्यस्य या एता उत्तरायै श्रोणेः स्वयमातृण्णामभ्याद्रवन्ति तासु विषुवत्यनुसीतमुपदधाति तृतीयया च चतुर्थ्या चै'वमेव पूरयित्वैवं प्रत्यस्य या एता दक्षिणायै श्रोणेः स्वयमातृण्णामभ्याद्रवन्ति तासु विषुवत्यनुसीतमुपदधाति पञ्चम्या च षष्ठ्या चै'वमेव पूरयित्वैवं प्रत्यस्य या एता उत्तरादꣳसात्स्वयमातृण्णामभ्याद्रवन्ति तासु विषुवत्यनुसीतमुपदधाति सप्तम्या चाष्टम्या चै'वमेव पूरयित्वैवं प्रत्यस्य या एता दक्षिणात्पश्चात्स्वयमातृण्णामभ्याद्रवन्ति तासु विषुवत्यनुसीतमुपदधाति नवम्या च दशम्या चै'वमेव पूरयित्वैवं प्रत्यस्य या एता उत्तरात्पश्चात्स्वयमातृण्णामभ्याद्रवन्ति तासु

---

१ •सादयंत्य• Tr Be BU Ms; •सादयत्य• MH.

२ Thus M Tr Be U Ms; •त्मंन• BH.

३ निधाय instead of निदधाति M Tr HU, omitting the following अथ।

विषुवत्यनुषीतमुपदधात्येकादश्यां च द्वादश्यां च । तासां बार्हस्पत्यं मध्य[1] उपदधाति दिवि श्रयस्वान्तरिक्षे यतस्व पृथिव्या संभव ब्रह्मवर्चसमसि ब्रह्मवर्चसाय त्वेत्यनुषीतमुपदधातीति ब्राह्मणं । तथादेवतं कृत्वा सूददोहसः करोति । ॥ २९ ॥

अथोत्तरवेदेराहृतोत्तरवेदिमलंकरोत्यथोत्तरवेद्यामपां पृष्ठमसीति पुष्करपर्णमुपदधाति । तथादेवतं कृत्वा सूददोहसं करोत्यथोत्तरवेद्यामेवोत्तरनिर्बाधꣳ रुक्ममुपदधाति ब्रह्म जज्ञानमित्यथैनमक्ष्णया पञ्चगृहीतेन व्याघारयति कृणुष्व पाजः प्रसितिं न पृथ्वीमित्यथ दक्षिणतः प्राञ्चꣳ हिरण्मयं पुरुषमुपदधाति हिरण्यगर्भः समवर्तताग्र इत्यथैनमभिमृशति द्रप्सश्चस्कन्देति । तथादेवतं कृत्वा सूददोहसौ करोत्यथोत्तरतः प्रक्रमवेलायाꣳ स्रुचावुपदधात्याज्यस्य पूर्णां कार्ष्मर्यमयीं दध्नः पूर्णामौदुम्बरीं दक्षिणां कार्ष्मर्यमयीमुत्तरामौदुम्बरीमियमसीति कार्ष्मर्यमयीमसावसीत्यौदुम्बरीं मनसैव । तथादेवतं कृत्वा सूददोहसौ करोत्यथ दक्षिणे प्रललाटे सर्पशिर उपदधाति नमो अस्तु सर्पेभ्य इति तिसृभिरनुष्टुप्छन्दसमपि वा यतउच्चारं जनपदस्य जन्यं भयं मन्यते । तथादेवतं कृत्वा सूददोहसं करोति । ॥ ३० ॥ अष्टमः ॥

अथ स्वयमातृण्णां यजुषा करोति ध्रुवासि धरुणास्तृता विश्वकर्मणा सुकृता । मा त्वा समुद्र उद्वधीन्मा सुपर्णो ऽव्यथ-

[1] मध्यत M only.

माना पृथिवीं दृꣳहेत्यथैनामश्वमवघ्राप्य विदुषा ब्राह्मणेन सहाधिद्रुत्योपदधाति यथैतस्य पुरुषस्य प्राणैः प्राणाः संनिधीयेरन्नापिधीयेरन्भूः प्रजापतिस्त्वा सादयत्वित्यनुद्रुत्याग्निस्त्वाभिपातु मह्या स्वस्त्या छर्दिषा शंतमेन तया देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यनुप्राण्यात्मयमाꣳ स्वयमातृण्णामुपधायेत्यनुप्राणित्यथैष ब्राह्मणो वरं ददात्यथ स्रुचि चतुर्गृहीतं गृहीत्वा स्वयमातृण्णावकाशे जुहोति चित्तिं जुहोमि मनसा घृतेनेत्युभाभ्यामन्वारभ्यान्वारोहं वाचयति पृथिवीमाक्रमिषं प्राणो मा मा हासीदित्यपरे बिले हिरण्येष्टकामुपदधाति तेजोऽसि तेजो मे यच्छ पृथिवीं यच्छ पृथिव्यै मा पाहीति तां जघनेन प्रक्रमवेलायां मण्डलेष्टकामुपदधाति पृथिव्युदपुरमन्नेन विष्टेति दक्षिणतो रेतःसिचमुपदधाति पृथिवी रेतःसिक्ता मे रेतो दधातु सा मे रेतः प्रजनयत्विति तथादेवतं कृत्वा सूददोहसः करोति ॥ ३१ ॥

अथैता दश स्कन्ध्याः प्राचीरायातयति द्वे ऋतव्ये द्वे द्वियजुषी विराजं च विश्वज्योतिषं च सयुजं चाषाढां च द्वे संयान्यावृतव्ये उपदधाति मधुश्च माधवश्चेत्यवकामनूपदधात्यग्नेर्योनिरसीत्यथ द्वियजुषी उपदधाति काण्डात्काण्डात्प्ररोहन्ती या शतेन प्रतनोषीति द्वाभ्यां दूर्वेष्टकामथ हिरण्यमूर्ध्नीमुपदधाति यास्ते अग्ने सूर्ये रुचो या वो देवाः सूर्ये रुच इति विराजं च विश्वज्योतिषं च विराड् ज्योतिरधारयद्बृहस्पतिस्त्वा सादयत्वित्युत्तरामथ सयुजमुपदधातीन्द्राग्निभ्यां त्वा सयुजा

युजा युनज्मीत्यथाषाढां व्यालिखितायामुत्तरलक्ष्माणमुपदधात्यषाढासि सहमानेत्यथ संयान्याउपदधात्यग्नेर्यान्यसि देवानामग्नेयान्यसीति। तथादेवतं कृत्वा सूददोहसः करोति। ॥ ३२ ॥

अथोत्तरेण व्यालिखितामुपविश्य याचति दधि च मधुमिश्रं कूर्मं च। तं दध्ना मधुमिश्रेणाभ्यनक्ति मधु वाता ऋतायत इति तिसृभिरनुच्छन्दसमथैनमवकाभारेण परिवेष्ट्य पुरस्तात्प्रत्यञ्चमुपदधाति मही द्यौः पृथिवी च न यतस्त आपः प्रचरन्त्यग्रय इति द्वाभ्यामथैनꣳ शङ्कुभिः परिनिहन्त्यभितो ऽनवसर्पणाय। तथादेवतं कृत्वा सूददोहसं करोत्यथात्रैव तिष्ठन्याचत्यौदुम्बरं चोलूखलमुसलꣳ सर्वौषधं च। तदेतत्प्रादेशमात्रमुलूखलं भवत्यरत्निमात्रं मुसलं। तस्मिन्सर्वौषधमवहन्त्यूर्जो भागो ऽस्यूर्जः पवित्रमूर्गसमन्नाद्यायेत्यथैनदुत्तरतः[1] प्रक्रमवेलायामुपदधाति तद्विष्णोः परमं पदमिति। लोकंपृणामुत्तरतो मुसलं करोति। तथादेवतं कृत्वा सूददोहसौ करोत्यथ सुख्यामुखां याचति। तस्यामन्तरवस्राविणौ द्वे स्रुवाहुती जुहोत्यग्ने युक्ष्वा हि ये तवेति दक्षिणे बिले जुहोति युक्ष्वा हि देवहूतमानित्युत्तरे। ऽथैनामुत्तरतः प्रक्रमवेलायामुपदधाति ध्रुवासि पृथिवि सहस्व पृतन्यत इति। लोकंपृणे उत्तरत इतिरे करोति। तथादेवतं कृत्वा सूददोहसः करोत्यथैतत्पुरुषशिरो याचति। तस्य प्राणेषु हिरण्यशल्कान्प्रत्यस्यति

१ Thus U (sec. m.) and Ms (एतत् सर्वौषधेन पूर्णमुलूखलम् Msc.); °थैनमु° all the other MSS. and U (pr. m).

द्रप्सश्चस्कन्देत्याद्ये ऽभूदिदं विश्वस्य भुवनस्य वाजिनमिति दक्षिणस्यां नासिकायामग्नेर्वैश्वानरस्य चेत्युत्तरस्यामग्निर्ज्योतिषा ज्योतिष्मानिति दक्षिणे ऽक्षिण्ए रुक्मो वर्चसा वर्चस्वानित्युत्तर स्रुचे त्वेति दक्षिणे कर्णे रुचे त्वेत्युत्तरे। ऽथ स्रुचि चतुर्गृहीतं गृहीत्वा दक्षिणे ऽक्षिण्ए जुहोति चित्रं देवानामुदगादनीकमित्यपरं चतुर्गृहीतं गृहीत्वोत्तरे ऽक्षिण्ए जुहोति चित्रं देवानामिति। समान्या जुहोतीति ब्राह्मणमथैनद्दध्ना मधुमिश्रेण पूरयति समित्स्रवन्ति सरितो न धेना इत्यान्तादनुवाकस्याथैनत्प्राचीनमुत्तानमुखायामुपदधाति ॥ ३३ ॥

आदित्यं गर्भं पयसा समङ्ग्धीत्यनुद्रुत्येमं मा हिंसीर्द्विपादं पशूनामिति। मयुमारण्यमनु ते दिशामीति शुचमनूत्सृजति। ललाटे हिरण्येष्टकामुपदधाति विश्वकर्मा दिशां पतिरित्यथ पुरस्तात्प्रत्यङ्मुख उपविश्यान्तरात्मन्नश्वस्य शिर उपदधाति वातस्य ध्राजिं वरुणस्य नाभिमित्यनुद्रुत्येमं मा हिंसीरेकशफं पशूनामिति। गौरमारण्यमनु ते दिशामीति शुचमनूत्सृजति। ललाटे हिरण्येष्टकामुपदधाति प्रजापतिर्दिशां पतिरित्यथ पश्चात्प्राङ्मुख उपविश्यान्तरात्मन्नृषभस्य शिर उपदधात्यजस्रमिन्दुमरुषं भुरण्युमित्यनुद्रुत्येमꣳ समुद्रꣳ शतधारमुत्समिति। गवयमारण्यमनु ते दिशामीति शुचमनूत्सृजति। ललाटे हिरण्येष्टकामुपदधाति रुद्रो दिशां पतिरित्यथ दक्षिणत उदङ्मुख उपविश्यान्तरात्मन्वृष्णेः शिर उपदधाति वरूत्रिं त्वष्टुर्वरुणस्य नाभिमित्यनुद्रुत्येमामूर्णायुं वरुणस्य मायामित्युष्ट्र-

मारण्यमनु ते दिशामीति शुचमनूत्सृजति । ललाटे हिरण्येष्टकामुपदधाति वरुणो दिशां पतिरित्यथोत्तरतो दक्षिणामुख उपविश्यान्तरात्मन्यस्तस्य शिर उपदधाति यो अग्निरग्नेस्तपसो ऽधि जात इत्यनुद्रुत्याजा ह्यग्नेरजनिष्ट गर्भादिति । शरभमारण्यमनु ते दिशामीति शुचमनूत्सृजति । ललाटे हिरण्येष्टकामुपदधात्यग्निर्दिशां पतिरित्यन्तेषु तस्य क्षुद्रूह्योपदध्यादिति ब्राह्मणं । तथादेवतं कृत्वा सूददोहसः करोति । ॥ ३४ ॥ नवमः ॥

अथापस्या उपदधात्यपां त्वेमन्त्सादयामीति पञ्च पुरस्तात्प्रतीचीरुपदधाति पञ्च दक्षिणतः पञ्च पश्चात्प्राचीः पञ्चोत्तरतश्छन्दस्यास्तथादेवतं कृत्वा सूददोहसः करोत्यथ प्राणभृत उपदधात्ययं पुरो भुवस्तस्य प्राणो भौवायनो वसन्तः प्राणायनो गायत्री वासन्ती गायत्र्यै गायत्रं गायत्रादुपाꣳशुरुपाꣳशोस्त्रिवृत्त्रिवृतो रथंतरꣳ रथंतराद्वसिष्ठ ऋषिः प्रजापतिगृहीतया त्वया प्राणं गृह्णामि प्रजाभ्य इति । दश प्राचीरायातयति स्वयमातृण्णाया अयं दक्षिणा विश्वकर्मेति । दश दक्षिणा आयातयति स्वयमातृण्णाया अयं पश्चाद्विश्वव्यचा इति । दश प्रतीचीरायातयति स्वयमातृण्णाया इदमुत्तरात्सुवरिति । दशोदीचीरायातयति स्वयमातृण्णाया इयमुपरि मतिरिति । दशभिरुपरिष्टात्प्रदक्षिणं परिचिनोत्यक्ष्णयोपदधातीति ब्राह्मणं । तथादेवतं कृत्वा सूददोहसः करोत्यथ संयत उपदधात्यायुषः प्राणꣳ संतन्विति द्वादश तिस्रस्तिस्रो दिक्षु न मध्ये । तथा-

देवतं कृत्वा सूददोहसः करोत्यथापानभृत उपदधाति प्राची दिशां वसन्त ऋतूनामग्निर्देवता ब्रह्म द्रविणं त्रिवृत्स्तोमः स उ पञ्चदशवर्तनिस्त्र्यविर्वयः कृतमयानां पुरोवातो वातः सानग ऋषिरिति । वाचयति पितरः पितामहा इति । दक्षिणेन प्राणभृतो दश प्रतीचीरायातयति स्वयमातृण्णामभि दक्षिणा दिशामिति । जघनेन प्राणभृतो दशोदीचीरायातयति स्वयमातृण्णामभि प्रतीची दिशामित्युत्तरेण प्राणभृतो दश प्राचीरायातयति[1] स्वयमातृण्णामभ्युदीची दिशामित्यग्रेण प्राणभृतो दश दक्षिणा आयातयति स्वयमातृण्णामभ्यूर्ध्वा दिशामिति । बाह्येन प्राणभृतो दशभिरुपरिष्टादपसलैः परिचिनोति । विषूचीरुपदधातीति ब्राह्मणमपानभृद्भिश्चितिराप्यते । तयादेवतं कृत्वा सूददोहसः करोत्यथाग्निं सर्वतोमुखं चिनुते[2] । ॥ २५ ॥

गायत्रीं पुरस्तादुपदधाति त्रिष्टुभं दक्षिणतो जगतीं पश्चादनुष्टुभमुत्तरतः पङ्क्तिं मध्ये[3] । तयादेवतं कृत्वा सूददोहसः करोत्यथाग्नेरङ्गान्युपदधाति प्राच्या त्वा दिशा सादयामि गायत्रेण छन्दसाग्निना देवतयाग्नेः शीर्ष्णाग्नेः शिर उपदधामि दक्षिणया त्वा दिशा सादयामि प्रतीच्या त्वा दिशा सादयाम्युदीच्या त्वा दिशा सादयाम्यूर्ध्वया त्वा दिशा सादयामि पाङ्क्तेन छन्दसेति । तयादेवतं कृत्वा सूददोहसः करोत्यथोत्त-

---

१ Thus Tr HBU Ms; प्रतीचीर॰ M Be.

२ Thus Tr Be BU Ms; चिनोति MH.

३ मध्य इति M.

रतः प्राजापत्यामुपदधाति संवत्सरस्य प्रतिमामिति ' तां जघनेन प्रक्रमत्रेलायां प्राञ्चमृषभमुपदधाति त्वामग्ने वृषभं चेकितानमिति ' तयादेवतं कृत्वा सूददोहसौ करोत्यथ लोकंपृणा उपदधाति लोकं पृण छिद्रं पृणाय सीद शिवा त्वम्। इन्द्राग्नी त्वा बृहस्पतिरस्मिन्योनावसीषदन्निति ' तयादेवतं[1] करोति तया देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यथ सूददोहसं करोति ता अस्य सूददोहसः सोमꣳ श्रीणन्ति पृश्नयः। जन्मन्देवानां विशस्त्रिष्वा रोचने दिव इति ' प्राच्याच लोकंपृणया प्रसौत्यग्निं प्राचीभिः संप्रच्छादयन्ति ' संप्रच्छन्नं पलाशशाखया परिकर्षति लोकं पृण छिद्रं पृणेत्यथ चितिक्लृप्ताभिमृशति चित्तिमचित्तिं चिनवद्वि विद्वानित्याग्नेय्या गायत्र्यैतां चितिमभिमृश्य द्वाभ्यामवद्रवति वाङ्म आसन्प्राणदा इत्यथापराह्णिकीभ्यां[2] प्रवर्ग्योपसद्भ्यां प्रचरत्येतावदेवैतदहः कर्म क्रियते ' वसन्त्येताꣳ रात्रिम् ' ॥ ३६ ॥ दशमः ॥

अथ द्वितीये ऽभ्युदित आदित्ये प्रवर्ग्योपसद्भ्यां प्रचरत्यथ कार्ष्णाजिनौ[3] उपानहावुपमुञ्चेते[3] अध्वर्युश्च यजमानश्चाथ द्वाभ्यामात्मन्यग्निं गृह्णीते मयि गृह्णाम्यग्रे अग्निं यो नो अग्निरिति ' स्वयंचितिं जपति यास्ते अग्ने समिधो यानि

---

१ Thus M Tr. Ms; the other MSS. abbreviate the following passage.

२ अथापराह्ण (or ह्णि) आपराह्णि° Be U Ms.

३ Thus M Tr U Ms; °जिनौवुपा° B; °जिनिवपा° H; Be defect.

धामेति । कृष्णमश्वमभिमृश्य तनुपुरीषमुपदधाति पृष्ठो दिवीति । तथादेवतं कृत्वा सूददोहसं करोत्यथापराह्णिकीभ्यां[1] प्रवर्ग्योपसद्भ्यां प्रचरत्येतावदेवैतदहः कर्म क्रियते । वसन्त्येताꣳ रात्रिमथ तृतीये ऽभ्युदित आदित्ये प्रवर्ग्योपसद्भ्यां प्रचरति । सर्व एव कार्ष्णाजिनीरुपानह उपमुञ्चन्ते । ऽथ याचत्याज्यस्थालीꣳ स्रुवां विभक्तिमुदपात्रं पञ्च च स्कन्ध्या अवकाश्च या उ चान्या उपधास्यन्भवति ता । एतत्समादायोत्तरे श्रोण्यन्त सꣳसादयन्त्यथ द्वाभ्यामात्मन्नग्निं गृह्णीते मयि गृह्णाम्यग्रे अग्निं यो नो अग्निरिति । स्वयंचितिं जपति यास्ते अग्ने समिधो यानि धामेति । श्वेतमश्वमभिमृश्याधिद्रवत्यपामिदं न्ययनं नमस्त इति द्वाभ्यामथाधिद्रुत्य प्रथमे संचिताहुती जुहोत्यग्न उदधे तत्त्वा यामीति । दक्षिणतो विभक्तिमुपदधात्यग्निं दूतं वृणीमह इति । तथादेवतं कृत्वा सूददोहसं करोति । ॥ ३७ ॥

अथैताः पञ्च स्कन्ध्याः प्राचीरायातयति द्वे स्तन्ये द्वे सयुजावेकाꣳ संयानीमर्धस्तन्ये उपदधाति शुक्रश्च शुचिश्चेत्यवकामनूपदधात्यग्नेर्योनिरसीत्यथ सयुजावुपदधात्याधाराभ्यां त्वा सयुजा युजा युनज्मि तेजसा त्वा सयुजा युजा युनज्मीत्यथ संयानीमुपदधाति वायोर्याम्यसीति । तथादेवतं कृत्वा सूददोहसः करोत्यथाश्विनीरुपदधाति ध्रुवचितिर्ध्रुवयोनिरिति पञ्चैकैकां दिश्वेकां मध्ये । तथादेवतं कृत्वा सूददोहसः करो-

---

१ अथापराह्ण आप॰ Be UH Ms.

त्यथैता उपदधाति सजूरृतुभिः सजूर्विधाभिरिति पञ्चैकां दिश्येकां मध्ये। समानप्रभृतयो भवन्ति समानोदर्का इति ब्राह्मणं। तथादेवतं कृत्वा सूददोहसः करोत्यथ प्राणभृत उपदधाति प्राणं मे पाह्यपानं मे पाहीति पञ्चैकां दिश्येकां मध्ये। तथादेवतं कृत्वा सूददोहसः करोत्यथ वृष्टिसनीरुपदधात्यपस्पिन्वौषधीर्जिन्वेति पञ्चैकां दिश्येकां मध्ये। ऽनुपरिहारꣳ सादयतीति ब्राह्मणं। तथादेवतं कृत्वा सूददोहसः करोत्यथ मूर्धन्वतीरुपदधाति विष्टम्भो वय इति चतस्रः पुरस्ताद्धꣳसपातिनीस्तथादेवतं[१] कृत्वा सूददोहसः करोत्यथ वयस्या उपदधाति। ऋषिर्वय इति पञ्च दक्षिणायाꣳ श्रोण्यामुपदधाति पष्ठवाड्वय इति पञ्चोत्तरस्यां। वस्तो वय इति दक्षिणेऽꣳस उपदधाति। वृष्णिर्वय इत्युत्तरे। व्याघ्रो वय इति दक्षिणे पक्ष उपदधाति। सिꣳहो वय इत्युत्तरे। पुरुषो वय इति मध्ये। पुरुषेण चितिराप्यते। तथादेवतं कृत्वा सूददोहसः करोत्यथाग्निꣳ सर्वतोमुखं चिनुते ऽग्नेरङ्गानि प्राजापत्यास्तृषभं लोकंपृणा। उदीच्याश्च लोकंपृणया प्रतीत्यग्निमुदीचीभिः संप्रच्छादयन्ति। संप्रच्छन्नं पलाशशाखया परिकर्षति लोकं पृण छिद्रं पृणेत्यथ चितिक्लृप्त्याभिमृशति चित्ति-

---

१ Thus (°पातिनीस्) MBU Bhav. (one MS.); पातीनीस् Be; °पाद्विनीस् Tr H Bhav. (another MS.), Keś. (twice), Ms. (but Msc.: हंसपतनवद् वक्रया मत्या आधेयाः, and यथा भवेयुर्हंसपातिन्य इति गोपालः)।

मचित्तिं चिनवद्वि विद्वानित्याग्नेय्या त्रिष्टुभैतां चितिमभिमृश्य द्वाभ्यामवद्रवति वाङ्म आसन्प्राणदा इत्यथापराह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचरत्येतावदेवैतदहः कर्म क्रियते' वसन्त्येतांꣳ रात्रिम्' ॥ ३८ ॥ एकादशः ॥

अथ चतुर्थे ऽनुदित आदित्ये प्रवर्ग्योपसद्भ्यां प्रचरति' समानं पुरीषस्योपधानमथ पञ्चमे ऽनुदित आदित्ये प्रवर्ग्योपसद्भ्यां प्रचरति' सर्व एव कार्ष्णाजिनीरुपानह उपमुञ्चन्ते' ऽथ याचत्याव्यस्याखौꣳ समुर्वां विभक्तिमुदपाचꣳ सर्वं च स्वयमातृण्णानिक्रीतं दश च स्कन्ध्या अवकाश्या या उ चान्या उपधास्यन्भवति ता' एतत्समादायोत्तरे श्रोण्यन्ते सꣳसादयन्त्यथ द्वाभ्यामात्मन्यग्निं गृह्णीते मयि गृह्णाम्यग्रे अग्निं यो नो अग्निरिति' स्वयंचितिं जपति यास्ते अग्ने समिधो यानि धामेति' श्वेतमश्वमभिमृश्याधिद्रवत्यपामिदं न्ययनं नमस्त इति द्वाभ्यामथाधिद्रुत्य द्वितीये संचिताहुती जुहोत्यग्ने दुभ्र तत्त्वा यामीति' दक्षिणतो विभक्तिमुपदधात्यग्निनाग्निः समिध्यत इति' तथादेवतं कृत्वा सूददोहसं करोत्यथ स्वयमातृण्णामश्वमवघ्रापयाविदुषा ब्राह्मणेन सहाधिद्रुत्योपदधाति ध्रुव इन्द्राग्नी अव्यथमानामित्यनुद्रुत्य वायुस्त्वाभिपातु मह्या स्वस्त्या छर्दिषा शंतमेन तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति' वन्याद्वितीयामुपधायेति' प्राणापानिति' स व्यानो' ऽथैष ब्राह्मणो वरं ददात्यथ स्रुचि चतुर्गृहीतं गृहीत्वा स्वयमातृण्णावकाशे जुहोति चित्तिं जुहोमि मनसा घृतेनेत्यङ्गुष्ठाभ्यामन्वारभ्या-

न्वारोहं वाचयत्यन्तरिक्षमाक्रमिषं प्रजा मा मा हासीदित्यपरे बिले हिरण्येष्टकामुपदधाति ज्योतिरसि ज्योतिर्मे यच्छान्तरिक्षं यच्छान्तरिक्षान्मा पाहीति ' तां जघनेन प्रक्रमवेलायां मण्डलेष्टकामुपदधात्यधिद्यौरन्तरिक्षं ब्रह्मणा विष्टेति ' दक्षिणतो रेतःसिचमुपदधात्यन्तरिक्षꣳ रेतःसिक्तन्मे रेतो दधातु तन्मे रेतः प्रजनयत्विति मनसैव ' तयादेवतं कृत्वा सूददोहसः करोति ' ॥ ३९ ॥

अथैता दश स्कन्ध्याः प्राचीरायातयति चतस्र ऋतव्याः सम्राजं च विश्वज्योतिषं च द्वे सयुजौ द्वे संयान्यावृतव्या उपदधाति नभश्च नभस्यश्चेत्यवकामनूपदधात्यग्नेर्योनिरसीतीषश्चोर्जश्चेत्यवकामनूपदधात्यग्नेर्योनिरसीति सम्राजं च विश्वज्योतिषं च सम्राट् ज्योतिरधारयद्विश्वकर्मा त्वा सादयत्वित्युत्तरामथ सयुजावुपदधाति वर्चसा त्वा सयुजा युजा युनज्म्युक्थेभिस्त्वा सयुजा युजा युनज्मीत्यथ संयान्यावुपदधाति देवानां वायोयान्यस्यन्तरिक्षस्य यान्यसीति ' तयादेवतं कृत्वा सूददोहसः करोत्यथ दिश्या उपदधाति राज्ञ्यसि प्राची दिगिति पञ्चैकैकां दिश्येकां मध्ये ' तयादेवतं कृत्वा सूददोहसः करोत्यथ प्राणभृत उपदधात्यायुर्मे पाहि प्राणं मे पाहीति दश पुरस्तात्प्राचीस्तासां ज्योतिष्मतीमुत्तमामुपदधाति ' तयादेवतं कृत्वा सूददोहसः करोत्यथ बृहतीरुपदधाति मा छन्द इति द्वादश दक्षिणतः पृथिवी छन्द इति द्वादश पश्चादग्निर्देवतेति द्वादशोत्तरतस्तयादेवतं कृत्वा सूददोहसः

करोत्यथ वालखिल्या उपदधाति' मूर्धासि राडिति सप्त पुरस्तात्प्रतीचीरुपदधाति यन्त्री राडिति सप्त पश्चात्प्राचीर्वालखिल्याभिश्चितिराप्यते' तयादेवतं कृत्वा सूददोहसः करोत्यथाग्निꣳ सर्वतोमुखं चिनुते ऽग्नेरङ्गानि प्राजापत्यामृषभं लोकंपृणाः' प्राच्याच लोकंपृणया प्रसौत्यपि प्राचीभिः संप्रच्छादयन्ति' संप्रच्छन्नं पलाशशाखया परिकर्षति लोकं पृण छिद्रं पृणेत्यथ चितिकॢप्त्याभिमृशति चित्तिमचित्तिं चिनवद्वि विद्वानित्याग्नेय्या जगत्यैतां चितिमभिमृश्य द्वाभ्यामवद्रवति वाङ्म आसन्प्राणदा इत्यथापराह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचरत्येतावदेवैतदहः कर्म क्रियते' वसन्त्येताꣳ रात्रिम्' ॥ ४० ॥ द्वादशः ॥

अथ षष्ठे ऽनुदित आदित्ये प्रवर्ग्योपसद्भ्यां प्रचरति' समानं पुरीषस्योपधानमथ सप्तमे ऽनुदित आदित्ये प्रवर्ग्योपसद्भ्यां प्रचरति' सर्व एव कार्ष्णाजिनीरुपानह उपमुञ्चन्ते' ऽथ याचत्याज्यस्थालीꣳ सस्रुवां विभक्तिमुदपात्रं पञ्च च स्कन्ध्या अवकाश्च या उ चान्या उपधास्यन्भवति ता' एतत्समादायोत्तरे श्रोण्यन्ते सꣳसादयन्त्यथ द्वाभ्यामात्मन्यग्निं गृह्णीते मयि गृह्णाम्यग्रे अग्निं यो नो अग्निरिति' स्वयंचितिं जपति यास्ते अग्ने समिधो यानि धामेति' श्वेतमश्वमभिमृश्याधिद्रवत्यपामिदं न्ययनं नमस्त इति द्वाभ्यामथाधिद्रुत्य तृतीये संचिताहुती जुहोत्यग्ने गच्छ तत्त्वा यामीति' दक्षिणतो विभक्तिमुपदधात्यग्निर्हंचापि जहनदिति' तयादेवतं कृत्वा सूददोहसं करोत्यथैताः पञ्च स्कन्ध्याः प्राचीरायातयति द्वे स्तव्ये द्वे

सयुजावेकाꣳ संयानीमन्तत्ये उपदधाति सहश्च सहस्यश्चेत्यवकामनूपदधात्यग्नेर्योनिरसीत्यथ सयुजावुपदधाति स्तोमैभिस्त्वा सयुजा युजा युनज्मि छन्दोभिस्त्वा सयुजा युजा युनज्मीत्यथ संयानीरुपदधाति देवानामन्तरिक्षयान्यसीति । तथादेवतं कृत्वा सूददोहसः करोति । ॥ ४१ ॥

अथाक्ष्णयास्तोमीया उपदधात्याशुस्त्रिवृदिति पुरस्तादुपदधाति व्योम सप्तदश इति दक्षिणतो धरुण एकविꣳश इति पश्चाद्भान्तः पञ्चदश इत्युत्तरतः । प्रतूर्तिरष्टादश इति पुरस्तादुपदधात्यभिवर्तः सविꣳश इति दक्षिणतो वर्चो द्वाविꣳश इति पश्चात्तपो नवदश इत्युत्तरतो । योनिश्चतुर्विꣳश इति पुरस्तादुपदधाति गर्भाः पञ्चविꣳश इति दक्षिणत ओजस्त्रिणव इति पश्चात्संभरणस्त्रयोविꣳश इत्युत्तरतः । क्रतुरेकत्रिꣳश इति पुरस्तादुपदधाति ब्रध्नस्य विष्टपं चतुस्त्रिꣳश इति दक्षिणतः प्रतिष्ठा त्रयस्त्रिꣳश इति पश्चान्नाकः षट्त्रिꣳश इत्युत्तरतो । ऽग्नेर्भागो ऽसीति पुरस्तादुपदधाति नृचक्षसां भागो ऽसीति दक्षिणतो मित्रस्य भागो ऽसीति पश्चादिन्द्रस्य भागो ऽसीत्युत्तरतो । वसूनां भागो ऽसीति पुरस्तादुपदधात्यादित्यानां भागो ऽसीति दक्षिणतो ऽदित्यै भागो ऽसीति पश्चाद्देवस्य सवितुर्भागो ऽसीत्युत्तरतो । धर्त्रश्चतुष्टोम इति पुरस्तादुपदधाति यावानां भागो ऽसीति दक्षिणत ऋभूणां भागो ऽसीति पश्चाद्विवर्तो ऽष्टाचत्वारिꣳश इत्युत्तरतो । ऽन्यथानूच्यान्यथोपदधातीति ब्राह्मणं । तथादेवतं कृत्वा सूददो-

हसः करोत्यथ सृष्टीरुपदधात्येकयास्तुवत प्रजा अधीयन्तेति सप्तदश । चतस्रो दक्षिणेऽंस उपदधात्यथ तिस्रोऽथ तिस्रोऽथ तिस्रोऽथ चतस्रो । दक्षिणादंसाद्दक्षिणाꣳ श्रोणिमभ्यायातयति[1] । तथादेवतं कृत्वा सूददोहसः करोत्यथ व्युष्टीरुपदधातीयमेव सा या प्रथमा व्यौच्छदिति पञ्चदश । तिस्रस्तिस्रो दिक्षु तिस्रो मध्ये । व्युष्टीभिश्चितिराप्यते[2] । तथादेवतं कृत्वा सूददोहसः करोति । ॥ ४२ ॥

अथाग्निꣳ सर्वतोमुखं चिनुतेऽग्नेरङ्गानि प्राजापत्यामृषभं लोकंपृणा । उदीच्याच लोकंपृणया प्रसौत्यग्निमुदीचीभिः संप्रच्छादयन्ति । संप्रच्छन्नं पलाशशाखया परिकर्षति लोकं पृण छिद्रं पृणेत्यथ चितिक्लृप्याभिमृशति चित्तिमचित्तिं चिनवद्वि विद्वानित्याग्नेय्यानुष्टुभैतां चितिमभिमृश्य दाभ्यामवद्रवति वाङ्म आसन्प्राणदा इत्यथापराह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचरत्येतावदेवैतदहः कर्म क्रियते । वसन्त्येताꣳ रात्रिम् । ॥ ४३ ॥ त्रयोदशः ॥

अथाष्टमेऽह्न्युदित आदित्ये प्रवर्ग्योपसद्भ्यां प्रचरति । समानं पुरीषस्योपधानमथ नवमेऽह्न्युदित आदित्ये प्रवर्ग्योपसद्भ्यां प्रचरति । सर्व एव कार्ष्णाजिनीरुपानह उपमुञ्चन्तेऽथ घाचत्याव्यस्राकीꣳ मसुवां विभक्तिमुदपात्रꣳ सर्वं च स्वयमातृण्णानिकोतꣳ सप्त च स्कन्ध्या अवकाश्च या उ चान्या

---

१ श्रोणीम॰ some of the MSS.

२ व्युष्टिभि॰ H. Ms.

उपधास्यन्भवति ता । एतत्समादायोत्तरे श्रोण्यन्ते सꣳसादयन्न'थ द्वाभ्यामात्मन्यग्निं गृह्णीते मयि गृह्णाम्यग्रे अग्निं यो नो अग्निरिति । स्वयंचितिं जपति यास्ते अग्ने समिधो यानि धामेति । श्वेतमश्वमभिमृश्याधिद्रवत्यपामिदं न्ययनं नमस्त इति द्वाभ्याम'थाधिद्रुत्य चतुर्थे संचिताहुती जुहोत्यग्ने किꣳशिल तत्त्वा यामीति । दक्षिणतो विभक्तिमुपदधात्यग्ने स्तोमं मनामह इति । तथादेवतं कृत्वा सूददोहसं करोत्य'थैताः सप्त स्कन्ध्याः प्राचीरायातयति द्वे ऋतव्ये स्वराजं च विश्वज्योतिषं चैकाꣳ सयुजं द्वे संयान्या'वृतव्ये उपदधाति तपश्च तपस्यश्चेत्य'थैकामनूपदधात्यग्नेर्योनिरसीति स्वराजं च विश्वज्योतिषं च स्वराड् ज्योतिरधारयत्प्रजापतिष्ट्वा सादयत्वित्युत्तराभ्या'मथ सयुजमुपदधाति रय्यै पोषाय सजातानां मध्यमस्थेयाय मया त्वा सयुजा युजा युनज्मीत्य'थ संयान्यावुपदधात्यन्तरिक्षमस्यन्तरिक्षाय त्वेति । तथादेवतं कृत्वा सूददोहसः करोति । ॥ ४४ ॥

अथासपत्ना उपदधात्य'ग्ने जातान्प्रणुदा नः सपत्नानिति पुरस्तादुपदधाति सहसा जातानिति पश्चाच्चतुश्चत्वारिꣳश स्तोम इति दक्षिणतः षोडश स्तोम इत्युत्तरतस्ता'सां पुरीषवतीं मध्य उपदधाति पृथिव्याः पुरीषमस्यप्सो नामेति । तथादेवतं कृत्वा सूददोहसः करोत्य'थ विराज उपदधात्येवश्छन्दो वरिवश्छन्द इति चत्वारिꣳशतं दशदश दिक्षु न मध्ये । ऽक्ष्णयोपदधातीति ब्राह्मणं । तथादेवतं कृत्वा सूददोहसः करो-

त्यथ स्तोमभागा उपदधाति रश्मिरसि क्षयाय त्वा क्षयं जिन्वेत्येकत्रिꣳशतꣳ सप्तसप्त दिक्षु तिस्रो मध्ये । तथादेवतं कृत्वा सूददोहसः करोत्यथ नाकसद उपदधाति राज्ञ्यसि प्राची दिग्वसवस्ते देवा अधिपतय इति पञ्चैकैकां दिश्येकां मध्ये । तथादेवतं कृत्वा सूददोहसः करोत्यथ पञ्चचोडा उपरिष्टान्नाकसदामुपदधात्ययं पुरो हरिकेशः सूर्यरश्मिरिति पञ्चैकैकां दिश्येकां मध्ये । तासां पश्चात्प्राचीमुत्तमामुपदधात्यथ यं यजमानो द्वेष्टि तं मनसा ध्यायति । तथादेवतं कृत्वा सूददोहसः करोत्यथ छन्दाꣳस्युपदधात्यग्निर्मूर्धा दिव इत्येतस्यानुवाकस्य तिस्रस्तिस्रो यथाम्नातं । गायत्रीः पुरस्तादुपदधाति त्रिष्टुभो दक्षिणतो जगतीः पश्चादनुष्टुभ उत्तरतो बृहतीर्मध्य । उष्णिहः पुरस्तादुपदधाति पङ्क्तीर्दक्षिणतोऽक्षरपङ्क्तीः पश्चादतिच्छन्दसमुत्तरतो द्विपदा मध्ये । ऽपि वातिच्छन्दसं मध्ये द्विपदा उत्तरतस्तथादेवतं कृत्वा सूददोहसः करोत्यथ दक्षिणेऽꣳसे कृत्तिका उपदधात्यम्बा नामासि दुला नामासीति सप्त गुल्मकृतास्तथादेवतं कृत्वा सूददोहसः करोत्यथ वृष्टिसनीरुपदधाति पुरोवातसनिरस्यभ्रसनिरसीति पञ्चैकैकां दिश्येकां मध्ये । ऽनुपरिहारꣳ सादयतीति ब्राह्मणं । तथादेवतं कृत्वा सूददोहसः करोत्यथादित्येष्टका उपदधाति सलिलाय त्वा सर्णीकाय त्वेत्यष्टौ द्वेद्वे दिक्षु न मध्ये । तथादेवतं कृत्वा सूददोहसः करोत्यथ घृतेष्टका उपदधात्यृचे त्वा रुचे त्वेति पञ्चैकैकां दिश्येकां मध्ये । ऽनुपरिहारꣳ सादयतीति ब्राह्मणं ।

तयादेवतं कृत्वा सूददोहसः करोत्यथ यशोदा उपदधाति यशोदां त्वा यशसि सादयामीति पञ्चैकैकां दिक्ष्वेकां मध्ये । तयादेवतं कृत्वा सूददोहसः करोत्यथ भूयस्कृत उपदधाति भूयस्कृदसि वरिवस्कृदसीति पञ्चैकैकां दिक्ष्वेकां मध्ये । तयादेवतं कृत्वा सूददोहसः करोत्यथाप्सुषद उपदधात्यप्सुषदसि श्येनसदसीति पञ्चैकैकां दिक्ष्वेकां मध्ये । तयादेवतं कृत्वा सूददोहसः करोत्यथ द्रविणोदा उपदधाति पृथिव्यास्त्वा द्रविणे सादयामीति पञ्चैकैकां दिक्ष्वेकां मध्ये । तयादेवतं कृत्वा सूददोहसः करोत्यथायुष्या उपदधाति प्राणं मे पाह्यपानं मे पाहीति सप्तैकैकां दिक्षु तिस्रो मध्ये । तयादेवतं कृत्वा सूददोहसः करोत्यथर्तुनामान्युपदधाति यावा अयावा इति सप्तैकैकां दिक्षु तिस्रो मध्ये । तयादेवतं कृत्वा सूददोहसः करोति । ॥ ४५ ॥ चतुर्दशः ॥

अथेन्द्रतनूरुपदधात्यग्निना विश्वाषाडिति द्वाविंशतिं पञ्चपञ्च दिक्षु द्वे मध्ये । तयादेवतं कृत्वा सूददोहसः करोत्यथ यज्ञतनूरुपदधाति प्रजापतिर्मनसान्धो ऽच्छेत इति त्रयस्त्रिंशतमष्टावष्टौ दिक्ष्वेकां मध्ये । तयादेवतं कृत्वा सूददोहसः करोत्यथ ज्योतिष्मतीरुपदधाति ज्योतिष्मतीं त्वा सादयामीति द्वादश तिस्रस्तिस्रो दिक्षु न मध्ये । तयादेवतं कृत्वा सूददोहसः करोत्यथ भूतेष्टका उपदधाति पृथिव्यै स्वाहान्तरिक्षाय स्वाहेति द्वादश तिस्रस्तिस्रो दिक्षु न मध्ये । तयादेवतं कृत्वा सूददोहसः करोत्यथाज्यानीरुपदधाति शतायुधाय शत-

वीर्यायेति पञ्चैकैकां दिक्ष्वेकां मध्ये। तथादेवतं कृत्वा सूददोहसः करोत्यथ राष्ट्रभृत उपदधात्यग्ने यशस्विन्यशसेमम् र्पयेति चतस्र एकैकां दिक्षु न मध्ये। तथादेवतं कृत्वा सूददोहसः करोत्यथ दक्षिणे ऽꣳसे पौर्णमासीमुपदधाति पूर्णा पश्चादिति। तथादेवतं कृत्वा सूददोहसं करोत्यथ दक्षिण एवाꣳसे नक्षत्रेष्टका उपदधाति कृत्तिका नक्षत्रमग्निर्देवतेत्यथैना रोचयत्यग्ने रुच स्थ प्रजापतेर्धातुः सोमस्यर्चे त्वा रुचे त्वा द्युते त्वा भासे त्वा ज्योतिषे त्वेत्यथैतं नक्षत्रपथꣳ रोहिणीप्रभृत्या विशाखाभ्यामायातयति[1]। दक्षिणादꣳसाद्दक्षिणाꣳ श्रोणिमभ्यायातयत्यथ[2] पुच्छसन्धौ चात्मसन्धौ चामावास्यामुपदधाति यत्ते देवा अदधुर्भागधेयमित्यथैतं नक्षत्रपथमनूराधाप्रभृत्यापभरणीभ्य आयातयत्युत्तरायै श्रोणेरुत्तरमꣳसमभ्यायातयत्यथोत्तर[3] एवाꣳसे पौर्णमासीमुपदधाति पूर्णा पश्चादित्यसꣳस्पृष्टा उपदधातीति ब्राह्मणं। नक्षत्रेष्टकाभिश्चितिराप्यते। तथादेवतं कृत्वा सूददोहसः करोत्यथावद्रुत्य कृष्णमश्वमभिमृश्य तनुपुरीषमुपदधाति पृष्टो दिवीति। तथादेवतं कृत्वा सूददोहसं करोत्यथ[4] षष्ठीं चितिं चिनुते संयच्च प्रचेताश्चेति पञ्चैकैकां दिक्ष्वेकां मध्ये। तथादेवतं कृत्वा सूददोहसः करोत्यथाग्निꣳ

१ Thus M Tr U; ०शाखाभ्यां आयात० Be B; ०शाखाभ्यामभ्यायात० H.

२ ०थोथोन० some of the MSS.

३ Thus corrected; all MSS.: ०थोत्तरोत्तरम०।

४ अथ i.s. of अथ BH.

सर्वतोमुखं चिनुते ऽग्नेरङ्गानि प्राजापत्यामृषभं लोकंपृणाः । प्राच्याश्च लोकंपृणया प्रसौत्यग्निं प्राचीभिः संप्रच्छादयन्त्यथोदीचीभिः । प्राचीभिस्त्वेव निस्तिष्ठन्ति । यावदन्नं चेष्यमाणो भवति तावदन्नं[1] चिनुते । ऽथानभिमृष्टं चितिक्लृप्ता भवति । तदेताश्चतस्रः स्वयमातृण्णा याचति । ता दिक्षूपदधाति प्राणाय त्वा चक्षुषे त्वा तया देवतयाङ्गिरस्वद्ध्रुवा सीद व्यानाय त्वा[2] चक्षुषे त्वा तया देवतयाङ्गिरस्वद्ध्रुवा सीदापानाय त्वा चक्षुषे त्वा तया देवतयाङ्गिरस्वद्ध्रुवा सीद वाचे त्वा चक्षुषे त्वा तया देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यथ स्वयमातृण्णामश्वमवघ्राप्याविदुषा ब्राह्मणेन सहाधिद्रुत्योपदधाति सुवरायोस्त्वा सदने सादयामीत्यनुद्रुत्य सूर्यस्त्वाभिपातु मह्या स्वस्त्या छर्दिषा शंतमेन तया देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यपान्यात्तृतीयामुपधायेत्यपानित्यथैष ब्राह्मणो वरं ददात्यथ स्रुचि चतुर्गृहीतं गृहीत्वा स्वयमातृण्णावकाशे जुहोति चित्तिं जुहोमि मनसा घृतेनेत्यङ्गुष्ठाभ्यामन्वारभ्यान्वारोहं वाचयति दिवमाक्रमिषं सुवरगन्मेत्यपरे बिले हिरण्येष्टकामुपदधाति सुवरसि सुवर्मे यच्छ दिवं यच्छ दिवो मा पाहीति । तां जघनेन प्रक्रमवेलायां मण्डलेष्टकामुपदधाति द्यौरपराजितामृतेन विष्टेति । दक्षिणतो रेतःसिचमुपदधाति द्यौ रेतःसिक् सा मे रेतो दधातु सा मे

---

१ B Bc Ms. ins. चितिं।

२ The following words, unto सीदेत्यथ, l. 9, are found thus in U only; all the other MSS. abbreviate.

रेतः प्रजनयन्निति । तथादैवतं कृत्वा सूददोहसः करोत्यथोत्तरतः प्रक्रमवेलायां विकर्णीमुपदधाति प्रोथदश्वो न यवसे अविष्यन्निति । तथादैवतं कृत्वा सूददोहसं करोत्यथ लोकंपृणा उपदधाति लोकं पृण छिद्रं पृणेत्यथ[1] चितिकॢप्ताभिमृशति चित्तिमचित्तिं चिनवद्वि विद्वानित्याग्नेय्या पङ्क्त्यैतां चितिमभिमृश्य द्वाभ्यामवद्रवति वाङ्म आसन्प्राणदा इत्यथापराह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचरत्येतावदेवैतदहः कर्म क्रियते । वसन्त्येताꣳ रात्रीम् । ॥ ४६ ॥ पञ्चदशः ॥

अथैतस्मिन्नेव नवमे ऽह्नि दशमायाह्न उपकल्पयते सहस्रꣳ हिरण्यशल्कानूर्ध्वं चिभ्यो ऽपरिमितानित्येक आहुस्ते यदि सहस्रं भवन्ति द्वेद्वे शते पञ्चनाडीष्वोते[2] भवतो । ऽथ दशमे ऽभ्युदित आदित्ये प्रवर्ग्योपसद्भ्यां प्रचरति । समानं पुरीषस्योपधानमथ पात्र्यामप आनीय हिरण्यशल्कान्संप्रकीर्य द्वाभ्यांद्वाभ्याꣳ शताभ्यां प्रोक्षति सहस्रस्य प्रमा असीति यत्प्राङ् स्वयमातृण्णायै भवति सहस्रस्य प्रतिमा असीति यद्दक्षिणा स्वयमातृण्णायै भवति सहस्रस्य विमा असीति यत्प्रत्यङ् स्वयमातृण्णायै भवति सहस्रस्योन्मा असीति यदुदङ् स्वयमातृण्णायै भवत्यथ मध्यं द्वाभ्याꣳ शताभ्यां प्रोक्षति साहस्रो ऽसि सहस्राय त्वेत्यथोत्तरे श्रोण्यन्ते तिष्ठन्निष्टका धेनूः कुरुत इमा मे अग्न

१ अथ MTr; अथ the other MSS.

२ पञ्च॰ all; ॰नाडीष्वोते Tr UH Ms; ॰नाडीष्वेते BeM; ॰नाडीष्वोते B; Bhav.: पञ्चनाडीषु पञ्चिपञ्चसुशुषिरेषु निहिते[षु] भवतः।

इष्टका धेनवः सन्त्वित्यन्तादनुवाकस्याथापराह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचरत्येतावदेवैतदहः कर्म क्रियते । वसन्त्येताꣳ रात्रिमथैतस्मिन्नेव दशमेऽह्न्येकादशायाञ्च उपकल्पयतेऽर्कपर्णमजक्षीरं गावीधुकं चरुं तिसृधन्वमश्मानमुदकुम्भं मण्डूकमवकां वेतसशाखां दर्भस्तम्बमाज्यस्थालीꣳ सस्रुवां दीर्घवꣳशं द्वादशमित्यथैकादशेऽह्न्युदित आदित्ये प्रवर्ग्योपसद्भ्यां प्रचरति । स दीर्घवꣳशे स्रुवं प्रबध्योत्तमे संचिताहुती जुहोत्यग्ने वन्य तत्त्वा यामीति । ॥ ४७ ॥

यावदेवाचाध्वर्युश्चेष्टति तावदेव प्रतिप्रस्थातोत्तरस्य पक्षस्य चरमयेष्टकया प्रत्यूढपुरीषयोपरमत्यथैतस्यार्कपर्णस्य पुटमन्तरवस्राविणं कृत्वोदङ् तिष्ठन्मुखदघ्ने धारयन्नाहाहरानयेति । स यत्र धारेष्टकां प्राप्नोति तत्प्रतिपद्यते नमस्ते रुद्र मन्यव इत्यन्तमेतमनुवाकं निगद्य द्वितीयं तृतीयं । चतुर्थस्य यत्राभिजानाति नमः क्षत्तृभ्य इति तत्स्वाहाकरोति । सोऽत एव प्राङावृत्य नाभिदघ्ने धारयन्संग्रहीतृभ्य इति प्रतिपद्यातिशिष्टमनुवाकस्य[1] निगद्य पञ्चमꣳ षष्ठꣳ । सप्तमस्य यत्राभिजानाति नमो वर्ष्याय चेति तत्स्वाहाकरोति । सोऽत एव दक्षिणावृत्य जानुदघ्ने धारयन्नवर्ष्याय चेति प्रतिपद्यातिशिष्टमनुवाकस्य[1] निगद्याष्टमं नवमं दशममेकादशस्य यत्राभिजानाति य एतावन्तश्च भूयाꣳसश्चेति तत्स्वाहाकरोति । सोऽत एव प्रत्यङा-

[1] Thus M only; अनुवाकं all the other MSS.

इत्य गुल्फदघ्ने धारयन्नमो रुद्रेभ्यो ये पृथिव्यामित्येतद्यजमानं वाचयति। नाभिदघ्ने धारयन्नमो रुद्रेभ्यो ये ऽन्तरिक्ष इत्येतद्यजमानं वाचयति। ग्रीवदघ्ने[1] धारयन्नमो रुद्रेभ्यो ये दिवीत्येतद्यजमानं वाचयत्यथैतदर्कपर्णं यं द्वेष्टि तस्य संचरे पशूनां न्यस्यति। यद्यु वै न द्वेष्याखुवटे न्यस्यत्यथैतं गावीधुकं चरुं चरमायामिष्टकायां निदधाति यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवनाविवेश तस्मै रुद्राय नमो अस्त्वित्यथैतत्तिसृधन्वं याचति। तेनोत्तरे ओष्ठन्ते तिष्ठन्नुपतिष्ठते। ऽपि वानुपरिक्रामं यत्ते रुद्र पुरो धनुस्तद्वातो अनुवातु ते तस्मै ते रुद्र संवत्सरेण नमस्करोमि यत्ते रुद्र दक्षिणा धनुर्यत्ते रुद्र पश्चाद्धनुर्यत्ते रुद्रोत्तराद्धनुर्यत्ते रुद्रोपरि धनुरित्यथैनद्याचितं ब्राह्मणाय दद्यात्यथास्यैष उदकुम्भ उत्तरे ओष्ठन्ते ऽश्मना संस्पृष्टः[2] शेते। स यो बलवांस्तमाह्वानेनोदकुम्भेन संततया धारया त्रिः प्रदक्षिणं परिषिञ्चन्परीहीति। स तथा करोति। परिषिच्यमाने यजमानं वाचयत्यश्मन्नूर्जं पर्वते शिश्रियाणां वाते पर्जन्ये वरुणस्य शुष्मे। अद्भ्य ओषधीभ्यो वनस्पतिभ्यो ऽधि संभृतां तां न इषमूर्जं धत्त मरुतः संरराणा इत्यथैतं कुम्भमश्मना संस्पृष्टं सादयत्यश्मंस्ते क्षुदमुं ते शुगृच्छतु यं द्विष्म इति। निधाय कुम्भं

१ Thus M Tr BU (sec. m.) Ms Keś.; ग्रीवा॰ Be U (pr. m.).

२ Thus Bhav. (one Ms.) and Ms.; ग्मानं सस्पृष्टं M; संसृष्ट Tr Be BU Bhav. (another Ms.) संसक्तः H.

यथेतं त्रिः पुनः प्रतिपर्येत्यथैतस्मिन्नेव दीर्घवंशे प्रबध्नाति मण्डूकमवकां वेतसशाखां दर्भस्तम्बमिति । तेन यत्प्राक् स्वयमातृण्णायै भवति तद्विकर्षति समुद्रस्य त्वावकया हिमस्य त्वा जरायुणेति ॥ ४८ ॥

द्वाभ्यां पुरस्ताद्द्वाभ्यां दक्षिणतो द्वाभ्यां पश्चाद्द्वाभ्यामुत्तरतो ऽष्टाभिर्विकर्षतीति ब्राह्मणमथैताश्चैव कार्ष्णाजिनीरुपानह एतं[1] च[1] दीर्घवंशꣳ संछिद्य चात्वाले संप्रकिरन्त्यथ प्राञ्चो ऽग्निरित्याज्यस्थालीꣳ सस्रुवामादायाधिद्रुत्याज्यस्थाल्याः[2] स्रुवेणोपघातꣳ सर्पाहुतीर्जुहोति । समीची नामासि प्राची दिगिति पश्चादासीनः पूर्वे बिले जुहोत्योजस्विनी नामासि दक्षिणा दिगित्युत्तरत आसीनो दक्षिणे बिले जुहोति । प्राची नामासि प्रतीची दिगिति पुरस्तादासीनो ऽपरे बिले जुहोत्यवस्थावा नामास्युदीची दिगिति दक्षिणत आसीन उत्तरे बिले जुहोत्यथैतेनैव यथेतमेत्य यथैव प्रथममहौषीत्तद्वै जुहोत्यधिपत्नी नामासि वशिनी नामासीत्यथावद्रुत्याग्निꣳ सामभिरुपस्थापयति । गायत्रेण पुरस्तादुपतिष्ठते ऽग्नेर्हृदयेन दक्षिणमुपपक्षꣳ रथंतरेण दक्षिणं पक्षं वारवन्तीयेन दक्षिणाꣳ श्रोणिमृतुस्थायज्ञायज्ञियेन[3] पुच्छꣳ श्यैतेनोत्तराꣳ श्रोणिं

१ Thus Tr BU Ms; एतंच Bo; एतच्च MH.

२ Thus U (sec. m.) only; °स्थाल्या all the other MSS., also Ms; but Msc: चाज्यस्थाल्यास्स्रुकाशात् ।

३ °यज्ञीयेन Tr H Ms.

बृहतोत्तरं पक्षं प्रजापतेर्हृदयेनोत्तरमुपपक्षं वामदेव्येन मध्यमं याह होतरग्नेरुक्थेनाग्निमनुशꣳसेति । यदि होता न कामयते यजमान एव जघनेन पुच्छं तृणानि सꣳस्तीर्य तेषूपविश्याग्नेरुक्थेनाग्निमनुशꣳसति पिता मातरिश्वाच्छिद्रा पदा धा अच्छिद्रा उशिजः पदानुतक्षुः सोमो विश्वविन्नेता नेषद्बृहस्पतिरुक्थामदानि शꣳसिषदोमिति सकृदा विवीर्यैनꣳ स्तुतशस्त्रयोर्दोहं वाचयतीष्टो यज्ञो भृगुभिराशीर्दा वसुभिस्तस्य त इष्टस्य वीतस्य द्रविणेह भक्षीयेत्यथापराह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचरत्येतावदेवैतदहः कर्म क्रियते । वसन्त्येताꣳ रात्रिम् । ॥ ४९ ॥ षोडशः ॥

अथैतस्मिन्नेवैकादशे ऽह्नि द्वादशायाह्न उपकल्पयत औदुम्बरꣳ स्रुवमौदुम्बरं द्रोणमौदुम्बरं प्रसेकमौदुम्बरीं वितष्टिं[1] तस्यां पञ्चगृहीतमाज्यं भवति दध्नः पूर्णामौदुम्बरीं तिस्र औदुम्बरीः समिधस्तिस्रो नानावृक्ष्या नानावृक्ष्यमिध्मं दधिमधुमिश्रं गुसुष्टिमवकाभारं पृश्निमश्मानमाज्यप्रोक्षं द्वितीयꣳ होतारमप्रतिरथस्यानुवक्तारं विलीनोत्पूतस्याज्यस्य द्वौ वा त्रीन्वा कुम्भान्ब्राह्मौदनिकान्व्रीहीन्सर्वौषधꣳ[2] रोहितं चर्मानडुहं कृष्णायै श्वेतवत्सायै पयो रथं चषालहोमीयꣳ शाकलान्परिधीनित्यथ द्वादशे ऽभ्युदित आदित्ये प्रवर्ग्योपसद्भ्यां प्रचरत्यथोपनिष्क्रम्य संप्रैषमाह सुब्रह्मण्य सुब्रह्मण्यामाह्वयार्धस्तनव्रतं प्रय-

१ Thus Tr U Be B Ms; विनष्टीं MH.

२ Thus MU Tr Ms; ब्रह्मौदनि° B Be H.

च्छतेत्याह्वयति सुब्रह्मण्यः सुब्रह्मण्यामर्धस्तनव्रतं प्रयच्छत्यथादत्ते पञ्चगृहीतमाज्यं दधि मधुमिश्रं गुमुष्टिमवकाभारमित्यथैतत्समादायाधिद्रुत्याह्वणया पञ्चगृहीतेन स्वयमातृण्णां[1] व्याघारयति नृषदे वडप्सुषदे वड्वनसदे वड् बर्हिषदे वट् सुवर्विदे वडित्येतयैव स्रुचोपघातं दध्ना मधुमिश्रेण गन्धर्वाहुतीर्जुहोति' हेतयो नाम स्थ तेषां वः पुरो गृहा इति पश्चादासीनः पूर्वे बिले जुहोति' निलिम्पा नाम स्थ तेषां वो दक्षिणा गृहा इत्युत्तरत आसीनो दक्षिणे बिले जुहोति' वज्रिणो नाम स्थ तेषां वः पश्चाद्गृहा इति पुरस्तादासीनो ऽपरे बिले जुहोत्यवस्थावानो नाम स्थ तेषां व उत्तराद्गृहा इति दक्षिणत आसीन उत्तरे बिले जुहोत्यथैतेनैव यथेतमेत्य यत्रैव प्रथममहौषीत्तद्धि जुहोत्यधिपतयो नाम स्थ क्रव्या नाम स्थेत्यथाह प्रतिप्रस्थातरिममग्निं कूर्मपृषन्तं कुर्विति' तꣳ स कूर्मपृषन्तं करोति' नाप्रोक्षितमधितिष्ठत्यथ गुमुष्टिमादाय दध्ना मधुमिश्रेणावोक्षति ये देवा देवानां ये देवा देवेष्वधि देवत्वमायन्निति ॥ ५० ॥

द्वाभ्यां पुरस्तात्ताभ्यां दक्षिणतस्ताभ्यां पश्चात्ताभ्यामुत्तरतो' ऽनुपरिचारमवोक्षतीति[2] ब्राह्मणमथैनमवकाभारेण प्रतिच्छाद्य गोप्तारꣳ समादिश्यावद्रुत्यापराह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचरत्यथोपनिष्क्राम्य संप्रैषमाह सुब्रह्मण्य सुब्रह्मण्यामाह्वयाग्नीद्देवा-

१ Thus M Tr UH; ॰वधा the other MSS.

२ नुपरिचारम॰ M, but cp. TS. v. 4.5.3.

नरमारुतान्निर्वप[1] प्रतिप्रस्थातः प्रवर्ग्यस्यावृता प्रवर्ग्यꣳ सꣳसाद्योदासनायेति । चेधैतत्पदं कुर्वन्ति । गार्हपत्ये तृतीयमुपयमनीषु तृतीयं नि तृतीयं दधत्यथ प्रवर्ग्यस्यावृता प्रवर्ग्यमुदास्याधिश्रयति वैश्वानरं द्वादशकपालं मारुतांꣳश्च सप्तकपालानथ गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वाहवनीये ऽनीकवन्तं जुहोत्यग्निस्तिग्मेन शोचिषेत्यनुद्रुत्य सैनानीकेन सुविदत्रो अस्मे इति जुहोत्यपरं चतुर्गृहीतं गृहीत्वाहवनीय एव वैश्वकर्मणानि जुहोति । य इमा विश्वा भुवनानि जुह्वदित्यनुद्रुत्य विश्वकर्मा ह्यजनिष्ट देव इति जुहोत्यपरं चतुर्गृहीतं गृहीत्वा चक्षुषः पितेत्यनुद्रुत्य विश्वकर्मन्हविषा वर्धनेनेति जुहोति । नानैव सूक्ताभ्यां जुहोति नानैव सूक्तयोर्वीर्यं दधातीति ब्राह्मणमथ तिस्र औदुम्बरीः समिध आदधात्युदेनमुत्तरां नयेन्द्रेमं प्रतरां कृधि यस्य कुर्मो हविर्गृह इत्यथाभ्यादधातीध्मं प्रणयनीयमुपोपयमनीः कल्पयन्ति चात्वालादथ संप्रैषमाहाग्नये प्रणीयमानायानुब्रूह्याग्नीदेकस्फ्ययानुसंधेहि द्वितीयो होताप्रतिरथमनुब्रवीत्विति । प्रतिपद्यत एष द्वितीयो होताप्रतिरथमाशुः शिशान इति । दशर्चं भवतीति ब्राह्मणमथैतेनैव सहाग्निनाददते पृश्निमश्मानमाज्यप्रोक्षं दध्नः पूर्णामौदुम्बरीं तिस्रो नानावृक्ष्या नानावृक्ष्यमिध्मꣳ शाकलान्परिधीनित्यथैनमुद्यच्छत उदु त्वा विश्वे देवा इति । षड्भिर्हरतीति

[1] Thus Tr H Ms ; मारुतानि॰ Be ; मारुतंनि॰ MUB.

ब्राह्मणं तासां द्वे परिग्राह्यवती भवतो ऽथ विषुवत्याग्नीध्रस्य काले पृश्निमश्मानं निदधाति विमान एष दिव उत्स समुद्र इति द्वाभ्यामथ चतसृभिरा पुच्छाद्देतीन्द्रं विश्वा अवीवृधन्निति धारयन्त्येतमग्निमथैनꣳ संचितमाज्यप्रोक्षेण प्रोक्षति ॥ ५१ ॥

वसवस्त्वा रुद्रैः पुरस्तात्पान्त्विति पुरस्तात्पितरस्त्वा यमराजानः पितृभिर्दक्षिणतः पान्त्विति दक्षिणत आदित्यास्त्वा विश्वैर्देवैः पश्चात्पान्त्विति पश्चाद्द्युतानस्त्वा मारुतो मरुद्भिरुत्तरतः पात्वित्युत्तरतो देवास्त्वेन्द्रज्येष्ठा वरुणराजानो ऽधस्ताच्चोपरिष्टाच्च पान्त्वित्युपरिष्टादथैतेनैव सहाग्निनाधिद्रवति प्राचीमनु प्रदिशं प्रेहि विद्वान्क्रमध्वमग्निना नाकमुख्यं पृथिव्या अहमुदन्तरिक्षमारुहꣳ सुवर्यन्तो नापेक्षन्ते ऽग्ने प्रेहि प्रथमो देवयतामिति पञ्चभिर्धारयन्त्येतमग्निमथ दध्नः पूर्णामौदुम्बरीꣳ स्वयमातृण्णायां जुहोति नक्तोषासेति पुरोऽनुवाक्यामनूच्याग्ने सहस्राक्षेति जुहोत्यथ प्रदक्षिणमावृत्यैषं प्रतिष्ठापयति सुपर्णो ऽसि गरुत्मानिति तिसृभिः सादयतीति ब्राह्मणमथैनं विस्रस्याकूतिपाहं कृत्वाध्वराकूतिभिरभिजुहोत्यग्निर्यज्ञं नयतु प्रजानन्नैनं यज्ञहनो विदन्देवेभ्यः प्रसूताद्यज्ञं प्र प्र यज्ञपतिं तिर स्वाहा वायुर्यज्ञं नयतु प्रजानन्त्सूर्यो यज्ञं नयतु प्रजानन्यज्ञो यज्ञं नयतु प्रजानन्नैनं यज्ञहनो विदन्देवेभ्यः प्रसूताद्यज्ञं प्र प्र यज्ञपतिं तिर स्वाहेत्यथावद्रुत्याग्निवत्युत्तरं परिग्राहं परिगृह्य योयुपित्वा तिर्यञ्चꣳ स्फ्यꣳ स्तब्ध्वा संप्रैषमाह

प्रोक्षणीरासादयेध्माबर्हिरुपसादयेत्यथाधिद्रुत्य आकलान्परिधीन्परिधाय नानावृक्ष्यमिध्ममभ्यज्य स्वाहाकारेणाभ्याधाय तिस्रो नानावृक्ष्याः समिध आदधाति प्रेद्धो अग्ने दीदिहि पुरो न इत्यौदुम्बरीं विधेम ते परमे जन्मन्नग्न इति वैकङ्कतीं ताꣳ सवितुर्वरेण्यस्य चित्रामिति शमीमयीमथ द्वे स्रुवाहुती जुहोति चित्तिं जुहोम्यग्ने तमद्येत्यथ स्रुचि चतुर्गृहीतं गृहीत्वाज्यस्य पूर्णाꣳ स्रुचं जुहोति सप्त ते अग्ने समिधः सप्त जिह्वा इत्यथ जुह्वन्मनसा दिशो ध्यायेद्दिग्भ्य एवैनमवरुन्द्धे । दध्ना पुरस्ताज्जुहोत्याज्येनोपरिष्टात्तेजश्चैवास्मा इन्द्रियं च समीची दधातीति ब्राह्मणमथाचैव तिष्ठन्याचति वैश्वानरं द्वादशकपालं मारुताꣳश्च सप्तकपालानथोपस्तीर्य सर्वश एव वैश्वानरमवदधदाहाग्नये वैश्वानरायानुब्रूहीति । द्विरभिघारयत्यथात्याक्रम्याश्राव्याहाग्निं वैश्वानरं यजेति । वषट्कृते मध्ये जुहोत्यथैनꣳ स्रुवाहुतिभिरभिजुहोति सुवर्न[1] घर्मः स्वाहेति पञ्चभिरथ मारुतैः प्रचरति[2] ॥ ५२ ॥

पर्युपस्तारं दर्विहोमाकारमीदृङ्[3] चान्यादृङ् चेत्यनुद्रुत्य शुक्रज्योतिश्च चित्रज्योतिश्चेति जुहोति । शुक्रज्योतिश्च चित्रज्योतिश्चेत्यनुद्रुत्य ऋतजिच्च सत्यजिच्चेति जुहोत्यृतजिच्च सत्यजिच्चेत्यनुद्रुत्यर्तश्च सत्यश्चेति जुहोत्यृतश्च सत्यश्चेत्यनुद्रुत्य यो

१ Thus U Ms, cp. TS. v. 7. 5. b; सुवर्ष the other MSS.

२ °तैः प्रचरति Tr U B Ms; °तैश्चरति MH Be Bhav.

३ दार्विहो° M.

ऽरण्ये ऽनुवाक्यो गणस्तमनुद्रुत्य जुहोति । यो ऽरण्ये ऽनुवाक्यो गणस्तमनुद्रुत्येदृचास एतादृचास इति जुहोतीदृचास एतादृचास इत्यनुद्रुत्य मितासश्च संमितासश्च न इति जुहोति । मितासश्च संमितासश्च न इत्यनुद्रुत्येदृङ् चान्यादृङ् चेति जुहोति । तानभितो वैश्वानरं परिचिनोति । गणेन गणमनुद्रुत्य जुहोत्युच्चैर्वैश्वानरस्याश्रावयत्युपांशु मारुताञ्जुहोतीति ब्राह्मणम् । ॥ ५३ ॥

अथैतं प्रसेकमश्चावायातयति दक्षिणतो वोदञ्चं पश्चाद्वा प्राञ्चं । तस्य स्रुगिव पूर्वार्धो भवत्येवमेव मध्यं । चमस इव बुध्नस्तस्मिंश्चतुर उपस्तृणान आहाप्रमत्तः संततमानय वसोर्धारां निगदिष्यामीति । स यत्र धाराग्निं प्राप्नोति तत्प्रतिपद्यते ऽग्नाविष्णू सजोषसेति सर्वामात्तं[1] वसोर्धारामथैतं प्रसेकमग्नावनुप्रहरत्यथैनꣳ सꣳस्रावेणाभिजुहोत्यथ यदाज्यमुच्छिष्यते तस्मिन्ब्रह्मौदनं पचति । तं ब्राह्मणाश्चत्वारः प्राश्नन्ति । तेभ्यश्चतस्रो धेनूर्दद्यादिति[2] ब्राह्मणमथ यास्यैतत्पुरस्तादेवौदुम्बरे द्रोणे सर्वौषधं दध्नाज्येन समुदायुतं भवति । तस्यौदुम्बरेण स्रुवेणोपघातं वाजप्रसवीयं जुहोति वाजस्येमं प्रसवः सुषुवे अग्रे वाजो नः सप्त प्रदिश इति चतुर्दश स्रुवाहुतीरभिषेकाय सरेकं परिशिनष्ट्यथैनमपिधाय प्रज्ञातं निदधात्यथ नक्तोषासेति

---

१ सर्वेम॰ M Tr H Ms; सर्वाम॰ U Be B Bhav.

२ Thus MU Be B Ms (cp. TS. v. 7.3.4); ददाति i.s. of दद्यादिति H.

कृष्णायै श्वेतवत्सायै पयो जुहोत्यथ षड्ढाद्यस्ततो जुहोत्यृताषाडृतधामेति । भुवनस्य पत इति रथमुखे पञ्चाहुतीर्जुहोत्यथ तिस्रो रुचो जुहोति यास्ते अग्ने सूर्ये रुचो या वो देवाः सूर्ये रुचो रुचं नो धेहि ब्राह्मणेष्वित्यथ पात्र्यामाज्यमानीयाञ्जलिनोपघातं वातनामानि जुहोति समुद्रोऽसि नभस्वानार्द्रदानुः शंभूर्मयोभूरभि मा वाहि स्वाहा मारुतोऽसि मरुतां गणः शंभूर्मयोभूरभि मा वाहि स्वाहावस्युरसि दुवस्वाञ्छंभूर्मयोभूरभि मा वाहि स्वाहेति । वातस्य हैके जुह्वतो मन्यन्ते[1] । ऽथैताञ्छाकलान्परिधीनग्नावनुप्रहरति । तदेतच्छाकलान्तम् । ॥ ५४ ॥ सप्तदशः ॥

अथ सदोहविर्धाने संमिनोति । सदोहविर्धाने संमित्याध्वरधिष्ण्यान्निवपति । तेषूपर्यग्निधिष्ण्यानुपदधाति समाग्ने वर्चो विहवेष्वस्त्वित्याग्नीध्रीय एकां च याजुषीं सप्त च लोकंपृणा । अथ होतुर्धिष्ण्य एकां चैव याजुषीमेकादश च लोकंपृणा । अथेतरेष्वेकैकां चैव याजुषीं सप्तसप्त च लोकंपृणा । अथ[2] मार्जालीय एकां च याजुषीं पञ्च च लोकंपृणा । अथाग्नीषोमौ प्रणयत्यग्नीषोमौ प्रणीय यूपस्यावृता यूपमुच्छ्रयति । स्वर्वन्तं यूपमुत्सृज्याग्नीषोमीयं पशुमुपाकरोति । तस्य प्रसिद्धं वपया चरित्वा वपाश्रपणी अनुप्रहृत्य[3] वसतीवरीर्गृहीत्वाथ[4]

१ Thus M Tr U H Bhav. Keś.; मन्वंते Be; मन्वते B.
२ B ins. च, Be च लोकंपृणा।
३ Here Tr ins.: समुन्नम्य चात्वाले मार्जयन्ते च
४ ॰वरीः परिहृ॰ U Be B Ms.

पशुपुरोडाशं निर्वपति । तमनुवर्तन्ते ऽष्टौ देवसुवाꣳ हवीꣳष्यग्नये गृहपतय इत्येतानि । तानि नानाबध्नन्ति[1] । नाना श्रपयन्ति । नानाधान्यानि भवन्ति । प्रैषवान्पशुपुरोडाशो ऽनुब्रूहि यजेतीतरेषाꣳ हविषाꣳ । स यत्र वारुणस्यावद्यन्नाह वरुणाय धर्मपतये ऽनुब्रूहीति तदुपभृति स्विष्टकृते सर्वेषाꣳ सकृत्सकृदुत्तरार्धादवद्यति । द्विरभिघारयति । न प्रत्यनक्त्याक्रम्याश्राव्याह वरुणं धर्मपतिं यजेति । वषट्कृते जुहोत्यथ वै भवतीष्टो वरुणो भवत्यनिष्टः स्विष्टकृदथास्य ब्रह्मा हस्तं गृह्णातीति । स[2] यचेष्टो वरुणो भवत्यनिष्टः स्विष्टकृदथास्य ब्रह्मा हस्तं गृह्णाति[2] ॥ ५५ ॥

सविता त्वा प्रसवानाꣳ सुवतामग्निर्गृहपतीनाꣳ सोमो वनस्पतीनाꣳ रुद्रः पशूनां बृहस्पतिर्वाचामिन्द्रो ज्येष्ठानां मित्रः सत्यानां वरुणो धर्मपतीनामित्येतदेव सर्वं भवति ये देवा देवसुव स्थ त इममामुष्यायणमनमित्राय सुवध्वं महते क्षत्राय महत आधिपत्याय महते जानराज्यायेत्यथैनं यजमानायतने तिष्ठन्तं प्राहैष वो ऽमी[3] राजेति येषाꣳ श्रेष्ठी भवति । सोमो ऽस्माकं ब्राह्मणानां राजेतीतरे प्रत्याहुरथ भूर्भुवः सुवरिति वाचं विसृजते । दार्भ्यां मुखं विमृष्टे प्रति

१ Thus MU Be; नानाबध्नति H; नानाबध्नंति B; नानाविध्नन्ति Ms; तानि नाना पृथक् चविध्नन्ति (sic) Msc.

२ This clause is omitted in most of the MSS.

३ भरता (as TS. i. 8.10. d) Tr only, i, s. of मी ।

त्वन्नाम राज्यमधायि सर्वं माता वरुणस्याभूवन्निति । गायत्रान्विष्णुक्रमान्क्रमते[१] विष्णोः क्रमो ऽसि विष्णोः क्रान्तमसि विष्णोर्विक्रान्तमसीत्यथ स्विष्टकृता चरति । न रौद्रस्येडामवद्यत्यपासेनमभ्यवहरन्ति गम्भिष्ठमिडान्ताः[२] पुरोडाशाः संतिष्ठन्ते । पत्नीसंयाजान्तः पशुर्हृदयशूलान्त इत्येके । ऽथ वसतीवरीः परिहृत्य पयाꣳसि विशिष्योपवसन्ति । ॥ ५६ ॥ अष्टादशः ॥

अथातो महारात्र एव बुध्यन्ते । समानं कर्मा स्रुचाꣳ सादनात्सादयित्वा स्रुचो ऽग्निं योगेन युनज्म्यग्निं युनज्मीमौ ते पक्षौ चिदसि समुद्रयोनिरिति तिसृभिरथ राजानमुपावहृत्य प्रातरनुवाकमुपाकरोति । परिहिते प्रातरनुवाके ऽपो ऽच्छैत्य ह्रदेति[३] । यः क्रतुस्तमुपैति । प्रसिद्धो ऽभिषवः । प्रसिद्धं ग्रहा गृह्यन्ते । समानं कर्माश्विनाद्ग्रहादाश्विनं ग्रहं गृहीत्वैकादश रशना आदाय यूपमभ्यैति । स्वर्वन्तं यूपमुत्सृज्यैकादशिनान्पशूनुपाकरोत्याग्नेयं कृष्णग्रीवꣳ सारस्वतीं मेषीं बभ्रुꣳ सौम्यं पौष्णꣳ श्यामꣳ शितिपृष्ठं बार्हस्पत्यꣳ शिल्पं वैश्वदेवमैन्द्रमरुणं मारुतं कल्माषमैन्द्राग्नꣳ संहितमधोरामꣳ सावित्रं वारुणं पेत्वमिति । तेषां प्रसिद्धं वपाभिश्चरित्वा प्रसर्पन्ति प्रातःसवनाय ।

---

१ Thus Mu Tr BH; गायत्रान्वि॰ Be.

२ Thus U (sec. m.) Ms; गंभीर॰ Tr HU (pr. m.) गंभिष्ठ॰ Be B; गम्भीरे ह्रदे M, which seems to be a periphrase of वपां गम्भिष्ठम्. Bhav.: रौद्रं वपाश्रपणमप्सु निनयन्ति गम्भीरे ह्रदे ।

३ Thus only M; all the other MSS. ऽदेति ।

तदृजुधा संतिष्ठते । प्रसर्पन्ति माध्यंदिनाय सवनाय । स[1] यत्र क च मध्यंदिनो[2] भवति तदेतद्धिरण्यपात्रं मधोः पूरयित्वा सौर्या चित्रवत्यावेक्ष्याघ्रमवघ्राय ब्रह्मणे ददाति । प्रसिद्धो ऽभिषवः । प्रसिद्धं ग्रहा गृह्यन्ते । समानं कर्मा दाक्षिणेभ्यो । दाक्षिणानि हुत्वा त्रिभिर्मरुत्वतीयैश्चरति । सीदन्ति नाराशꣳसा आप्यायिता दक्षिणस्य हविर्धानस्यापालम्बमधोऽधो माहेन्द्रायाय पुरस्तादभिषेकस्य षट् पार्थानि जुहोत्यग्नये स्वाहा सोमाय स्वाहेत्यथ यजमानायतने कृष्णाजिनं प्राचीनग्रीवमुत्तरलोमोपस्तृणाति । तद्यजमानं प्राञ्चमुपवेश्य सुवर्णरजताभ्याꣳ रुक्माभ्यां पर्युपास्य सर्वौषधेन पुरस्तात्प्रत्यञ्चमभिषिञ्चति । शीर्षतो ऽभिषिञ्चत्या मुखादन्ववस्रावयति ॥ ५७ ॥

देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ सरस्वत्यै वाचो यन्तुर्यन्त्रेणाग्नेस्त्वा साम्राज्येनाभिषिञ्चामीन्द्रस्य त्वा साम्राज्येनाभिषिञ्चामि बृहस्पतेस्त्वा साम्राज्येनाभिषिञ्चामीति[3] । समुन्मृष्टे समुत्क्रोशन्त्यभ्यषेच्ययमसावामुष्यायणो ऽमुष्य पुत्रो ऽमुष्य पौत्रो ऽमुष्य नप्ताग्निसवेनेत्यथ भूर्भुवः सुवरिति वाचं

---

१ om. Be H.

२ माध्यंदिनो Tr H.

३ Some of the MSS. (MU Tr) give the formula बृहस्पतेस्त्वा etc. before इन्द्रस्य त्वा etc.; B Be give a text exactly as found TS. i. 7.10.h; H abbreviates thus: ॰ईस्त्वा साम्राज्येनाभिषिंचामीन्द्रस्य त्वा ॰मिति

विसृजते । द्वाभ्यां मुखं विमृष्टे । गायत्रान्विष्णुक्रमान्क्रमते[1] । ऽथोपरिष्टादभिषेकस्य षट् पार्थानि जुहोति ॥ ५८ ॥

इन्द्राय स्वाहा घोषाय स्वाहेति । द्वादश भूतानामवेष्टीर्जुहोति पृथिव्यै स्वाहान्तरिक्षाय स्वाहेत्यं । जुधा माध्यंदिनꣳ सवनꣳ संतिष्ठते । प्रसर्पन्ति तृतीयसवनाय । प्रसिद्धमादित्यग्रहेण चरित्वाग्रयणं गृह्णाति । समानं कर्म पवमानात् । पवमानेन चरित्वा स्वे धामन्पशुभिश्चरति[2] । तेषां नाना मनोता नाना देवता नाना प्रत्यभिमर्शना नाना वसाहोमाः समानो वनस्पतिः समानः स्विष्टकृत्प्रैषवान्समानीडा समान्यो दिशो । नाना दिश इत्येके । समानं कर्म यज्ञायज्ञियस्य[3] स्तोत्रा- । द्यज्ञायज्ञियस्य[3] स्तोत्र एकयाप्रस्तुतं भवत्यथाग्निमभिमृशति नमस्ते अस्तु मा मा हिꣳसीरुद्रो दत्तोदधिं भिन्तेति द्वाभ्याꣳ । समानं कर्म पत्नीसंयाजेभ्यः । पत्नीः संयाज्य प्राङेत्य ध्रुवामाप्याय्याध्वरिकाणि समिष्टयजूꣳषि हुत्वा दशाग्निकान्युपजुहोति यदाकूतात्समसुस्रोदिति । समानं कर्मावभृथादथैतस्मिन्नवभृथे द्वितीयामवभृथाहुतिं जुहोति समुद्राय वयुनाय सिन्धूनां पतये नम इति । प्रसिद्धो ऽवभृथ । उदयनीयेष्ट्वेष्टा[4]

१ Thus Tr BHU Ms; गायत्रान् Be; गायत्रा M.

२ Thus M Tr BU (sec. m.) Ms; चरंति U (pr. m.) H Be.

३ Thus, with *i*, U Be H (the second time); with ī (both times) M Tr Ms.

४ Thus H; उदयनीयेनेष्ट्वा Tr BU; उदयनीयेष्ट्वा M.

मैत्रावरुणीं वशामुपाकरोति । तस्यै मैत्रावरुण्यामिक्षाध्यवदानीया भवति । सर्वमꣳस्यां पशोः कुर्वन्त्यथ गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वाप्यस्य पूर्णाꣳ स्रुचमग्नेर्विमोकं जुहोतीमꣳ स्तनमूर्जस्वन्तं धयापामित्यथैनमुपतिष्ठते ये ऽग्नयः पुरीष्या इत्यथैनमाग्निभिरुपतिष्ठत आपं त्वाग्ने मनसेति नवभिरनुष्टुप्छन्दसमथोदवसानीयया यजते । ऽथ देविकाहविर्भिर्यजते । ऽथ त्रैधातवीयया यजते । ऽथ सौत्रामण्या यजते । संवत्सरं न कंचन प्रत्यवरोहति । न शीर्षमाꣳसं खादति न वयसां माꣳसं । नाग्निं चित्वा रामामुपेयाच्चाग्निचिद्वर्षति धावेद्यदि धावेदुपावर्तेतात्मानमेवाभ्युपावर्तेत इति ब्राह्मणम् । ॥ ५९ ॥ एकोनषष्टिः ॥

॥ इति दशमः प्रश्नः ॥

वाजपेयेन यक्ष्यमाणो भवति। स उपकल्पयते कृष्णाजिनꣳ सुवर्णरजतौ च रुक्मौ बस्ताजिनꣳ शतमानꣳ हिरण्यꣳ सप्तदश सुवर्णानि[1] कृष्णलानि हिरण्यपात्रं मधोः पूर्णमौदुम्बरꣳ रथचक्रꣳ सप्तदशारꣳ सप्तदशफलकां च श्रितिं[2] यूपं च तूपरं चतुरश्रिꣳ सप्तदशारत्निं गोधूमकलापीमुष्णीषं[3] नैवारꣳ सप्तदशशरावꣳ सप्तदशोषपुटान्सप्तदश[4] वायव्यानि सप्तदश पृथुबुध्नानुपयामान्सुतं च वाजं च सप्तदश निष्कान्सप्तदश वसनानि सप्तदश वासोभारान्सप्तदश रथान्सप्तदश दुन्दुभीन्सप्तदश हस्तिनः सप्तदश दास्यः सप्तदशानाꣳसि युक्तानि सप्तदश गवाꣳ शतानि वयसोवयसो वा सप्तदश सहस्रं[5] वा। तस्मिन्हि सर्वाणि वयाꣳसि भवन्ति। चतुर्विꣳशतिं पशूनेकपञ्चाशतमश्वान्खादिरौ विहर्षौ[6] वध्रैर्व्यूतौ[7]। प्रज्ञाता आग्निष्टोमिकाः संभाराः। स दीक्षस्य जघन्याहःसु पुरस्तादाषाढ्यै पौर्णमास्यै

१ सौवर्णानि U Be 11.

२ Thus M Tr Be (sec. m.) Bhav. (one copy); श्रुतिं U (sec. m.); the other MSS. श्रौतिं, सौतिं, स्रुतिं (Bhav. another copy).

३ Thus MU Be 11; •कलापि• T Be B; •कलापा• F.

४ •पुटिकान् M (Bhav.).

५ साहस्रं M.

६ Thus M Tr Bhav.; विहर्षां U Be 11; विहर्षौ' Be B; विहर्षा F; विह H.

७ Thus FH; वध्रैर्व्यू• Be 11 Bhav. (one copy); वध्रैर्व्यूं• Be and M (without, however, the r); वध्रैव्यू• U; वैध्रैर्व्यू• B; वर्ध्रैर्व्यू• Tr.

दीक्षते । तस्य त्रयोदश दीक्षास्तिस्र उपसदः सप्तदश्यां[१] प्रसुतो । ऽपि वा सप्तदश दीक्षास्तिस्र उपसद एकविंꣳशत्यां प्रसुतो । ऽपि वा तिस्र एव दीक्षास्तिस्र उपसदः सप्तम्यां प्रसुतः । ॥ १ ॥

अथ वै भवति सावित्रं जुहोति कर्मणःकर्मणः पुरस्तादिति । दीक्षणीयां[२] निर्वप्स्यन्सावित्रं[२] जुहोति देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय दिव्यो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाचमद्य स्वदाति नः स्वाहेति । दीक्षाहुतीर्होष्यन्सावित्रं जुहोति । प्रायणीयां[३] निर्वप्स्यन्सावित्रं[३] जुहोत्यन्तर्हिरण्याꣳ[४] होष्यन्सावित्रं जुहोति । पदेन चरति । पदेन चरित्वा राजानं क्रीत्वोद्यातिथ्यं निर्वप्स्यन्सावित्रं जुहोति । प्रथमाभ्यां प्रवर्ग्योपसद्भ्यां प्रचरिष्यन्सावित्रं जुहोत्येतस्मिन्काले प्रतिप्रस्थाता दक्षिणे शालाखण्डे ऽवटं खानयित्वा वाजपेयसुराꣳ संधापयति । महावेद्यै पूर्वं परिग्राहं परिग्रहीष्यन्सावित्रं जुहोत्याहवनीयं प्रणेष्यन्सावित्रं जुहोति । रथवाहने सदोहविर्धाने संनेष्यन्सावित्रं जुहोत्यग्नीषोमौ प्रणेष्यन्सावित्रं जुहोतीति

१ Thus M Tr U Be 11 Be (sec. m.); सप्तदशौ (as Āp. xviii. 1.6) B Be (pr. m.); सप्तदशा F.

२ Thus M Be (sec. m.) Be 11 F; •णीयाग्नि• Tr BH Be (pr. m.); दीक्षणीयायां U.

३ Thus Be UF; प्रायणीयाग्नि• Tr BH Be; प्रायणीयं M.

४ Thus U Tr HF Be 11 Bhav.; •हिरण्याꣳ M Be.

इशान्तःशालमहौषीदथात्[1] आग्नीध्र[2] एव होष्यति । यूपमुच्छ्रयिष्यन्त्सावित्रं जुहोति । यदाध्वर्युश्च[3] यजमानश्च पुरस्तात्प्रत्यञ्चावञ्जन्तावभिसर्पतो[4]ऽथ प्रतिप्रस्थाता पश्चात्प्राङ् वासोभिर्वेष्टयन्नभिसर्पत्युदीचीनदशैर्वा विग्रथ्नाति धनुर्वेष्टीर्वा[5] प्रवेष्टयत्यैतस्मिन्काले[5] प्रतिप्रस्थाता गोधूमकलापीमुभयतः समां कल्पोष्णीषेण विग्रथ्नाति । तस्यां तच्चेष्टन्ति यच्चषाले । स्वर्वन्तं यूपमुत्सृज्याग्नीषोमीयं पशुमुपाकरिष्यन्त्सावित्रं जुहोति । तस्य प्रसिद्धं वपया चरित्वा वसतीवरीर्ग्रहीष्यन्त्सावित्रं जुहोति । पशुपुरोडाशं निर्वप्स्यन्त्सावित्रं जुहोत्यनुसवनं त्रीणि । तानि सप्तदशापि[6] वा[6] सवनेसवन एव जुहुयादित्येतदपरमथ पशुपुरोडाशं निर्वपति । तमनुवर्तन्तेऽष्टौ देवसुवाꣳ हवीꣳष्यग्नये गृहपतय इत्येतानि । तेषामुक्तं चरणं यथाग्रेर्विधायामिडान्ताः

---

१ After अहौषीद् B Be U ins. इति ; Keś. cites the clause without इति ; it could, however, be right, cp. Vol. I. p. 193, 15.

२ आग्नीध्रीय Tr.

३ यजा° Be B ; the passage referred to is Vol. I., p. 113, 5 sqq.

४ Thus Be (sec. m.) Bhav. ; प्रत्यञ्चावाञ्जन्तावभि° Tr ; °वंजंतावभिस° Be (pr. m.) B ; °वंजसावनसर्पंतो UH ; °वांजसाववसर्पंतो Be11 ; °वंजसो-ववस M ; °वाजसवबस° F ; read perhaps °प्रत्यञ्चावञ्जसोपसर्पंतौ ।

५ धनुर्वेष्टीर्वा प्रवे° Tr Be B ; धनुर्वेष्टिं वा प्रवे° Be 11 HF ; धनुर्वेष्टितं प्रवे° U ; धनुर्वेष्ट इव प्रतिवे° M. The Dvaidhasūtra citing this passage reads धनुर्वेष्टीर्वा प्रवे° ; I am not certain about the correct reading and the meaning of these words. Bhav. comments : धनुर्वेष्टनवद्वेष्टयति वा ।

६ अपि वा om. B Be.

पुरोडाशाः संतिष्ठन्ते । पत्नीसंयाजान्ताः पश्विडहृदयशूलान्ता इत्येके । ऽथैतान्दुन्दुभीननुदिशमामन्त्रयति पञ्च दक्षिणायाꣳ श्रोण्यां पश्चोत्तरस्यां चतुरो दक्षिणे ऽꣳसे त्रीनुत्तरे ऽꣳसे । तथा ह्यस्मै दिग्भ्यो वाचमवरुन्धत इति ह स्माह बौधायनो । ऽग्रेणाग्नीध्रं गुल्फदघ्ना आसक्ताः स्युरित्याग्नीगविरंभितः सद इति कात्यो । ऽथ वसतीवरीः परिहृत्य पयाꣳसि विश्रित्योपवसन्ति । ॥ २ ॥ प्रथमः ॥

अथातो महारात्र एव बुध्यन्ते । प्रातराज्यानि गृहीत्वा राजानमुपावहृत्य प्रातरनुवाकमुपाकरोति । परिहिते प्रातरनुवाके ऽपो ऽच्छैत्यपो ह्यध्वर्युरभिद्रवत्येतस्मिन्काले[1] प्रतिप्रस्थाता वाजपेयसुराꣳ संपवय्य[2] सग्रहामादाय दक्षिणया द्वारोपनिर्हृत्य दक्षिणेन सदः परीत्य दक्षिणेन मार्जालीयं धिष्ण्यं पर्याहृत्यापरया द्वारा हविर्धानं प्रपाद्य दक्षिणस्य हविर्धानस्य पश्चादक्षमुपसादयत्यथाध्वर्युरद्भिरुदेति[3] । सर्वान्कृदनुपैति । प्रसिद्धो ऽभिषवः । प्रसिद्धं ग्रहा गृह्यन्ते । समानं कर्माग्रयणाद्ग्रहादाग्रयणं[4] गृहीत्वा पञ्चैन्द्रानतिग्राह्यान्गृह्णात्युपयामगृहीतो ऽसि नृषदं त्वा द्रुषदमित्येताभिः पञ्चभिरथैना-

१ ह before अध्वर्यु॰ only in Tr Be B; वाध्वर्यु॰ M and अभिद्रवति Be 11 Tr; अभिद्रवति H.

२ Thus Tr U Be Be' 11 (pr. m.); सपंवय्य F; संपवयति M; संपवयति Be 11 (sec. m.); संपवयत्य H.

३ Thus M; उदेति all the other MSS.

४ Some of the MSS. insert ग्रहं ।

न्दक्षिणार्धपूर्वार्धे खरस्य शुल्बकृतान्सादयति । यावदेवाचाध्वर्युश्चेष्टति तावदेष प्रतिप्रस्थाता सत उदीचीनदशेन वालेन सुरां पुनाति पुनातु ते परिस्रुतꣳ सोमꣳ सूर्यस्य दुहिता । वारेण शश्वता तनेति । वायव्यमेवाध्वर्युरादत्त उपयामं प्रतिप्रस्थाताध्वर्युः पूर्वो वायव्येन द्रोणकलशात्सोमग्रहान्गृह्णात्यया विष्ठा जनयन्कर्वराणीत्यनुद्रुत्योपयामगृहीतो ऽसि प्रजापतये त्वा जुष्टं गृह्णामीति । परिमृज्य सादयत्येष ते योनिः प्रजापतये त्वेत्यथ प्रतिप्रस्थातोपयामेन सतात्सुराग्रहान्गृह्णाति कुविदङ्ग यवमन्त इत्यनुद्रुत्योपयामगृहीतो ऽसि प्रजापतये[1] त्वेति गृह्णाति । प्रजापतये त्वेति सादयति । नैव[1] जुष्टं करोति न[2] योनिं । तावेवमेव व्यतिषक्तं ग्रहान्गृह्णीतः समृद्ग्रेतरः समृद्ग्रेतरः । पुरो ऽक्षमेवाध्वर्युः सोमग्रहान्द्विश्रेणि[3] वा त्रिश्रेणि[3] वोदीच आयातयति । पश्चादक्षं प्रतिप्रस्थाता सुराग्रहान्द्विश्रेणि[3] वा त्रिश्रेणि[3] वोदीच आयातयत्यथ षोडशिनं गृह्णात्यातिष्ठ वृत्रहन्रथमित्यनुद्रुत्योपयामगृहीतो ऽसीन्द्राय त्वा षोडशिने जुष्टं गृह्णामीति । परिमृज्य सादयत्येष ते योनिरिन्द्राय त्वा षोडशिन इत्यथोक्थ्यं गृह्णाति । समानं कर्मा-

---

१...१ Thus according to B Be Tr; MFH only: प्रजापतये त्वेति सादयति नैव; Be 11 U: प्रजापतये त्वा गृह्णामीति दर्भैः परिमृज्य प्रजापतये त्वेति सादयति नैव।

२ नैव Be 11 U.

३ द्विः० and त्रिः० HU.

श्विनाद्ग्रहादाश्विनं ग्रहं[१] गृहीत्वा षड्गना आदाय यूपमभ्येति[२] । स्वर्वन्तं यूपमुत्सृज्याथैतान्पशूनुपाकरोत्याग्नेयमैन्द्राग्नमैन्द्रं मारुतीं गोवशाꣳ सप्तदश प्राजापत्याञ्छ्यामानेकरूपान्सारस्वतीमन्ततो । ऽथ निर्मन्थ्यमाहृत्य निर्मन्थ्येन चरति । प्रहृत्याभिहुत्याथैतानानादेवत्यान्पशून्पृथग्द्विगुणाभिरभिधाय पृथक् त्रिगुणासु नियुनक्त्यथैतान्समानदेवत्यान्पशून्पृथग्द्विगुणाभिरभिधायैकस्यां यूप्यायां नियुनक्त्यपि वा पशौ पशुं प्रसजति[३] । सारस्वतीमन्ततो नियुज्याथैनान्प्रोक्ष्य निपाय्योपोक्ष्योदूह्य प्रोक्षणीधानम् ॥ ३ ॥

अथेध्मात्समिधमाददान आहाग्नये समिध्यमानायानुब्रूहीत्यभ्यादधातीध्मं । परि समिधꣳ शिनष्टि । वेदेनोपवाजयत्यनूक्तासु सामिधेनीषु स्रुवेणाघारमाघारयति । संमृष्टे स्रुग्भ्यामुत्तरमंसामꣳस्पर्शयन्स्रुचावुदङ्ङत्याक्रम्य जुह्वा पशून्समज्य सादयित्वा स्रुचौ प्रवरं प्रवृणीते । प्रसिद्धमृत्विजो वृणीते । सीदति होता । प्रसवमाकाङ्क्षति । प्रसूतः स्रुचावादायात्याक्रम्याश्राव्याह समिधः प्रेष्येति । वषट्कृते जुहोति प्रेष्य प्रेष्येति चतुर्थाष्टमयोः समानयमानो ऽष्टमे सर्वꣳ समानयते । परि स्वाहाकृतीभ्यः सꣳस्रावꣳ शिनष्टि । दश प्रयाजानिष्ट्वोदङ्ङत्या-

---

१ Om. M Tr Be U.

२ Thus M Tr B Be Keś.; अभ्येति Be11 UFH.

३ Thus Be11 F; प्रसंजति Tr; प्रतिसजति U; प्रसजाति H; प्रसंजयति M; नियुनक्ति Be.

क्रम्य स्वरुशासैः पशून्समनक्ति । त[1] एते[1] नानादेवत्याः पशवो नानास्वरवो नानाशासा अथैते समानदेवत्याः पशवः समानस्वरवो नानाशासाः[2] । समानं कर्म पर्यग्निकरणादथ पर्यग्निकृतैः पशुभिरुदञ्चः प्रतिपद्यन्ते । तेषाꣳ सारस्वत्युत्तरार्ध्या भवत्याग्नेय उपचारत[3] । आग्नेयमेवाध्वर्युर्वपाश्रपणीभ्यामन्वारभते । पृथगितरान्परिकर्मिण उदञ्चो नयन्त्यनुपूर्वमव्यतिषजन्त[4] । आग्नेयायैवाध्वर्युः पशवे निहन्यमानाय बर्हिरुपास्यति पृथगितरेभ्यस्तत इतरान्प्राचो वोदीचो वा निघ्नन्त्यक्ष्णतो मायुꣳ संज्ञपयतेत्युक्त्वैतेनैव यथेतमेत्य पृषदाज्यावकाश आसत इह प्रजा[5] विश्वरूपा रमन्तामस्मिन्यज्ञे विश्वविदो घृताचीः । अग्निं कुलायमभिसंवसाना अस्माꣳ अवन्तु पयसा घृतेनेति । संज्ञप्तान्प्राहुर्जुहोति संज्ञप्ताहुतिं यत्पशवो मायुमकृषतेत्यथाभ्यैति[6] शमितार उपेतनेति । पाशेभ्यः पशून्प्रमुच्यमानाननुमन्त्रयतेऽदितिः पाशान्प्रमुमोक्त्वेतानिति । पृथगविशाखाभिरुपमज्येमां दिशं निरस्यत्यरातीयन्तमधरं कृणोमि यं द्विष्मस्तस्मिन्प्रतिमुञ्चामि पाशानिति । ॥ ४ ॥

---

१ Thus M Tr Be 11 HF; अथैते B Be U (sec. m.).

२ समानाशासाः M.

३ उपचरत M Tr U.

४ Thus M Be 11 UHF; °ानुपूर्व्यम° Be B Tr.

५ Thus (cp. Vol. I., p. 118, 1) Be 11 F; पशवो M Tr Be UH Keś.; Āp. (vii. 17. 1) has also पशवो but the fem. घृताचीः (घृताच Tr F) points to प्रजाः, cp. also Maitr. S. iv. 2. 10.

६ Thus all exc. B (: अभ्येति).

अथ प्रतिप्रस्थाता पत्नीमुदानयत्युदकमण्डलुमुत्थाप्य मानुपूर्व[1] पशूनां प्राणानाप्याययत्यन्वगध्वर्युर्वपा उत्खिदन्नेत्याग्नेयस्यैवाध्वर्युर्वपया[2] प्रथमया प्रतिपद्यते ऽनूचीरितरा आहरन्त्याग्नेयस्यैव वपायै प्रतितप्यमानायै बर्हिषो ऽग्रमुपास्यत्युपेतरा यच्छन्त्याग्नेयस्यैव वपाꣳ स्रुवाहुत्याभिजुहोत्युपेतरा यच्छन्त्यथ स्वाहाकृतिप्रैषेण चरित्वा मꣳस्रावेण पृषदाज्यमभिघार्याग्नेयस्यैव वपामभिघारयत्युपेतरा यच्छन्त्यथ पुरस्तात्स्वाहाकृतिꣳ स्रुवाहुतिꣳ हुत्वाथैतेषां नानादेवत्यानां पशूनामनुब्रूहि प्रेष्येति वपाभिश्चरत्यथैतेषाꣳ[3] समानदेवत्यानां पशूनां मुख्यस्य वपाꣳ समवछुम्पन्नाह प्रजापतय इत्युपाꣳशु छागानां वपानां मेदसो[4] ऽवदीयमानस्यानुब्रूहीत्युच्चैर्यावतीः[5] स्रुक्संभवत्यथेतराः[6] पात्र्या वेडसूनेन वोपोद्यच्छन्ते दिरभिधारयत्यत्याक्रम्याश्राव्याह प्रजा-

---

१ Thus Tr B Be F; मानुपूर्वं U Be 11 H; उत्थाप्यानुपूर्वं M.

२ Thus (उत्खिदन्नेति) Tr; उत्खिदन्नेति M Be; उत्खिदन्तेति B; उत्खिदति or उद्धरति the other MSS.; Bhav.: उद्धरन्गच्छति।

३ चरित्वाथै° Tr Be B.

४ मेदसोऽवदीयमानस्य Tr Be (pr. m.) BF; °वदीयमानानाम° Be 11 U; H is partly corr. but reads ऽवदीयमानस्य; M pr. m. gen. sing., sec. m. (not wholly certain) gen. plur. of the part.; मेदसोवदीयमानानाम° Be 11 U Keś; वपानां मेदसामवदीयमानानाम° Be (sec. m.).

५ यावतीः (sc. वपाः?) M Be 11 U; यावत् Be B; यावति Tr.

६ Thus only Tr, cp. xv. 31. स्रुक्स्यांभवति U, H; स्रुक्संभवति F; स्रुवसंस्थभवति B; स्रुक्तंभवति M; स्रुक्स्यांभवति Be 11 Be.

पतय इत्युपांशु छागानां वपा[1] मेदः प्रस्थितं प्रेष्येत्युच्चैर्वषट्कृते वपा[2] जुहोत्युपांशु सारस्वत्यै वपया [3]चरत्यथोपरिष्टात्स्वाहाकृतिꣳ स्रुवाहुतिꣳ हुत्वा वपाश्रपणीरनुप्रहृत्य समुत्क्रम्य चात्वाले मार्जयन्ते । ऽथ पशून्विशास्ति[4] शमितरित्याह यन्मारुत्या अनवदानीयं तदभ्यर्धाच्छ्रपयतादित्यथ[5] सावित्रꣳ हुत्वा प्रसर्पन्ति प्रातःसवनाय । तदृशुधा संतिष्ठते । ॥ ५ ॥ द्वितीयः ॥

अथ सावित्रꣳ हुत्वा प्रसर्पन्ति माध्यंदिनाय सवनाय देवी द्वाराविष्यन्त एवोर्ध्वेन । संप्रसृप्तान्विदित्वाध्वर्युः प्राङायन्नाह चात्वाले रथचक्रं निमिनुत रथवाहने रथमाधत्ताश्वान्पल्पूलयत यद्वास्यत्रर्षि[6] तद्दक्षिणत उपस्थापयाभिषोतार[7] एत ह्वयत ग्रावस्तुतमेहि यजमानेति । प्रसिद्धो ऽभिषवः । प्रसिद्धं ग्रहा गृह्यन्ते । समानं कर्माग्रयणाद्ग्रहादाग्रयणं गृहीत्वा षोडशिन-

---

१ वपा Be 11 HF; वपानां M Tr Be B.

२ वपा om. all exc. Be B.

३ प्रचरत्य° B Be H.

४ विशास्तीति Be U (sec. m.); विशाधिति B; विशास्ति the other MSS. (also U pr. m.).

५ Thus Be 11 (sec. m.); तदर्धाच्छ्र° M; तदभ्यर्धाच° Tr; तदयद्राच्छ्र° Be 11 (pr. m.); तपयशा(?)श° H; the other MSS. corr.; Bhav. seems to have read अपार्धात्; the meaning is पृथक्।

६ Thus U Be 11 H; इदास्यवृषि F; वेददास्यो B; यद्वास्यो Be, यद्वास्य (broken off) भिनोदचिष° M; यद्वास्यो Tr; after ऋषि H ins. वेदेः, Be B: मार्जालीये, Tr: मार्जालीयं; these MSS. om. तद्।

७ Thus Be 11 UHF; °स्थापयताभि° M Tr B Be.

मभिगृह्णातीन्द्रमिद्धरी वहत इत्यनुद्रुत्योपयामगृहीतो ऽसीन्द्राय त्वा षोडशिने जुष्टं गृह्णामीति । परिमृज्य सादयत्येष ते योनिरिन्द्राय त्वा षोडशिन इत्यथोक्थ्यं गृह्णाति । समानं कर्मा दाक्षिणेभ्यो । दाक्षिणानि होष्यन्नाचत्याज्यस्थालीꣳ सस्रुवाꣳ स्रुचं वासस्तस्यैतस्य वसनस्यान्तमायां दशायां निष्करज्जुः प्रग्रथिता[1] भवत्येतत्समादायाहेहि[2] यजमानेत्युत्तरेणाग्नीध्रीयं परीत्योत्तरेण[3] सदः परीत्याग्रेण शालां तिष्ठते[4] प्रतिप्रस्थाता एतानि शस्त्राणि प्रयच्छत्यथाहेहि यजमानेति । रथ एष दक्षिणे श्रोण्यन्ते रथवाहन आहितो भवति । तमुपावहरतीन्द्रस्य[5] वज्रो ऽसि वार्त्रघ्नस्त्वयायं वृत्रं वध्यादित्यथैनं धूर्गृहीतमन्तर्वेद्यभ्यववर्तयन्ति[6] वाजस्य नु प्रसवे मातरं महीमदितिं नाम वचसा करामहे । यस्यामिदं विश्वं भुवनमाविवेश तस्यां नो देवः सविता धर्म साविषदित्यथाप्स्वश्वान्पल्पूलयत्यप्स्वन्तरमृतमप्सु[7] भेषजमपासुत प्रशस्तिष्वश्वा भवथ वाजिन इत्यथ दक्षिणं योग्यं युनक्ति वायुर्वा त्वा मनुर्वा त्वा

---

१ Thus Be 11 UF, Bhav., Keś.; °थितो the other MSS.

२ भवतीत्येत° M Tr.

३ पर्याहृत्य i. s. o. परीत्य Be B.

४ तिष्ठन् M; तिष्ठति F; तिष्ठते the other MSS.

५ Thus Tr Be 11 Be BU (sec. m.); pluralis verbi the other MSS.; अवतारयति Bhav. Keś.

६ Thus M Tr U (pr. m.); अभ्याववर्तयंति Be BTU (sec. m.). आवर्तयति H; प्रवेशयंति Keś.; cf. infra xii. 7 (p. 95, l. 10).

७ The first अप्सु om. MH.

गन्धर्वाः सप्तविंशतिः । ते अग्रे अश्वमयुञ्जन्ते अस्मिञ्जवमादधुरित्यथास्य पृष्ठं मर्मृज्यते ऽपां नपादाशुहेमन्य ऊर्मिः ककुद्मान्प्रतूर्तिर्वाजसातमस्तेनायं वाजꣳ सेदित्येवमेवोत्तरं योग्यं युनक्ति । तस्यैवमेवोत्तरतः प्रष्टिमुपनियुनक्ति । तयोरेवमेव पृष्ठे[1] मर्मृज्यत । एतस्य योगमनु सर्वमाणिवयुज्यते । ऽधिकक्ष्यान्हस्तिनः कुर्वन्ति । प्रवेष्टयन्ति वासोभाराश्वसनानां दशासु निष्करण्ठूः प्रबध्नन्ति । पूगशो दक्षिणा आयातयत्यथ सौरीभ्यामृग्भ्यां गार्हपत्ये जुहोति । नयवत्यर्चाग्नीध्रे जुहोति[2] । सृज्यन्ते[2] दक्षिणा दक्षिणापथेन । स यत्किंचिद्ददाति[3] हिरण्यमुखमेव ददात्यथ वासाꣳस्यथ[4] युक्तानि गोअश्वꣳ हस्तिपुरुषमन्ततो[5] । ऽदत्ता एवैते रथा अतिवर्तन्ते । नैते ऽन्यस्य सन्त आजिं धावन्ति । मनसैव स्वरथमध्वर्यवे ददाति मनसा समनुदिश्य[6] दक्षिणाभिर्मरुत्वतीयैश्चरति । सीदन्ति नाराशꣳसा आप्यायिता दक्षिणस्य हविर्धानस्यापालम्बमधोऽधो[7] माहेन्द्राय । ॥ ६ ॥

---

१ पृष्ठे M Tr Be U; पृष्ठं BFH.

२ Thus M Tr Be 11 HF; जुहोत्युत्सृज्यन्ते Be B; जुहोति सृज्यन्ति U.

३ यत्किंचद° Tr.

४ Thus Tr HF; Be B वनाꣳसि i.e. of वन; M (injured): ...वना...सि ददाति वन युक्ता वनो ।

५ Before पुरुष° Tr F ins. दास°, H दासी; Bhav.: हस्तिपुरुषम्; cf. infra xii. 7.

६ समनुदिश्य UH Be 11; सनुदिश्य M Tr Be B; सनुदिश्यं F.

७ Thus, with पा, all, also Keś. but Be sec. m. °पालंबम° ।

अथ याचति नैवारꣳ सप्तदशशरावꣳ स एष क्षीरे श्रृतो भवति । तेन चरति[1] बृहस्पतये ऽनुब्रूहि बृहस्पतिं यजेति । तमनिष्टस्विष्टकृतमपिधाय प्रज्ञातं निदधात्यथास्यैतत्पुरस्तादेवौदुम्बरे द्रोणे सर्वौषधं दध्नाज्येन समुदायुतं भवति । तस्यौदुम्बरेण स्रुवेणोपघातꣳ सप्तान्नहोमाञ्जुहोति वाजस्येमं प्रसवः सुषुवे ऽग्र इत्यभिषेकाय प्रैकं परिश्रिनक्त्यथैनमपिधाय प्रज्ञातं निदधात्यथ पुरस्तादभिषेकस्य षट् पार्थानि जुहोत्यग्नये स्वाहा सोमाय स्वाहेत्यथ यजमानायतने कृष्णाजिनं प्राचीनग्रीवमुत्तरलोमोपस्तृणाति । तद्यजमानं प्राञ्चमुपवेश्य सुवर्णरजताभ्याꣳ रुक्माभ्यां पर्युपास्य सर्वौषधेन पुरस्तात्प्रत्यञ्चमभिषिञ्चति । ग्रीवतो ऽभिषिच्य मुखादन्ववस्रावयति देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ सरस्वत्यै वाचो यन्तुर्यन्त्रेणाग्नेस्त्वा साम्राज्येनाभिषिञ्चामीन्द्रस्य त्वा[2] साम्राज्येनाभिषिञ्चामि[2] बृहस्पतेस्त्वा साम्राज्येनाभिषिञ्चामीति । समुन्मृष्टे समुत्क्रोशन्त्यभ्यषेच्ययमसावामुष्यायणो ऽमुष्य पुत्रो ऽमुष्य पौत्रो ऽमुष्य नप्ता वाजपेयेनेत्यथ भूर्भुवः सुवरिति वाचं विसृजते । दाभ्यां मुखं विमृष्टे । गायत्रान्विष्णुक्रमान्क्रमते[3] । ऽथोपरिष्टादभिषेकस्य षट् पार्थानि जुहोती-

---

१ प्रचरन्ति Be B.

२ Tr Be B U (sec. m.) om.; M places बृहस्पतेस्त्वा etc. before इन्द्रस्य त्वा ।

३ Thus Tr U Be 11 H F; गायत्राभि॰ M Be B.

न्द्राय स्वाहा घोषाय स्वाहेति । द्वादश भूतानामवेष्टीर्जुहोति पृथिव्यै स्वाहान्तरिक्षाय स्वाहेत्यथैतस्य बार्हस्पत्यस्य स्विष्टकृता चरत्यथैनमादायान्तरेण चात्वालोत्करावुदङ्ङुपनिष्क्रामत्युत्तरत[1] एते[2] रथा युक्तास्तिष्ठन्ति[3] । तदेतान्यजुर्युंजो ऽश्वानवघ्रापयति वाजिनो वाजजितो वाजꣳ सरिष्यन्तो वाजं जेष्यन्तो बृहस्पतेर्भागमवजिघ्रतेत्यथैनमपिधाय प्रज्ञातं निदधात्यथ रथमभिप्रैति विष्णोः क्रमो ऽसि विष्णोः क्रान्तमसि विष्णोर्विक्रान्तमसीत्यथ रथस्य पक्षसी संमृशत्यङ्कौ न्यङ्कावभितो रथं याविति[4] । रथमातिष्ठति देवस्याहꣳ सवितुः प्रसवे बृहस्पतिना वाजजिता वाजं जेषमित्येतस्मिन्काले चात्वाले रथचक्रं निमितं ब्रह्मारोहति । तमत[5] एवानुमन्त्रयते देवस्याहꣳ सवितुः प्रसवे बृहस्पतिना वाजजिता वर्षिष्ठं नाकꣳ रुहेयमित्यथ यजमानमन्वाख्यायोज्जितीर्वाचयत्यग्निरेकाक्षरेण वाचमुदजयदिति सप्तदशाथास्मा अश्वाजनीं[6] प्रयच्छत्यश्वाजनि वाजिनि वाजेषु वाजिनीवत्यश्वान्समत्सु वाजयेति । तया यथायुक्तमश्वान्विप-

---

१ °क्रामंत्यु° M U Be 11 Bo Be (pr. m.); °क्रामत्यु° Tr Be (sec. m.) Bhav., Keś.

२ एवैते Tr Be 11 U.

३ युक्तास् om. Be B.

४ Tr Be B ins. अथ ।

५ अवतस् i.s.o. अत M.

६ Thus Be 11 U F, Keś., Bhav. (one copy); अश्वाजनिं Tr; अश्वाजनी M; अश्वाजिनिं Be; अश्वाजिनं B; अश्ववाजिनीं H.

त्यवांसीति दक्षिणꣳ सप्तिरसीति मध्यमं वाज्यसीत्युत्तरमथैतानाजिसृतो[1] ऽवख्यापयति[2] वाजिनो वाजं धावत मरुतां प्रसवे जयत वि योजना मिमीध्वमध्वन स्कभ्नीत काष्ठां गच्छतेत्यौदुम्बर्येषा स्थूणा सप्तदशसु शम्याप्रव्याधेषु निमिता। तां काष्ठेत्याचक्षते। तामाजिसृतो ऽतीत्य[3] मा[3] गच्छत[3] मो[4] एनामप्राप्य[4] निवृत्ततान्तःपत्नसमेनां[5] कृत्वा सव्यानवसृज्य दक्षिणैरनुपरिवर्तयाध्वै[6] मो[6] अप्रसृताः[6] सर्पतेति[6]। ॥ ७ ॥ तृतीयः ॥

अथाहाभिसर्प यजमान माहेन्द्रं ग्रहं ग्रहीष्यामीत्यन्वारब्धे यजमाने माहेन्द्रं ग्रहं गृह्णाति महाꣳ इन्द्रो य ओजसेत्यनुद्रुत्योपयामगृहीतो ऽसि महेन्द्राय त्वा जुष्टं गृह्णामीति। परिमृज्य सादयत्येष ते योनिर्महेन्द्राय त्वेति। तदेतान्पञ्चैन्द्रानतिग्राह्यान्सह सꣳसादयत्यथाप[7] उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ् द्रुत्वा स्तोत्रमुपाकरोति। स्तुवते

---

१ ॰मथैतान॰ Be B Keś.; ॰मथैनान॰ the other MSS.

२ Thus M Tr Be B F H Keś.; विख्याप॰ Be 11 U and Comm. on Taitt. S. Vol. I, p. 1024.

३ These three words only in Be B and Bhav.; the other MSS. and Keś. omit them.

४ Thus Tr Be B Keś.; मैनाम॰ the other MSS.

५ Thus Be B; निवर्तन्तां॰ Tr; निवर्तांतः॰ M Be 11 U; निवर्तांनतः॰ H; निवर्त्यात्वंतान॰ F.

६ Thus Be B; ॰याध्वैर्मो FH; ॰यध्वंप्रसृतास्सर्पतेति Tr.; ॰यध्वंमाप्रसृताः सर्पेति M; ॰याध्वैमाः प्रसृताः सर्पतेति Keś.

७ ॰सादयंत्य॰ MH Keś.

माहेन्द्राय[1] । प्रस्तुते साम्नि संप्रैषमाह ब्रह्मन्वाजिनाꣳ साम गायाजिस्तृत आजिं धावत दुन्दुभीन्समाघ्नताभिघोतारो[2] ऽभिषुणताग्नीदाग्निरं विनयोलूखलमुदादय प्रतिप्रस्थातर्वारुणमेककपालं निर्वप सौम्यस्य विद्धीति । यथासंप्रैषं ते कुर्वन्ति । गायति ब्रह्मा वाजिनाꣳ साम । तं य एव कश्च[3] परिकर्म्यावेष्टयति । धावन्त्याजिस्तृत । आघ्नन्ति दुन्दुभीन्संप्रवदन्ति वाचः । संप्रोदिता[4] वाचो ऽनुमन्त्रयत इन्द्राय वाचं वदतेन्द्रं वाजं जापयतेन्द्रो वाजमजयिदित्यथ रथान्धावतो ऽनुमन्त्रयते वाजेवाजे ऽवत वाजिनो न इति चतसृभिरनुष्टुप्छन्दसाꣳ । शाम्यन्ति घोषाः शस्त्राय । होत एषोत्तमेति प्राङ्होतुः कालात्पराङावर्तते ऽध्वर्युरभ्येनमाह्वयते होता । प्रत्याह्वयते ऽध्वर्युः । शꣳसति । प्रतिगृणाति । प्रसिद्धमुक्थ्यं प्रतिगीर्य प्राङेत्योद्यच्छत एतं माहेन्द्रं ग्रहमनूद्यच्छन्त इतरानुपोद्यच्छन्ते नाराशꣳसानथाश्रावयत्यो श्रावयास्तु श्रौषडुक्थशा[5] यज सोम-

१ माहे॰ M Tr U Be B Be 11; महे॰ HF.

२ Thus (समाघ्नत, cp. Pitṛmedhasūtra, p. 37. 14) Tr U Be B Be 11; समाहत MHF.

३ Thus M Tr U Be B; कश्चन Be11 H; कचन F.

४ संप्रवदिता, संवदिता, संप्रवदंता or संप्रवदतो the MSS.; this last reading, presented by M, could also be defended, if we take the part. as an acc. pl. masc., but cp. Bhav. ता अनुमन्त्रयते and infra xii. 13, where the correct reading is given by M.

५ Be B ins. इति after श्रौषट्।

स्वेति । वषट्कृते जुहोति । तदेतान्पञ्चैन्द्रानतिग्राह्यान्सह[1] जुह्वति । वषट्कृतानुवषट्कृते द्विर्जुहोति । तथैव द्विर्द्विर्नाराशंसाननुप्रकम्पयन्ति । द्विर्हुतो माहेन्द्रः परिशेते । आयन्ति रथा । आगतान्रथान्दृष्ट्वा याचत्याज्यस्थालीꣳ सस्रुवाꣳ स यद्यस्मै रथश्लेषमाचक्षत आग्नीध्र[2] एतां जुहोत्युत स्माऽस्य द्रवतस्तुरण्यत इत्युभयेनैव रथविमोचनीयं जुहोत्या मा वाजस्य प्रसवो जगम्यादिति । ॥ ८ ॥

अथ याचति नैवारꣳ सप्तदशशरावꣳ सप्तदश सुवर्णानि[3] कृष्णलानि हिरण्यपात्रं मधोः पूर्णमित्येतत्समादायान्तरेण चात्वालोत्करावुदङुपनिष्क्रामत्युत्तरत[4] एते रथा युक्तास्तिष्ठन्ति । तदेतान्यजुर्युजो ऽश्वानवघ्रापयति वाजिनो वाजजितो वाजꣳ सस्रुवाꣳसो वाजं जिगिवाꣳसो बृहस्पतेर्भागे निमृड्ढ्वमित्यथैनमपिधाय प्रज्ञातं निदधात्यथ रथान्विमुच्यमानाननुमन्त्रयत इयं वः सा सत्या संधाभूद्यामिन्द्रेण समधद्ध्वमिति । दुन्दुभीनवद्यतो ऽनुमन्त्रयते ऽजीजिपत वनस्पतय इन्द्रं वाजं विमुच्यध्वमिति । तदेतं यजुर्युजꣳ रथं विमुञ्चति यथादत्तमितरान्व्यावर्तयन्त्युपसंगच्छन्त एनमेत आजिसृतस्तेभ्य एकैकं कृष्णलं व्युत्प्रयच्छति । तानि सार्धꣳ समादाय हिरण्यपात्रं मधोः पूर्णमित्येकधा ब्रह्मण उपहरति । ॥ ९ ॥

---

१ तदेतान् om. Be B ; तदेतत् M.

२ आग्नीध्रीय Be B.

३ सौवर्णानि U.

४ °क्रामत्यु° Tr HF ; °क्रामंत्यु° MU Be B Be 11.

तद्बुह्ना प्रतिगृह्योपावरोहत्यथाहाजिह्मतो दक्षिणापथेनोपातीत्य दक्षिणाꣳ श्रोणिमभिनिश्रयध्व[१] मारुता अग्रेणाहवनीयं परीत्य दक्षिणमꣳसमुपसꣳश्रयध्वमिति[२] । तदेनान्विमिताभ्यामभिविप्रन्त्यथाहैहि[३] यजमानेति । पूर्वया द्वारा हविर्धानं प्रपाद्य यजमानꣳ सोमग्रहानुपस्थापयति ॥ १० ॥

संपृच स्थ सं मा भद्रेण पृङ्क्तेति । विपृच स्थ वि मा पाप्मना पृङ्क्तेति सुराग्रहानथैताꣳ सुराꣳ सम्रेकामादायैताꣳश्च सुराग्रहानाजिसृद्भ्य उपहरन्ति । तां ते पिबन्तो रममाणा महीयमाना आसते । ऽथ यन्मारुत्या अनवदानीयं तदुभयानन्तरेण[४] पर्णशाखासु न्यस्यति । तत्समुत्कुम्य[५] विमाथीकुर्वते[६] । ऽथ याचत्याव्यस्याशीꣳ ससुवां तार्प्यं दर्भमयमित्येतत्समादायाहैहि यजमानेत्यन्वग्यजमानो ऽनूची पत्न्याहवनीये जुहोत्यन्वारब्धे यजमाने वाजस्य प्रसवस्येति द्वादश सुवाहुतीरथ यजमानं तार्प्यं परिधापयति क्षत्रस्योल्बमसीति । क्षत्रस्य

१ ०भिनिःश्र० Be (sec. m.) only.

२ Thus M Tr HF Keś. ; उपश्रय० Bell U ; अभिनिश्रय० B Be.

३ तदेनान् i.s.o. तदेनान् M Tr U Bell H F ; अथैनान् Be B ; अभिविप्रंत्य० Be (sec. m.) Tr Bhav. ; अभिनिप्रंत्य० MU Bell F ; निप्रंत्य० H ; अभिविवस्य० B Be (pr. m.).

४ तदुभयोरंतरेण M.

५ Thus Be B ; समुत्कुम्य M U Bell H ; समुत्काय F ; समत्कुम्योच्चैः क्रोशन्तः Keś.

६ cp. Āp. xviii. 7. 8 ; विमाथं कुर्वते (as TBr. I. 3. 8. 4.) M.

योनिरसीति दर्भमयं पत्नीमंथैताः श्रितिं[1] यजमानायतनात्प्राचीं वोदीचीं वा यूपमभ्यायातयत्यथ जायामामन्त्रयते जाय एहि सुवो रोहावेति। रोहाव हि सुवरितीतरा प्रत्याहाहं नावुभयोः सुवो रोक्ष्यामीति यजमानस्त्वं नावुभयोः सुवो रोहेति पत्नी। तां दशभिः कल्पै[2] रोहत्यायुर्यज्ञेन[2] कल्पतामित्यान्तं गत्वा बाहू उद्गृह्णाति सुवर्देवाः अगन्मामृता अभूम प्रजापतेः प्रजा अभूमेत्यथेमं लोकं प्रत्यवेक्षते समहं प्रजया सं मया प्रजा समहः रायस्पोषेण सं मया रायस्पोष इत्यथैनामुपावरोहति। स यावति मन्यत एतावति मोदाप्स्यन्तीति[3] तदेनमामपुटैर्घ्नन्ति[4] ॥ ११ ॥

अन्नाय त्वेति पुरस्तादध्वर्युरन्नाद्याय त्वेति दक्षिणतो ब्रह्मा वाजाय त्वेति पश्चाद्धोता वाजजित्यायै त्वेत्युद्गातोत्तरतो। यद्यु वा एते न कामयन्ते ऽध्वर्युरेव पुरस्ताद्धन्ति दक्षिणतः प्रति-

---

१ Thus M Tr Be B; सौतिं U Bell H F; सौतिं Bhav. (one copy), श्रितिरं (the other copies); Keś. has thrice सौतिं corrected from original श्रितिं or सौतिं।

२ Thus (as TBr. I. 3. 7. 4.) M Tr UBF Dvaidhasūtra and Bhav. on this passage of the Dvaidha; कल्पैरारोह॰ Be H; thus also Bhav. on the passage of the Vājap.

३ Thus, conjecturally, corrected; मोदास्यंतीति M Tr; मेदास्यंतीति UHF; मांशास्युंतीति Be B.

४ कपपुटै॰ FH Be (pr. m.); although at the beginning of this praśna the कपपुटाः have been mentioned, आमपुटैः is here the correct reading, cp. Bhav. a. h. l.

प्रस्नाता पश्चादाग्नीध्र उपेतोत्तरतस्तेषां[1] तथा विभागो यथा दुन्दुभीनामक्षाभ्यां[2] प्रत्यवरोहणत[3] आसन्दीं निदधाति । तस्यां वस्ताजिनमास्तृणाति वस्ताजिने शतमानꣳ हिरण्यमथ दक्षिणं पादꣳ हिरण्य[4] उपावरोहत्यमृतमसीति[4] पुष्टिरसि प्रजननमसीति सव्यं वस्ताजिने । ऽथैनमेतयासन्द्या सद आवहन्त्य[5] वा[5] व्रजत्यन्वायन्त्येनमेते[5] चमसा । अथैतस्य बार्हस्पत्यस्येडामुपह्वयत । इडोपहूतं माहेन्द्रꣳ होता चैवाध्वर्युश्च संभक्षयतो नराशꣳसपीतेन नाराशꣳसानेवैतेषामतिग्राह्याणां मुख्ये पात्रे सꣳस्रावान्समवनीय यजमान एव प्रत्यक्षं भक्षयत्यपि वैनान्सर्वेश एव चमसेषु व्यवनीय भक्षयेयुरित्येतदपरꣳ । होतृचमसमेवैते त्रयः समुपहूय भक्षयन्ति । यथाचमसं चमसान्हिन्व म इत्यात्मानं प्रत्यभिमृशन्ते । नाप्याययन्ति चमसान्सर्वभक्षा

---

१ Thus M Tr: उत्तरत उपेता all the other MSS.

२ Thus Tr Be B Be 11 (sec. m.); अक्षाभ्ये UFH Be 11 (pr. m.); अक्ष om. M.

३ Thus corrected on account of the collateral passage xviii. 17 s. f. and the Vivaraṇa: प्रत्यवरोह(ण)तः यत्र प्रत्यवरोहति तत्र ; MSS. प्रत्यवरोहन ।

४ हिरण्यमुपा॰ M U Be 11 H F; हिरण्यउपा॰ Be; हिरण्येउपा॰ B; हिरण्य om. Tr.

५ Thus Be 11; ॰वहंत्यानाव्रजत्य॰ U; ॰वहंत्यथवाव्रजंत्य॰ M; ॰व्रजंत्य॰ Tr Be B H F, but cp. Bhav.: तथैवासन्द्योदस्य सदः प्रापयन्ति स्वयमेव वा गच्छति ।

मार्जयन्ते। ऽथैन्द्राय त्वेन्द्राय त्वेत्येवं त्रिभिरुक्थ्यपर्यायैश्चरति[१]। संतिष्ठते माध्यंदिनꣳ सवनम्॥ १२॥ चतुर्थः॥

अथ सावित्रꣳ हुत्वा प्रसर्पन्ति तृतीयसवनाय। प्रसिद्ध-मादित्यग्रहेण चरित्वाग्रयणं गृहीत्वाथ षोडशिनमभिगृह्णा-त्यसावि सोम इन्द्र त इत्यनुद्रुत्योपयामगृहीतो ऽसीन्द्राय त्वा षोडशिने जुष्टं गृह्णामीति। परिमृज्य सादयत्येष ते योनिरिन्द्राय त्वा षोडशिन इत्यथोक्थ्यं गृह्णाति। समानं कर्मा पवमानात्पवमानेन चरित्वा स्वे धामन्पशुभिश्चरति[२]। तेषां नाना मनोता नाना देवता नाना प्रत्यभिमर्शना नाना वसाहोमाः समानो वनस्पतिः समानः स्विष्टकृत्प्रैषवान्समानीडा समान्यो दिशो। नाना दिश इत्येके। समानं कर्मा ध्रुववद्भ्य-श्चमसेभ्यो। ध्रुववद्भिश्चमसैश्चरित्वा त्रिभिरुक्थ्यपर्यायैश्चरतीन्द्रा-वरुणाभ्यामिन्द्राबृहस्पतिभ्यामिन्द्राविष्णुभ्यामित्यथ[३] षोडशिना चरत्यथ प्राङायन्नाह होतृचमसमनून्नयध्वमुन्नेतः सर्वश्च एव राजानमुन्नय मातिरीरिच इति। होतृचमसमेव प्रथममुन्नयन्ति यथोपपादमितरान्सर्वश्च एव राजानꣳ समुन्नीयोत्तरवेद्याꣳ सꣳसादयन्ति। तदेताभ्यामाप्याभ्याम्सञ्च सꣳसादयन्त्येतान उप-स्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ् द्रुत्वा स्तोत्रमुपा-

१ Thus M Tr; चरन्ति UB Be H Be 11 F.

२ Thus M Tr BHF; चरन्ति Be 11 U.

३ °चरतीन्द्रा° M Tr; the other MSS. read plural.

करोति । स्तुवते । तदेतद्बृहत्साम्नैकविंशं वैष्णवीषु शिपिविष्टवतीषु कुर्वन्ति । होत एषोत्तमेति प्राह होतुः कालात्पराङावर्तते ऽध्वर्युरभ्येनमाह्वयते होता । प्रत्याह्वयते ऽध्वर्युः । शंसति । प्रतिगृणाति । प्रसिद्धमुक्थं प्रतिगीर्य प्राङेत्योद्यच्छत एतꣳ होतृचमसमनूद्यच्छन्त इतराननुपोद्यच्छन्ते चमसानथाश्रावयत्यो श्रावयास्तु श्रौषडुक्थशा यज सोमानामिति । वषट्कृते जुहोति । तदेतान्प्राजापत्यान्सह जुह्वति । वषट्कृतानुवषट्कृते द्विर्जुहोति । तथैव द्विर्द्विः सर्वांश्चमसाञ्जुह्वत्यथ भक्षैः प्रत्यञ्च आद्रवन्त्यनुसवनभक्षः प्रजापतिना पीतस्येत्यचैतेषां[1] प्राजापत्यानां मुख्ये पात्रे सꣳस्रावान्समवनीय[2] यजमान एव प्रत्यक्षं भक्षयत्यपि वैनान्सर्वश एव चमसेषु व्यवनीय भक्षयेयुरित्येतदपरमेव यन्मारुत्या अनवदानीयं तदुल्लिख्य उपहरति[3] । तदेतत्समावच्छो[4] विभज्य प्राश्नन्ति । होतृचमसमेवैते त्रयः समुपहूय भक्षयन्ति । यथाचमसं चमसांश्चिन्न स इत्यात्मानं प्रत्यभिमृशन्ते । नाप्याययन्ति चमसान्सर्वभक्षा मार्जयन्ते । ऽथ संप्रैषमाहाग्नीदौपयजानङ्गारानाहरोपयष्टरुपसीद ब्रह्मन्प्रस्थास्यामः समिधमाधायाग्नीदग्नीन्सकृत्सकृत्संमृड्ढीत्याहर-

---

१ Thus M Tr U Be 11; ऽचैषां Be BFH.

२ Thus M Tr; संस्रावमवनीय Be 11 UH Keś.; संस्रावानवनीय F; सꣳस्रावान्प्रत्यवनीय B Be; cp. supra p. 81, 9.

३ ॰हरति Be BH Bhav.; हरंति M Tr F.

४ Thus MUHF; तत्सेषमा॰ Tr Be B; तदेवैषमा॰ Be (sec. m.).

न्येतानाग्नीध्राद्दौपयजानङ्गाराꣳस्त्वानयेयु[१] होतारं निवपत्युप-
सीदत्युपयष्टा गुदतृतीयैश्चैतानि गुदतृतीयान्येकादशधा कृत्वो-
पयष्टोपयजति । समानमत ऊर्ध्वꣳ । संतिष्ठते वाजपेयो ।
वाजपेयेनेष्ट्वा प्रत्यवरोहणीयेनाग्निष्टोमेन[२] यजेत । संतिष्ठते
वाजपेयः संतिष्ठते वाजपेयः । ॥ १३ ॥ पञ्चमः ॥ ५

॥ इत्येकादशः प्रश्नः ॥

---

१ Thus (०हरन्ते०) all exc. B, which has the sing. and M, which omits this passage altogether.

२ चतुष्टोमेन ins. Tr.

राजसूयेन[1] यक्ष्यमाणो भवति । स पुरस्तात्फाल्गुन्यै वा चैत्र्यै वा पौर्णमास्या आमावास्येन[1] हविषेष्ट्वा दीक्षते । तस्य तिस्रो दीक्षास्तिस्र उपसदः सप्तम्यां प्रसुतः । संतिष्ठत एष प्रायणीयो ऽग्निष्टोमश्चतुष्टोमः सहस्रदक्षिण उदयनीयान्तो ऽथाष्टमे ऽज्ञानुमतं निर्वपति । हविष्कृता वाचं विसृजते । समानं कर्माधिवपनादध्युष्य दक्षिणार्धे गार्हपत्यस्याष्टौ कपालान्युपदधात्येकं प्रतिप्रस्थातोत्तरतो नैर्ऋताय । हविःपेष्यै प्रयच्छन्नाह प्राचश्च प्रतीचश्च व्यवघ्नातयन्तौ पिण्ड्ढीति[2] । स ये प्राञ्चः शम्याया अवशीयन्ते तानध्वर्युः समुप्य संयुत्यानुमतꣳ अपयत्यथ ये प्रत्यञ्चः शम्याया अवशीयन्ते तान्प्रतिप्रस्थाता समुप्य संयुत्य नैर्ऋतꣳ अपयत्याददत[3] एतं[4] नैर्ऋतमुपस्तीर्णाभिघारितं कृष्णं वासः कृष्णतूषमन्तमागारादेकोल्मुकमुदपात्रमित्येतत्समादाय गार्हपत्ये स्रुवाहुतिं जुहोति वीहि स्वाहाहुतिं जुषाण इत्यथ दक्षिणया द्वारोपनिष्क्रम्य तां दिशं यन्ति यत्रास्य स्वकृतमिरिणꣳ स्पष्टं भवति प्रदरो वा ।

---

१ ... १ Thus MT Be 11 (the last two om. however स); the other MSS.: राजा राजसूयेन यजेत फल्गुन्यै वा चैत्र्यै वा पुरस्तादामावास्येन। The Vivaraṇa begins also: राजा राजसूयेन यजेतेति, but infra it cites the words यक्ष्यमाणो भवति and cp. comm. on T.S. i. 1.8 and on Tāṇḍ. br. xviii. 8.1.

२ पिंड्ढीति M; the other MSS. still more corrupted.

३ Thus M; अपयित्वाददत T Be 11; Be BU om. आददत।

४ Thus M; एतद्वै॰ all the other MSS.

तदेतदेकोल्मुकमुपसमाधाय संपरिस्तीर्याङ्गुष्ठाभ्यां[1] परिगृह्य नैर्ऋतं जुहोत्येष ते निर्ऋते भागो भूते हविष्मत्यसि मुञ्चेममंहसः स्वाहेत्यथ कृष्णं वासः कृष्णातूषं ददात्यथापो व्यतिषिच्य परास्य पात्रमनवेक्षमाणा आयन्ति हस्तपादान्प्रक्षाल्यैतेनैव यथेतमेत्य गार्हपत्ये स्रुवाहुतिं जुहोति स्वाहा नमो य इदं चकारेत्यथानुमतेन[2] संस्थां करोति। धेनुं ददाति[3]। ॥ १ ॥

अथ नवमे ऽहन्यादित्यं चरुं निर्वपति। वरं ददात्यथ दशमे ऽहन्याग्नावैष्णवमेकादशकपालं। वामनं वहिनं ददात्यथैकादशे ऽहन्यग्नीषोमीयमेकादशकपालं। हिरण्यं ददात्यथ द्वादशे ऽहन्यैन्द्रमेकादशकपालमृषभं वहिनं ददात्यथ त्रयोदशे ऽहन्याग्नेयमष्टाकपालमैन्द्रं दध्यृषभं वहिनं ददात्यथोपातीत्याग्रयणहवींषि चतुर्दशे ऽहनि सरस्वत्यै चरुं। वत्सतरीं ददात्यथ पञ्चदशे ऽहनि सरस्वते चरुं। वत्सतरं ददाति। यद्यु वै चतुर्दश्यामेवोपवसथः संपद्यत एवमेवैतदहरेताभ्यामिष्टिभ्यां[4] नानाबर्हिभ्यां[5] यजेतांयाश्चैतदहर्विश्वेभ्यो देवेभ्यो वत्सा अपाकृता भवन्ति। वैश्वदेवं पयो दोहयित्वोपवसति सांनाय्यस्य

---

१ स्तीभ्यां i.s.o. अङ्गुष्ठाभ्यां B Be U.
२ ॰चकारेत्यनुमतेः Be BU.
३ धेनुर्दक्षिणा Be BU.
४ एकने॰ i.s.o. एवमे॰ M Be BU.
५ Thus M; ॰बर्हिर्भ्यां Be BU; ॰बीर्हिभ्यां Be 11 T.

वाहृता तूष्णीं वाथ श्वो भूते वैश्वदेवहविर्भिरिष्ट्वा पौर्णमासवैमृधाभ्यामिष्ट्वा प्रसिद्धं निवर्तयते । ऽथ श्वो भूत इन्द्राय सुत्राम्णे पुरोडाशमेकादशकपालं निर्वपत्यभिहितो रथ उभाकाङ्क्ष्यकवचो[1] गर्भिणीभिर्वा वडवाभिर्युक्तः साण्डैर्वाश्वैरावेष्टो निष्कमाददात्यथ श्वो भूत इन्द्रायाङ्होमुचे पुरोडाशमेकादशकपालं निर्वपत्यनभिहितो रथो[2] ऽकाङ्क्ष्यकवचो[2] ऽगर्भाभिर्वा वडवाभिर्युक्तो निरष्टैर्वाश्वैः[3] सद्वृणको[3] निष्कमाददाति । ॥ २ ॥

एते संतनी इत्याचक्षते । ऽथ श्वो भूते संतनीभ्यामेव प्रतिपद्यते । स एवमेव संतनीभ्यामहरहर्विपर्यासं[4] यजमानश्चतुरो मास[5] एति[5] काममिष्ट्वा कामं पशुबन्धेन कामं

---

१ Thus hesitatingly emended. उभे कंस्रेकवचो M; दर्भैकक्ष्यकवचो T Be 11; उभौकांस्यकवचो Be BU; Bhav. उभे कांस्यकवचो मिरस्त्रायम्, but this may be a periphrase of our compositum. So much, at any rate, is certain, that an adj. is required with the sense उभयतः कांस्यकवच (cp. Kāty. xxii. 10. 30-31, Lāṭy. ix. 4. 14).

२ Again emended; रथो न उकंस्यो उकवचो उग० M; could उ in Nandināgari represent the avagraha? Then the reading of M would be; रथो [न] ऽकंस्यो ऽकवचो ऽग० ; रथः कांस्यकवचो Be BU; दर्भैकक्ष्यकवचो Be 11 T (omitting रथो).

३ ०वांश्वै स्वल्पएको M; ०वांश्वैश्चपका T Be 11; ०र्वाश्वैस्वल्पएकाद० Be; ०र्वाश्वैश्चपकाद० B, the last two om. निष्कम्।

४ Here and infra B Be U have sometimes विपर्यासाभ्यां; Be 11 T om. the word every time.

५ Thus here and infra M; मास इति B Be U; मासानेति Be 11 T.

यवाग्रयणेनाथ चतुर्षु मासेषु पर्यवेतेषु संतन्येष्ट्वा[1] वरुणप्रघासहविर्भिरिष्ट्वा पौर्णमासवैमृधाभ्यामिष्ट्वा प्रसिद्धं निवर्तयते। ऽथ श्वो भूते संतनीभ्यामेव प्रतिपद्यते। स एवमेव संतनीभ्यामहरहर्विपर्यासं यजमानो ऽपरांश्चतुरो मास एति काममिष्ट्वा कामं पशुबन्धेन कामं श्यामाकाग्रयणेनाथ चतुर्षु मासेषु पर्यवेतेषु संतन्येष्ट्वा साकमेधहविर्भिरिष्ट्वा पौर्णमासवैमृधाभ्यामिष्ट्वा प्रसिद्धं निवर्तयते। ऽथ श्वो भूते संतनीभ्यामेव प्रतिपद्यते। स एवमेव संतनीभ्यामहरहर्विपर्यासं यजमानो ऽपरांश्चतुरो मास एति काममिष्ट्वा कामं पशुबन्धेन कामं व्रैह्याग्रयणेनाथ चतुर्षु मासेषु पर्यवेतेषु संतन्येष्ट्वा शुनासीरीयहविर्भिरिष्ट्वा पौर्णमासवैमृधाभ्यामिष्ट्वा प्रसिद्धं निवर्तयते। ऽथ श्वो भूते संतनीभ्यामेव प्रतिपद्यते। स एवमेव संतनीभ्यामहरहर्विपर्यासं यजमानः सप्ताहान्येति काममिष्ट्वा कामं पशुबन्धेनाथाष्टमे ऽह्नीन्द्रतुरीयमाग्नेयमष्टाकपालं निर्वपति रौद्रं गावीधुकं चरुमैन्द्रं दधि वारुणं यवमयं चरुमन्वाहार्यमासाद्य वहिनीं धेनुं ददाति। ॥ ३ ॥

अथ तदानीमेव पञ्चेध्मीयेन प्रतिपद्यते। पञ्चधाङ्गारान्विहृत्य पञ्चेध्मानभ्यादधाति पर्णमयं पुरस्तान्नैयग्रोधं दक्षिणत आश्वत्थं पश्चादौदुम्बरमुत्तरतः प्लाक्षं मध्ये। ऽथैनानाज्येन व्याघारयति ये देवाः पुरःसदो ऽग्निनेत्रा रक्षोहणस्ते नः पान्तु

1 Thus here and infra MT Be 11; संतन्वेष्ट्वा B Be.

ते नो ऽवन्तु तेभ्यो नमस्तेभ्यः स्वाहा ये देवा दक्षिणसदो ये देवाः पश्चात्सदो ये देवा उत्तरसदो ये देवा उपरिषद इत्यथोपवेषेणाङ्गारान्समूहति[1] समूढꣳ रक्षः संदग्धꣳ रक्ष इदमहꣳ रक्षो ऽभिसंदहामीत्यथैनान्स्रुवाहुतिभिरभिजुहोत्यग्नये[2] रक्षोघ्ने स्वाहेति पञ्चभिरथ[3] प्रष्टिवाहिनꣳ रथं ददात्यथ याचति पर्णमयꣳ स्रुवमपामार्गसक्तून्प्रतिवसनीयं वासो ऽन्तमागारादेकोल्मुकमुदपात्रमित्येतत्समादायोदञ्चो निष्क्रम्य तां दिशं यन्ति यत्रास्य स्वकृतमिरिणꣳ स्पष्टं भवति प्रदरो वा तदेतदेकोल्मुकमुपसमाधाय संपरिस्तीर्य पर्णमयेन स्रुवेणापामार्गसक्तूञ्जुहोति देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ रक्षसो वधं जुहोमि स्वाहेति[4] हतꣳ रक्ष इति स्रुवमनुप्रहरत्यवधिष्म[5] रक्ष इत्युपतिष्ठते[6] ऽथ[7] यदस्ते तद्ददात्यथापो व्यतिषिच्य परास्य पात्रमनवेक्षमाणा आयन्ति हस्तपादान्प्रक्षाल्यैतेन यथेतमेत्यैन्द्रतुरीयेण सꣳस्थां करोत्यथ नवमे ऽह्नि पूर्वाणि देविकाहवीꣳषि निर्वपत्यनुमत्यै चरुꣳ राकायै चरुं धात्रे पुरोडाशं द्वादशकपालमित्यन्वाहार्य-

---

१ निरूहति Be T.

२ स्रुवाहुतीभि॰ M Be U ; स्रुवाहुतीर॰ BT Be 11.

३ पंचभिर om. Be BU.

४ इति om. Be BU.

५ ॰नुप्रहृत्याव॰ Be BU.

६ उपोत्तिष्ठते MT Be 11, but cp. Āp. xviii. 9. 18.

७ om. B Be U.

मासाद्य[1] वत्सतरीं[2] ददात्यथ दशमे ऽहन्युत्तराणि देविकाहवींषि निर्वपति सिनीवाल्यै चरुं कुह्वै चरुं धात्र एव[3] पुरोडाशं द्वादशकपालमित्यन्वाहार्यमासाद्य[4] वत्सतरं[5] ददात्यथैकादशे ऽहनि त्रिषंयुक्तैः प्रतिपद्यत आग्नावैष्णवं निर्वपत्यैन्द्रावैष्णवमेकादशकपालं वैष्णवं त्रिकपालं । वामनमृषभं वहिनं ददात्यथ द्वादशे ऽहन्यग्नीषोमीयमेकादशकपालं निर्वपतीन्द्रासोमीयमेकादशकपालꣳ सौम्यं चरुं । बभ्रुं ददात्यथ त्रयोदशे ऽहनि सोमापौष्णं चरुं निर्वपत्यैन्द्रापौष्णं चरुं पौष्णं चरुꣳ । श्यामं ददात्यथ चतुर्दशे ऽहनि वैश्वानरं द्वादशकपालं निर्वपति । हिरण्यं ददात्यथ पञ्चदशे ऽहनि वारुणं यवमयं चरुमश्वं ददाति । ॥ ४ ॥ प्रथमः ॥

अथैनमामावास्येन हविषेजानꣳ रत्निनः पर्यवस्यन्ति[6] दक्षिणतो वोदञ्चो पश्चादा प्राञ्चस्तेषामवसितानां ब्रह्मैव दक्षिणार्ध्यो वापरार्ध्यो वा भवति । स[7] यत्किंच यज्ञपरिभोजनं[8] ब्रह्मण एव[9] तद्गृहे[9] भवत्यथारण्योरग्नीन्समारोह्य ब्रह्मणो

१ इति om. T Be 11 U.

२ •तरं Be 11 T.

३ om. B Be U; the word should be supplied, also Vol. i. p. 264, 4.

४ इति om. all the MSS.

५ •तरीं Be 11 T.

६ पर्युपविशन्ति B Be U.

७ om. Be 11 T.

८ •भाजनं B Be U.

९ Thus M Be 11 T; इवैत• B Be.

गृहानध्यवसाय मथित्वाग्नीन्विहृत्य बार्हस्पत्यं चरुं निर्वपति ब्रह्मणो गृहे । शितिपृष्ठं ददात्यथारण्योरग्नीन्समारोह्य[1] स्वान्यग्न्यायतनान्यभिप्रव्रजति[2] । तं यन्तमनुमन्त्रयते ऽयं नो राजा वृत्रहा राजा भूत्वा वृत्रं वध्यादित्यथ स्वान्यग्न्यायतनान्यध्यवसाय मथित्वाग्नीन्विहृत्येन्द्राय सुत्राम्णे पुरोडाशमेकादशकपालं प्रतिनिर्वपत्यथास्यैतदहः[3] श्वेतायै श्वेतवत्सायै पयो दोहयित्वा समातच्य निदधात्यथ श्वो भूते ऽरण्योरग्नीन्समारोह्य राजन्यस्य गृहानध्यवसाय मथित्वाग्नीन्विहृत्यैन्द्रमेकादशकपालं राजन्यस्य गृहे । ऋषभं ददाति । तथारण्योरग्नीन्समारोह्य स्वान्येवाग्न्यायतनान्यभिप्रव्रजति[4] । तं तथैव[5] यन्तमनुमन्त्रयते । यस्ययस्य गृहे यजते स सो ऽनुमन्त्रयते ऽयं नो राजा वृत्रहा राजा भूत्वा वृत्रं वध्यादित्यथ स्वान्येवाग्न्यायतनान्यध्यवसाय मथित्वाग्नीन्विहृत्येन्द्रायांहोमुचे पुरोडाशमेकादशकपालं प्रतिनिर्वपति । प्रज्ञातमेवास्यैतदहः श्वेतायै श्वेतवत्सायै पयो दोहयित्वा समातच्यैव[6] निदधात्यथ तृतीये ऽहन्यादित्यं चरुं महिष्यै गृहे । धेनुं ददात्यथ चतुर्थे ऽहनि भगाय चरुं वावातायै गृहे । विचित्तगर्भां पष्ठौहीं ददात्यथ पञ्चमे ऽहनि

---

१ °रोह्य here and infra sometimes B Be U.

२ °व्रजंति MT Bc Be 11 ; °इति B.

३ प्रति om. MT Be 11 but cp. Āp. xviii. 10. 28.

४ एव after स्वानि om. MT Be 11 ; °व्रजति T Be 11. B ; °व्रजंति M Bc.

५ Thus MUB Be ; एव om. Be 11 T.

६ एव om. Be BU.

नैर्ऋतं चरुं परिवृक्त्यै गृहे कृष्णानां व्रीहीणां नखनिर्भिन्नं । कृष्णां कूटां ददात्यथ षष्ठे ऽह्न्याग्नेयमष्टाकपालꣳ सेनान्यो गृहे । हिरण्यं ददात्यथ सप्तमे ऽह्नि वारुणं दशकपालꣳ सूतस्य गृहे । महानिरष्टं ददात्यथाष्टमे ऽह्नि मारुतꣳ सप्तकपालं ग्रामण्यो गृहे । पृश्निं ददात्यथ नवमे ऽह्नि सावित्रं द्वादशकपालं क्षत्तुर्गृह । उपध्वस्तं ददात्यथ दशमे ऽह्न्याश्विनं द्विकपालꣳ संग्रहीतुर्गृहे । सवात्यौ ददात्यथैकादशे ऽह्नि पौष्णं चरुं भागदुघस्य गृहे । श्यामं ददात्यथ द्वादशे ऽह्नि रौद्रं गावीधुकं चरुमक्षावापस्य गृहे । शबलमुदारं ददाति । प्रसिद्धमेवास्यैतदहः[1] श्वेतायै श्वेतवत्सायै पयो दोहयित्वा[2] समातच्यैव[3] निदधात्यथ त्रयोदशे ऽह्नि मैत्रावार्हस्पत्यं भवति । ॥ ५ ॥

अथ वै भवति श्वेतायै श्वेतवत्सायै दुग्धे स्वयंमूर्ते स्वयंमथित आज्य आश्वत्थे पात्रे चतुःस्रक्तौ स्वयमवपन्नायै शाखायै कर्णाꣳश्चाकर्णाꣳश्च तण्डुलान्विचिनुयादित्यथ वै भवति स्वयंकृता वेदिर्भवति स्वयंदिनं बर्हिः स्वयंकृत इध्म इति । राजैवायꣳ[4] स्वयं कर्मभिः पूजितो भवति । स[5] स्वयमेव वेदिं करोति स्वयमिध्माबर्हिः संनह्यति स्वयमाश्वत्थं पात्रं चतुःस्रक्ति[6]

---

१ Thus B Be U ; प्रसिद्धमेवास्यैतं द्वादशाहं M ; अथ प्रसिद्धमेवास्यैद्वादशाहं T Be 11.

२ दोहयित्वादोहयित्वा M.

३ समातच्यसमातच्यैव M ; तानर्धमासादच्यैव Be 11 T.

४ corrected ; राजैवायतु M Be BU ; राजैवैषं Be 11 T.

५ om. T Be 11.

६ वक्त्रि T Be 11, but cp. Āp. xviii. 11. 2.

करोति[1] स्वयमवपन्नायै शाखायै कर्णाꣳश्चाकर्णाꣳश्च तण्डुलान्विचिनोत्यंय वै भवति ये कर्णाः स पयसि बार्हस्पत्यो ये ऽकर्णाः स आज्ये मैत्र इत्यंथोत्तरतो भस्ममिश्रानङ्गारान्निरूह्य तेषु नवं पात्रमधिश्रित्य तिरः पवित्रमाज्यमानीय[2] तिरः[2] पवित्रमकर्णानोप्य[2] तेन[2] बार्हस्पत्यमपिदधाति[3] । तं तथापिहितमन्तर्वेद्यामासादयति[4] । समानं कर्मा प्रयाजेभ्यः । पञ्च प्रयाजानिष्ट्वोद्धृत्याक्रम्य सꣳस्रावेण बार्हस्पत्यमभिघार्य मैत्रमभिघारयति । बार्हस्पत्येन पूर्वेण प्रचरत्यथ मैत्रेण । बार्हस्पत्यस्य पूर्वस्य स्विष्टकृते ऽवद्यत्यथ मैत्रस्य । बार्हस्पत्यस्य पूर्वस्येडामवद्यत्यथ मैत्रस्यान्वाहार्यमासाद्यैतामेव श्वेताꣳ श्वेतवत्सां ददाति । संतिष्ठते मैत्राबार्हस्पत्यꣳ हविः । ॥ ६ ॥ द्वितीयः ॥

अथैतस्मिन्नेव पूर्वपक्ष उक्थ्यायाभिषेचनीयाय दीक्षते । तस्यापरिमिता दीक्षाः षडुपसदः । स तथा राजानं क्रीणाति यथा मन्यते ऽमावास्यायै मे यज्ञिये[5] ऽहन्सुत्या संपत्स्यत इति ।

---

१ याचति B Be U.

२ Thus M; Be BT om. आज्यमानीय तिरः पवित्रं and Be BU have कर्णान् i.s.o. अकर्णान्।

३ अभिद॰ Be 11 T.

४ तेनमपिहित॰ T Be 11.

५ Thus MB Be; यज्ञीये U; यजनीये T Be 11; this latter might be the right reading, but as the expression यज्ञिये ऽहन occurs several times infra, xvii. 55-61, without any various reading, I did not venture to write यजनीये in the text.

तस्य तथा संपद्यते । ऽथ प्रायणीयेन चरति । प्रायणीयेन चरित्वा पदेन चरति । पदेन चरित्वा रोहिते[1] चर्मणि[1] राजानं क्रीत्वोह्यातिथ्यं निर्वपत्यातिथ्येन प्रचर्याथाग्नवहमुपसद्भिश्चरत्यथाहवनीयं प्रणयत्याहवनीयं प्रणीय रथवाहने सदोहविर्धाने संमिनोति । रथवाहने सदोहविर्धाने संमित्याग्नीषोमौ प्रणयत्यग्नीषोमौ प्रणीय यूपस्याहुता यूपमुच्छ्रयति । स्वर्वन्तं यूपमुत्सृज्याग्नीषोमीयं पशुमुपाकरोति । तस्य प्रसिद्धं वपया चरित्वा वसतीवरीर्गृहीत्वाथ पशुपुरोडाशं निर्वपति । तमनुवर्तन्ते ऽष्टौ देवसुवाꣳ हवीꣳष्यग्नये गृहपतय इत्येतानि । तेषामुक्तं चरणं यथाग्नेर्विधायामिडान्ताः पुरोडाशाः संतिष्ठन्ते । पत्नीसंयाजान्ताः पशुर्हृदयशूलान्त इत्येके । ऽथैतान्दुन्दुभीननुदिशमासञ्जयत्यथ वसतीवरीः परिहृत्य पयाꣳसि विमिश्र्योपवसन्त्यथातो महारात्र एव बुध्यन्ते । प्रातराज्यानि गृहीत्वा राजानमुपावहृत्य प्रातरनुवाकमुपाकरोति । परिहिते प्रातरनुवाके ऽपो ऽच्छैत्यङ्क्षिवदेत्युक्षभ्य[2] क्रतुमुपैति । प्रसिद्धो ऽभिषवः । प्रसिद्धं ग्रहा गृह्यन्ते । समानं कर्माश्विनाद्ग्रहादाश्विनं ग्रहं[3] गृहीत्वा द्वे रशने आदाय यूपमभ्येति । स्वर्वन्तं यूपमुत्सृज्याग्नेयं पशुमुपाकरोति । तस्यैन्द्राग्न उपालम्भ्यो भवति । तयोः प्रसिद्धं वपाभ्यां चरित्वा प्रसर्पन्ति

१ Missing in M Be T, but cp. the Dvaidhasūtra.

२ ०वदेत्यु० Be U; ०वदेत्य० the other MSS.

३ om. M Be.

प्रातःसवनाय । तदृजुधा संतिष्ठते । प्रसर्पन्ति माध्यंदिनाय सवनाय । प्रसिद्धो ऽभिषवः । प्रसिद्धं ग्रहा गृह्यन्ते । समानं कर्मा दाक्षिणेभ्यो । दाक्षिणानि होष्यन्नाचत्याज्यस्थालीं स्रुवा स्रुचं वासस्तस्यैतस्य वसनस्यान्तमायां दशायां निष्करज्जुः प्रग्रथिता[१] भवत्यैनत्समादायाहैहि[२] यजमानेत्युत्तरेणाग्नीध्रीयं परीत्योत्तरेण सदः परीत्यापरेण शालां तिष्ठते प्रतिप्रस्थाता एतानि शस्त्राणि प्रयच्छत्यथाहैहि यजमानेति । रथ एष दक्षिणे श्रोण्यन्ते रथवाहन आहितो भवति । तमुपावहरतीन्द्रस्य[३] वज्रो ऽसि वार्त्रघ्नस्त्वयायं वृत्रं वध्यादित्यथैनं धूर्गृहीतमन्तर्वेद्यभ्यववर्तयन्ति[४] तूष्णीमथास्यवशान्पल्पूलयति तूष्णीमथ दक्षिणं योग्यं युनक्ति[५] मित्रावरुणयोस्त्वा प्रशास्त्रोः प्रशिषा युनज्मि यज्ञस्य योगेनेत्यथास्य पृष्ठं मर्मृज्यते तूष्णीमेवमेवोत्तरं योग्यं युनक्ति । तस्यैवमेवोत्तरतः प्रष्टिमुपनियुनक्ति । तयोरेवमेव पृष्ठे[६] मर्मृज्यत[६] । एतस्य योगमनु सर्वमाणिवयुज्यते । ऽधिकक्ष्यान्हस्तिनः कुर्वन्ति । प्रवेष्टयन्ति वासोभारान्वसनानां दशासु निष्करज्जूः प्रग्रथ्नन्ति । पूगशो दक्षिणा आयातयत्यथ सौरीभ्यामृग्भ्यां गार्हपत्ये जुहोति ।

१ °थितो MSS.

२ भवतीत्येन° M.

३ °हरतौ° Be BU ; °हरंति° MT Be 11.

४ Thus M only ; °भ्यवर्तयंति T Be 11 U Be ; °भ्यावर्तयंति B.

५ Here Be BU ins. तस्यैवमेवोत्तरतः प्रष्टिमुपनियुनक्ति।

६ Thus MB Be U ; शशुम्भाश T Be 11.

नयवत्यर्चाग्नीध्रे जुहोति । सृज्यन्ते[1] दक्षिणा दक्षिणापथेन । स यत्किंचिद्ददाति[2] हिरण्यमुखमेव ददात्यथ वासांस्यथ[3] युक्तानि[4] गोऽश्वꣳ हस्तिपुरुषमन्ततो[4] । ऽदत्ता एवैते रथा अतिवर्तन्ते[5] । नैते ऽन्यस्य सन्त आजिं धावन्ति । मनसैव स्वरथमध्वर्यवे ददाति । मनसा चतुष्पात्त्वेवं[6] ब्रह्मण आदिशति । मनसा समनुदिश्य[7] दक्षिणाभिर्मरुत्वतीयैश्चरन्ति[8] । सौदन्ति नाराशꣳसा आप्यायिता दक्षिणस्य हविर्धानस्यापालम्बमधोऽधो[9] माहेन्द्राय । ॥ ७ ॥

अथ याचति वैतसं[10] द्रोणकलशꣳ षोडश[11] वायव्यान्याश्चैतत्पुरस्तादेव[12] षोडशतयं आपो दिग्भ्यः संभृता[13]

---

१ संसृज्यते T Be 11.

२ यत्किंचद॰ M.

३ Thus M; उत i.s. of अथ T Be 11; B Be again (cp. supra p. 73, 10) वासांसि i.s.o. अथ ।

४ Thus MUB Be; हस्तिदासपुरुष॰ T Be 11.

५ Thus M only; अतिनिर्वर्तन्ते Be BU; अतिपतन्ते Be 11 T.

६ चतुष्पात्त्वेवं all MSS. exc. M which has चतुष्पत्त्वेवं; one copy of Bhav. has the word with *ā*, another with *a*, cp. Ait. Br. viii. 20, 2.

७ Thus MB; समनुदिश्य Be U; समुदिश्य Be 11 T.

८ चरति M; चरन्ति the other MSS.

९ ॰स्यापालंब॰ Be (sec. m.).

१० च ins. MT Be 11.

११ षोडशंच M.

१२ एताः i.s.o. एव Be BU.

१३ Thus M Be; संभृता BU; समाहृता Be 11 T.

दक्षिणस्य[1] हविर्धानस्य प्राच्यो ऽवाक्प्रतीच्य उपस्तम्भनाभि-
चिताः शेरते। तासां वहन्त्यः पूर्वार्ध्या भवन्ति सारस्वत्यो
ऽपरार्ध्याः। स वहन्तीरभिजुहोत्यर्थेत स्थापो देवीर्मधुमतीर-
गृभ्णतोर्जस्वती राजसूयाय चितानाः। याभिर्मित्रावरुणावभ्य-
षिञ्चन्याभिरिन्द्रमनयन्नत्यरातीः॥ राष्ट्रदा स्थ राष्ट्रं दत्त
स्वाहेति। गृह्णाति पर्णमयेन राष्ट्रदा स्थ राष्ट्रममुष्मा आमुष्या-
यणायामुष्य पुत्रायामुष्य पौत्राय दत्तेत्यपां पतिरसीत्यपांप-
तीयाः पुंनाम्नो[2] वोत्सस्य[2] समुद्रिया वा। वृषास्यूर्मिरित्यौर्म्यां।
वृषसेनो ऽसीति पन्नद्या। व्रजक्षित स्थेति कूप्या। मरुतामोज
स्थेति निवेष्याः[3]। सूर्यवर्चस स्थेत्यतिदृश्याः[4]। सूर्यत्वचस स्थेत्यात-
पति वर्ष्या। मान्दा स्थेति ह्रादुन्यो[5]। वाशा स्थेति पृष्वाः[6]।
शक्वरी स्थेति गोदुघ्या। विश्वभृत स्थेति पयो। जनभृत स्थेति
दध्यग्नेस्तेजस्या स्थेत्याज्यमपामोषधीनाꣳ रस स्थेति मध्वेव

---

१ Thus Be BU Bhav.; उत्तरस्य MT Be 11.

२ Thus M Bhav.; पुन्नाम्नोवात्सस्य Be U; पुन्नाम्ना वात्सस्य B; पुन्ना-मेनात्स्य Be 11 T.

३ Thus M Be11 T and the best MSS of the Karmānta-sūtra; परिवेष्याः B Be and Bhav.; निवेष्य the Vājasaneyins.

४ Thus only M and Bhav.; सूर्यवर्चसस्थेतिदृश्यं Be 11 T.; °स्थेति-दिश्याः Be; in BU the passage is missing; the Karmānta MSS. read स्वभिदृश्याः।

५ Thus M Be; the other MSS. defective.

६ Thus M Be Bhav.; वर्ष्याः Be 11 T; but cp. TS. VII. 4. 13.

सारस्वतीरभिजुहोत्यपो[1] देवीर्मधुमतीरगृभ्णन्नूर्जस्वती राजसूयाय चितानाः। याभिर्मित्रावरुणावभ्यषिञ्चन्याभिरिन्द्रमनयन्नत्यरातीः ॥ राष्ट्रदा स्थ राष्ट्रं दत्त स्वाहेति । गृह्णाति पर्णमयेन राष्ट्रदा स्थ राष्ट्रममुष्मा आमुष्यायणायामुष्य पुत्रायामुष्य पौत्राय दत्तेत्यथैना वैतसे द्रोणकलशे समवनयति देवीरापः सं मधुमतीर्मधुमतीभिः सृज्यध्वं महि वर्चः क्षत्रियाय वन्वाना इत्यथैना अन्तरेण होतुश्च धिष्णियं ब्राह्मणाच्छꣳसिनश्च सादयत्यनाधृष्टाः सीदतोर्जस्वतीर्महि वर्चः क्षत्रियाय दधतीरित्यथ ये ऽर्थ्याः[2] प्ररेका अध्वर्योस्तानावसथꣳ हरन्त्यथ ये[3] ऽनर्थ्या[3] अपस्तानभ्यवहरन्त्यथानभिक्रान्तानाꣳ सारस्वतीनां वसतीवरीर्दशपेयाय परिशाययन्ति । ॥ ८ ॥ तृतीयः ॥

अथात्रैव तिष्ठन्याचति दर्भनाडीꣳ शतमानꣳ[4] हिरण्यं चत्वारि नानारूप्याणि पात्राणि[5] तार्प्यं चोष्णीषं चैकशतं च दर्भपुञ्जीलानि दध्युदुम्बरꣳ शष्पाणि धनुश्चेषूꣳश्चेति[6] । स दर्भनाड्याꣳ शतमानꣳ हिरण्यं प्रबध्नात्यनिभृष्टमसि वाचो बन्धुस्तपोजा इत्यथैनद्वैतसे[7] द्रोणकलशे ऽवदधाति सोमस्य

---

१ Thus M Be U ; the other MSS. more or less corrupted.

२ नीर्थ्याः M Be 11 T.

३ येनतीर्थ्या M Be 11 T.

४ च ins. T Be 11.

५ यानि ins. Be BU.

६ इति om. Be BU.

७ Thus M only ; अथैनद्दै° Be BU ; अथैनदै° Be11 T.

दाचमसीति ' हिरण्येनोत्पुनाति शुक्रा वः शुक्रेणोत्पुनामि चन्द्राश्चन्द्रेणामृता अमृतेन स्वाहा राजसूयाय चिताना इति ' गृह्णाति पर्णमयेन सधमादो द्युम्निनीरूर्ज एत अनिभृष्टा अपस्युवो वसानाः । पस्त्यासु चक्रे वरुणः सधस्थमपाꣳ शिशुर्मातृतमास्वन्तरिति ' पुरस्तादासीनाय ब्रह्मणे प्रयच्छत्येतयैव गृहीत्वा दक्षिणत आसीनायौदुम्बरेण राजन्याय प्रयच्छत्येतयैव गृहीत्वा पश्चादासीनायाश्वत्थेन वैश्याय प्रयच्छत्येतयैव गृहीत्वोत्तरत आसीनाय नैयग्रोधेन जन्याय प्रयच्छत्यथैतं[१] प्रैकमाग्नीध्रꣳ[१] कृत्वापिधाय[१] प्रज्ञातं निदधात्यथ यजमानं तार्प्यं परिधापयति क्षत्रस्योल्बमसीति ' क्षत्रस्य योनिरसीत्यासजते[२] तार्प्यमभीव नाभिमुष्णीषं पर्यस्यत्यथैनमेकशतेन दर्भपुञ्जीलैः पवयति नित्येन पवनेनाथैनमुन्मृजन्नाग्रयति[३] दध्युदुम्बरꣳ गृभ्णामीत्यथैनमाविद्भिः प्राञ्चमानयत्याविन्नो अग्निर्गृहपतिरिति सप्तभिरनुच्छन्दसमथैनं यजमानायतने तिष्ठन्तं प्राहैष वो भरता राजेति येषाꣳ श्रेष्ठो[४] भवति ' सोमो ऽस्माकं ब्राह्मणानाꣳ राजेतीतरे प्रत्याहुरथास्मै धनुः

---

१ Thus M only (reading however एनं i.s.o. एतं); Be U om. आग्नीध्रं. Be 11 T are wholly corrupted.

२ Thus M Be B U; आसचते Be 11 T; Bhav. reads सचते or आसचते।

३ Uncertain reading: •मुन्मृजमामयति M U Be B; T Be 11 totally corrupted: •मुदुंबरमामयति।

४ Thus T Be 11; राजा M U Be B.

प्रयच्छतीन्द्रस्य वज्रो ऽसि वार्त्रघ्नस्त्वयायं वृत्रं वध्यादिति शत्रु-बाधना स्थेतीषूञ्छुन्मे[१] बाधध्वमितीतरः[२] प्रतिगृह्णाति पात मा प्रत्यञ्चं पात मा तिर्यञ्चमन्वञ्चं मा पात दिग्भ्यो मा पात विश्वाभ्यो मा नाष्ट्राभ्यः पातेत्यथ हिरण्यवर्णावुषसाꣳ विरोक इति त्रिष्टुभा[३] बाहू उद्गृह्णात्यथैनꣳ सꣳशास्ति मनसैव दिशो ऽनुप्रक्राम मनसोर्ध्वामनूज्जिहीथ्वेत्यथैनं[४] वाचयति ॥ ९ ॥

समिधमातिष्ठोग्रामातिष्ठ विराजमातिष्ठोदीचीमातिष्ठो-र्ध्वामातिष्ठेत्यथाचैव[५] तिष्ठन्याचति मारुतं चैकविꣳशतिकपालं वैश्वदेवीं चामिक्षां[६] तस्य यो ऽरण्ये ऽनुवाक्यो गणस्तेन मध्यमानि कपालान्युपहितानि भवन्ति राजसूयगणाभ्यामित-राणि ताभ्यां चरति[७] मरुद्भ्यो ऽनुब्रूहि मरुतो यजेति विश्वेभ्यो देवेभ्यो ऽनुब्रूहि विश्वान्देवान्यजेत्यभिष्टस्विष्टकृते[८] एवैते हविषी[९] अपिधाय[९] प्रज्ञाते निदधात्यथ याचति शार्दू-

---

१ Before मे T Be 11 ins : स्वास्य बाधन इति ब्राह्मणं, cp. TBr. I. 7. 6, 8.

२ Thus M Be 11 T ; बाधयध्वमि॰ Be BU.

३ Be BU चिर् or चि, but cp. T Br. l. c.

४ Emended ; ॰र्ध्वामनूजिहौ॰ M ; ॰र्ध्वामनूज्जोपृहौ॰ T Be 11 ; ॰र्ध्वाजिहीर्षेत्य॰ Be BU ; cp. TBr. I. 7.7.2 and Hir. XIII. 15 : मनसो-र्ध्वामनूज्जिहीते ।

५ अथ om. Be BU.

६ All the MSS. exc. M om. च ।

७ चरन्ति M T Be 11.

८ Before स्विष्टकृ॰ M T Be 11 ins. आमिक्षया चरति ।

९ Thus M Be BU ; चर्वीषि भवतीपिधाय T Be 11.

लचर्म सुवर्णरजतौ च[1] रुक्मौ वाराही उपानहौ सीसं च लोहितायसं च। दक्षिणतः क्लीब आस्ते। ऽथ पुरस्तादभिषेकस्य षट् पार्थानि जुहोत्यग्नये स्वाहा सोमाय स्वाहेत्यथ यजमानायतने शार्दूलचर्म प्राचीनग्रीवमुत्तरलोमोपस्तृणाति सोमस्य त्विषिरसि तवेव मे त्विषिर्भूयादिति। तद्यजमानं प्राञ्चमुपवेश्य सुवर्णरजताभ्यां रुक्माभ्यां पर्युपास्यत्यमृतमसि मृत्योर्मा पाहीत्यधस्ताद्रजतमुपास्यति दिद्योन्मा पाहीत्युपरिष्टात्सुवर्णं शताहत्समयावेष्टा दन्दशूका इति दक्षिणत आसीनं क्लीबं सीसेन विध्यति। सव्येन पादेन लोहितायसं निरस्यति निरस्तं नमुचेः शिर इत्यथास्मा अभिषेकात्संप्रसृजन्ति[2]। तान्सो ऽवेक्षते ॥ १० ॥

सोमो राजा वरुणो देवा धर्मसुवश्च ये। ते ते वाचं सुवन्तां ते ते प्राणं सुवन्तां ते ते चक्षुः सुवन्तां ते ते श्रोत्रं सुवन्तामित्यथ ब्रह्मणः[3] पात्रमादाय तेनाभिषिञ्चत्यध्वर्युरेव[4] यजुर्जपत्यभिषिञ्चन्नोतरे सोमस्य त्वा द्युम्नेनाभिषिञ्चाम्यग्नेस्तेजसा सूर्यस्य वर्चसेन्द्रस्येन्द्रियेण मित्रावरुणयोर्वीर्येण मरुतामोजसा क्षत्राणां क्षत्रपतिरस्यति दिवस्पाह्यमावित्यथोर्ध्वा

---

१ om. MB.

२ Thus M; संप्रतिसृजन्ति T Be 11; सर्पन्ति i.s. of संप्रसृजन्ति Be BU; Bhav. periphrases: सद्योयच्छन्ते।

३ Thus M Be U; ब्रह्मण B; ब्राह्मणाः Be 11 T.

४ तेनाभिषञ्चत्य° T Be 11.

धाराः समुन्मृष्टे समावहन्नधरागुदीचीरहिं बुध्नियमनुसंचर-
न्तीस्ताः पर्वतस्य वृषभस्य पृष्ठे नावश्चरन्ति स्वसिच इयाना
इत्यथैतेषामभिषेकाणां मुख्ये पात्रे संस्रावान्समवनीय[1]
प्रतिहितस्य गृह्णानेत्यथान्वारब्धयोः प्रतिहिते च महिष्यां च
जुहोति प्रजापते न त्वदेतान्यन्य इत्यथास्मा एष प्रतिहितो
वरं ददात्यथ प्रतिहिताय पात्रं प्रयच्छन्नाहेदं ते पात्रं दाया-
द्यमस्यघदा[2] त्वाभिषिञ्चामीदं ते ऽमदित्यथैतेनैव यथेतमेत्या-
ग्नीध्रे[3] प्रत्येकं जुहोति रुद्र यत्ते क्रयी परं नाम तस्मै हुतमसि
यमेष्टमसि स्वाहेत्यथास्मै धनुः प्रयच्छति यदि पुरस्तादप्रत्तं
भवति। समुन्मृष्टे समुत्क्रोशन्त्यभ्यषेच्ययममावामुष्यायणो ऽमुष्य
पुत्रो ऽमुष्य पौत्रो ऽमुष्य नप्ता राजसूयेनेत्यथ भूर्भुवः सुवरिति
वाचं विसृजते। दाभ्यां सुखं विमृष्टे। गायत्रान्विष्णुक्रमान्क्र-
मते[4]। ऽथोपरिष्टादभिषेकस्य षट् पार्थानि जुहोतीन्द्राय
स्वाहा घोषाय स्वाहेति। द्वादश भूतानामवेष्टीर्जुहोति
पृथिव्यै स्वाहान्तरिक्षाय स्वाहेत्यथैतयोर्हविषोः स्विष्टकृता
चरत्यथैने अपिधाय प्रज्ञाते निदधाति। ॥ ११ ॥

अथ वाराही उपानहावुपमुञ्चते पशूनां मन्युरसीति

---

१ ॰स्रावमवनीय M.

२ Thus M, which omits only घदा, but cp. infra XII. 13 s. f.; दायाद्यमघदा Be U; the other three MSS. are wholly corrupted; my copies of Bhav. read यद् i.s.o. घघद्।

३ चाग्नीध्रे om. Be BU.

४ Thus Be II T; गायत्राविः MU Be B.

दक्षिणे पादे तवैव मे मन्युर्भूयादिति सव्ये । ऽथेमामभिमृशति नमो मात्रे पृथिव्या इति । तस्यां दक्षिणं पादमुपावहरति[1] माहं मातरं पृथिवीꣳ हिꣳसिषमिति मा मां माता पृथिवी हिꣳसीदिति सव्यमंसयान्तरेण चात्वालोत्करावुदङुपनिष्क्रामति[2] विष्णोः क्रमो ऽसि विष्णोः क्रान्तमसि विष्णोर्विक्रान्तमसीत्युत्तरत एते रथा युक्तास्तिष्ठन्ति । तान्दृष्ट्वैव प्रतिहितो ऽवतिष्ठत्यथ प्रतिहितस्य धनुरादायाधिज्यं कृत्वा रथमातिष्ठति मरुतां प्रसवे जेषमित्याप्तं मन इति कूबरमभिनिश्रयते[3] । तं तदानीमेव प्रतिहितो ऽन्वातिष्ठति प्रससाहिषे पुरुहूत शत्रूनिति । त्रिष्टुभान्वारभत इति ब्राह्मणमथ[4] प्रतिहिताय[4] धनुः प्रयच्छन्नाह राजन्य एष षट्त्रिꣳशत्सु शम्याप्रव्याधेषु निर्जयेन[5] सहस्रेणावसितस्तस्मा[6] इषुमस्यतादपेनꣳ[7] राश्नुताज्जिनैनं[8] दक्षिणापथेनात्याकुरुतादिति । राजन्य

---

१ Thus MT Be 11; ॰पवहति Be BU.

२ ॰ष्क्रामति Be 11 T Be BU; ॰ष्क्रामंति M; Bhav. reads the plural, cf. p. 75, 3.

३ Thus corrected (cp. p. 79, 2; 105, 16); ॰भिनिश्यते M Be U; ॰भिश्रियते B; ॰भिश्रायते Be 11 T.

४ Thus M only; ब्राह्मणंसतिप्रतिहिताय Be 11 T; ब्राह्मणमथनिहिताय Be BU.

५ Thus MU Be B; निर्जयेण Be 11 T.

६ Thus Be BU; ॰वसितस्याक्षा M; ॰वसीतत्क्षा Be 11 T.

७ Thus corrected; ॰मस्यतादावैनं Be 11 T; ॰मस्यतादद्वेनं M; ॰मास्यताउपैनां Be BU.

८ Thus corrected; ॰श्नुताज्जिलैनं Be BU; ॰श्नुताजलैनं T Be 11; ॰श्नुतांजिल्वैनं M.

एव संश्लिष्टो[1] भवति राजपुत्रस्य इषुमसिष्यति[2] स त्वाप-राध्यति[3] तस्मा उत्तरवर्ग्येण[4] संवृत्येषुं[5] प्रयच्छतादिति । स तथा करोति । ॥ १२ ॥ चतुर्थः ॥

अथाहाभिमर्श यजमान माहेन्द्रं ग्रहं ग्रहीष्यामीत्यन्वारब्ध यजमाने माहेन्द्रं ग्रहं गृह्णाति महाꣳ इन्द्रो य ओजसेत्यनु-द्रुत्योपयामगृहीतोऽसि महेन्द्राय त्वा जुष्टं गृह्णामीति । परि-मृज्य सादयत्येष ते योनिर्महेन्द्राय त्वेत्यथैतान्मणीन्याचति राजतमौदुम्बरꣳ सौवर्णमिति । त एते[6] नानासूत्रेष्वोता भवन्ति । तानुत्तरस्य हविर्धानस्य सध्यन्ते वꣳशे प्रयत्याप उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ् द्रुत्वा स्तोत्रमुपा-करोति । स्तुवते माहेन्द्राय । प्रस्तुते सामि संप्रैषमाहाजिसृत

---

[1] Thus corrected; संश्रद्धो M; श्लिष्टो T Be 11; संश्लिष्टो Be BU.

[2] Thus corrected; इषुमाचिष्यति Be BU; इषुमवचिष्यति M; इषु-मस्यति T Be 11.

[3] Thus corrected; °पराध्यति MSS.

[4] Thus M Be BU; °वर्गेण T Be 11.

[5] Thus M; समच्छेषुं T Be 11; संवृत्येषुं Be BU. I subjoin the vivaraṇa of this difficult passage as found in my two copies: राजन्यः क्षत्रियः एष षट्त्रिंशत्सु सभ्याचेषेषु जैतयोन (read °येन) गोसहस्रेणा-वसितः स्थितः तस्मै राजन्याय इषुमस्यतादित्याशिष एवमपराध्नुनां (sic) सोपरि प्रक्षार्पीत् (sic) पार्श्वे विध्यतो स्थित्वा सं दक्षिणापथेन दक्षिणायनमार्गेण गच्छेति क्षत्रियः पूर्वमेव श्लिष्टो (read संश्लिष्टो) भवति राजपुत्रस्येषुमस्यति स त्वा सोपरि क्षिपति तस्मै उत्तरासङ्गेण समप्रक्षिप्तं (read °पक्षि° ?) संवृत्य दद्यादिति तदेव संवृत्य प्रयच्छति ।

[6] om. MT Be 11.

आजिं धावत दुन्दुभीन्समाघ्नताभिषोतारो[1] ऽभिषुणुताग्नीदाशिरं विनयोलूखलमुदादय प्रतिप्रस्थातर्वारुणमेककपालं निर्वप सौम्यस्य विड्ढीति । यथासंप्रैषं ते कुर्वन्ति । धावन्त्याजिसृत । आघ्नन्ति दुन्दुभीन्संप्रवदन्ति वाचः । संप्रोदिता[2] वाचो ऽनुमन्त्रयते । शाम्यन्ति घोषाः प्रस्ताय । होत्र एषोत्तमेति प्राङ्होतुः कालात्पराङावर्तते ऽध्वर्युरभ्येनमाह्वयते होता । प्रत्याह्वयते ऽध्वर्युः । शंसति । प्रतिगृणाति । प्रसिद्धमुक्थं प्रतिगीर्य प्राङेत्योद्गच्छत एतं माहेन्द्रं ग्रहमनूद्गच्छन्त इतरानुपोद्गच्छन्ते नाराशंसानथाश्रावयत्यो श्रावयास्तु श्रौषडुक्थशा यज सोमस्येति । वषट्कृतानुवषट्कृते द्विर्जुहोति । तथैव द्विर्द्विर्नाराशंसाननुप्रकम्पयन्ति । द्विर्हुतो माहेन्द्रः परिशेत । आयन्ति रथा । आगतान्रथान्दृष्ट्वा जपति[3] समहमिन्द्रियेण वीर्येण सं मयेन्द्रियं वीर्यमित्यथान्तरेण चात्वालोत्करावुदङुपनिष्क्रामत्युत्तरत[4] एते रथा युक्तास्तिष्ठन्ति । तान्दृष्ट्वैव प्रतिहितो ऽवतिष्ठत्यथ प्रतिहितस्य धनुरादायाधिज्यं[5] कृत्वा रथमातिष्ठति मरुतां प्रसवे जेषमित्याप्तं मन इति कूबरमभिनिग्र-

---

१ °समाह्नताभि° MB.

२ Thus only M; संप्रवदिता T Be 11; in the other MSS. this whole passage is missing.

३ Thus MU Be B; यजति Be 11 T.

४ °ष्क्रामत्यु° Be BU; °ष्क्रामंत्यु° M Be 11 T.

५ °दायाप्रज्यं M only.

यते[1] । तं तदानीमेव प्रतिहितो ऽन्वातिष्ठति प्रसमाहिषे पुरुहूत शत्रूनिति । त्रिष्टुभान्वारभत इति ब्राह्मणमथ प्रतिहिताय धनुः प्रयच्छत्याहेदं ते धनुर्दायाद्यमपद्यदा[2] त्वाभिषिञ्चामीदं ते ऽसदित्यथैतेनैव यथेतमेत्यान्तरेण चात्वालोत्करावुपातीत्य पूर्वया द्वारा हविर्धानं प्रपाद्य प्राञ्चꣳ रथमावर्त्य[3] तिष्ठति । ॥ १३ ॥

तदेतान्मणीन्याचति राजतमौदुम्बरꣳ सौवर्णमिति । सव्ये हस्ते राजतं प्रतिमुञ्चत इयदस्यायुरस्यायुर्मे धेहीति दक्षिण औदुम्बरमूर्गस्यूर्जं मे धेहीति दक्षिण एव सौवर्णं शुक्रमसि वर्चो ऽसि वर्चो मयि धेहीत्यथास्मा आमिक्षामुपोद्यच्छते[4] । तस्यां दक्षिणꣳ हस्तमुपावहरति मित्रो ऽसीति वरुणो ऽसीति सव्यमथैनामभिमृशति[5] समहं विश्वैर्देवैरित्यथैनामपिधाय प्रज्ञातां[6] निदधाति । तदेतान्मणीनेकस्मिन्सूत्र आवयति[7] मध्यत औदुम्बरं करोति । तान्धीवासु प्रतिषज्यैतेनैव यथेत-

---

१ Thus M and cp. supra p. 79, 2; infra 103, 9; •मथिभिन्द• Be BU; •मथिन्द• Be 11; •मपिन्द• T.

२ All the MSS. are more or less corrupted exc. M, which has however •द्यमसदा; cp. supra p. 102, 7.

३ •हत्य all.

४ Plural M Be BU; singular Be 11 T.

५ सव्यमथैनामभि• Be 11 T.

६ प्रज्ञानाम्निद• Be; प्रज्ञातं the other MSS., exc. M the reading of which is uncertain (प्रज्ञातं or प्रज्ञातां)।

७ Thus M; आवपति Be 11 T; आनयति Be BU.

मेत्याग्रेणाग्नीध्रं[1] प्राञ्चꣳ रथमावर्त्यावतिष्ठत्यथाग्नीध्रे[2] रथविमोचनीया[3] जुहोत्यग्नये[3] गृहपतये स्वाहेति चतस्रः सुवाङ्गतीरथास्यैतत्पुरस्तादेवाग्रेणाग्नीध्रꣳ रथवाहनं प्रागीषं योग्यकृतमुपस्थितं भवति। तस्मिन्त्सह संग्रहीत्रा रथवाहने रथमादधाति। सुवर्गादेवैनं लोकादन्तर्दधाति। हꣳसः शुचिषदित्यादधाति[4]। ब्रह्मणैवैनमुपावहरति[4] ब्रह्मणादधात्यतिच्छन्दसादधातीति ब्राह्मणमथास्यैतत्पुरस्तादेव जघनेनाग्नीध्रं चतुरपस्रावं[5] वाष्टापस्रावं[5] वा विमितं कारितं भवति। तस्य मध्यत औदुम्बरीमासन्दीं निमिनोति क्षत्रस्य नाभिरसीति। तस्यामुत्तरमष्टनमधीवासमास्तृणाति[6] क्षत्रस्य योनिरसीत्यथैनामासीदत्यासीदन्तमनुमन्त्रयते स्योनामासीद सुषदामासीद मा त्वा हिꣳसीदिति। मा मा हिꣳसीदितीतरः प्रत्याहाथासन्नमभिमन्त्रयते[7] निषसाद धृतव्रतो वरुणः पस्त्यास्वा साम्राज्याय सुक्रतु-

---

१ Here and infra Be 11 T every time आग्नीध्रीयं and ०ध्रीये।

२ रथमाहृत्य० MSS.

३ Thus (cp. TBr. I. 7. 9. 5) M Be U; ०विमोचनीयाञ्जु० Be 11 T; B corrupted.

४ ०दधातीति ब्राह्मणमथैनमुपा० M; the Brāhmaṇa (TBr. I. 7. 9. 6) is quoted in abbreviated form by all the MSS. exc. M.

५ Thus M, cp. infra XV. 2 and Āp. XVIII. 18. 5; ०स्रपस्रावं U Be; all the other MSS. and Bhav. both times ०स्रावं।

६ Thus M; उत्तरमष्टनं अधिवास० Be; उत्तरमष्टन अधिवास० BU; उत्तरमनवधीवास० Be 11 T; Bhav.: उत्तरमष्टनमुपरिरोमाधिवासं।

७ Thus MT Be 11; अनु i.s.o. अभि० B Be U.

रित्यथैनमृत्विजः पर्युपविशन्ति । पुरस्तादध्वर्युरुपविशति दक्षिणतो ब्रह्मा पश्चाद्धोतोद्गातोत्तरतस्ततः[1] प्राञ्चो वोदञ्चो वा रत्निनः । सो ऽध्वर्युमभिवदति[2] ॥ १४ ॥

[3]ब्रह्मा३न्निति । त्वꣳ राजन्ब्रह्मासीत्याहाध्वर्युः सवितासि सत्यसव इति । ब्रह्मा३न्निति ब्रह्माणं । त्वꣳ राजन्ब्रह्मासीत्याह ब्रह्मेन्द्रो ऽसि सत्यौजा इति । ब्रह्मा३न्निति होतारं । त्वꣳ राजन्ब्रह्मासीत्याह होता मित्रो ऽसि सुशेव इति । ब्रह्मा३न्नित्युद्गातारं । त्वꣳ राजन्ब्रह्मासीत्याहोद्गाता वरुणो ऽसि सत्यधर्मेति । सुश्लोका३ꣳ इति क्षत्तारं । त्वꣳ राजन्सुश्लोको ऽसीत्याह क्षत्ता । सुमङ्गला३ꣳ इति संग्रहीतारं । त्वꣳ राजन्सुमङ्गलो ऽसीत्याह संग्रहीता । सत्यराजा३न्निति भागदुघं । त्वꣳ राजन्सत्यराजासीत्याह भागधुक् । सप्त पुष्पनाभो ऽभ्युद्यायास्मै[4] स्फ्यं प्रयच्छतीन्द्रस्य वज्रो ऽसि वार्त्रघ्नस्तेन मे रध्येति । तेन[5]ते[5]रध्यासमितीतरः[5] प्रतिगृह्णाति । तꣳ संप्रयच्छति सूताय सूतग्रामणिने सजाताय सजातग्रामणिने संग्रहीत्रे ऽक्षावापगोव्यच्छाभ्यामन्ततस्तेन[6] तौ[6] सध्यतो ऽधिदेव-

---

१ ततः om. Be 11 T.

२ Thus M only ; all the other MSS. ध्वर्युरभिवदति ।

३ Here and in the following lines sometimes T Be 11, sometimes Be BU are defective ; M only is in good order.

४ Thus M only ; भत्र (i.s.o. अभ्युद्य) T Be 11 ; अभ्युद्याय B Be U.

५ तेनमेरध्या° M ; तेममेराध्या° Be 11 T ; तेनतेनराध्या° Be BU.

६ तेनवेमनतो Be BU ; ममतो M ; T Be 11 def.

समुद्धृत्य[1] तिस्रः पञ्चाशतः सौवर्णानयाचितपतो ऽस्यास्मै पञ्चाशानपच्छिद्य प्रयच्छति दिशो ऽभ्ययꣳ राजाभूदिति । ताꣳस्तदानीमेवाचेष्वपिसृजत्यथैतमोदनमुद्भवते । नानाꣳशिनौ ब्रह्मा च यजमानश्च समानाꣳशिनौ सूतग्रामण्यौ समानाꣳशिनौ क्षत्तसंग्रहीतारौ । स यो नु सताच इव स राज्ञ आसन्[2] उपविश्य[2] चतुःशतमयानपच्छिद्याहोक्षिमꣳ राज इति । तानेव[3] सनाक्समन्तानिव[3] कृत्वाह हतं ब्राह्मणस्येत्यथैतमोदनमुद्भवते । समानाꣳशिनौ ब्रह्मा च यजमानश्च नानाꣳशिनौ सूतग्रामण्यौ नानाꣳशिनौ क्षत्तसंग्रहीतारौ । स यः पराजयते तस्यैनं कुले क्षत्ता पाचयति । यावदेव ओदनः पच्यते तावदेव होता शौनःशेपमाख्यापयते हिरण्मये कशिपावासीनस्तस्मा अध्वर्युः प्रतिगृणाति हिरण्मये कूर्चे आसीनः[4] ॥ १५ ॥

ओꣳ होतस्तथा होतः सत्यꣳ[5] होतररात्स्म होतरिति । यद्गु वै होता नाध्येत्यन्य[6] उ[6] होचाशꣳसी शꣳसति । तस्मा

---

१ कथीता i.s.o. उदत्य M.

२ आसनमुपविश्य M.

३ तानेवसन्वक्षस० M.

४ As the MSS. with the exception of M are hopelessly spoiled, the text of the last 13 lines has been reconstructed as best possible. Only the various reading of M is given, as the var. of the other MSS. is nearly worthless.

५ MSS. exc. M ins. ह, cp. XVI. 8.

६ नाध्येत्यन्यो T Be 11; वधीत्यन्यउ (०न्युउ) Be BU; तदाध्येत्यन्यꣳ M.

उ प्रतिप्रस्थाता प्रतिगृणाति । परःशतं भवतीति ब्राह्मणं । यदैष ओदनः पक्को भवत्यथैनमेकधोद्धृत्य ब्रह्मण उपहरति । तस्मा एताꣳश्चैव मणीन्ददाति[1] शतं विपथं चतुष्प्राश्वेचर्मथ[2] होत्रे ददाति शतं विपथꣳ हिरण्मयं कशिप्वथोद्गात्रे ददाति शतं विपथमथाध्वर्यवे[3] ददाति शतं विपथꣳ रथं तिस्रः पञ्चाशतः सौवर्णानथान्हिरण्मयं कूर्चमित्येतेभ्य एतन्निर्जयꣳ[4] सहस्रं चतुर्धा कृत्वा ददात्यथैनमेतयामन्द्या मद आवहन्त्या[5] वा[5] व्रजत्यन्वायन्त्येनमेते[5] चमसा । अत्रैतयोर्हविषोरिडामुपह्वयत । इडोपहूतं माहेन्द्रꣳ होता चैवाध्वर्युश्च[6] संभक्षयतो । नराशꣳसपीतेन नाराशꣳसान् । होतृचमसमेवैते त्रयः समुपहूय भक्षयन्ति । यथाचमसं चमसान्हिन्व म इत्यात्मानं प्रत्यभिमृशन्ते । नाप्याययन्ति चमसांश्चंभक्षा मार्जयन्ते । ऽथेन्द्राय त्वेन्द्राय त्वेत्येवं[7] त्रिभिरुक्थ्यपर्यायैश्चरति[8] । संतिष्ठते माध्यंदिनꣳ सवनं । प्रसर्पन्ति तृतीयसवनाय । प्रसिद्धमादित्य-

---

१ सर्वान् before मणीन् ins. Be B; सर्वंमणीन् U.

२ चतुष्पल्वेचं all (also Āp. XVIII. 19. 7), but cp. supra p. 96, 5.

३ Thus M; अथ om. Be BU; विविधमथानिध्वर्यवे T Be 11.

४ एतंनिर्जयं all.

५ आवहंत्यावाव्रजंत्य॰ Be BUT Be 11; आवहंत्याव्रजंत्य॰ M, but cp. supra p. 81, 5.

६ एतन्यार्थं ins. T Be 11.

७ Thus MT Be 11; त्वेत्वेव Be; त्वेत्येव एवं BU.

८ ॰श्चरति M Be BU; ॰श्चरंति T Be 11.

ग्रहेण चरित्वाग्रयणं गृह्णात्यथोक्थ्यं गृह्णाति । समानं कर्मा पवमानात्पवमानेन चरित्वा द्वे धामच्छद्भ्यां चरति । तयोर्नाना मनोते[1] नाना देवते[2] नाना प्रत्यभिमर्शनौ[3] नाना वषाड्ढोमौ समानो वनस्पतिः समानः स्विष्टकृत्प्रैषवान्समानीडा समान्यो दिशो । नाना दिश इत्येके । समानं कर्मावभृथादथैतस्मिन्नवभृथ उपाददते चार्मपच्चावुपानहौ[4] । प्रस्नाव्य वाराही चार्मपचीभ्यामुदेति[5] । सो ऽपामन्ते जुहोत्यपां नप्त्रे स्वाहेति । विषुवति दर्भस्तम्बे जुहोत्यूर्जो नप्त्रे स्वाहेति । पुनरेत्य[6] गार्हपत्ये जुहोत्यग्नये गृहपतये स्वाहेति । प्रसिद्धो ऽवभृथ । उदयनीयेष्ट्वा मैत्रावरुणीं वशामुपाकरोति । तस्यै प्रसिद्धं वपया चरित्वा नैव श्मश्रूणि वपते न केशान्संतिष्ठत एष उक्थ्यो ऽभिषेचनीयश्चतुस्त्रिंशपवमानः[7] सहस्रदक्षिण उदवसानीयान्तः । ॥ १६ ॥ पञ्चमः ॥

अथास्यैषा पुरस्तादेव जुष्टे देवयजने सप्तसु शम्याप्रव्याधेषु शाला कारिता भवति । सो ऽत्रैवाग्नेयमष्टाकपालं निर्वपति ।

१ मनोते M Be 11 T; मनोता Be BU.

२ Thus M; देवता Be BU; T Be 11 om. this passage.

३ ॰मर्शनो M; ॰मर्शने T Be 11; ॰मर्शं B; ॰मर्शना Be.

४ Thus M; चर्मपच्चा उपानहौ T Be 11; चार्पेच्चा उपानहौ BU; चार्पेच्चा उ॰ Be; cp. infra XVIII. 19 init.

५ Thus T Be 11; चार्मपचिभ्या॰ M; चर्मपचीभ्या॰ B; चर्मपचिभ्या॰ Be U.

६ Thus M; प्रातरेत्य Be BU; Be 11 T defective.

७ ॰तुस्त्रिंशत्पव॰ U Bhav.

हिरण्यं ददाति । शम्यान्याम उदवसाय वसति । सारस्वतं चरुं । वत्सतरीं ददाति । द्वितीये शम्यान्याम उदवसाय वसति । सावित्रं द्वादशकपालमुपध्वस्तं ददाति । तृतीये शम्यान्याम उदवसाय वसति । पौष्णं चरुꣳ । श्यामं ददाति । चतुर्थे शम्यान्याम उदवसाय वसति । बार्हस्पत्यं चरुꣳ । शितिपृष्ठं ददाति । पञ्चमे शम्यान्याम उदवसाय वसत्यैन्द्रमेकादशकपालमृषभं ददाति । षष्ठे शम्यान्याम उदवसाय वसति । वारुणं दशकपालं । महानिरष्टं ददात्यथ सप्तमे ऽहन्त्कालामध्यवस्यत्येतदेवाग्रदीक्षते[1] । ऽथ वै भवति सद्यो दीक्षयन्ति सद्यः सोमं क्रीणन्ति पुण्डरिस्रजां प्रयच्छतीत्यथैनं तीर्थाद्दानीय पवयित्वा पुण्डरिस्रजिनमुदानीय दीक्षणीयामिष्टिं निर्वपति । तस्याꣳ सꣳस्थितायां मुष्टी चैव न करोति वाचं च न यच्छति । निदधत्यस्मा एतद्धविरुच्छिष्टं व्रतभाजनमथ प्रायणीयामिष्टिं निर्वपति । हविष्कृता वाचं विसृजते । ऽथास्मा एतद्धविरुच्छिष्टं प्रयच्छन्ति[2] व्रतभाजनमथ प्रायणीयेन चरति । प्रायणीयेन चरित्वा पदेन चरति । पदेन चरित्वा दशभिः साण्डैर्वत्सतरै राजानं क्रीत्वोद्यातिथ्यं निर्वपत्यातिथ्येन प्रचर्य पुरस्तादुपसदाꣳ सौम्यं चरुं । बभ्रुं ददात्यथ मध्यम उपसदावन्तरेण त्वाष्ट्रमष्टाकपालꣳ । शुण्ठं ददात्यथोपरिष्टादुपसदां वैष्णवं त्रिकपालं । वामनं ददात्य-

१ दीक्षते Be BU ; दीक्षन्ते M; दीक्षयन्ते T Be 11.
२ •यच्छंति M Be 11 T; •यच्छति Be BU.

आहवनीयं प्रणयत्याहवनीयं प्रणीय सदोहविर्धाने संमिनोति । सदोहविर्धाने संमित्याग्नीषोमौ प्रणयत्यग्नीषोमौ प्रणीय यूपस्यावृता यूपमुच्छ्रयति । स्वर्वन्तं यूपमुत्सृज्याग्नीषोमीयं पशुमुपाकरोति । तस्य प्रसिद्धं वपया चरित्वा सारस्वतीर्वसतीवरीर्गृहीत्वाथ पशुपुरोडाशं निर्वपतीडान्तः पशुपुरोडाशः संतिष्ठते । पत्नीसंयाजान्तः पशुर्हृदयशूलान्त इत्येके । ऽथ वसतीवरीः परिहृत्य पर्याऽग्नि विग्रिथ्योपवसन्त्यथातो महारात्र एव बुध्यन्ते । प्रातराज्यानि गृहीत्वा राजानमुपावहृत्य प्रातरनुवाकमुपाकरोति । परिहिते प्रातरनुवाके ऽपो ऽच्छैत्यद्भिरुदैति[1] । ॥ १७ ॥

अग्निष्टोमं क्रतुमुपैति । प्रसिद्धो ऽभिषवः । प्रसिद्धं ग्रहा गृह्यन्ते । समानं कर्माश्विनाद्ग्रहादाश्विनं ग्रहं[2] गृहीत्वा द्वे रशने आदाय यूपमभ्यैति[3] । स्वर्वन्तं यूपमुत्सृज्याग्नेयं पशुमुपाकरोति । तस्य प्राजापत्यस्तूपर उपालम्भ्यो भवति । तयोः प्रसिद्धं वपाभ्यां चरित्वा प्रसर्पन्ति प्रातःसवनाय । पूर्वस्यां द्वारि[4] सूतग्रामण्यावुपतिष्ठतो[5] ऽपरस्यां क्षत्तसंग्रहीतारौ । प्रसर्पतः पृच्छतः का ते माता का ते[6] मातामहीति । स य

१ °दैति MT Be 11 ; °रेति Be BU.

२ om. MT Be 11.

३ °भ्यैति M Be BU ; °भ्येति T Be 11.

४ द्विमि M.

५ °वुपतिष्ठतो B Be U ; °वुपविशतो M ; °वुपविश T Be 11.

६ om. Be BU.

आ दशभ्यो[1] संपादयत्यति तꣳ सृजन्त्यथ यो न संपादयति दीर्घवꣳशेन तमुपानुदन्ति[2] । स ह आह वैश्या मे माता सावित्रीति[3] वाति तꣳ सृजन्ति विप्रो विवाहान् गोप्तार इति वदन्तो । दशदशाच समसमभिसंजानत । ऋजुधा प्रातःसवनꣳ संतिष्ठते । प्रसर्पन्ति माध्यंदिनाय सवनाय । प्रसिद्धो ऽभिषवः । प्रसिद्धं ग्रहा गृह्यन्ते । समानं कर्मा दाक्षिणेभ्यो । दाक्षिणानि हुत्वा प्राकाशावध्वर्यवे ददाति स्रजमुद्गात्रे रुक्मꣳ होत्रे ऽश्वं प्रस्तोतृप्रतिहर्तृभ्यां द्वादश पष्ठौहीर्ब्रह्मणे वशां मैत्रावरुणायर्षभं ब्राह्मणाच्छꣳसिने वाससी नेष्टापोतृभ्याꣳ स्थूरि यवाचितमच्छावाकायानड्वाहमग्नीधे । भार्गवो होता भवति । श्रायन्तीयं ब्रह्मसामं भवति वारवन्तीयमग्निष्टोमसामर्जुधा माध्यंदिनꣳ सवनꣳ संतिष्ठते । प्रसर्पन्ति तृतीयसवनाय । प्रसिद्धमादित्यग्रहेण चरित्वाग्रयणं गृह्णाति । समानं कर्मा पवमानात्पवमानेन चरित्वा स्वे धामन्पशुभ्यां चरति । तयोर्नाना मनोते[4] नाना देवते[5] नाना प्रत्यभिमर्शनौ[6] नाना वसाहोमौ समानो वनस्पतिः समानः स्विष्टकृत्प्रैषवान्समानीडा समान्यो दिशो । नाना

---

१ Thus Be BU; दशमच्चै M; T Be 11 om. this passage altogether.

२ Thus M Be U; तमुपानर्दंति B; तंवनुर्दंति T Be 11.

३ Thus MT; सावित्रीनि Be 11; सावित्रीवि Be BU.

४ मनोते MT Be 11; मनोता Be BU.

५ देवते M; देवता Be BU; om. T Be 11.

६ Thus T Be 11; ॰भिमर्शौ M; ॰भिमर्शना Be BU.

दिश इत्येके । समानं कर्मावभृथात्संसिद्धो ऽवभृथ । उदयनीययेष्ट्येष्ट्वा मैत्रावरुणीं वशामुपाकरोति । तस्यै प्रसिद्धं वपया चरित्वा दक्षिणे वेद्यन्ते श्मश्रूण्येव वपते न केशान्संतिष्ठत एषो ऽग्निष्टोमः सप्तदशो दशपेयः सहस्रदक्षिण उदवसानीयान्तः । ॥ १८ ॥ षष्ठः ॥

अथ पञ्चहविषा दिशामवेष्ट्या यजत[1] । आग्नेयमष्टाकपालं निर्वपत्यैन्द्रमेकादशकपालं वैश्वदेवं चरुं मैत्रावरुणीमामिक्षां बार्हस्पत्यं चरुमित्यथ वै भवति हविषोहविष इष्ट्वा बार्हस्पत्यमभिघारयतीति । स हविषोहविष इष्ट्वा बार्हस्पत्यमभिघारयत्यन्वाहार्यमासाद्यैता[2] आदिष्टदक्षिणा ददात्यथ द्विपशुना पशुबन्धेन यजत । आदित्यां मल्हां गर्भिणीमालभते मारुतीं पृश्निं पष्ठौहीं । गर्भिण्यादित्या भवत्यगर्भा[3] मारुत्यादित्यया पूर्वया प्रचरति मारुत्योत्तरयोच्चैरादित्याया आश्रावयत्युपाꣳशु मारुत्यै । संतिष्ठते यथा द्विपशुः पशुबन्धस्तथाथ सत्यदूतानाꣳ[4] हविर्भिर्यजते । ऽश्विभ्यां पूष्णे पुरोडाशं द्वादशकपालं निर्वपति सरस्वते सत्यवाचे चरुꣳ सवित्रे सत्यप्रसवाय पुरोडाशं द्वादशकपालमन्वाहार्यमासाद्य तिसृधन्वꣳ शुष्कदृतिं ददाति । तं प्रतिराजभ्यः प्रहिणोति । स

१ यजन्त Be BU.

२ Thus M only; °मासाद्यता Be BU; °मासाद्येता T Be 11.

३ Thus M only; भवतिगर्भा Be BU; T Be 11 om. these words.

४ Thus M; the other MSS. are partly corrupted, partly incomplete.

यः प्रतिगृह्णाति मित्रो म इति तं वेदाथ यो न प्रतिगृह्णात्यमित्रो म इति तं वेदाथ पूर्वैः प्रयुजाꣳ हविर्भिर्यजत । आग्नेयमष्टाकपालं निर्वपति सौम्यं चरुꣳ सावित्रं द्वादशकपालं बार्हस्पत्यं चरुं त्वाष्ट्रमष्टाकपालं वैश्वानरं द्वादशकपालमन्वाहार्यमासाद्य दक्षिणꣳ रथवाहनवाहं[1] ददात्यथ पौर्णमासवैमृधाभ्यामिष्ट्वोत्तरैः प्रयुजाꣳ हविर्भिर्यजते । सारस्वतं चरुं निर्वपति पौष्णं चरुं मैत्रं चरुं वारुणं चरुं क्षैत्रपत्यं चरुमादित्यं चरुमन्वाहार्यमासाद्योत्तरꣳ रथवाहनवाहं[2] ददाति । ॥ १९ ॥

अथैतद्द्वादशाहं व्रतं चरत्याङ्क्ते[3] । न दतो धावते । ऽभ्यङ्क्ते । न प्रमन्दयते । युध्यते युद्ध आगते । ऽग्निहोत्रोच्छेषणव्रतो वा[4] यजमानो भवति । भक्तसु[5] पत्न्या आहरन्त्यथैतत्पुरस्तादेव जुष्टे देवयजने तिस्रः शालाः कारिता भवन्ति । स दक्षिणार्ध्याꣳ[6] शालामध्यवसाय मथित्वाग्नीन्वि-

---

[1] Thus Be BU; रथवाहनं MT Be 11, but cp. Āp. XVIII. 22. 6, 8.

[2] Thus again, Be BU; रथवाहं M; T Be 11 om.

[3] These and the following words thus in M; चरत्याङ्क्ते नदतेधावतेभ्यंक्तेनप्रमंदयते Be BU; चरतिनाङ्क्तेनदतोधावतेभ्यंक्तेनप्रमन्नयते Be 11 T; Bhav. reads प्रस्कन्दयते explaining this word, as it seems, by न खट्वायां शेते न केशान्विलिखते ।

[4] वा Be 11 T; च Be BU; M om.

[5] M om. च, but cp. vol. I. 67. 4.

[6] दक्षिणां T Be 11.

हृत्य प्रतीचीनस्तोमाय केशवपनीयायातिरात्राय दीक्षते । तस्यापरिमिता दीक्षा द्वादशोपसदः । स तथा राजानं क्रीणाति यथा मन्यते पौर्णमास्यां मे यजनीये[1] ऽहन्सुत्या संपत्स्यत इति । तस्य तथा संपद्यते । प्रसिद्धेन कर्मणोपवसथादेत्याथ[2] वसतीवरीः परिहृत्य पयाꣳसि विशिष्योपवसन्त्यथातो महारात्र एव बुध्यन्ते । प्रातराज्यानि गृहीत्वा राजानमुपावहृत्य प्रातरनुवाकमुपाकरोति । परिहिते प्रातरनुवाके ऽपो ऽच्छैत्यद्भिरुदेत्यतिरात्रं[3] क्रतुमुपैति । प्रसिद्धो ऽभिषवः । प्रसिद्धं ग्रहा गृह्यन्ते । समानं कर्मावभृथात्प्रसिद्धो ऽवभृथ । उदयनीययेष्ट्वा मैत्रावरुणीं वशामुपाकरोति । तस्यै प्रसिद्धं वपया चरित्वा दक्षिणे वेद्यन्ते यानि कानि च लोमानि[4] वापयते । संतिष्ठत एष प्रतीचीनस्तोमः केशवपनीयो ऽतिरात्रः सहस्रदक्षिण उदवसानीयान्तो । ऽथ मध्यमाꣳ शालामध्यवसाय मथित्वाग्नीन्विहृत्य व्युष्टये द्विरात्राय दीक्षते । तस्यापरिमिता दीक्षा द्वादशोपसदः । स तथा राजानं क्रीणाति यथा मन्यते द्विरात्रस्य मे[5] सतो[5] ऽमावास्याया[5] उपवसथीये[5]

---

१ Thus U Be (sec. m.); यज्ञीये Be (pr. m.) B; यज्ञिये M; Be 11 T om. the passage.

२ ॰थोपवस॰ M Be.

३ Thus M Be 11 T; ॰द्भिरुदेत्यातिरात्रं Be BU.

४ तानि ins. M.

५ Thus T Be 11 (only ॰वास्याये); मे before सतो om. M, but this MS.: मावास्याये स उप॰; Be BU give मे before सतो and सा before उप॰, reading ॰वास्याये।

ऽहन्पूर्वमहः संपद्यत उत्तरस्मिन्नुत्तरमिति । संतिष्ठते व्युष्टि-द्विरात्रो[1] । ऽथोत्तरार्ध्यां[2] शालामध्यवसाय मथित्वाग्नीन्विहृ-त्योदयनीयायाग्निष्टोमाय दीक्षते । तस्य तिस्रो दीक्षास्तिस्र उपसदः सप्तम्यां प्रसुतः । संतिष्ठत एष उदयनीयो ऽग्निष्टोम-श्चतुष्टोमः सहस्रदक्षिण उदवसानीयान्तो[3] । ऽथ देविकाहवि-र्भिर्यजते । ऽथ त्रैधातवीयया यजते । ऽथ सौत्रामण्या यजते । संतिष्ठते राजसूयो ऽर्धसप्तदशैर्मासैः । संतिष्ठते राजसूयः संतिष्ठते राजसूयः । ॥ २० ॥ सप्तमः ॥

॥ इति द्वादशः प्रश्नः ॥

---

१ Thus all; are we to correct व्युष्टिर्द्विरात्रो ?, cp. 117, 14.

२ Thus BeBUM (sec. m.); थोत्तराद्धू M (pr. m.) T Be 11 Karmântasûtra.

३ उदयनीयान्तो Be 11 T.

¹अथात इष्टीर्व्याख्यास्यामस्तासाꣳ सह प्रदिष्टमेव दार्शपौर्णमासिकं तन्त्रं । दार्शपौर्णमासिकः² संस्कारः² । सर्वाः प्रथमाः सर्वा मध्यमाः सर्वा उत्तमा³ । यथाकालं पर्वतिथ्या निर्वपेद्या आदिष्टस्थाना । अथ या अनादिष्टस्थाना यानि पूर्वपक्षस्य पुण्याहान्येतत्तीर्थानि⁴ भवन्ति या अनार्तिष्ट्यो ऽथ या आर्तिष्ट्य उपाधिगमकालास्ता भवन्ति । यथैतदभ्युद्धृताभ्युदिताभिनिम्रुक्ताविज्ञातेति । व्युदितमन्यन्वाधानं । नित्यं व्रतोपायनं । यावत्सिद्धि याजमानमनुसꣳहरेदन्यत्रावापदेवताभ्यस्तासां याः सोपनामास्ता उपाꣳश्वथेतरा उच्चैरादेशादेव । सप्तदश सामिधेन्यो जानीयाद्यथैतन्मानवी ऋचौ धाय्ये कुर्यादुष्णिक्ककुभौ⁵ धाय्ये त्रिष्टुभौ⁶ संयाज्ये⁶ । वार्त्रघ्नावाज्यभागौ पूर्वपक्षे । वृधन्वन्तावपरपक्ष इत्यौपमन्यवो । यानि हवीꣳषि कामेन वा दक्षिणया वा व्यपेतानि⁷ स्युर्नानाबर्हीꣳष्येव

---

१ The text of this first adhyāya is given principally according to M, in comparison with the vivaraṇa. All the other MSS. except D, contain a highly corrupted tradition. I do not give all their various readings, which are nearly ever so much corruptions.

२ Thus M and Bhav.; ॰मासिकाः संस्काराः all the other MSS.

३ ॰त्तमा M.

४ ॰तीर्थानि M.

५ कुर्याद् om. M.

६ Thus only D; M om.; त्रिष्टुभो धाय्ये UB; त्रिष्टुभो धाय्ये Be; त्रिष्टुभ स्याग्रेर् Be 8.

७ व्यवेतानि M.

तानि जानीयाद्यादेशादेव दक्षिणाव्यपेतꣳ[1] समानबर्हिर्भवति यथा दिशामवेष्टिर्नैष्टीरुपाꣳशुयाजो[2] ऽनुसमेति । यद्देवत्यꣳ हविस्तद्देवत्ये याज्यापुरोऽनुवाक्ये । पुरस्तात्स्विष्टकृत उपहोमा यथासूक्ता उपहोमा । वासोदक्षिणाः काम्या इष्टयो या अनादिष्टदक्षिणा । गोदक्षिणः पशुबन्धो । नित्यो ऽन्वाहार्य । इति[3] न्वा[3] इमा[3] इष्टयो[3] व्याख्याताः । ॥ १ ॥ प्रथमः ॥

अथ वै भवत्यैन्द्राग्नमेकादशकपालं निर्वपेत्प्रजाकाम इति । तस्या एते भवत उभा वामिन्द्राग्नी अश्रवꣳ हीत्यैन्द्राग्नमेकादशकपालं निर्वपेत्स्पर्धमानः क्षेत्रे वा सजातेषु वेति । तस्या एते भवत इन्द्राग्नी रोचना दिवः श्नथद्वृत्रमित्यैन्द्राग्नमेकादशकपालं निर्वपेत्संग्राममुपप्रयास्यन्निति । तस्या एते भवत इन्द्राग्नी नवतिं पुरः शुचिं नु स्तोममित्यैन्द्राग्नमेकादशकपालं निर्वपेत्संग्रामं जित्वेति । तस्या एते भवत उभा वामिन्द्राग्नी अश्रवꣳ हीत्यैन्द्राग्नमेकादशकपालं निर्वपेज्जनतामेष्यन्निति । तस्या एते भवत इन्द्राग्नी रोचना दिवः श्नथद्वृत्रमिति । पौष्णं चरुमनुनिर्वपेदिति । तस्या एते भवतो वयमु त्वा पथस्पते पथस्पथ इति । क्षेत्रपत्यं चरुं निर्वपेज्जनतामागत्येति । तस्या एते भवतः क्षेत्रस्य पतिना वयं क्षेत्रस्य पत इत्यैन्द्राग्न-

---

१ ॰व्यवेतं M.

२ दिशामवेष्टीर्नै॰ M.

३ इतीन्विमा इष्टीर्व्याख्याताः M; all the other MSS. have also इष्टिर् or इष्टीर्।

मेकादशकपालमुपरिष्टान्निर्वपेदिति ' तस्या एते भवतो ये संग्रामं जिग्युषः ' ॥ २ ॥

अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेद्यो दर्शपूर्णमासयाजी सन्नमावास्यां वा पौर्णमासीं वातिपादयेदित्यन्तेऽस्या यक्ष्यमाण उपकल्पयते पथो ऽन्तिकाद्दर्हिरनड्वाहं ' तस्या एते भवतो ऽग्ने नया देवानामित्यन्वाहार्यमासाद्यानड्वाहं ददात्यग्नये व्रतपतये पुरोडाशमष्टाकपालं निर्वपेद्य आहिताग्निः सन्नव्रत्यमिव चरेदिति ' तस्या एते भवतस्त्वमग्ने व्रतपा असि यद्वो वयं प्रमिनाम व्रतानीत्यग्नये रक्षोघ्ने पुरोडाशमष्टाकपालं निर्वपेद्यꣳ रक्षाꣳसि सचेरन्नित्यथ वै भवति निशितायां निर्वपेत्परिश्रिते याजयेदिति ' स निशायां महारात्र उत्थायाग्नये रक्षोघ्ने पुरोडाशमष्टाकपालं निर्वपति ' परिश्रिते याजयति ' कृणुष्व पाजः प्रसितिं न पृथ्वीमित्येतस्यानुवाकस्य पञ्चदश सामिधेनीः पराचीरन्वाह ' तस्या एते भवतो रक्षोहणं वि ज्योतिषेत्यथ पुरस्तात्स्विष्टकृतः स्रुवाहुतिमुपजुहोत्युत स्वानासो दिवि षन्त्वग्नेरिति ' ॥ ३ ॥

अग्नये रुद्रवते पुरोडाशमष्टाकपालं निर्वपेदभिचरन्निति ' तस्या एते भवतस्त्वमग्ने रुद्र आ वो राजानमित्यग्नये सुरभिमते पुरोडाशमष्टाकपालं निर्वपेद्यस्य गावो वा पुरुषा वा प्रमीयेरन्यो वा बिभीयादिति ' तस्या एते भवतो ऽग्निर्होता साध्वीमकरित्यग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेत्संग्रामे संयत्त इति ' तस्या एते भवतो ऽक्रन्ददग्निस्ते वसूनीत्यथ वै

भवत्यभि वा एष एतानुच्यति येषां पूर्वापरा अन्वञ्चः प्रमीयन्ते । पुरुषाकृतिर्ह्यस्य प्रियतमाग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेदिति । तस्या एते भवतो । ऽय वै भवत्यभि वा एष एतस्य गृहानुच्यति यस्य गृहान्दहत्यग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेदिति । तस्या एते भवतः । ॥ ४ ॥

द्वितीयः ॥

अथ वै भवत्यग्नये कामाय पुरोडाशमष्टाकपालं निर्वपेद्यं कामो नोपनमेदिति । तस्या एते भवतस्तुभ्यं ता अङ्गिरस्तमाश्याम तं काममग्न इत्यग्नये यविष्ठाय पुरोडाशमष्टाकपालं निर्वपेत्स्पर्धमानः क्षेत्रे वा सजातेषु वेति । तस्या एते भवतः श्रेष्ठं यविष्ठ भारत स श्वितान इत्यग्नये यविष्ठाय पुरोडाशमष्टाकपालं निर्वपेदभिचर्यमाण इति । तस्या एते भवतो । ऽग्नय आयुष्मते पुरोडाशमष्टाकपालं निर्वपेद्यः कामयेत सर्वमायुरियामिति । तस्या एते भवत आयुष्टे आयुर्दा अग्न इत्यग्नये जातवेदसे पुरोडाशमष्टाकपालं निर्वपेद्भूतिकाम इति । तस्या एते भवतस्तस्मै ते दिवस्परीत्यग्नये रुक्मते पुरोडाशमष्टाकपालं निर्वपेद्रुक्काम इति । तस्या एते भवतः शुचिः पावक दृशानो रुक्म इत्यग्नये तेजस्वते पुरोडाशमष्टाकपालं निर्वपेत्तेजस्काम इति । तस्या एते भवत आ यदिषे नृपतिं स तेजीयसेत्यग्नये साहन्त्याय पुरोडाशमष्टाकपालं निर्वपेत्सीक्षमाण इति । तस्या एते भवतो ऽग्ने सहन्तमाभर तमग्ने पृतनासहं रयिमिति । ॥ ५ ॥

अग्नये ऽन्नवते पुरोडाशमष्टाकपालं निर्वपेद्यः कामयेतान्नवान्स्यामिति । तस्या एते भवत उक्षान्नाय वशान्नाय वश्वा हि सूनो इत्यग्नये ऽन्नादाय पुरोडाशमष्टाकपालं निर्वपेद्यः कामयेतान्नादः स्यामिति । तस्या एते भवतो । ऽग्नये ऽन्नपतये पुरोडाशमष्टाकपालं निर्वपेद्यः कामयेतान्नपतिः स्यामिति । तस्या एते भवतो । ऽग्नये पवमानाय पुरोडाशमष्टाकपालं निर्वपेदग्नये पावकायाग्नये शुचये ज्योगामयावीत्येतयेष्ट्या यक्ष्यमाण उपकल्पयते हिरण्यं । तस्या एता भवन्त्यग्न आयूंषि पवस ऽग्ने पवस्वाग्ने पावक स नः पावकाग्निः शुचिव्रततम उदग्ने शुचयस्तवेत्यन्वाहार्यमासाद्य हिरण्यं दद्यादेतामेव निर्वपेच्चक्षुष्काम इति । तस्या एता भवन्ति । ॥ ६ ॥

अग्नये पुत्रवते पुरोडाशमष्टाकपालं निर्वपेदिन्द्राय पुत्रिणे पुरोडाशमेकादशकपालं प्रजाकाम इति । तस्या एता भवन्ति यस्त्वा हृदा कीरिणा मन्यमानो यस्मै त्वꣳ सुकृते जातवेदस्त्वे सुपुत्र शवस उक्थउक्थे सोम इन्द्रं ममादेत्यग्नये रसवते ऽजक्षीरे चरुं निर्वपेद्यः कामयेत रसवान्स्यामिति । तस्या एते भवतो ऽग्ने रसेनापो अन्वचारिषमित्यग्नये वसुमते पुरोडाशमष्टाकपालं निर्वपेद्यः कामयेत वसुमान्स्यामिति । तस्या एते भवतो वसुर्वसुपतिस्त्वामग्ने वसुपतिं वसूनामित्यग्नये वाजसृते पुरोडाशमष्टाकपालं निर्वपेत्संग्रामे संयत्त इति । तस्या एते भवतस्त्वामग्ने वाजसातममयं नो अग्निरित्यग्नये ऽग्निवते पुरोडाशमष्टाकपालं निर्वपेद्यस्याग्नावग्निमभ्युद्धरेयुरिति । तस्या

एते भवतो ऽग्निनाग्निः समिध्यते त्वᳫ ह्यग्ने अग्निनेत्यग्नये ज्योतिष्मते पुरोडाशमष्टाकपालं निर्वपेद्यस्याग्निरुद्धृतो ऽहुते ऽग्निहोत्र उद्वायेदपर आदीप्यानूद्धृत्य इत्याहुस्तत्तथा न कार्यं यद्भागधेयमभि पूर्वं उद्ध्रियते किमपरो ऽभ्युद्ध्रियेतेति तान्येवावक्षाणानि संनिधाय मन्थेदिति स तान्येवावक्षाणानि संनिधाय मन्थतीतः प्रथमं जज्ञे अग्निः स्वाद्योनेरधि जातवेदाः। स गायत्रिया त्रिष्टुभा जगत्या देवेभ्यो हव्यं वहतु प्रजानन्निति छन्दोभिरेवैनᳫ स्वाद्योनेः प्रजनयतीति ब्राह्मणमग्नये ज्योतिष्मते पुरोडाशमष्टाकपालं निर्वपेदिति तस्या एते भवत उदग्ने शुचयस्तव वि ज्योतिषेति ॥ ७ ॥

तृतीयः ॥

अथ वै भवति वैश्वानरं द्वादशकपालं निर्वपेद्वारुणं चरुं दधिक्राव्णे चरुमभिशस्यमान इत्येतयेष्ट्या यक्ष्यमाण उपकल्पयते हिरण्यं तस्या एता भवन्ति वैश्वानरो न ऊत्या त्वमग्ने शोचिषा शोशुचानो ऽव ते हेड उदुत्तमं दधिक्राव्णो अकारिषमा दधिक्रा इत्यन्वाहार्यमासाद्य हिरण्यं ददात्येतामेव निर्वपेत्प्रजाकाम इति तस्या एते भवन्ति वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जात इति तस्या एते भवतो वैश्वानरस्य दᳫसनाभ्यो बृहज्जातो यदग्न इति वैश्वानरं द्वादशकपालं निर्वपेदमावास्यां वा पौर्णमासीं वातिपाद्येति तस्या एते भवतो वैश्वानरो न ऊत्या पृष्टो दिवीत्याग्नेयमष्टाकपालं निर्वपेद्वैश्वानरं द्वादशकपालमग्निमुद्वासयिष्यन्निति

तस्या एता भवन्त्यग्निर्मूर्धा भुवो वैश्वानरो न ऊत्या त्वमग्ने शोचिषा शोशुचान इति । वैश्वानरं द्वादशकपालं निर्वपेन्मारुतञ् सप्तकपालं ग्रामकाम इत्यथ वै भवत्याहवनीये वैश्वानरमधिश्रयति गार्हपत्ये मारुतमनूच्यमान आसादयतीति । काले प्रत्यक्षं वैश्वानरमासादयत्यनूच्यमानासु सामिधेनीषु मारुतं । तस्य एता भवन्ति वैश्वानरो न ऊत्या पृष्टो दिवि मरुतो यद्ध वो दिवो या वः शर्मेति । ॥ ८ ॥

आदित्यं चरुं निर्वपेत्संग्राममुपप्रयास्यन्निति । तस्या एते भवतो ऽदितिर्न उरुष्यत्वु महीमू षु मातरमिति । वैश्वानरं द्वादशकपालं निर्वपेदायतनं गत्वेति । तस्या एते भवतो वैश्वानरो न ऊत्यास्माकमग्ने मघवत्सु धारयेति । वैश्वानरं द्वादशकपालं निर्वपेदिदिषाणयोरन्नं जग्ध्वेति । तस्या एते भवतो वैश्वानरो न ऊत्यर्तावानमिति । वैश्वानरं द्वादशकपालं निर्वपेत्समानयोः पूर्वो ऽभिद्रुह्येति । तस्या एते एव भवतो । वैश्वानरं द्वादशकपालं निर्वपेदविं प्रतिगृह्येति । तस्या एते भवतो वैश्वानरो न ऊत्या त्वमग्ने शोचिषा शोशुचान इति । वैश्वानरं द्वादशकपालं निर्वपेदुभयादत्प्रतिगृह्याश्वं वा पुरुषं वेति । तस्या एते एव भवतो । वैश्वानरं द्वादशकपालं निर्वपेत्सनिमेष्यन्निति । तस्या एते भवतो वैश्वानरो न ऊत्या वैश्वानरस्य सुमतौ स्यामेति । ॥ ९ ॥

अथ वै भवति यो वै संवत्सरं प्रयुज्य न विमुञ्चत्यप्रतिष्ठानो वै स भवत्येतमेव वैश्वानरं पुनरागत्य निर्वपेदिति ।

स एतमेव वैश्वानरं पुनरागत्य निर्वपति। यमेव प्रयुङ्क्ते तं भागधेन विमुञ्चति प्रतिष्ठित्या इति ब्राह्मणमथ वै भवति यथा रज्ज्वोत्तमां गामाजेत्तां भ्रातृव्याय प्रहिणुयादिति। स यथा रज्ज्वोत्तमां गामाजति तां भ्रातृव्याय प्रहित्य भ्रातृव्यस्य गोष्ठे न्यस्यति। निर्ऋतिमेवास्मै प्रहिणोतीति ब्राह्मणं। तस्या एते भवतः। ॥ १० ॥ चतुर्थः ॥

अथ वै भवत्यैन्द्रं चरुं निर्वपेत्पशुकाम इति। तस्या एते भवत इन्द्रं वो विश्वतस्परीन्द्रं नर इतीन्द्रायेन्द्रियावते पुरोडाशमेकादशकपालं निर्वपेत्पशुकाम इति। तस्या एते भवत इन्द्रियाणि शतक्रतो ऽनु ते दायीतीन्द्राय घर्मवते पुरोडाशमेकादशकपालं निर्वपेद्ब्रह्मवर्चसकाम इति। तस्या एते भवत आ यस्मिन्सप्त वासवा आमासु पक्वमैरय इतीन्द्रायार्कवते पुरोडाशमेकादशकपालं निर्वपेदन्नकाम इति। तस्या एते भवत इन्द्रमिद्गाथिनो बृहद्गायन्ति त्वा गायत्रिण इतीन्द्राय घर्मवते पुरोडाशमेकादशकपालं निर्वपेदिन्द्रायेन्द्रियावत इन्द्रायार्कवते भूतिकाम इति। तस्य एता भवन्त्या यस्मिन्सप्त वासवा आमासु पक्वमैरय इन्द्रियाणि शतक्रतो ऽनु ते दायीन्द्रमिद्गाथिनो बृहद्गायन्ति त्वा गायत्रिण इति। ॥ ११ ॥

इन्द्रायाऽंहोमुचे पुरोडाशमेकादशकपालं निर्वपेद्यः पाप्मना गृहीतः स्यादिति। तस्या एते भवतो ऽंहोमुचे विवेष यन्मेतीन्द्राय वैमृधाय पुरोडाशमेकादशकपालं निर्व-

पेद्यं मृधो ऽभि प्रवेपेरन्राष्ट्राणि वाभि समियुरिति ' तस्या एते भवतो वि न इन्द्र मृधो जहि मृगो न भीम इतीन्द्राय त्रात्रे पुरोडाशमेकादशकपालं निर्वपेद्बद्धो वा परियत्तो वेति ' तस्या एते भवतस्त्रातारमिन्द्रं मा ते अस्याᳲ सहसावन्नितीन्द्रायार्काश्वमेधवते पुरोडाशमेकादशकपालं निर्वपेद्यं महायज्ञो नोपनमेदिति ' तस्या एते भवतो ऽनवस्ते रथं वृष्णे यत्त इति ' ॥ १२ ॥

इन्द्रायान्वृजवे पुरोडाशमेकादशकपालं निर्वपेद्ग्रामकाम इति ' तस्या एते भवतो ऽन्वह मासा अनु ते दायीतीन्द्राण्यै चरुं निर्वपेद्यस्य सेनासᳲशितेव स्यादित्यंय वै भवति बल्वजानपीध्मे संनह्येत्तान्सहैवेध्मेनाभ्यादध्यादिति ' तान्सहैवेध्मेनाभ्यादधाति ' तस्या एते भवत इन्द्राणीमासु नारिषु नाहमिन्द्राणि रारणेतीन्द्राय मन्युमते मनस्वते पुरोडाशमेकादशकपालं निर्वपेत्संग्रामे संयत्त इति ' तस्या एते भवतो यो जात एवा ते मह इन्द्रो ऽत्युग्र इत्येतामेव निर्वपेद्यो हतमना इव स्यादिति ' तस्या एते भवत ' एतामेव निर्वपेद्यः स्वयंपाप इव स्यादिति ' तस्या एते एव भवतः ' ॥ १३ ॥

इन्द्राय दात्रे पुरोडाशमेकादशकपालं निर्वपेद्यः कामयेत दानकामा मे प्रजाः स्युरिति ' तस्या एते भवतो मा नो मर्धीरा तू भरेतीन्द्राय प्रदात्रे पुरोडाशमेकादशकपालं निर्वपेद्यस्मै प्रत्तमिव सन्न प्रदीयेतेति ' तस्या एते भवतः प्रदातारᳲ हवामहे प्रदाता वज्रीतीन्द्राय सुत्राम्णे पुरोडाश-

मेकादशकपालं निर्वपेदपरुद्धो वापरुध्यमानो वेति। तस्या एते भवत इन्द्रः सुत्रामा तस्य वयꣳ सुमतौ यज्ञियस्येति। यो ऽलꣳ श्रियै सन्सदृङ् समानैः स्यात्तस्मा एतमैन्द्रमेकादशकपालं निर्वपेदित्यथ वै भवति रेवती पुरोऽनुवाक्या भवति शान्त्या अप्रदाहाय शक्वरी याज्येति। तस्या एते भवतो रेवतीर्नः प्रो ष्वस्मै पुरोरथमिति। ॥ १४ ॥ पञ्चमः ॥

अथ वै भवत्याग्नावैष्णवमेकादशकपालं निर्वपेदभिचरन्त्सरस्वत्याज्यभागा स्याद्बार्हस्पत्यश्चरुरित्यथ वै भवति प्रति वै परस्तादभिचरन्तमभिचरन्ति। द्वे द्वे पुरोऽनुवाक्ये कुर्यादतिप्रयुक्त्या इति। स द्विर्द्विः पुरोऽनुवाक्यामन्वाह। त्रिस्त्रिर्हविषामवद्यति। तस्या एता भवन्त्यग्नाविष्णू अग्नाविष्णू प्र णो देव्या नो दिवो बृहस्पत एवा पित्र इत्येतयैव यजेताभिचर्यमाण इति। तस्या एता एव भवन्त्याग्नावैष्णवमेकादशकपालं निर्वपेद्यं यज्ञो नोपनमेदिति। तस्या एते भवतो ऽग्नाविष्णू अग्नाविष्णू इत्याग्नावैष्णवं घृते चरुं निर्वपेच्चक्षुष्काम इति। तस्या एते एव भवतः। ॥ १५ ॥

अथ वै भवतीन्द्रियं वै वीर्यं वृङ्क्ते भ्रातृव्यो यजमानो ऽयजमानस्याध्वरकल्पां प्रतिनिर्वपेद्भ्रातृव्ये यजमाने। नास्येन्द्रियं वीर्यं वृङ्क्ते। पुरा वाचः प्रवदितोर्निर्वपेदिति। स पुरा वाचः प्रवदितोर्भद्रावाच उत्थायाग्नावैष्णवमष्टाकपालं निर्वपेत्प्रातःसवनस्याकाले। सरस्वत्याज्यभागा स्याद्बार्हस्पत्यश्चरुरिति। तस्या एता भवन्त्यग्नाविष्णू अग्नाविष्णू प्र णो देव्या नो दिवो बृह-

स्यत एवा पिब इत्यांग्नावैष्णवमेकादशकपालं निर्वपेन्माध्यंदिनस्य सवनस्याकाले' सरस्वत्याज्यभागा स्याद्बार्हस्पत्यश्चरुरिति' तस्या एता एव भवन्त्यांग्नावैष्णवं द्वादशकपालं निर्वपेत्तृतीयसवनस्याकाले' सरस्वत्याज्यभागा स्याद्बार्हस्पत्यश्चरुरिति' तस्या एता एव भवन्ति' मैत्रावरुणमेककपालं निर्वपेदशायै काल इति' तस्या एते भवत आ नो मित्रावरुणा प्र बाहवेति' ॥ १६ ॥

यो ब्रह्मवर्चसकामः स्यात्तस्मा एतꣳ सोमारौद्रं चरुं तिष्यापूर्णमासे निर्वपेदिति' स यो[1] ब्रह्मवर्चसकामः स्यात्स तैष्यां पौर्णमास्याꣳ सोमारौद्रं चरुं निर्वपति' परिश्रिते याजयत्यंय[2] वै भवति श्वेतायै श्वेतवत्सायै दुग्धं मथितमाज्यं भवत्याज्यं प्रोक्षणमांज्येन मार्जयन्ते' यावदेव ब्रह्मवर्चसं तत्सर्वं करोत्यंति ब्रह्मवर्चसं क्रियत इत्याहुरीश्वरो दुश्चर्मा भवितोरिति' मानवी ऋचौ धाय्ये कुर्यादिति' मनू देववतो रथ इत्येनयोर्वां द्वे धाय्यालोके[3] दधाति' तस्या एते भवतः सोमारुद्रा विवृहतं विषूचीꣳ सोमारुद्रा युवमेतानीति' ॥ १७ ॥

यदि बिभीयाद्दुश्चर्मा भविष्यामीति सोमापौष्णं चरुं निर्वपेदिति' तस्य एते भवतः सोमपूषणेमौ देवाविति' सोमारौद्रं चरुं निर्वपेत्प्रजाकाम इति' तस्या एते भवतः सोमारुद्रा विवृहतं विषूचीꣳ सोमारुद्रा युवमेतानीति'

---

१ Thus M Be 8; यदि UD Be; B defect.

२ Thus M Be 8 UD; यजत्यय Be B.

३ Thus MU Be; धाय्ये Be 8 B; धाय्ये लोके D.

सोमारौद्रं चरुं निर्वपेदभिचरन्निति ' तस्या एते एव भवतः ' सोमारौद्रं चरुं निर्वपेज्ज्योगामयावीत्येतयेष्ट्या यक्ष्यमाण उपकल्पयते होतानड्वाहं[1] ' तस्या एते एव भवतो ' ऽन्वाहार्यमासाद्य होतानड्वाहं ददाति ' सोमारौद्रं चरुं निर्वपेद्यः कामयेत स्वे ऽस्मा आयतने भ्रातृव्यं जनयेयमिति ' सो ऽपरवेचमर्यादायामध्यवसाय मथित्वाग्नीन्विहृत्य सोमारौद्रं चरुं निर्वपत्यथ वै भवति वेदिं परिगृह्यार्धमुद्धन्यादर्धं नार्धं बर्हिष स्तृणीयादर्धं नार्धमिध्मस्याभ्यादध्यादर्धं न ' स एवास्मा आयतने भ्रातृव्यं जनयतीति ब्राह्मणं ' तस्या एते भवतः ' ॥ १८ ॥ षष्ठः ॥

अथ वै भवत्यैन्द्रमेकादशकपालं निर्वपेन्मारुतꣳ सप्तकपालं ग्रामकाम इत्यथ वै भवत्याहवनीय ऐन्द्रमधिश्रयति गार्हपत्ये मारुतमनूच्यमान आसादयतीति ' काले प्रत्यञ्चमैन्द्रमासादयत्यनूच्यमानासु सामिधेनीषु मारुतं ' तस्या एता भवन्तीन्द्रं वो विश्वतस्परीन्द्रं नरो मरुतो यद्ध वो दिवो या वः शर्मेत्येतामेव निर्वपेद्यः कामयेत क्षत्राय च विशे च समदं दध्यामित्यैन्द्रस्यावद्यन्ब्रूयादिन्द्रायानुब्रूहीतीन्द्रं वो विश्वतस्परीत्यन्वाहात्याक्रम्याश्राव्याह मरुतो यजेति ' या वः शर्मेति यजति ' मारुतस्यावद्यन्ब्रूयान्मरुद्भ्यो ऽनुब्रूहीति ' मरुतो यद्ध वो दिव इत्यन्वाहात्याक्रम्याश्राव्याहेन्द्रं यजेतीन्द्रं नर इति यजति ' स एवैभ्यो भागधेये समदं दधाति वितृꣳहाणास्तिष्ठन्तीति ब्राह्मण-

1 Thus MDB ; होतारमनड्वाहं Be U ; Be 8 om., perhaps rightly, होता।

मैतामेव निर्वपेद्यः कामयेत कल्पेरन्निति । यथादेवतमवदाय यथादेवतं यजेद्भागधेयेनैवैनान्यथायथं कल्पयति । कल्पन्त एवेति ब्राह्मणं । तस्या एता भवन्ति याः पूर्वस्याः । ॥ १९ ॥

ऐन्द्रमेकादशकपालं निर्वपेद्वैश्वदेवं द्वादशकपालं ग्रामकाम इत्येतयेष्ट्या यक्ष्यमाण उपकल्पयत उपाधाय्यपूर्वयं वासो । ऽथ वै भवत्यैन्द्रस्यावदाय वैश्वदेवस्यावद्येदथैन्द्रस्योपरिष्टादिति । स ऐन्द्रस्यावदाय द्विर्वैश्वदेवस्यावद्यत्यथैन्द्रस्योपरिष्टादिन्द्रियेणैवास्मा उभयतः सजातान्परिगृह्णातीति ब्राह्मणं । तस्या एते भवतो भरेष्विन्द्रं ममत्तु न इत्यन्वाहार्यमासाद्योपाधाय्यपूर्वयं वासो ददाति । पृश्निये दुग्धे प्रैयङ्गवं चरुं निर्वपेन्मरुद्भ्यो ग्रामकाम इत्यथ वै भवति प्रियवती याज्यानुवाक्ये भवत इति । तस्या एते भवतः प्रिया वो नाम हुवे तुराणाꣳ श्रियसे कं भानुभिरिति । यः समानैर्मिथो विप्रियः स्यात्तमेतया संज्ञान्या याजयेदिति । स[1] यैः[1] संजिज्ञासीत[1] तेषूपसमेतेष्वग्नये[1] वसुमते पुरोडाशमष्टाकपालं निर्वपति सोमाय रुद्रवते चरुमिन्द्राय मरुत्वते पुरोडाशमेकादशकपालं वरुणायादित्यवते चरुमिति । तस्या एते भवतोऽग्निः प्रथमो वसुभिर्नो अव्यात्सं नो देवो वसुभिरिति । ॥ २० ॥

आदित्येभ्यो भुवद्वद्भ्यश्चरुं निर्वपेद्भूतिकाम इति । तस्या एते

---

१ Thus M only; all the other MSS. are badly corrupted: तस्यैवसंजिज्ञासीनतेषुयमतेभ्य॰ U; तस्यैवसंजिज्ञासीतेषुयमतेभ्य॰ B; तस्यैवसंज्ञायित तेषूपसमेतेभ्य॰ Bo8; तस्यैव संजज्ञासीनतेषुपसतेभ्य॰ Bo; तस्यैव संज्ञातेषुप्रमतेभ्य॰ D.

भवतो यज्ञो देवानाꣳ शुचिरप इत्यादित्येभ्यो धारयद्भ्यश्चरुं निर्वपेदपरुद्धो वापरुध्यमानो वेत्यथादिते ऽनुमन्यस्वेत्यपरुध्यमानो ऽपरोद्धुः[1] पदपांसूनादत्ते[1] । ऽथैनानादायाहरत्युपप्रेत[2] मरुतः सुदानव एना विश्पतिनाभ्यमुꣳ राजानमित्यथैनान्यजमानस्याञ्जलावावपति सत्याशीरितीह मन इत्युपनिग्रह्णीते[3] । ऽथैतान्पदपांसूनसंचरे परावपत्यथ यं यजमानो द्वेष्टि तं मनसा ध्यायति । तस्या एते भवतो धारयन्त आदित्यासस्त्रिस्रो भूमीर्धारयन्निति । यः परस्ताद्ग्राम्यवादी स्यात्तस्य गृहाद्व्रीहीनाहरेच्छुक्लांश्च कृष्णांश्च विचिनुयादित्यथ वै भवति ये शुक्लाः स्युस्तमादित्यं चरुं निर्वपेदिति । तस्या एते भवतस्त्वानु चक्षियाच दक्षिणेत्यादित्या वै देवतया विड्विशमेवावगच्छतीति ब्राह्मणमथ वै भवत्यवगताश्च विडनवगतꣳ राष्ट्रमित्याहुर्ये कृष्णाः स्युस्तं वारुणं चरुं निर्वपेदिति । तस्या एते भवत इमं मे वरुण तत्त्वा यामीति । वारुणं वै राष्ट्रमुभे एव विशं च राष्ट्रं चावगच्छतीति ब्राह्मणम् । ॥ २१ ॥

अथ वै भवति यदि नावगच्छेदिममहमादित्येभ्यो[4] भागं निर्वपाम्यामुष्मादमुष्यै विशो ऽवगन्तोरिति निर्वपेदिति ।

---

[1] Thus M and Bhav.; पक्षपद॰ Be BDU; ॰पक्ष: पद॰ Be 8.

[2] Thus M; थैनानादायहरंत्यु॰ Be 8; D om. आदाय; थेनानायांतरत्यु॰ Be BU.

[3] Thus M; नि om. all the other MSS.

[4] Corrected (cp. TS. II. 3. 1. 4); all the MSS. have इदम् i. s. o. इमम्; only U: इदममहमा॰ ।

निरुप्योपरमत्यथावगच्छते सꣳसादयति । तस्या एते भवतो यज्ञो देवानामादित्यानामवसा नूतनेनेत्यादित्या एवैनं भागधेयं प्रेप्सन्तो विशमवगमयन्तीति ब्राह्मणमथ वै भवति यदि नावगच्छेदाश्वत्थान्मयूखान्सप्त मध्यमेषायामुपहन्यादिति । प्रागीषमन्तो[1] ऽवस्थापयित्वाश्वत्थान्मयूखान्सप्त[1] मध्यमेषायामुपहन्ति[1] । मध्यममुपहत्य[2] चौग्मतीचन्तौग्प्राच आयातयतीदमहमादित्यान्बध्नाम्यामुष्मादमुष्यै विशो ऽवगन्तोरित्यादित्या एवैनं बद्धवीरा विशमवगमयन्तीति ब्राह्मणमथ वै भवति यदि नावगच्छेदेतमेवादित्यं चरुं निर्वपेदिध्मे ऽपि मयूखान्संनह्येत्तान्सहैवेध्मेनाभ्यादध्यादिति । तान्सहैवेध्मेनाभ्यादधात्यनपरुध्यमेवावगच्छतीति ब्राह्मणमथ वै भवत्याश्वत्था भवन्ति । मरुतां वा एतदोजो यदश्वत्थ । ओजसैव विशमवगच्छति । सप्त भवन्ति । सप्तगणा वै मरुतो । गणश एव विशमवगच्छन्तीति ब्राह्मणं । तस्या एते एव भवतः । ॥ २२ ॥ सप्तमः ॥

अथ वै भवति यो मृत्योर्बिभीयात्तस्मा एतां प्राजापत्याꣳ शतकृष्णलां निर्वपेदित्येतयेष्ट्या यक्ष्यमाण उपकल्पयते शतꣳ सुवर्णानि कृष्णलानि नवं पात्रं प्रभूतमाज्यमित्यथ देवस्य त्वा सवितुः प्रसव इति प्रतिपदं कृत्वा प्रजापतये जुष्टं निर्वपामीति चतुरो मुष्टीन्कृष्णलानां[3] निर्वपति । हविष्कृता वाचं विसृज्य

१ This passage is found in M only.

२ Thus Be S; मध्यम उपहत्य Be BD; मध्यम उप॰ M; मध्य उप॰ U; मध्यमुपहत्य Bhav.

३ Thus M; कृष्णलान् or कृष्णलां the other MSS.

गार्हपत्ये नवं पात्रमधिश्रित्य तिरःपवित्रमाज्यमानीय तिरःपवित्रं कृष्णलान्यावपत्यथाज्यं निर्वपत्यथाज्यमधिश्रित्योभयं[1] पर्यग्नि कृत्वान्तर्वेद्यामासादयत्यथ वै भवति चत्वारिचत्वारि कृष्णलान्यवद्यति चतुरवत्तस्याप्त्या इत्यष्टौ देवताया अवद्यति चत्वारि स्विष्टकृतेऽष्टाविडायै[2] चत्वार्यवान्तरेडाया एकं प्राशित्रायैकं यजमानायाज्यमेव जुह्वतो जुह्वत्याज्यं प्राश्नन्तः[3] प्राश्नन्त्यथैनान्येकधोद्धृत्य[3] ब्रह्मण उपहरति। तस्या एते भवतो हिरण्यगर्भः प्रजापत इति। ॥ २३ ॥

यो ब्रह्मवर्चसकामः स्यात्तस्मा एतꣳ सौर्यं चरुं निर्वपेदित्यैतयेष्ट्या यक्ष्यमाण उपकल्पयते पञ्च सुवर्णानि कृष्णलानि सुवर्णरजतौ च रुक्मावथैतं चरुꣳ श्रपयित्वाभिघार्योदञ्चमुद्वास्य सुवर्णरजताभ्याꣳ रुक्माभ्यां परिगृह्यान्तर्वेद्यामासादयति। समानं कर्मा प्रयाजेभ्यो। ऽथ वै भवति प्रयाजेप्रयाजे कृष्णलं जुहोतीति। स प्रयाजेप्रयाज एव कृष्णलमन्ववधाय जुहोति। तस्या एते भवत उदु त्यं चित्रमित्यन्वाहार्यमासाद्य सुवर्णरजतौ रुक्मौ ददात्याग्नेयमष्टाकपालं निर्वपेत्सावित्रं द्वादशकपालं भूम्यै चरुं यः कामयेत हिरण्यं विन्देय हिरण्यं मोपनमेदित्यैतयेष्ट्या यक्ष्यमाण उपकल्पयते हिरण्यं। तस्या एता

१ ०मधिश्रयत्युभयं M.

२ ऽष्टौ is found in M only.

३ Thus M; प्राश्नंतमेव प्राश्नंत्य० D; the other MSS. (i. s. o. प्राश्नन्ति) प्राश्नावे Be; प्राश्नंते U; प्राश्नवे B; प्राश्नाति Be 8.— उद्धृत्य M Be 8, उपहृत्य the other MSS., but cp. supra XII. 16 (p. 68, 18).

भवन्ति स प्रत्नवन्ति काव्या हिरण्यपाणिमूतये वाममद्य सवितर्वेडित्या पर्वतानाꣳ स्तोमासस्त्वा विचारिणीत्यन्वाहार्यमासाद्य हिरण्यं दद्यात्येतामेव निर्वपेद्धिरण्यं विन्देति । तस्या एता एव भवन्त्येतामेव निर्वपेद्यस्य हिरण्यं नश्येदिति । तस्या एता एव भवन्ति । ॥ २४ ॥

यः सोमवामी स्यात्तस्मा एतꣳ सोमेन्द्रꣳ श्यामाकं चरुं निर्वपेदिति । १तस्या एते भवत उदूदरेणापान्तमन्युरिति । सोमवामी वा अन्यो भवत्यन्यः सोमातिपवितो भवति । यः सोमातिपवितः स्यात्तस्मा एतꣳ सोमेन्द्रꣳ श्यामाकं चरुं निर्वपेदिति१ । तस्या एते भवतः प्र सुवानः सवाधस्त इत्यग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेदिन्द्राय प्रदात्रे पुरोडाशमेकादशकपालं पशुकाम इत्येतयेष्ट्या यक्ष्यमाण उपकल्पयते दधि मधु घृतमपो यवानित्यथ देवस्य त्वा सवितुः प्रसव इति प्रतिपदं कृत्वाग्नये दात्रे जुष्टं निर्वपामीति चतुरो मुष्टीन्व्रीहीणां निर्वपत्येतामेव प्रतिपदं कृत्वेन्द्राय प्रदात्रे जुष्टं निर्वपामीति चतुर एव व्रीहीणामेतामेव प्रतिपदं कृत्वा प्रजापतये जुष्टं निर्वपामीति चतुरो यवानां । तेषां व्रीहिष्वेव हविष्कृतमुदादयत्युपोद्यच्छन्ते यवान्हविष्कृता वाचं विसृजते । समानं

---

१ The passage marked between १ ... १ is not found in M Be BU. In the words as handed down by Be 8, I inserted अन्यो (l. 8, first time) and तस्मा (l. 9) and changed अन्यं (l. 8, second time) into अन्यः । D: सोमवामी चोन्यो भवत्यन्यं विदुः सोमातिपवितः (sic).

कर्माधिवपनादुद्धृत्य दक्षिणार्धे गार्हपत्यस्याष्टौ कपालान्युपदधात्येकादशोत्तरतो ऽथैतान्यवानुलूखले परिचुत्य गार्हपत्य एककपालमधिश्रित्य धाना भर्जन्ति[१]। यदैते[२] हविषी अधिवृणक्ति तदैता धानाश्चतुष्टयेनोपसृजति[३] दध्ना मधुना[४] घृतेनाद्भिरिति। तस्या एता भवन्त्यग्ने दा दाशुषे रयिं दा नो अग्ने शतिनः प्रदातारꣳ हवामहे प्रदाता वज्री घृतं न पूतमुभे सुश्चन्द्र सर्पिष इति। ॥ २५ ॥

यो यज्ञविभ्रष्टः स्यात्तस्मा एतामिष्टिं निर्वपेदाग्नेयमष्टाकपालमैन्द्रमेकादशकपालꣳ सौम्यं चरुमित्यथ वै भवत्याग्नेयस्य च सौम्यस्य चैन्द्रे समासेचयेदिति। स आग्नेयस्य च सौम्यस्य चैन्द्रे समासेचयति। तेजश्चैवास्मिन्ब्रह्मवर्चसं[५] च[५] समीची[५] दधातीति ब्राह्मणं। तस्या एता भवन्ति स प्रत्नवन्नि काव्येन्द्रं वो विश्वतस्परीन्द्रं नरस्त्वं नः सोम या ते धामानीत्यग्नीषोमीयमेकादशकपालं निर्वपेद्यं कामो नोपनमेदिति। तस्या एते भवतो ऽग्नीषोमा सवेदसा युवमेतानीत्यग्नीषोमीयमष्टाकपालं निर्वपेद्ब्रह्मवर्चसकाम इति। यो ब्रह्मवर्चसकामः स्यात्सो ऽग्नीषोमीयमष्टाकपालꣳ श्यामाकानां निर्वपति। तस्या एते

१ Thus M (the same reading xvii. 31); भर्जयन्ति the other MSS.

२ Only found in M Be 8; BDU om.; Be has a lacuna of three akṣaras.

३ Thus M and Bhav.; the other MSS. have the plural.

४ मधुषा M.

५ Thus corrected acc. to TS. II. 3. 3. 2; तेजश्चैवास्मा इन्द्रियं च समीची MUDB Be; तेजश्चैवास्मा इन्द्रियं च ब्रह्मवर्चसं च समीची Be 8.

भवतो ऽग्नीषोमाविमꣳ सु मे ऽग्नीषोमा हविषः प्रस्थितस्येति । सोमाय वाजिने श्यामाकं चरुं निर्वपेद्यः क्लैब्याद्बिभीयादिति । तस्या एते भवत आप्यायस्व सं त इति । ब्राह्मणस्पत्यमेकादशकपालं निर्वपेद्ग्रामकाम इत्यथ वै भवति गणवती याज्यानुवाक्ये भवत इति । तस्या एते भवतो गणानां त्वा गणपतिꣳ हवामहे स इज्जनेनेत्येतामेव निर्वपेद्यः कामयेत ब्रह्मन्विशं नाशयेयमिति । मारुती याज्यानुवाक्ये कुर्यादिति । तस्या एते भवतो मरुतो यद्ध वो दिवो या वः शर्मेति । ॥ २६ ॥

अर्यम्णे चरुं निर्वपेत्सुवर्गकाम इति । तस्या एते भवतो ऽर्यमायाति ये ते ऽर्यमन्नित्यर्यम्णे चरुं निर्वपेद्यः कामयेत दानकामा मे प्रजाः स्युरिति । तस्या एते भवतो । ऽर्यम्णे चरुं निर्वपेद्यः कामयेत स्वस्ति जनतामियामिति । तस्या एते एव भवतो । यो राजन्य आनुजावरः स्यात्तस्मा एतमैन्द्रमानुषूकमेकादशकपालं निर्वपेदित्यथ वै भवति बुध्नवती अग्रवती याज्यानुवाक्ये भवत इति । तस्या एते भवतो बुध्नादग्रमङ्गिरोभिर्गृणानो बुध्नादग्रेण विमिमाय मानैरिति । यो ब्राह्मण आनुजावरः स्यात्तस्मा एतं बार्हस्पत्यमानुषूकं चरुं निर्वपेदित्यथ वै भवति बुध्नवती अग्रवती याज्यानुवाक्ये भवत इति । तस्या एते भवतो महान्मही अस्तभायद्बुध्नाद्यो अग्रमभ्युत्योजसेति । ॥ २७ ॥ अष्टमः ॥

अथ वै भवति यः पापयक्ष्मगृहीतः स्यात्तस्मा एतमादित्यं चरुममावास्यायां निर्वपेदिति । तस्या एते भवतो नवोनवो

भवति जायमानो यमादित्या अꣳशुमाप्याययन्तीति । यं कामयेतान्नादः स्यादिति तस्मा एतं त्रिधातुं निर्वपेदिन्द्राय राज्ञे पुरोडाशमेकादशकपालमिन्द्रायाधिराजायेन्द्राय स्वराज्ञ इत्यथ देवस्य त्वा सवितुः प्रसव इति प्रतिपदं कृत्वेन्द्राय राज्ञे जुष्टं निर्वपामीति चतुरो मुष्टीन्व्रीहीणां निर्वपत्येतामेव प्रतिपदं कृत्वेन्द्रायाधिराजायेन्द्राय स्वराज्ञ इति चतुरश्चतुरो मुष्टीनेकैकस्यै देवतायै । हविष्कृता वाचं विसृजते । समानं कर्माधिवपनादध्युष्य गार्हपत्य एकादशोत्तानानि कपालान्युपदधात्यथ वै भवत्युत्तानेषु कपालेष्वधिश्रयत्ययातयामत्वाय । त्रयः पुरोडाशा भवन्ति । त्रय इमे लोका । एषां लोकानामाप्त्या । उत्तरउत्तरो ज्यायान्भवतीति । स उत्तरमुत्तरमेव ज्यायाꣳसं करोति । सर्वेषामभिगमयन्नवद्यतीति । सो ऽवद्यन्नाहेन्द्राय राज्ञे ऽनुब्रूहीति । प्राच्यां दिशि त्वमिन्द्रासि राजेत्यनूच्येन्द्रो जयाति न पराजयाता इति यजति । सो ऽवद्यन्नाहेन्द्रायाधिराजायानुब्रूहीतीन्द्रो जयाति न पराजयाता इत्यनूच्यास्येदेव प्ररिरिचे महित्वमिति यजति । सो ऽवद्यन्नाहेन्द्राय स्वराज्ञे ऽनुब्रूहीत्यस्येदेव प्ररिरिचे महित्वमित्यनूच्य प्राच्यां दिशि त्वमिन्द्रासि राजेति यजति । व्यत्यासमन्वाहानिर्दाहायेति ब्राह्मणम् । ॥ २८ ॥

य इन्द्रियकामो वीर्यकामः स्यात्तमेतया सर्वपृष्ठया याजयेदित्येतयेष्ट्या यक्ष्यमाण उपकल्पयते ऽश्वमृषभं वृष्णिं बस्तमित्यथ देवस्य त्वा सवितुः प्रसव इति प्रतिपदं कृत्वेन्द्राय राथंतराय

जुष्टं निर्वपामीति चतुरो मुष्टीन्व्रीहीणां निर्वपत्यैतामेव प्रतिपदं त्वेन्द्राय बार्हतायेन्द्राय वैरूपायेन्द्राय वैराजायेन्द्राय शाक्वरायेन्द्राय रैवतायेति चतुरश्चतुरो मुष्टीनेकैकस्यै देवतायै । हविष्कृता वाचं विसृजते । समानं कर्माधिवपनादुद्धृत्य गार्हपत्ये द्वादशोत्तानानि कपालान्युपदधात्यय वै भवत्युत्तानेषु कपालेष्वधिश्रयत्ययातयामत्वाय । द्वादशकपालः पुरोडाशो भवति वैश्वदेवत्वाय । समन्तं पर्यवद्यतीति । सो ऽवद्यन्नाहेन्द्राय राथंतरायानुब्रूहीत्यभि त्वा शूर नोनुम इत्यनूच्य त्वामिद्धि हवामह इति यजति । सो ऽवद्यन्नाहेन्द्राय बार्हतायानुब्रूहीति । त्वामिद्धि हवामह इत्यनूच्य यद्द्याव इन्द्र त इति यजति । सो ऽवद्यन्नाहेन्द्राय वैरूपायानुब्रूहीति । यद्द्याव इन्द्र त इत्यनूच्य पिबा सोममिन्द्र मन्दतु त्वेति यजति । सो ऽवद्यन्नाहेन्द्राय वैराजायानुब्रूहीति । पिबा सोममिन्द्र मन्दतु त्वेत्यनूच्य कदा चन स्तरीरसीति यजति । सो ऽवद्यन्नाहेन्द्राय शाक्वरायानुब्रूहीति । कदा चन स्तरीरसीत्यनूच्य रेवतीर्नः सधमाद इति यजति । सो ऽवद्यन्नाहेन्द्राय रैवतायानुब्रूहीति । रेवतीर्नः सधमाद इत्यनूच्याभि त्वा शूर नोनुम इति यजति । व्यत्यासमन्वाहानिर्दाहायेति ब्राह्मणम् । ॥ २९ ॥

अन्वाहार्यमासाद्यर्षभं दक्षिणां ददामिति ददात्यैतयैव यजेताभिशस्यमान इति । यैव[1] पूर्वा[1] सेयं[1] । यद्युक्कामः

---

१ Thus M; यैव पूर्वा सेति Be; यैव पूर्वसे Be S; यैव पूर्वास्येति U; तस्या एते भवंति या पूर्वस्या BD.

स्यात्तस्मा एतामिष्टिं निर्वपेदग्नये भ्राजस्वते पुरोडाशमष्टाकपालꣳ सौर्यं चरुमग्नये भ्राजस्वते पुरोडाशमष्टाकपालमिति। तस्या एते भवन्त्युदग्ने शुचयस्तव वि ज्योतिषोदु त्यं चित्रमुदग्ने शुचयस्तव वि ज्योतिषेत्युपहूतायामिडायामनाहितमग्नीधे भवत्यथ यजमानाय चौष्पिण्डान्प्रयच्छत्युदु त्यं जातवेदसꣳ सप्त त्वा हरितो रथे चित्रं देवानामुदगादनीकमिति पिण्डान्प्रयच्छति। चक्षुरेवास्मै प्रयच्छति। यदेव तस्य तदिति ब्राह्मणं। वैश्वदेवीꣳ सांग्रहणीं निर्वपेद्ग्रामकाम इति। वैश्वदेवं चरुꣳ संगृह्णन्त इव अपयन्त्यथ ध्रुवोऽसि ध्रुवोऽहꣳ सजातेषु भूयासमिति परिधीन्परिदधाति। तस्या एते भवतो विश्वे देवा विश्वे देवा इत्यथ पुरस्तात्स्विष्टकृतः स्रुवाहुतीरुपजुहोत्यामनमस्यामनस्य[1] देवा इति तिस्रः। ॥ ३० ॥ नवमः ॥

अथ वै भवत्यग्निं वा एतस्य शरीरं गच्छति सोमꣳ रसो। वरुण एनं वरुणपाशेन गृह्णाति सरस्वतीं वागग्नाविष्णू आत्मा यस्य ज्योगामयति। यो ज्योगामयावी स्याद्यो वा कामयेत सर्वमायुरियामिति तस्मा एतामिष्टिं निर्वपेदित्येतयेष्ट्या यक्ष्यमाण उपकल्पयते खादिरं नवं पात्रं नवनीतमाज्यं यावतीः समा एष्यन्मन्येत तावन्मानं च प्रवर्तमथ देवस्य त्वा सवितुः प्रसव इति प्रतिपदं कृत्वाग्नेयमष्टाकपालं निर्वपति सौम्यं चरुं वारुणं दशकपालꣳ सारस्वतं चरुमाग्नावैष्णवमेकादशकपाल-

---

१ स्रुवाहुतीरुपजुहोत्य॰] MBD; स्रुवाहुतीर्जुहोत्य॰ U Be; स्रुवाहुतिं जुहोत्य॰ Be 8.

मिति[1] । समानं कर्माज्यावेक्षणात् आज्यावेक्षणे[2] ऽनुवर्तयति यद्ववमैत्तन्नवनीतमभवदिति । समानं कर्म स्रुचाꣳ सादनात्सादयित्वा स्रुचो ऽथैतं प्रवर्तं खादिरे नवे पात्र उपस्तीर्णाभिघारितꣳ सह हविर्भिरन्तर्वेद्यासादयति । समानं[3] कर्मा[3] प्रयाजेभ्यः[3] । प्रयाजैश्चरित्वा[3] हविर्भिश्चरति[3] । तस्या एता भवन्त्यायुष्ट आयुर्दा अग्न आप्यायस्व सं ते ऽव ते हेड उदुत्तमं प्र णो देव्या नो दिवो ऽग्नाविष्णू अग्नाविष्णू इत्यथ पुरस्तात्स्विष्टकृतः स्रुवाहुतीरुपजुहोति ॥ ३१ ॥

अश्विनोः प्राणो ऽसि तस्य ते दत्तां ययोः प्राणो ऽसि स्वाहेन्द्रस्य प्राणो ऽसि तस्य ते ददातु यस्य प्राणो ऽसि स्वाहा मित्रावरुणयोः प्राणो ऽसि तस्य ते दत्तां यस्य प्राणो ऽसि स्वाहा विश्वेषां देवानां प्राणो ऽसि तस्य ते ददतु येषां प्राणो ऽसि स्वाहेति । हुत्वाहुत्वैव सꣳस्रावैः[4] प्रवर्तमभिघारयति राडसि विराडसि सम्राडसि स्वराडसीत्यथैतं प्रवर्तमग्रेणाहवनीयं पर्याहृत्य दक्षिणतो निदधात्यथ यजमानमाज्यमवेक्षयति घृतस्य धारामम्मृतस्य पन्थामिन्द्रेण दत्तां प्रयतां मरुद्भिः । तत्त्वा विष्णुः पर्यपश्यत्तत्त्वेडा गव्यैरयदित्यथ ब्रह्मणो हस्तमन्वारभ्यर्त्विजः[5] पर्याहुः पावमानेन त्वा स्तोमेन गायत्रस्य

१ Here BD ins. हविष्कृता वाचं विसृजते ।

२ Thus M Bhav.; स आज्यमवेक्षमाणो the other MSS.

३ om. M Be.

४ संस्रावेण Be S.

५ ऋत्विजः only in M Be S D.

वर्तन्योपांशोर्वीर्येण देवस्त्वा सवितोत्सृजतु जीवातवे जीवनस्यायै बृहद्रथंतरयोस्त्वा स्तोमेन त्रिष्टुभो वर्तन्या शुक्रस्य वीर्येण देवस्त्वा सवितोत्सृजतु जीवातवे जीवनस्याया अग्नेस्त्वा मात्रया जगत्यै वर्तन्याग्रयणस्य वीर्येण देवस्त्वा सवितोत्सृजतु जीवातवे जीवनस्याया इत्यथ हिरण्याहृतं निष्पिबति । निष्पिबन्तमनुमन्त्रयत इममग्न आयुषे वर्चसे कृधि प्रियꣳ रेतो वरुण सोम राजन् । मातेवास्मा अदिते शर्म यच्छ विश्वे देवा जरदष्टिर्यथासदित्यथैतं[1] प्रवर्तमद्भिः प्रक्षाल्य दक्षिणे कर्ण आबध्नीत[2] आयुष्टे[2] विश्वतो दधदित्यथैनमनुपरिवर्तयत[3] आयुरसि विश्वायुरसि सर्वायुरसि सर्वमायुरसीत्यथास्य[4] ब्रह्मा हस्तं गृह्णात्यग्निरायुष्मानित्यान्तादनुवाकस्य । ॥ ३२ ॥

यावतो ऽश्वान्प्रतिगृह्णीयात्तावतो वारुणांश्चतुष्कपालान्निर्वपेदेकातिरिक्तानिति । तस्या एते भवत इमं मे वरुण तत्त्वा यामीति । यद्यपरं प्रतिग्राही स्यात्सौर्यमेककपालमनुनिर्वपेदिति । तस्या एते भवत उदु त्यं चित्रमित्यथापो[5] ऽवभृथमवैत्यथ[5] वै[5] भवत्यपोनप्त्रीयं[5] चरुं पुनरेत्य निर्वपेदिति ।

---

१ Thus M; ०थैनं all the other MSS.

२ Thus corrected, cp. infra XVII. 41 and XVIII. 9; आवध्नीताय० M; आवध्नात्यायु० the other MSS.

३ All exc. M ins. प्रवर्तम् after एनं।

४ After सर्वमायुरसि M has some words more: सर्वं न आयुर्भूयात्सर्वमायुर्गेषम्, cp. Āp. XIX. 24. 10.

५ Thus MUD Be, the last three omitting the words अथ वै भवति। चित्रमित्यवभृथमेवैत्यपोन० Be 8; चित्रमित्यपोन० B.

तस्या एते भवतो ऽपां नपात्समन्या यन्तीति । यः पाप्मना[1] गृहीतः स्यात्तस्मा एतामैन्द्रावरुणीं पयस्यां निर्वपेदित्येतयेष्ट्या यक्ष्यमाण उपकल्पयते दधि पय आमिक्षाया इत्यथ देवस्य त्वा सवितुः प्रसव इति प्रतिपदं कृत्वेन्द्रावरुणाभ्यां जुष्टं निर्वपामीति चतुरो मुष्टीन्व्रीहीणां निर्वपति । हविष्कृता वाचं विसृजते । समानं कर्माधिवपनादुद्धृत्य दक्षिणार्धे गार्हपत्यस्यैकादश कपालानुपदधाति । यदैतं पुरोडाशमधिश्रयति तदैतामामिक्षां गार्हपत्ये अपयत्यथैतं पुरोडाशमुपस्तीर्णाभिघारितमुद्वास्यामिक्षया संप्रच्छाद्यान्तर्वेद्यासादयति[2] । ॥ ३३ ॥

अथ वै भवति पयस्यायां पुरोडाशमवदधात्यात्मन्वन्तमेवैनं करोत्यथो आयतनवन्तमेव । चतुर्धा व्यूहति । दिक्ष्वेव प्रतितिष्ठति । पुनः समूहतीति । स आमिक्षां पुरोडाशाच्चतुर्धा[3] कृत्वा व्यूहति या वामिन्द्रावरुणा यतव्या तनूस्तयेममंहसो मुञ्चतं या वामिन्द्रावरुणा सहस्या रक्षस्या तेजस्या तनूस्तयेममंहसो मुञ्चतमिति । पुनः समूहति समूह्यावद्यतीति । तस्या एते भवत इन्द्रावरुणयोरहमिन्द्रावरुणा युवमध्वराय न इत्यथ पुरस्तात्स्विष्टकृतः सुवाहुतीरुपजुहोति यो वामिन्द्रावरुणावग्नौ स्रामस्तं वामेतेनावयज इत्यष्टौ । ॥ ३४ ॥ दशमः ॥

अथ वै भवति यो भ्रातृव्यवान्स्यात्स स्पर्धमान एतयेष्ट्या

---

१ Thus M; पापयक्ष्म॰ the other MSS.

२ Thus M; संछाद्य॰ all the other MSS.

३ Thus M and Bhav.; पुरोडाशं चतुर्धा all the other MSS.

यजेताग्नये प्रवते पुरोडाशमष्टाकपालं निर्वपेदग्नये विबाधवतेऽग्नये प्रतीकवत इति। तस्या एता भवन्ति प्रप्रायमग्निः प्र ते यक्षि प्र त इयर्मि मन्म भुवो वि पाजसा वि ज्योतिषा स त्वमग्ने प्रतीकेन तꣳ सुप्रतीकꣳ सुदृशꣳ स्वञ्चमिति। यो भ्रातृव्यवान्स्यात्स स्पर्धमान एतयेष्ट्या यजेतेन्द्रायाꣳहोमुचे पुरोडाशमेकादशकपालं निर्वपेदिन्द्राय वैमृधायेन्द्रायेन्द्रियावत इत्यथ वै भवति त्रयस्त्रिꣳशत्कपालं पुरोडाशं निर्वपतीति। य एवैते त्रय एकादशकपालास्त[1] एवैत[1] उक्ता[1] भवन्ति। तस्या एता भवन्त्यꣳहोमुचे विवेष यन्मा वि न इन्द्रेन्द्र त्वमिन्द्रियाणि शतक्रतो ऽनु ते दायीति। यो भ्रातृव्यवान्स्यात्स स्पर्धमान एतयेष्ट्या यजेताग्नये संवर्गाय पुरोडाशमष्टाकपालं निर्वपेत्तꣳ शृतमासन्नमेतेन यजुषाभिमृशेदिति। तꣳ शृतमासन्नमेतेन यजुषाभिमृशत्योजो ऽसि सहो ऽसि बलमसि भ्राजो ऽसि देवानां धाम नामासि विश्वमसि विश्वायुः सर्वमसि सर्वायुरभिभूरहमनेन हविषामुं भ्रातृव्यमभिभूयासमिति। युक्ष्वा हि देवहूतमानित्येतस्यानुवाकस्य सप्तदश सामिधेनीः पराचीरन्वाह। तस्या एते भवतः सखायः सं वः सम्यञ्चꣳ सꣳसमिद्युवसे वृषन्निति। ॥ ३५ ॥

यः प्रजाकामः स्यात्तस्मा एतं प्राजापत्यं गार्मुतं चरुं निर्वपेदिति। तस्या एते भवतः प्रजापते स वेदेति। यः पशुकामः

१ Thus Be 8 ; ता एवैत उक्ता M ; त एवोक्ता Be BU ; नवोक्ता D.

स्यात्तस्मा एतꣳ सोमापौष्णं गार्मुतं चरुं निर्वपेदिति । तस्या एते भवतः सोमापूषणेमौ देवाविति । चित्रया यजेत पशुकाम इति । स्वयि चित्रयेत्युपवसत्यथ[1] प्रातराग्नेयमष्टाकपालं निर्वपति सौम्यं चरुं त्वाष्ट्रमष्टाकपालꣳ सरस्वत्यै चरुꣳ सरस्वते चरुꣳ सिनीवाल्यै चरुमैन्द्रमेकादशकपालमिति । तस्या एते भवन्त्यग्निना रयिमश्नवद्धोमाꣳ अग्न आप्यायस्व सं त इह त्वष्टारमग्रियं तन्नस्तुरीपं प्र णो देवी नो दिवः पीपिवाꣳसꣳ सरस्वतो ये ते सरस्व ऊर्मयः सिनीवालि या सुपाणिरिन्द्रं वो विश्वतस्परीन्द्रं नर इत्यथ पुरस्तात्स्विष्टकृतः सुवाकृतीरुपजुहोत्यग्ने गोभिर्न आगहीति पञ्चर्चो द्वे यजुषी । ॥ ३६ ॥ एकादशः ॥

कारीर्या यक्ष्यमाणो भवति । स उपकल्पयते कृष्णं वासः कृष्णतूषं कृष्णमश्वं कृष्णꣳ संदानं कृष्णाजिनं कृष्णमधु[2] करीरसक्तून्कृष्णां कुम्भीमामपक्कां[3] कृष्णमनस्थिगधं कृष्णामविं कृष्णं वर्षाह्वस्तम्बं[4] वैतसमिध्मावर्हिरित्यथ यजमानायतने कृष्णं वासः कृष्णतूषं निदधात्यथापरेणाहवनीयं कृष्णमश्वं कृष्णेन संदानेन

---

१ स्वयिचियेत्यु॰ Be 8 Be; स्वयिचेत्यु॰ BDU; स्वयिचचेत्यु॰ M.

२ कृष्णांमधु DU.

३ Thus corrected acc. to a Prayoga; कुंभीमामपक्कां D; instead of आमपक्कां Be 8 (pr. m): आमवाकार्यं, (sec. m.): आमपार्चकरीया; आमपाचकरीया U; आमपाचकरी B; आमपाचेकरीयत् Be; आममार्चकरीयां M.

४ वर्षाह्व॰ M here and later on consequently; thus also some of the other MSS.

संदित्यान्तर्वेदि[1] कृष्णाजिने कृष्णमधु करीरसक्तूंश्चिवपत्युत्करे कुम्भीं निमिनोत्यथाग्रेणोत्करं प्राग्रीवमश्व स्थापयित्वा तस्याग्रेणोपस्तम्भनं कृष्णामविं निघ्नात्युत्तरेणाहवनीयं कृष्णं वर्षाह्वस्तम्बं वैतमभिप्राववर्षिरिति निदधात्यथ यजमानः कृष्णं वासः कृष्णतूषं परिधत्ते ॥ ३७ ॥

मारुतमसि मरुतामोजो ऽपां धारां भिन्द्धीति ' रमयत मरुतः श्येनमायिनमिति पश्चाद्वातं प्रतिमीवति ' पुरोवातमेव जनयति वर्षस्यावरुद्ध्या इति ब्राह्मणमथैतमश्वꣳ संदानात्प्रमुच्योत्तरवर्ग्येणाभिविक्षिपत्यभिक्रन्द[2] स्तनय गर्भमाधा इति ' स यदि विधूनुते[3] यदि मेहति यदि शकृत्करोति वर्षिष्यतीत्येव वेदाथ वातनामानि जुहोति पुरोवातो वर्षञ्जिन्वरावृत्स्वाहेत्यष्टावथान्तर्वेदि कृष्णाजिने मधुना करीरसक्तून्संयौति मान्दा वाशाः शुन्ध्यूरजिराः। ज्योतिष्मतीस्तमस्वरीरुन्दतीः सुफेनाः। मित्रभृतः क्षत्रभृतः सुराष्ट्रा इह मावतेति ' तिस्रः पिण्डीः कृत्वा समुक्षित्य कृष्णाजिनस्यान्तान्संदानेनोपनह्यति वृष्णो अश्वस्य संदानमसि वृष्ट्यै त्वोपनह्यामीत्यथैना अनसः प्रथमायां गधायामावध्नाति ॥ ३८ ॥

देवा वसव्या अग्ने सोम सूर्येत्यहोरात्रे उपरमति ' द्विती-

---

१ Thus M only; संनह्यत्यान्तर्वेदि all the other MSS.

२ ॰वर्ग्येण॰ M; ॰वर्मेण the other MSS.; cp. supra p. 104. 2.— ॰भिक्षिपत्य॰ M.

३ विधुनुते BD.

यस्यामावध्नाति देवाः शर्मण्या मित्रावरुणार्यमन्नित्यहोरात्रे एवोपरमति । तृतीयस्यामावध्नाति देवाः सपीतयो ऽपां नपादाशुहेमन्नित्यहोरात्रे एवोपरमत्यथ वै भवति यदि वर्षेत्तावत्येव होतव्यमिति । यदि चैव वर्षति यदि नोभयेनैव पिण्डीर्जुहोति स्रुचोपस्तीर्णाभिघारिता दिवा चित्तमः कृण्वन्त्या यं नर उदीरयथा मरुतः समुद्रत इत्यथासां धूममन्वीचते ऽसितवर्णा हरयः सुपर्णा इति । यदि न वर्षेच्छ्वोभूते हविर्निर्वपेदग्नये धामच्छदे पुरोडाशमष्टाकपालं निर्वपेन्मारुतं सप्तकपालं सौर्यमेककपालमिति । तस्या एता भवन्ति त्वं त्या चिदच्युताग्ने भूरीणि तव जातवेदो दिवो नो वृष्टिं मरुतो ररीध्वं पिन्वन्त्यपो मरुतः सुदानव उदु त्यं चित्रमित्यथ पुरस्तात्स्विष्टकृतः स्रुवाहुतीरुपजुहोत्यौर्वभृगुवच्छुचिमप्नवानवदाहुव इति तिस्रो । ऽथैतां कुम्भीमद्भिः पूरयति सृजा वृष्टिं दिव आद्भिः समुद्रं पृणेति । सा यदि दीर्यते यदि भिद्यते वर्षिष्यतीत्येव वेदाथाविमभिजुहोत्यजा[1] असि प्रथमजा बलमसि समुद्रियमिति । सा यदि विधूनुते यदि मेहति यदि शकृत्करोति वर्षिष्यतीत्येव वेदाथ वर्षाह्वस्तम्बमभिजुहोति ॥ ३९ ॥

---

१ Thus M Be S Be; वेदाय मेथ्या उपरि जुहोत्य॰ BUD; then follows in B the beginning of kh. 40; the passage अथाविमभिजुहोत्य॰ ... वर्षिष्यतीत्येव was given in this MS. already after the horse oracle.

उन्नम्भय पृथिवीं भिन्द्धीदं दिव्यं नभः। उद्नो दिव्यस्य नो देहीशानो विसृजा दृतिमित्यथैनमाहवनीये ऽनुप्रहरति हिरण्यकेशो रजसो विसार इत्यथास्य धूममन्वीक्षत आ ते सुपर्णा अमिनन्त एवैरित्यथान्तर्वेदि तिष्ठन्कृष्णाजिनमवधूनोति ये देवा दिविभागा इत्यान्तादनुवाकस्य। संतिष्ठते कारीर्यँ-यातो ऽन्नःसवकारीर्यँग्नेयमष्टाकपालं निर्वपति श्रपयित्वासादयति। तस्याः पञ्चदश सामिधेन्यः पञ्च प्रयाजा वार्त्रघ्नावाज्यभागावथ हविषो ऽग्निर्मूर्धा भुव इति। त्रिष्टुभौ संयाज्ये। याभिश्चैव पिण्डीराबध्नाति याभिश्च जुहोति याभ्यां च धूममन्वीक्षते ताः सङ्ख्यिष्यन्ति[1]। संतिष्ठते ऽन्नःसवकारीरी।

॥ ४० ॥ द्वादशः ॥

अथ वै भवति वैधातवीयेन यजेताभिचरन्वाभिचर्यमाणो वा सहस्रेण वा यक्ष्यमाणः[2] सहस्रेण वेजानो यो वा यक्ष्य इत्युक्त्वा न यजत इत्येतयेष्ट्या यक्ष्यमाण उपकल्पयते सहस्रं हिरण्यं तार्प्यं धेनुमित्यथ देवस्य त्वा सवितुः प्रसव इति प्रतिपदं कृत्वेन्द्राविष्णुभ्यां जुष्टं निर्वपामीति चतुरो मुष्टीन्व्रीहीणां निर्वपत्येतामेव प्रतिपदं कृत्वेन्द्राविष्णुभ्यां जुष्टं निर्वपामीति चतुरो यवानामेतामेव प्रतिपदं कृत्वेन्द्राविष्णुभ्यां जुष्टं निर्वपामीति चतुर एव व्रीहीणां। तेषां व्रीहिष्वेव हवि-

१ Thus M; सं om. all the other MSS.

२ The following thus only in M; the other MSS. are partly corrupted partly incomplete.

ष्कृतमुद्वादयत्युपोद्यच्छन्ते यवान्हविष्कृता वाचं विसृजते । समानं कर्माधिवपनादध्युष्य गार्हपत्ये द्वादश कपालान्युपदधात्यथ वै भवति द्वादशकपालः पुरोडाशो भवति । ते त्रयश्चतुष्कपाला-स्त्रिंष्वमृद्धत्वाय । त्रयः पुरोडाशा भवन्ति । त्रय इमे लोका । एषां लोकानामाप्त्या । उत्तरउत्तरो ज्यायान्भवतीति । स उत्तरमुत्तरमेव ज्यायाꣳसं करोति यवमयं[1] मध्ये[1] । ऽथ वै भवति ॥ ४१ ॥

सर्वाणि छन्दाꣳस्येतस्यामिष्टामनूच्यानीत्याहुस्त्रिष्टुभो वा एतद्वीर्यं यत्ककुदुष्णिहा जगत्यै । यदुष्णिहककुभावन्वाह तेनैव सर्वाणि छन्दाꣳस्यवरुन्द्ध इति । प्र सो अग्ने तवोति-भिरित्येतासां द्वे धाय्यालोके दधात्यथाग्ने त्री ते वाजिना त्री षधस्थेति त्रिवत्या परिदधाति सरूपत्वायेति ब्राह्मणꣳ । सर्वेषामभिगमयन्नवद्यतीति । तस्या एते भवतः सं वां कर्म-णोभा जिग्यथुरित्यन्वाहार्यमासाद्य सहस्रꣳ हिरण्यं तार्प्यं धेनुमिति ददाति । यं कामयेत राजन्यमनपोध्यो जायेत वृत्राण्ꣳश्चरेदिति तस्मा एतमैन्द्राबार्हस्पत्यं चरुं निर्वपेदित्ये-तयेष्ट्या यक्ष्यमाण उपकल्पयते हिरण्मयं दाम । तस्या एते भवतो ऽस्मे इन्द्राबृहस्पती बृहस्पतिर्नः परिपातु पश्चादित्य-न्वाहार्यमासाद्य हिरण्मयं दाम ददाति । ॥ ४२ ॥

---

[1] Thus M only; यवमयस्मध्ये Be 8 Be; यवमयोमध्ये BU; यवमयं-रमध्ये D.

वैश्वानरं द्वादशकपालं निर्वपेदनिष्ठाग्रयणेन नवान्नं जग्ध्वा यो वान्यस्याग्निषु यजेत यस्य वान्यो ऽग्निषु यजेत ˈ सो ऽरण्योरग्नीन्समारोह्योदवसाय मथित्वाग्नीन्विहृत्य वैश्वानरं द्वादशकपालं निर्वपति ˈ तस्या एते भवतो वैश्वानरो न ऊत्या पृष्टो दिवीत्यग्नये तन्तुमते पुरोडाशमष्टाकपालं निर्वपेद्विच्छिन्नाग्निहोत्रो यो वा कामयेत प्रजायै मे तन्तुर्न विच्छिद्येतेति ˈ सो ऽरण्योरग्नीन्समारोह्योदवसाय[१] मथित्वाग्नीन्विहृत्याग्नये तन्तुमते पुरोडाशमष्टाकपालं निर्वपेदिति ˈ तस्या एते भवतस्त्वं नस्तन्तुरुत सेतुरग्ने त्वं पन्था भवसि देवयानः। त्वयाग्ने पृष्ठं वयमारुहेम अथा देवैः सधमादं मदेम॥ स्वयं कृण्वानः सुगमप्रवायं तिग्मशृङ्गो वृषभः शोशुचानः। प्रत्नꣳ सधस्थमनुपश्यमान आ तन्तुमग्निर्दिव्यं ततानेति ˈ स्विष्टवत्यौ संयाज्ये हव्यवाहमभिमातिषाहꣳ रक्षोहणं पृतनासु जिष्णुम्। ज्योतिष्मन्तं दीद्यन्तं पुरन्धिमग्निꣳ स्विष्टकृतमाहुवेम॥ स्विष्टमग्ने अभितत्पृणाहि विश्वा देव पृतना अभिष्य। उरुं नः पन्थां प्रदिशन्विभाहि ज्योतिष्मद्धेह्यजरं न आयुरित्यग्नये व्रतभृते पुरोडाशमष्टाकपालं निर्वपेद्य आहिताग्निरश्रु कुर्यादिति ˈ तस्या एते भवतस्त्वमग्ने व्रतभृच्छुचिर्देवाꣳ आसादया इह। अग्ने हव्याय वोढवे॥ व्रता नु बिभ्रद्व्रतपा अदाभ्यो यजानो देवाꣳ अजरः सुवीरः। दधद्रत्नानि सुवि-

१ Thus MDU; ०रोह्योदव० Be S Be; in B the last kh. is wanting.

दानो अग्ने गोपाय नो जीवसे जातवेद इत्यथ यद्याग्नयो वृथाग्निभिः संसृज्येरन्मिथो वान्यस्य वाग्निभिः सो ऽरण्योरग्नीन्समारोह्योदवसाय[1] मथित्वाग्नीन्निहृत्याग्नये विविचये पुरोडाशमष्टाकपालं निर्वपत्यग्नये[2] व्रतपतय इति । तस्या एता भवन्ति वि ते विष्वग्वातजूतासो अग्ने त्वामग्ने मानुषीरीडते विशस्त्वमग्ने व्रतपा असि यद्वो वयं प्रमिनाम व्रतानीति । संतिष्ठन्त इष्टयः संतिष्ठन्त इष्टयः । ॥ ४३ ॥ त्रयोदशः ॥

॥ इति त्रयोदशः प्रश्नः ॥

१ °रोप्योदव° Be 8 Be.
२ च ins. M.

अथ वै भवति प्रजापतिरकामयत प्रजाः सृजेयेति । स तपो ऽतप्यत । स सर्पानसृजत । सो ऽकामयत प्रजाः सृजेयेति । स द्वितीयमतप्यत । स वयांस्यसृजत । सो ऽकामयत प्रजाः सृजेयेति । स तृतीयमतप्यत । स एतं दीक्षितवादमपश्यत्तमवदत्ततो वै स प्रजा असृजतेति । तत्पृच्छन्ति[1] कतमत्तत्तपो यत्तपस्तप्त्वा दीक्षितवादं वदतीत्यथ वै भवत्यङ्गिरसः सुवर्गं लोकं यन्तो ऽप्सु दीक्षातपसी प्रावेशयन्नप्सु स्नातीति । साक्षादेव दीक्षातपसी अवरुन्द्ध इत्येतदिति ब्रूयादित्यथ वै भवति यद्वै दीक्षितो ऽमेध्यं पश्यत्यपास्माद्दीक्षा क्रामति । नीलमस्य हरो व्येतीति । सो ऽमेध्यं दृष्ट्वा जपत्यबद्धं मनो दरिद्रं चक्षुः सूर्यो ज्योतिषां श्रेष्ठो दीक्षे मा मा हासीरित्याह । नास्माद्दीक्षापक्रामति । नास्य नीलं न हरो व्येतीति ब्राह्मणमथ वै भवति यद्वै दीक्षितमभिवर्षति दिव्या आपो ऽशान्ता ओजो बलं दीक्षां तपो ऽस्य निर्घ्नन्तीति । सो ऽभिवृष्यमाणो जपत्युन्दतीर्बलं धत्तौजो धत्त बलं धत्त मा मे दीक्षां मा तपो निर्वधिष्टेत्याह । तदेव सर्वमात्मन्धत्ते । नास्यौजो बलं न दीक्षां न तपो निर्घ्नन्तीति ब्राह्मणमथ वै भवत्यग्निर्वै दीक्षितस्य देवता । सो ऽस्मादेतर्हि तिर इव यर्हि यातीति । सो ऽस्मात्समारूढश्चिर इव[2]

१ पृच्छन्ति MG (pr. m.) U ; पृच्छति Be BG (sec. m.) ; the plural is correct, the subject being, according to Bhav., ब्रह्मवादिनः।

२ यर्हि ins. M.

भवति । सो ऽरण्योरग्नीन्समारोह्य बृहस्पतिवत्यर्चा प्रयाति । भद्रादभि श्रेयः प्रेहि बृहस्पतिः पुरएता ते अस्त्वित्याह । ब्रह्म वै देवानां बृहस्पतिस्तमेवान्वारभते । स एनꣳ संपारयतीति ब्राह्मणं । प्रज्ञातमपाꣳ संयानस्यौकमध्यवसानस्यैष[1] वै भवति यो वै सोमꣳ राजानꣳ साम्राज्यं लोकं गमयित्वा क्रीणाति गच्छति स्वानाꣳ साम्राज्यं । छन्दाꣳसि खलु वै सोमस्य राज्ञः साम्राज्यो लोकः । पुरस्तात्सोमस्य क्रयादेवमभिमन्त्रयेतेति । स पुरस्तात्सोमस्य क्रयादेवमभिमन्त्रयते ॥ १ ॥

एष ते गायत्रो भाग इति मे सोमाय ब्रूतादेष ते त्रैष्टुभो भाग इति मे सोमाय ब्रूतादेष ते जागतो भाग इति मे सोमाय ब्रूताच्छन्दोमानाꣳ साम्राज्यं गच्छेति मे सोमाय ब्रूतादिति । साम्राज्यमेवैनं लोकं गमयित्वा क्रीणाति । गच्छति स्वानाꣳ साम्राज्यमिति ब्राह्मणमेष वै भवति यो वै तानूनप्त्रस्य प्रतिष्ठां वेद प्रत्येव तिष्ठति । ब्रह्मवादिनो वदन्ति न प्राश्नन्ति न जुह्वत्यथ क्व तानूनप्त्रं प्रतितिष्ठतीति । प्रजापतौ मनसीति ब्रूयात्त्रिरवजिघ्रेदिति । स त्रिरवजिघ्रति प्रजापतौ त्वा मनसि जुहोमीत्येषा वै तानूनप्त्रस्य प्रतिष्ठा । य एवं वेद प्रत्येव तिष्ठतीति ब्राह्मणमेष वै भवति यो वा अध्वर्योः प्रतिष्ठां वेद प्रत्येव तिष्ठति । यतो मन्येतानभिक्रम्य होष्यामीति तत्तिष्ठ-

१ Thus M Bo G; ॰आनमध्यस्य॰ B.

चाश्रावयेदिति ' स यतो मन्यतानभिक्रम्य होष्यामीति तत्तिष्ठन्नाश्रावयत्येषा वा अध्वर्योः प्रतिष्ठा ' य एवं वेद प्रत्येव तिष्ठतीति ब्राह्मणमथ वै भवति यदभिक्रम्य जुहुयात्प्रतिष्ठाया इयात्तस्मात्समानत्र तिष्ठता होतव्यं प्रतिष्ठित्या इति ' तदेतदन्यत्र हविर्यज्ञेभ्यो ' ऽभिक्रामं जुहोतीति हविर्यज्ञेषु भवत्यथ वै भवति यो वा अध्वर्योः स्वं वेद स्ववानेव भवति ' स्रुग्वा अस्य स्वं वायव्यमस्य स्वं चमसो ऽस्य स्वं ' यद्वायव्यं वा चमसं वानन्वारभ्याश्रावयेत्स्वादियादिति ' स वायव्यं चैव चमसं चान्वारभ्याश्रावयति ' स्वादेव नैतीति ब्राह्मणमथ वै भवति यो वै सोममप्रतिष्ठाप्य स्तोत्रमुपाकरोत्यप्रतिष्ठितः सोमो भवत्यप्रतिष्ठित स्तोमो ऽप्रतिष्ठितान्युक्थान्यप्रतिष्ठितो यजमानो ऽप्रतिष्ठितो ऽध्वर्युर्वायव्यं वै सोमस्य प्रतिष्ठा चमसो ऽस्य प्रतिष्ठा सोम स्तोमस्य स्तोम उक्थानां ' ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकुर्यादित्युन्नयनꣳ ह्येव[1] चमसस्य ग्रहणꣳ ' स ग्रहं वैव गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकरोति ' प्रत्येव सोमꣳ स्थापयति प्रति स्तोमं प्रत्युक्थानि ' प्रति यजमानस्तिष्ठति प्रत्यध्वर्युरिति ब्राह्मणम् ' ॥ २ ॥

अथ वै भवति यज्ञं वा एतत्संभरन्ति यत्सोमक्रयण्यै पदं ' यज्ञमुखꣳ हविर्धाने ' यर्हि हविर्धाने प्राची प्रवर्तयेयुस्तर्हि तेनाक्षमुपाञ्ज्यादिति ' स यर्हि हविर्धाने प्राची

१ MGB ins. न; Bhav. cites the passage without the negative particle.

प्रवर्तयति[१] तर्हि[१] तेन पदहतीयेन पत्न्यक्षधुरमुपानक्ति । यज्ञमुख एव यज्ञमनुसंतनोतीति ब्राह्मणमथ वै भवति प्राञ्चमग्निं प्रहरन्त्युत्पत्नीमानयन्त्यन्वनाꣳसि प्रवर्तयन्त्यथ वा अस्यैष धिष्णियो हीयते सो ऽनुध्यायति स ईश्वरो रुद्रो भूत्वा प्रजां पशून्यजमानस्य शमयितोर्यर्हि पशुमाप्रीतमुदञ्चं नयन्ति तर्हि तस्य पशुश्रपणꣳ हरेदिति । स यर्हि पशुमाप्रीतमुदञ्चं नयन्ति तर्हि तस्य पशुश्रपणꣳ हरति । तेनैवैनं भागिनं करोतीति ब्राह्मणमथ वै भवति यजमानो वा आहवनीयो । यजमानं वा एतद्विकर्षन्ते यदाहवनीयात्पशुश्रपणꣳ हरन्ति । स वैव स्यान्निर्मन्थ्यं वा कुर्यादिति । स यद्युहैनं[२] करिष्यन्भवति नैनमन्वानयते । ऽजस्र एवास्यैष दीप्यमानः शेते । यद्यु वा एनमन्वानयते तस्य पशुवेलायामुल्मुकमादायारणी उपसंगृह्य पूर्वः पशोः प्रतिपद्यते । निर्मन्थ्येनाच[३] पशुꣳ श्रपयन्ति । वपया[४] तत्सहोल्मुकमाहरन्ति यजमानस्य सात्मत्वायेति ब्राह्मणमथ वै भवति यदि पशोरवदानं नश्येदाज्यस्य प्रत्याख्यायमवद्येदिति । स यावन्ति पशोरवदानानि नश्यन्ति तावत्कृत्व आज्यस्य प्रत्याख्यायमवद्यति । सैव ततः प्रायश्चित्तिरिति ब्राह्मणमथ वै भवति ये पशुं विमथ्नीरन्यस्तान्कामयेता-

---

१ Thus M; प्रवर्तयेयुर्यर्हि the other MSS.

२ यद्युहैनं B Be; cp. infra p. 163, 5.

३ Thus M only; निर्मन्थ्येनाद the other MSS.

४ Thus MBG (sec. m.); पया Be G (pr. m.).

तिमार्च्छेयुरिति कुविदङ्गेति नमोवृक्तिवत्यर्चाग्नीध्रे जुहुयादिति। स कुविदङ्गेति नमोवृक्तिवत्यर्चाग्नीध्रे जुहोति। नमोवृक्तिमेवैषां वृङ्क्ते। ताजगार्तिमार्च्छन्तीति ब्राह्मणं। यद्यु वा एकचरं विमथ्नीते ग्रामिव एतां जुहोति[१]। प्रज्ञातमुपाकरणलोक्रमपाव्यानां[२] चरणं। ब्राह्मणमुत्तरम्। ॥ ३ ॥ प्रथमः ॥

अथ वै भवति यो वा अयथादेवतं यज्ञमुपचरत्या देवताभ्यो वृश्च्यते पापीयान्भवति। यो यथादेवतं न देवताभ्य आवृश्च्यते वसीयान्भवत्याग्नेय्यर्चाग्नीध्रमभिमृशेद्वैष्णव्या हविर्धानमाग्नेय्या स्रुचो वायव्यया वायव्यान्यैन्द्रिया सद इति। स आग्नेय्यर्चाग्नीध्रमभिमृशति वैष्णव्या हविर्धानमाग्नेय्या स्रुचो वायव्यया वायव्यान्यैन्द्रिया सदो। यथादेवतमेव यज्ञमुपचरति। न देवताभ्य आवृश्च्यते वसीयान्भवतीति ब्राह्मणमुक्तमौदुम्बराणां महापरिधीनां [३]परिधानमुक्तꣳ स्रुचाꣳ सादनमुक्तं पात्राणामभिमर्शनमथ वै भवतीष्टर्गो वा अध्वर्युर्यजमानस्येष्टर्गः खलु वै पूर्वो ऽर्ष्टुः क्षीयत। आमन्यामुष्मा मन्वात्पाहि कस्याश्चिदभिशस्त्या इति पुरा प्रातरनुवाकाज्जुहुयादिति। पुरा प्रातरनुवाकान्महाराात्र उत्थायाग्नीध्र आमन्यां जुहोत्यामन्यामुष्मा मन्वात्पाहि कस्याश्चिदभिशस्त्याः[४] स्वाहेत्यात्मन एव

---

१ BG ins. प्रज्ञात एतां जुहोति।

२ Thus M; उपाकरणीयस्य the other MSS.

३ From here unto निर्देशो॰ (p. 158, 12) is left out in B.

४ ॰भिशस्त्या M Be U and Padapāṭha at TS. III. 1. 7. 1; अभिशस्त्याः G.

तदध्वर्युः पुरस्तात्कर्म नह्यते ऽनार्त्या इति ब्राह्मणमथ वै भवति यो वै छन्दोभिरभिभवति स सꣳसुन्वतोरभिभवतीति। स सꣳसुन्वतोर्मंहाराच्च उत्थायाग्नीध्रे तिस्रो ऽभिभूतीर्जुहोति संवेशाय त्वोपवेशाय त्वा गायत्रिया अभिभूत्यै स्वाहा संवेशाय त्वोपवेशाय त्वा त्रिष्टुभो ऽभिभूत्यै स्वाहा संवेशाय त्वोपवेशाय त्वा जगत्या अभिभूत्यै स्वाहेत्यथ द्वे प्राणाहुती जुहोति प्राणापानौ मृत्योर्मा पातं प्राणापानौ मा मा हासिष्टमित्यथ वै भवति देवतासु वा एते प्राणापानयोर्व्यायच्छन्ते येषाꣳ सोमः समृच्छते। संवेशाय त्वोपवेशाय त्वेत्याह। छन्दाꣳसि वै संवेश उपवेशश्छन्दोभिरेवास्य छन्दाꣳसि वृङ्क्त इति ब्राह्मणमथ वै भवति यस्य भूयाꣳसो यज्ञक्रतव इत्याहुः स देवता वृङ्क्त इति। यद्यग्निष्टोमः सोमः परस्तात्स्यादुक्थ्यं कुर्वीतेत्युक्थ्यं क्रतुमुपैति। यद्युक्थ्यः स्यादतिरात्रं कुर्वीतेत्यतिरात्रं क्रतुमुपैति। यज्ञक्रतुभिरेवास्य देवता वृङ्क्ते वसीयान्भवतीति ब्राह्मणमिति[1] न्वा[1] अध्वर्युतो[1]। ऽथ छन्दोगतः। प्रेतिवन्ति[2] चैतिवन्ति[2] चाज्यानि[2] भवन्त्यभिजित्यै। मरुत्वतीः प्रतिपदो विजित्या। उभे बृहद्रथंतरे भवत।

---

१ इतीन्वा अध्व॰ BGU; इतीन्वध्व॰ M.

२ Thus only Bhavasvāmin; प्रेतिवंत च इतिवंति चा॰ M; प्रेतिवंति प्रइतिवेति चाज्य॰ G; प्रेतिवंति प्रइतिवोति चाज्य॰ U; प्रेतिप्रइतिवेचाज्य॰ Be; cp. also TS. III. 1. 7. 2 with the comm. Vol. III, p. 41 and T Br. I. 4. 6. 1.

इति[1] न्वै[1] छन्दोगतो[1] । ऽथ होतृत:[2] । सजनीयꣳ ग्रहं विहव्यꣳ ग्रहमगस्त्यस्य कयाशुभीयꣳ ग्रहमिति[3] न्वा[3] एकयाजिनो[3] । ऽथ सत्त्रिणां महाराच उत्थानं चैव समानं पञ्चाभिभूतीर्द्वे प्राणाहुती । ते यथाकल्वेव यन्त्यादिष्टान्येवाहान्युपयन्त्युक्तं[4] निगाभ्यासु वाचनमथ वै भवत्योषधयो वै सोमस्य विशो । विशः खलु वै राज्ञः प्रदातोरीश्वरा । ऐन्द्रः सोम इति । सो ऽभिषोष्यन्नोषधीभ्यो ऽधि राजानं निर्याचते । ऽवीवृधं वो मनसा सुजाता ऋतप्रजाता भग इद्वः स्याम । इन्द्रेण देवीर्वीरुधः संविदाना अनुमन्यन्ताꣳ सवनाय सोममित्याहौषधीभ्य एवैनꣳ स्वायै विशः स्वायै देवतायै निर्याच्याभिषुणोतीति ब्राह्मणमथ वै भवति यो वै सोमस्याभिषूयमाणस्य प्रथमो ऽꣳशुः स्कन्दति स ईश्वर इन्द्रियं वीर्यं प्रजां पशून्यजमानस्य निर्हन्तोस्तमभिमन्त्रयेतेति । स यः सोमस्याभिषूयमाणस्य प्रथमो ऽꣳशुः स्कन्दति तमभिमन्त्रयेता मास्कान्सह प्रजया सह रायस्पोषेणेन्द्रियं मे वीर्यं मा निर्वधीरित्याशिषमेवैतामाशास्त इन्द्रियस्य वीर्यस्य प्रजायै पशूनामनिर्घातायेति ब्राह्मणमथैषा द्रप्सानुमन्त्रणीया[5] । तामितराभिः सह वक्ष्यामो । ऽथ वै भवति ॥ ४ ॥

१ Corrected ; इति छंदोग॰ M ; इत्यु-छंदोग॰ Be UG.

२ होतृत: M.

३ इतिन्वेकया॰ M ; इतीन्वा एकया॰ Be UG.

४ Thus M ; यंत्यादिष्टानि ह्यहान्युप॰ GU ; यन्त्यादिष्टाविष्टहान्युप॰ Be.

५ Thus MBG ; ॰मथवा द्रप्सानुमंत्रणीया Be ; ॰मथैषा द्रप्सानुमंत्रणीया U.

यो वै देवान्देवयशसेनार्पयति मनुष्यान्मनुष्ययशसेन देवयशस्येव देवेषु भवति मनुष्ययशसी मनुष्येषु । यान्प्राचीनमाग्रयणाद्ग्रहान्गृह्णीयात्तानुपाꣳशु गृह्णीयाद्यानूर्ध्वाꣳस्तानुपब्दिमत इति । स यान्प्राचीनमाग्रयणाद्ग्रहान्गृह्णाति तानुपाꣳशु गृह्णाति । यानूर्ध्वाꣳस्तानुपब्दिमतो । देवानेव तद्देवयशसेनार्पयति मनुष्यान्मनुष्ययशसेन । देवयशस्येव देवेषु भवति मनुष्ययशसी मनुष्येष्विति ब्राह्मणं । ते यत्र बहिष्पवमानꣳ सप्स्यन्तो भवन्ति तेषु समन्वारब्धेष्वाहवनीये स्रुवाहुतिं जुहोत्यग्निः प्रातःसवने पात्वस्मान्वैश्वानरो महिना विश्वशम्भूः । स नः पावको द्रविणं दधात्वायुष्मन्तः सहभक्षाः स्याम स्वाहेति । माध्यंदिने पवमाने तथैव समन्वारब्धेष्वाहवनीये स्रुवाहुतिं जुहोति विश्वे देवा मरुतो इन्द्रो अस्मानस्मिन्द्वितीये सवने न जह्युः । आयुष्मन्तः प्रियमेषां वदन्तो वयं देवानाꣳ सुमतौ स्याम स्वाहेत्यार्भवे पवमाने तथैव समन्वारब्धेष्वाहवनीये स्रुवाहुतिं जुहोतीदं तृतीयꣳ सवनं कवीनामृतेन ये चमसमैरयन्त । ते सौधन्वनाः सुवरानशानाः स्विष्टिं नो अभि वसीयो नयन्तु स्वाहेत्यथ वै भवत्यायतनवतीर्वा अन्या आहुतयो हूयन्तेऽनायतना अन्या । या आघारवतीस्ता आयतनवतीर्याः सौम्यास्ता अनायतना । ऐन्द्रवायवमादायाघारमाघारयेदिति । स ऐन्द्रवायवमादायाघारमाघारयत्यध्वरो यज्ञोऽयमस्तु देवा ओषधीभ्यः पशवे नो जनाय । विश्वस्मै भूतायाध्वरोऽसि स पिन्वस्व घृतवद्देव सोम स्वाहेति । सौम्या एव तदाहुतीरायतनवतीः

करोत्यायतनवान्भवति य एवं वेदाथो द्यावापृथिवी एव एतेन युनक्ति । ते युक्ते उपजीवनीये भवत । उपजीवनीयो भवति य एवं वेदेति ब्राह्मणमथ प्रतिप्रस्थातोत्तरार्ध आहवनीयस्य सञ्चिनः सꣳस्रावं जुहोत्येष ते रुद्र भागो यं निरयाचथास्तं जुषस्व विदेर्गौपत्यꣳ रायस्पोषꣳ सुवीर्यꣳ संवत्सरीणाꣳ स्वाहेत्यथ वै भवति मनुः पुत्रेभ्यो दायं व्यभजत्स नाभानेदिष्ठं ब्रह्मचर्यं वसन्तं निरभजत्स आगच्छत्सो ऽब्रवीत्कथा मा निरभागिति । न त्वा निरभाक्षमित्यब्रवीदङ्गिरस इमे सत्त्रमासते । ते सुवर्गं लोकं न प्रजानन्ति । तेभ्य इदं ब्राह्मणं ब्रूहि । ते सुवर्गं लोकं यन्तो य एषां पशवस्ताꣳस्ते दास्यन्तीति । तदेभ्यो ऽब्रवीदिति । तत्पृच्छन्ति । किमेभ्यस्तदुवाचेत्यपाव्यानि सन्तनीर्द्रप्सानुमन्त्रणीया अच्छावाकीया[२] स्तोत्रीयाः[२] शस्त्रीयाः सत्यं वदत श्रद्धा वो मा विगादित्येतदेभ्यस्तदुवाचेति[३] । तं पशुभिश्चरन्तं यज्ञवास्तौ रुद्र आगच्छदित्युक्तस्यैव कर्मणो ऽनुवादो । ऽथ द्वे प्रवृताहुती जुहोति । जुष्टो वाचो भूयासमृचा सोमꣳ समर्धयेत्युपरिष्टात्तृतीया[४] । तासु[४] तत्रैव वक्ष्यामो । ऽथ द्रप्सानुमन्त्रयते द्रप्सश्चस्कन्द यस्ते द्रप्सो यो दप्सो यस्ते द्रप्स इत्यथ वै भवत्यध्वर्युर्वा ऋत्विजां प्रथमो युज्यते तेन

१ Thus MU; all the other MSS. read the singular.

२ Thus M only; all the other MSS. ०वाकीयास्तोत्रीयाः ।

३ Thus M; विभाद् i.s. of विगाद् all the other MSS.

४ Thus M; तृतीयासु the other MSS.

स्तोमो योक्तव्य इति' ते यत्र बहिष्पवमानꣳ सर्पन्ति तत्प्रज्ञ एवाध्वर्युः प्रथमो बर्हिषी धुवानः[1] सर्पति' वागग्रेगा अग्र एत्वृजुगा देवेभ्यो यशो मयि दधती प्राणान्पशुषु प्रजां मयि च यजमाने चेत्याह' वाचमेव तद्यज्ञमुखे युनक्तीति ब्राह्मणमथ वै भवति वास्तु वा एतद्यज्ञस्य क्रियते यद्ग्रहान्गृहीत्वा बहिष्पवमानꣳ सर्पन्ति' पराञ्चो हि यन्ति' पराचीभि स्तुवते' वैष्णव्यर्चा पुनरेत्योपतिष्ठत इति' स वैष्णव्यर्चा पुनरेत्योपतिष्ठते' यज्ञो वै विष्णुर्यज्ञमेवाकर्विष्णो त्वं नो अन्तमः शर्म यच्छ सहन्त्य। प्र ते धारा मधुश्चुत उत्सं दुह्रते अक्षितमित्याह' यदेवास्य शयानस्योपशुष्यति तदेवास्यैतेनाप्याययतीति ब्राह्मणम्' ॥ ५ ॥ द्वितीयः ॥

अथ वै भवति यो वै पवमानानामन्वारोहान्विद्वान्यजतेऽनु पवमानानारोहति' न पवमानेभ्योऽवच्छिद्यत इति' बहिष्पवमाने पञ्चम्यां प्रस्तुतायां वाचयति श्येनोऽसि गायत्रच्छन्दा अनु त्वारभे स्वस्ति मा संपारयेति' माध्यंदिने पवमानेऽष्टम्यां प्रस्तुतायां वाचयति सुपर्णोऽसि त्रिष्टुप्छन्दा अनु त्वारभे स्वस्ति मा संपारयेत्यार्भवे पवमाने नवम्यां प्रस्तुतायां वाचयति सघासि जगतीच्छन्दा अनु त्वारभे स्वस्ति मा संपारयेत्याहैते वै पवमानानामन्वारोहास्तान्य एवं विद्वान्यजतेऽनु पवमानानारोहति' न पवमानेभ्योऽवच्छिद्यत

१ धुवानः (cp. infra XV. 29) BG; भुवाकः U; धुवाकः M, but with a न written above the क; धून्वानः Be.

इति ब्राह्मणमथ वै भवति यो वै पवमानस्य संततिं वेद सर्वमायुरेति । न पुरायुषः प्रमीयते । पशुमान्भवति । विन्दते प्रजां । पवमानस्य ग्रहा गृह्यन्ते ऽथ वा अस्यैते ऽगृहीता । द्रोणकलश आधवनीयः पूतभृत्तान्यदगृहीत्वोपाकुर्यात्पवमानं विच्छिन्द्यात्तं विच्छिद्यमानमध्वर्योः प्राणो ऽनु विच्छिद्येतोपयामगृहीतो ऽसि प्रजापतये त्वेति द्रोणकलशमभिमृशेदिति । स प्रजापतये त्वेति द्रोणकलशमभिमृशतीन्द्राय त्वेत्याधवनीयं । विश्वेभ्यस्त्वा देवेभ्य इति पूतभृतं । पवमानमेव तत्संतनोति । सर्वमायुरेति । न पुरायुषः प्रमीयते । पशुमान्भवति । विन्दते प्रजामिति ब्राह्मणमथ वै भवति त्रीणि वाव सवनान्यथ तृतीयꣳ सवनमवलुम्पन्त्यनꣳशु कुर्वन्त । उपांशुꣳ हुत्वोपांशुपात्रे ऽꣳशुमवास्य तं तृतीयसवने ऽपिसृज्याभिषुणुयादिति । स[1] य[1] एवैष[1] उपांशुपात्रे[1] ऽꣳशुः[1] प्रास्तो भवति तं माध्यंदिनीय ऋजीषे ऽपिसृज्याभिषुणोति । यदाप्याययति तेनाꣳशुमद्यदभिषुणोति तेनर्जीषि । सर्वाण्येव तत्सवनान्यꣳशुमन्ति शुक्रवन्ति समावद्वीर्याणि करोतीति ब्राह्मणम् । ॥ ६ ॥

अथातो दीर्घप्रवृत्तानामेव मीमांसा । द्रोणकलशे दीर्घे वा प्रवृत्ते वा पात्र्यां चतुर्गृहीतं गृहीत्वाहवनीये जुहोत्यन्वारब्धे यजमाने विधुं दद्राणꣳ समने बहूनां युवानꣳ सन्तं पलितो

१ Thus M; स एवैष etc. G; स वैष उपांशुपात्रेंऽशुः BU; स एवैष उपांशुपात्रेपशुः Be.

जगार। देवस्य पश्य काव्यं महित्वाद्या ममार स ह्यः समान स्वाहेत्यथ होतृचमसे वसतीवरीभ्यो ऽध्यपो निःषिच्य तस्य स्रुचाꣳ संभरति भूतिः सोमेन वर्धतां तस्य मेष्टस्य वीतस्य द्रविणमागम्यादिति। स्कन्नमनुमन्त्रयते भूपतये स्वाहा भुवनपतये स्वाहा भूतानां पतये स्वाहेति। स यद्यह[1] दीर्णो भवति प्रतिक्षिम्पत्येनं[2]। यद्यु वै प्रवृत्त उच्छ्रित्यैनं बर्हिषी अन्तर्धाय स्रुचामानयत्यपोद्धृत्य बर्हिषी आग्रयणादंशुं प्रस्कन्दयत्याधवनीये दीर्णे वा प्रवृत्ते वा तथैव पात्र्यां चतुर्गृहीतं गृहीत्वाहवनीये जुहोत्यन्वारब्धे यजमाने द्वौ समुद्रौ विततावजूर्यौ पर्यावर्तेते जठरेव पादाः। तयोः पश्यन्तो अतियन्त्यन्यमपश्यन्तः सेतुनातियन्त्यन्याꣳ स्वाहेत्यथ होतृचमसे वसतीवरीभ्यो ऽध्यपो निःषिच्य तस्य तथैव स्रुचाꣳ संभरति भूतिः सोमेन वर्धतां तस्य मेष्टस्य वीतस्य द्रविणमागम्यादिति। स्कन्नमनुमन्त्रयते भूपतये स्वाहा भुवनपतये स्वाहा भूतानां पतये स्वाहेति। स यद्यह[1] दीर्णो भवति प्रतिक्षिम्पत्येनं। यद्यु वै प्रवृत्त उच्छ्रित्यैनं बर्हिषी अन्तर्धाय स्रुचामानयत्यपोद्धृत्य बर्हिषी आग्रयणादेवांशुं प्रस्कन्दयति। पूतभृति दीर्णे वा प्रवृत्ते वा तथैव पात्र्यां चतुर्गृहीतं गृहीत्वाहवनीये जुहोत्यन्वारब्धे यजमाने द्वे द्रधसी

१ Thus here and infra (163. 15, 164. 6) M; also Be at these last mentioned passages; यदि the other MSS. and Be, here, but infra यद्युह।

२ Thus here and infra M, the other MSS. every time the plural.

सन्ततौ वस्त एकः केशी विश्वा भुवनानि विद्वान्। तिरोधायैत्यसितं वसानः शुक्रमादत्ते अनुहाय जार्यै स्वाहेत्यथ होतृचमसे वसतीवरीभ्यो ऽध्यपो निःषिच्य तस्य तथैव स्वधाꣳ संभरति भूतिः सोमेन वर्धतां तस्य मेदस्य वीतस्य द्रविणमागम्यादिति। स्कन्नमनुमन्त्रयते भूपतये स्वाहा भुवनपतये स्वाहा भूतानां पतये स्वाहेति। स यद्यह दीर्णो भवति प्रतिच्छिम्पत्येनं। यद्यु वै प्रवृत्त उच्छ्रित्यैनं बर्हिषी अन्तर्धाय स्वधामानयत्यपोद्धृत्य बर्हिषी आग्रयणाद्देवांसु 'प्रस्कन्दयत्याग्रयणे दीर्णे वा प्रवृत्ते वा तस्य पुरोरुचा ऊल्लोच्छ्रित्यैनं बर्हिषी अन्तर्धाय स्वधामानयत्यपोद्धृत्य बर्हिषी द्रोणकलशाद्देवांसु[1] प्रस्कन्दयत्यथान्यस्मिन्ग्रहे दीर्णे वा प्रवृत्ते वा तस्यैव पुरोरुचा ऊल्लोच्छ्रित्यैनं बर्हिषी अन्तर्धाय स्वधामानयत्यपोद्धृत्य बर्हिषी आग्रयणाद्देवांसु प्रस्कन्दयति ॥ ७ ॥

अथ वै भवति देवा वै यज्ञे ऽकुर्वत तदसुरा अकुर्वत। ते देवा एतं महायज्ञमपश्यन्तमतन्वताग्निहोत्रं व्रतमकुर्वत। तस्माद्द्विव्रतः स्याद्द्विरग्निहोत्रं जुहोति। पौर्णमासं यज्ञमग्नीषोमीयं पशुमकुर्वत। दार्शं यज्ञमाग्नेयं पशुमकुर्वत। वैश्वदेवं प्रातःसवनमकुर्वत। वरुणप्रघासान्माध्यंदिनꣳ सवनꣳ साकमेधान्पितृयज्ञं त्र्यम्बकाꣳस्तृतीयसवनमकुर्वतेति। तत्पृच्छन्ति[2] कतमः स महायज्ञ इत्ययमेव चातुर्मास्यः सोम उक्तो भवत्ययो

१ This passage is left out by all the MSS exc. M.

२ °शृणन्ति all the MSS. exc. M.

खलु य एव कश्च सौम्यो ऽध्वरः स महायज्ञस्तमेषामसुरा यज्ञमन्ववाजिगाꣳसन्तं नान्ववायन्त ऽनुवन्नध्वर्तव्या वा इमे देवा अभुवन्निति ' तदध्वरस्याध्वरत्वं ' ततो देवा अभवन्पराऽसुरा ' य एवं विद्वान्सोमेन यजते भवत्यात्मना परास्य भ्रातृव्यो भवतीति ब्राह्मणमथ समस्तꣳ राजानमुपतिष्ठते परिभूरग्निं परिभूरिन्द्रं परिभूर्विश्वान्देवान्परिभूर्माꣳ सह ब्रह्मवर्चसेन स नः पवस्व शं गवे शं जनाय शमर्वते शꣳ राजन्नोषधीभ्यो ऽच्छिन्नस्य ते रयिपते सुवीर्यस्य रायस्पोषस्य ददितारः स्याम । तस्य मे रास्व तस्य ते भक्षीय तस्य त इदमुन्मृज इति ' चत्वारो ब्राह्मणसंपन्नाः कामास्तेषां यं[1] कामं[1] कामयते[1] तमादिश्योन्मृष्टे ' ऽथावकाशैश्चरति ' प्राणाय मे वर्चोदा वर्चसे पवस्वेत्युपाꣳशुपात्रमवेक्षते ' ऽपानायेत्यन्तर्यामपात्रं[2] ' व्यानायेत्युपाꣳशुसवनं ' वाच इत्यैन्द्रवायवं ' दक्षक्रतुभ्यामिति मैत्रावरुणꣳ ' श्रोत्रायेत्याश्विनं ' चक्षुर्भ्यामिति शुक्रामन्थिनावात्मन इत्याग्रयणमङ्गेभ्य इत्युक्थ्यमायुष इति ध्रुवं ' प्रतिष्ठाया इत्यतुपात्रे माध्यंदिने सवने ' न प्रातःसवने ' वीर्यायेत्यतिग्राह्यं वा षोडशिनं वावेक्षते ' विष्णोर्जठरमसीति द्रोणकलशमवेक्षत ' इन्द्रस्य जठरमसीत्याधवनीयं ' विश्वेषां देवानां जठरमसीति पूतभृतमथ समस्तमेव राजानमुपतिष्ठते को ऽसि को नाम कस्मै त्वा काय त्वा यं

1 Thus M; यंयं कामं कामयते Be; यं कामं कामयेत UG; यं कामयेत B.

2 अंतर्यामं i.s.o. अन्तर्यामपात्रं M.

त्वा सोमेनातीतृपं यं त्वा सोमेनामीमदꣳ सुप्रजाः प्रजया भूयासꣳ सुवीरो वीरैः सुवर्चा वर्चसा सुपोषैः पोषैर्विश्वेभ्यो मे रूपेभ्यो वर्चोदा वर्चसे पवस्व तस्य मे रास्व तस्य ते भक्षीय तस्य त इदमुन्मृज इति। चत्वारो ब्राह्मणसंपन्नाः कामाश्चैषां यं[1] कामं[1] कामयते[1] तमादिश्योन्मृष्ट आयुरुन्मृजे भूतिमुन्मृजे ब्रह्मवर्चसमुन्मृजेऽमुष्य प्राणमुन्मृज इदमुन्मृज[2] इति। यमेव तर्पयति स एनं तृप्तः प्राणापानाभ्यां वाचो दक्षक्रतुभ्यां चक्षुर्भ्याꣳ श्रोत्राभ्यामात्मनोऽङ्गेभ्य आयुषोऽन्तरेति। ताजक् प्रधन्वतीति ब्राह्मणमुक्तꣳ भक्षविचनानामुपस्थानमुक्तꣳ संप्रसर्पणश्चोक्तो भक्षानुवाकः। ॥ ८ ॥ तृतीयः ॥

उक्तं पृषदाज्यस्याविहृतस्य ग्रहणमुक्तौ दधिघर्मौ। अथ वै भवति यत्कृष्णशकुनः पृषदाज्यमवमृशेच्छूद्रा अस्य प्रमायुकाः स्युर्यच्छ्वावमृशेच्चतुष्पादोऽस्य पशवः प्रमायुकाः स्युर्यत्स्कन्देद्यजमानः प्रमायुकः स्यादित्यथ वै भवति पशवो वै पृषदाज्यं। पशवो वा एतस्य स्कन्दन्ति यस्य पृषदाज्यꣳ स्कन्दति। यत्पृषदाज्यं पुनर्गृह्णाति पशूनेवास्मै पुनर्गृह्णातीति ब्राह्मणमथ वै भवति प्राणो वै पृषदाज्यं। प्राणो वा एतस्य स्कन्दति यस्य पृषदाज्यꣳ स्कन्दति। यत्पृषदाज्यं पुनर्गृह्णाति प्राणमेवास्मै पुनर्गृह्णाति[3]।

---

१ Thus M again; यं कामं कामयेत UBG; यंयं क॰ कामयेत Be.

२ om. U Be.

३ इति ins. BG.

हिरण्यमवधाय[1] गृह्णातीति । स्रुचि पृषदाज्ये कꣳसं वा चमसं वा याचति । तमन्तर्वेदि निधाय तस्य स्वधाꣳ संभरति भूतिर्दध्ना घृतेन वर्धतां तस्य मेष्टस्य वीतस्य द्रविणमागम्यादिति । स्रुचमनुमन्त्रयते भूपतये स्वाहा भुवनपतये स्वाहा भूतानां पतये स्वाहेत्यथैतस्याꣳ[2] स्रुच्यवदधाति शतमानꣳ हिरण्यं । नित्ये ग्रहणे वैष्णवीमृचमनुवर्तयति विष्णो त्वं नो अन्तम इत्यपोद्धृत्य हिरण्यमश्वमवघ्राप्य सादयत्यथातो ऽमेध्यभूतस्यैव श्वावघ्रातस्य ध्वाङ्क्षावमृष्टस्य कीटावपन्नस्येति यद्[3] चान्यदमेध्यं[3] मन्यते । सर्वत्र एवैताꣳ स्रुचमप्सु प्रवेश्याथान्यस्याꣳ स्रुच्यवदधाति शतमानꣳ हिरण्यं । नित्ये ग्रहणे वैष्णवीमृचमनुवर्तयति विष्णो त्वं नो अन्तम इत्यपोद्धृत्य हिरण्यमश्वमवघ्राप्यैव सादयत्यथ वै भवति वि वा एतस्य यज्ञश्छिद्यते यस्य पृषदाज्यꣳ स्कन्दति । वैष्णव्यर्चा पुनर्गृह्णातीति । स वैष्णव्यर्चा पुनर्गृह्णाति । यज्ञो वै विष्णुर्यज्ञेनैव यज्ञꣳ संतनोतीति ब्राह्मणं । ते यद्यान्तःप्राणं प्रचरिष्यन्तो भवन्ति तदाह ब्रह्मन्प्रचरिष्यामो होतर्घर्ममभिष्टुहीति । तद्ब्रह्मा प्रसौति देव सवितरेतत्ते प्राह तत्प्र च सुव प्र च यज बृहस्पतिर्ब्रह्मा स यज्ञं पाहि स यज्ञपतिं पाहि स मां पाह्यों प्रचरतेति

---

१ गृह्णाति हिरण्यमवधाय om. U.

२ ॰थैनं M.

३ यच चान्यद॰ M.

प्रतितिष्ठतीह[1] हविर्यज्ञेषु भवति' यत्राह ब्रह्मन्स्तोष्यामः प्रशास्तरिति तद्ब्रह्मा प्रसौति देव सवितरेतत्ते प्राह तत्प्र च सुव प्र च यज बृहस्पतिर्ब्रह्मायुष्मत्या ऋचो मा गात तनूपात्साम्नः सत्या व आशिषः सन्तु सत्या आकूतय ऋतं च सत्यं च वदत स्तुत देवस्य सवितुः प्रसवे भूरिन्द्रवन्त स्तुतेति प्रातःसवने' भुव इन्द्रवन्त स्तुतेति माध्यंदिने' सुवरिन्द्रवन्त स्तुतेति तृतीयसवने' स्तुते स्तुतस्य दोहं वाचयति स्तुतस्य स्तुतमस्यूर्जं मह्यꣳ स्तुतं दुहामा मा स्तुतस्य स्तुतं गम्यादिति' शस्त्रे शस्त्रस्य दोहं वाचयति शस्त्रस्य शस्त्रमस्यूर्जं मह्यꣳ शस्त्रं दुहामा मा शस्त्रस्य शस्त्रं गम्यादिति' तयोरुभयोरभ्यासं[2] वाचयतीन्द्रियावन्तो वनामहे धुक्षीमहि प्रजामिषꣳ सा मे सत्याशीर्देवेषु भूयाद्ब्रह्मवर्चसं मागम्यादित्यथ यज्ञस्य पुनरालम्भं जपति यज्ञो बभूव स आ बभूव स प्रजज्ञे स वावृधे। स देवानामधिपतिर्बभूव सो अस्माꣳ अधिपतीन्करोतु वयꣳ स्याम पतयो रयीणामित्यथ वै भवति यज्ञो वा वै यज्ञपतिं दुहे यज्ञपतिर्वा यज्ञं दुहे' स य स्तुतशस्त्रयोर्दोहमविद्वान्यजते तं यज्ञो दुहे' स इष्ट्वा पापीयान्भवति' य एनयोर्दोहं विद्वान्यजते स यज्ञं दुहे' स इष्ट्वा वसीयान्भवति' स्तुतस्य स्तुतमस्यूर्जं मह्यꣳ स्तुतं दुहामा मा स्तुतस्य स्तुतं गम्याच्छस्त्रस्य शस्त्रमस्यूर्जं मह्यꣳ शस्त्रं दुहामा मा शस्त्रस्य शस्त्रं गम्यादित्याहैष वै स्तुतशस्त्र-

१ B om. इव ; Bhav. comments upon it.

२ Thus M; ॰भ्यासं BG ; ॰भ्याभ्यासं Be U.

योदीहिस्त्वं य एवं विद्वान्यजते दुह एव यज्ञमिद्धा वसीयान्भवतीति ब्राह्मणमुक्तꣳ होत्रकाणाꣳ संतर्पणमुक्तानि[1] वैश्वकर्मणान्युक्तमाशिरो ऽवनयनमुक्ता ध्रुवस्य चर्याथ वै भवति ॥ ९ ॥

यद्वै होताध्वर्युमभ्याह्वयते वज्रमेनमभि प्रवर्तयत्युक्थशा इत्याह प्रातःसवनं प्रतिगीर्येति ' स उक्थमुक्थं वैव प्रतिगीर्योक्थशा इत्याह सवनꣳसवनं[2] वोक्थं[2] वाचीत्याह माध्यंदिनꣳ सवनं प्रतिगीर्योक्थं वाचीन्द्रायेत्याह तृतीयसवनं प्रतिगीर्य ' सप्तैतान्यक्षराणि ' सप्तपदा शक्वरी ' शाक्वरो वज्रो ' वज्रेणैव तृतीयसवने वज्रमन्तर्धत्त इति ब्राह्मणमथ वै भवति ब्रह्मवादिनो वदन्ति स त्वा अध्वर्युः स्याद्यो यथासवनं प्रतिगरे छन्दाꣳसि संपादयेत्तेजः प्रातःसवन आत्मन्दधीतेन्द्रियं माध्यंदिने सवने पशूꣳस्तृतीयसवन इत्युक्थशा इत्याह प्रातःसवनं प्रतिगीर्योक्थं वाचीत्याह माध्यंदिनꣳ सवनं प्रतिगीर्योक्थं वाचीन्द्रायेत्याह तृतीयसवनं प्रतिगीर्य ' सप्तैतान्यक्षराणि ' सप्तपदा शक्वरी ' शाक्वराः पशवो ' जागतं तृतीयसवनं ' तृतीयसवन एव प्रतिगरे छन्दाꣳसि संपादयत्यथो पशवो वै जगती ' पशवस्तृतीयसवनं ' पशूनेव तृतीयसवन आत्मन्धत्त इति

---

१ Thus M Be G (pr. m.); सर्पण॰ the other MSS.

२ Thus, without any various reading all the Dvaidha MSS.; प्रातःसवनं सवनं चोक्थं M pr. m., but प्रातः is expunged and the second सवनं is changed into प्रतिगीर्य; प्रतिसवनं वोक्थं B Be; प्रातःसवनं वो॰ UG.

ब्राह्मणमथ वै भवति यद्वै होताध्वर्युमभ्याह्वयत आव्यमस्मि-
न्दधाति । तद्यन्नापहनीत पुरास्य संवत्सराद्गृह आवेवीरञ्छोंऽसा
मोद इवेति प्रत्याह्वयत इति । सो ऽभ्याहूतः शोंऽसा मोद
इवेति प्रत्याह्वयते । तेनैव तदपहत इति ब्राह्मणमथ वै भवति
यथा वा आयतां प्रतीक्षत एवमध्वर्युः प्रतिगरं प्रतीक्षते ।
यदभिप्रतिगृणीयाद्यथायतया समृच्छते तादृगेव तद्यदर्धर्चाल्लुप्येत
यथा धावद्भ्यो हीयते तादृगेव तत्त्वदाकर्णांशाप्रतिगरौ स्यादा-
शाप्रतिगरौ ह वा अभि[1] वा प्रतिगृणात्यर्धर्चाद्वा लुप्यते ।
प्रणौतीत्येव[2] प्रणौयादपानितीत्येवापान्याद्[3] एवं विद्वान्प्रति-
गृणात्यन्नाद एव भवत्यास्य प्रजायां वाजी जायत इति
ब्राह्मणमथ वै भवतीयं वै होतासावध्वर्युर्यदासीनः शंसत्यस्या
एव तद्धोता नैत्यास्त इव हीयमथो इमामेव तेन यजमानो
दुहे । यत्तिष्ठन्प्रतिगृणात्यमुष्या एव तदध्वर्युर्नैति । तिष्ठतीव
ह्यसावथो[4] अमुमेव[4] तेन यजमानो दुहे । यदासीनः शंसति
तस्मादितःप्रदानं देवा उपजीवन्ति । यत्तिष्ठन्प्रतिगृणाति
तस्मादमुतःप्रदानं मनुष्या उपजीवन्ति । यत्प्राङासीनः शंसति

---

१ अपि all, but cp. TS. III. 2. 9. 5.

२ Thus M only; प्रणौतामेव the other MSS.

३ एव after अपानितीति only found in M. The sense of these words is "only if he perceives that the hotar makes the praṇava, he should make the praṇava; only if he perceives that the hotar draws breath, he should draw breath," cp. Sat. Br. IV. 3. 2. 6.

४ ०थोमुमेव M.

प्रत्यङ् तिष्ठन्प्रतिगृह्णाति तस्मात्प्राचीनꣳ रेतो धीयते प्रतीचीः प्रजा जायन्त इति ब्राह्मणमथ वै भवति यद्वै होताध्वर्युमभ्याह्वयते वज्रमेनमभि प्रवर्तयति। पराङावर्तत इति। सो ऽभ्याहूतः पराङावर्तते। वज्रमेव तन्निकरोतीति ब्राह्मणमुक्तं प्रतिनिर्ग्राह्याणां ग्रहणमुक्तꣳ[1] सꣳस्थावस्थापिधानमुक्तमुपाꣳश्वन्तर्यामयोरनुमन्त्रणमुक्ता द्विदेवत्यानां चर्या[2]। ॥ १० ॥

चतुर्थः ॥

अथातो ऽतिग्राह्याणामेव ग्रहणꣳ। स यद्येको यदि वा बहव आग्रयणमेवैनान्गृहीत्वा गृह्णाति। माहेन्द्रस्यैव होममनु हूयन्ते[3]। स आग्नेयं गृह्णात्यग्न आयूꣳषि पवस इत्यनुद्रुत्योपयामगृहीतो ऽस्यग्नये त्वा तेजस्वते जुष्टं गृह्णामीति। परिमृज्य सादयत्येष ते योनिरग्नये त्वा तेजस्वत इत्यथैनꣳ होष्यन्नवेक्षते ऽग्ने तेजस्विन्तेजस्वी त्वं देवेषु भूयास्तेजस्वन्तं मामायुष्मन्तं वर्चस्वन्तं मनुष्येषु कुर्विति। जुहोति दीक्षायै च त्वा तपसश्च तेजसे जुहोमीति। हुत्वा वाचयति तेजोविदसि तेजो मा मा हासीन्माहं तेजो हासिषं मा मां तेजो हासीदिति। भक्षयति मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधात्वित्यथैन्द्रं गृह्णात्युत्तिष्ठन्नोजसा सहेत्यनुद्रुत्योपयामगृहीतो ऽसीन्द्राय त्वौजस्वते जुष्टं गृह्णामीति। परिमृज्य सादयत्येष ते योनिरिन्द्राय

---

१ These two words are left out in all the MSS. exc. M.

२ चर्याः Be.

३ Thus (and cp. Āp. XIII. 8. 7) MU; ह्रयते Be: ह्रयंते BG.

त्वौजस्वत इत्यथैनꣳ होष्यन्नवेक्षत इन्द्रौजस्विन्नोजस्वी त्वं देवेषु भूया ओजस्वन्तं मामायुष्मन्तं वर्चस्वन्तं मनुष्येषु कुर्विति' जुहोति ब्रह्मणश्च त्वा क्षत्रस्य चौजसे जुहोमीति' हुत्वा वाचयत्योजोविदस्योजो मा मा हासीन्माहमोजो हासिषं मा मामोजो हासीदिति' भक्षयति मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियं दधात्वित्यथ सौर्यं चा[1] सौर्यं गृह्णाति तरणि-र्विश्वदर्शत इत्यनुद्रुत्योपयामगृहीतो ऽसि सूर्याय त्वा भ्राजस्वते जुष्टं गृह्णामीति' परिमृज्य सादयत्येष ते योनिः सूर्याय त्वा भ्राजस्वत इत्यथैनꣳ होष्यन्नवेक्षते सूर्य भ्राजस्विन्भ्राजस्वी त्वं देवेषु भूया भ्राजस्वन्तं मामायुष्मन्तं वर्चस्वन्तं मनुष्येषु कुर्विति' जुहोति वायोश्च त्वापां च भ्राजसे जुहोमीति' हुत्वा वाचयति सुवर्विदसि सुवर्मा मा हासीन्माहꣳ सुवर्हासिषं मा माꣳ सुवर्हासीदिति' भक्षयति मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधात्विति' ते वा एते पृष्ठ्यस्य षडह-स्योत्तरेष्वहःसु गृह्यन्त एकविꣳशे त्रिणवे त्रयस्त्रिꣳशे' विश्वजिति सर्वपृष्ठे ग्रहीतव्या यज्ञस्य सुवीर्यत्वायाग्निष्टोमे ग्रहीतव्या यज्ञस्य सतनुत्वायेति ब्राह्मणमथोपाकरणं[2] जपति वायुर्हिंकर्तेत्यार्त्विज्यं वा[3] करिष्यन्कृत्स्नं वा प्रतिगरिष्यन्नेतद-

---

१ Found in M only.

२ The brāhmaṇa cited here is found T.S. VI. 6. 8. 2.

३ om. M Be.

जुर्जपतीडा देवहूरिति ' प्रियो हैवाग्निर्व्यस्य भवति ' प्रश्नꣳ संव्याख्यास्यन्नेतद्यजुर्जपन्त्सभां प्रपद्यते ' ऽभि हैव[1] तं[1] प्रश्नं जयति ' ॥ ११ ॥

अथातो ऽꣳश्वदाभ्ययोरेव ग्रहणमꣳश्वदाभ्यौ ग्रहीष्यन्नुपकल्पयते द्वे औदुम्बरे नवे पात्रे तयोश्चतुःस्रक्त्यꣳशुपात्रं भवति वृत्तमदाभ्यपात्रं ते सुवर्णरजताभ्याꣳ रुक्माभ्यां पर्यन्ते भवतः शतमानं च हिरण्यमर्मयोपनद्धस्य राज्ञस्त्रीनꣳशून्प्रवृहति वसवस्त्वा प्रवृहन्तु गायत्रेण छन्दसाग्नेः प्रियं पाथ उपेहि रुद्रास्त्वा प्रवृहन्तु त्रैष्टुभेन छन्दसेन्द्रस्य प्रियं पाथ उपेह्यादित्यास्त्वा प्रवृहन्तु जागतेन छन्दसा विश्वेषां देवानां प्रियं पाथ उपेहीत्यथ होतृचमसे वसतीवरीभ्यो ऽध्यपो निःषिच्य द्वादशभिराधावैराधूनोति मान्दासु ते शुक्र शुक्रमाधूनोमीति प्रतिपद्य शुक्रासु ते शुक्र शुक्रमाधूनोमीत्यान्तो ' ऽथैतस्मिन्नदाभ्यपात्रे ऽꣳशूनुपसंसृज्य गृह्णाति शुक्रं ते शुक्रेण गृह्णाम्यह्नो रूपेण सूर्यस्य रश्मिभिः । आस्मिन्नुग्रा अचुच्यवुर्दिवो धारा असश्चतेत्यथैनमादायोपोत्तिष्ठति ककुहꣳ रूपं वृषभस्य रोचते बृहदित्येति सोमः सोमस्य पुरोगाः शुक्रः शुक्रस्य पुरोगा इत्येत्याहवनीये जुहोत्यन्वारब्धे यजमाने यत्ते सोमादाभ्यं नाम जागृवि तस्मै ते सोम सोमाय स्वाहेत्यथ प्रदक्षिणमावृत्य राजन्येवाꣳशूनपिसृजत्युशिक् त्वं

१ Thus MUG; हैवन Be; हैवैनं B.

देव सोम गायत्रेण छन्दसाग्नेः प्रियं पाथो अपीहि वशी त्वं देव सोम त्रैष्टुभेन छन्दसेन्द्रस्य प्रियं पाथो अपीह्यस्मत्सखा त्वं देव सोम जागतेन छन्दसा विश्वेषां देवानां प्रियं पाथो अपीहीत्यथाह प्रतिप्रस्थातरुदकंसेन वा[1] मोदचमसेन[1] वा जघनेनाहवनीयं प्रत्युपलम्बस्वेति । स तथा करोत्यथैतद्धिरण्यमद्भिः प्रक्षाल्य मध्यमायामङ्गुलौ बध्नीते नाधिकायां वा प्रपद्यात्यथ सकृदभिषुतस्य राज्ञो ऽंशुं गृह्णाति वामदेव्यमिति साम मनसा गायमानो ऽनवानं प्रजापतये[2] त्वेति[2] गृह्णाति[2] प्रजापतये त्वेति जुहोत्यथ हिरण्यमभिव्यनित्या[3] नः प्राण एतु परावत आन्तरिक्षाद्दिवस्परि । आयुः पृथिव्या अध्यमृतमसि प्राणाय त्वेत्यथान्तर्वेद्यद्भिर्मार्जयत इन्द्राग्नी मे वर्चः कृणुतां वर्चः सोमो बृहस्पतिः । वर्चो मे विश्वे देवा वर्चो मे धत्तमश्विना ॥ दधन्वे वा यदीमनु वोचद्ब्रह्माणि वेरु तत् । परि विश्वानि काव्या नेमिश्चक्रमिवाभवदित्यध्वर्योरेतद्धिरण्यं भवति[4] । ब्राह्मणमुत्तरम् । ॥ १२ ॥ पञ्चमः ॥

अथातः पृश्नीनामेव ग्रहणं । संहृत्य राजानं दशधा व्यूह्याभिमृशति वायुरसि प्राणो नामेति दशभिर्दश । ते वा

---

१ Thus M; वोदचम° all the other MSS., omitting वा।

२ om. Be.

३ Thus MUG; °व्यानित्या B Be; cp. T.S. III. 3. 4. 3.

४ All the MSS. exc. M ins. इति।

एते संवत्सरस्याचीयेष्वहःसु[1] गृह्यन्ते । यत्र क्व चैवैनान्गृह्णीयादित्येतदपरमयातः परःसाम्नामेव ग्रहणं । ते वा एते परःसामानः पुरस्ताद्वैषुवतात्त्र्यहमन्वहमितः पराञ्चो गृह्यन्ते । ऽथ वैषुवते[2] ऽह्नि पराञ्चश्चार्वाञ्चश्च गृह्यन्ते । ऽथोर्ध्वं वैषुवतात्त्र्यहमन्वहमावृत्तानेव गृह्णाति । प्रजापतिर्देवासुरानसृजतेति ब्राह्मणमेवाथ[3] वै भवत्यावृश्च्यते वा एतद्यजमानो ऽग्निभ्यां यदेनयोः शृतंकृत्याथान्यत्रावभृथमवैत्यायुर्दा अग्ने हविषो जुषाण इत्यवभृथमवैष्यञ्जुहुयादिति । यो ऽवभृथमवैष्यन्नायुर्दां दग्नमौ जुहोत्यायुर्दा अग्ने हविषो जुषाणो घृतप्रतीको घृतयोनिरेधि । घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभिरक्षतादिमꣳ स्वाहेत्याहुत्यैवैनौ शमयति नार्तिमार्छति यजमान इति ब्राह्मणमुक्तं बर्हिषः पर्युपोषणमुक्तꣳ[4] सक्तुहोमस्याथ वै भवति यदि मिश्रमिव चरेदञ्जलिना सक्तून्प्रदाव्ये जुहुयादिति । स्नातकः पुपूषमाणो ऽरण्ये प्रदाव्यं [5]दहन्तमुपाधिगम्याञ्जलिनोपस्तीर्णाभिघारितान्सक्तून्प्रदाव्ये जुहोति विश्वलोप

---

१ Thus M; °स्याचीयेषु° all the other MSS.; probably we have here a heteroclitic loc. from स्याचीयम् (स्याध्मन् of the other ritual texts), cp. infra XVI. 16 init.

२ एव before एनान् om. M.

३ वैषुवतीये M and Bhav.

४ ब्राह्मणमेषोथ M.

५ पर्युपोषण° M, उपोषण° all the other MSS.

६ Thus M; दवन्तमुपा° UBG; द्रवन्तमुपा° Be.

विश्वदावस्य त्वामञ्जुहोमि स्वाहेति । हुत्वा प्रसङ्क्रमयते ऽग्धादेको ऽङ्कतादेकः समभनादेकः । ते नः कृण्वन्तु भेषजꣳ सदः सहो वरेण्यमित्यथैनं त्रिभिर्दर्भपुञ्जीलैः पवयति पवमानः सुवर्जन इत्येतेनाष्टर्चेन । शुद्धो हैव शुचिः पूतो मेध्यो भवत्यथ वै भवत्यक्ष्णां विधान्यामेकाष्टकायामपूपं चतुःशरावं पक्त्वा प्रातरेतेन कक्षमुपोषेदिति[1] । समां[2] विजिज्ञासमानो महारात्र उत्थायाक्ष्णां विधान्यामेकाष्टकायामपूपं चतुःशरावं पक्त्वा प्रातरुदित आदित्ये विप्रुषित[3] आददत एतमपूपमुपस्तीर्णाभिघारितं पर्णसेवाभ्यां परिगृह्य । तस्यह पूतितृणानि [4]भवन्त्यन्तमागारादेकोल्मुकमुद्घाचमित्येतस्मादाय तां दिशं यन्ति यत्रास्य कक्ष स्पष्टो भवति । तदेतदेकोल्मुकमुपसमाधायापूपमादीपयति पर्णसेवाभ्यां परिगृह्य । तस्यह पूतितृणानि[4] भवन्ति । तेन कक्षमुपोषत्यथैनमुद्गृह्णात्यथ[5] विज्ञानमुपैति । यदि दहति पुण्यसमं भवति यदि न दहति पापसममेतेन ह स्म वा ऋषयः पुरा विज्ञानेन दीर्घसत्त्रमुपयन्तीति ब्राह्मणमन्त्रेतमपूपं प्राश्याय[6] उपस्पृश्य गृह्णानेत्यृषभो गोषु जीर्यति

---

१ °मुपोषेदिति MU.

२ Thus only M; सर्वां all the other MSS.

३ Thus M; विप्रमुषित BG; विप्रुषित Be U; Bhav. comments: उदिते अस्ताये ।

४—४ This passage is left out in all etc. M.

५ °मुपोषत्य° M.

६ प्राश्याय M, perhaps rightly.

तेन यक्ष्यमाणो भवति । तस्य तदुपक्लृप्तं भवति यत्पशुना यक्ष्यमाणस्यांय[1] यदुत्सृष्टो भवति[1] तस्य निहत्य[2] दक्षिणं कर्णमाजपति शिवस्त्वष्टः पिशङ्गरूप इति द्वाभ्यामथैनं गोष्वपिसृजते ॥ १३ ॥

एतं युवानं परि वो ददामीत्यपियन्तमनुमन्त्रयते त्वां गावो ऽवृणत राज्याय त्वाँ हवन्त मरुतः स्वर्काः । वर्ष्मन्क्षत्रस्य ककुभि शिश्रियाणस्ततो न उग्रो विभजा वसूनीत्यथेतरं त्वाष्ट्रं वैन्द्रं वा प्राजापत्यं वा पशुमालभते[3] । एता हि साण्डस्य देवतास्तस्योपाकरणीययोरनुवर्तयति नमो महिम्न उत चक्षुषे त इत्यथास्य वपां जुहोति देवानामेष उपनाह आसीदित्यथास्य हविर्जुहोति पिता वत्सानां पतिरघ्नियानामिति । समानमुत्तरं पशुकर्म । वशया यक्ष्यमाण आह गर्भमीक्षध्वमिति । ते चेद्गर्भं पश्यन्ति संप्रच्छाद्य वशां वपयाद्रवन्त्यथास्यै वपां जुहोति सूर्यो देवो दिविषद्भ्यो धाता क्षत्राय वायुः प्रजाभ्यः । बृहस्पतिस्त्वा प्रजापतये ज्योतिष्मतीं जुहोतु स्वाहेति । वशामनुमन्त्रयते यस्यास्ते हरितो गर्भो ऽथो योनिर्हिरण्ययी । अङ्गान्यह्रुता यस्यै तां देवैः समजीगममित्यथ याचत्यष्टाप्रुड्ढिरण्यं कौशं चान्तरकोशं च वासश्चोष्णीषं

१ ॰माणस्याथैनमुत्सृष्ट॰ M.

२ Thus MGB; नित्य U; नित्यं Be.

३ पशुम॰ M; पशून॰ all the other MSS.

चाथैतद्धिरण्यमद्भिः[१] प्रक्षाल्य वाससोपनह्योष्णीषेण विग्रथ्य दर्भे कोशे ऽवधाय महति कोशे ऽवदधाति । स आह प्रत्यञ्चं गर्भमन्तरेण सक्थिनी प्रतिनिवर्तयतेति । तं निवर्त्यमानमनुमन्त्रयत आ वर्तन वर्तय नि निवर्तन वर्तयेन्द्र नर्दबुद । भूम्याश्चतस्रः प्रदिशस्ताभिरावर्तया पुनरित्युत्थाङ्गर्भं विस्रस्यमानमनुमन्त्रयते वि ते भिनद्मि तकरीं वि योनिं वि गवीन्यौ । वि मातरं च पुत्रं च वि गर्भं च जरायु च । बहिस्ते अस्तु बालितीत्यथैतं[२] गर्भं संदंशेन परिगृह्याद्भिरभ्युक्ष्य शामित्रे प्रतितपति । तस्याभ्यर्धादश्वाहोमं[३] प्रद्योतयत्यथैतं गर्भमन्तरेण चात्वालोत्करावन्तरेण यूपं चाहवनीयं चोपातिहृत्य[४] तं दक्षिणतः प्राञ्चमायातयन्मस्नशोचा[५] सादयत्यथ वशायै हविषा चरत्यथ पुरस्तात्स्विष्टकृतो गर्भस्यावद्यन्नाह विष्णवे शिपिविष्टायानुब्रूहीत्यथ वै भवति पुरस्तान्नाभ्या अन्यदवद्येदुपरिष्टादन्यदिति । स पुरस्तान्नाभ्या अन्यदवद्यत्युपरिष्टादन्यद्द्विरभिघारयत्याश्राव्याह विष्णुं शिपिविष्टं यजेति । वषट्कृते जुहोत्युरुद्रप्सो विश्वरूप इन्दुः पवमानो धीर आनञ्ज गर्भम् । एकपदी द्विपदी त्रिपदी चतुष्पदी पञ्चपदी षट्पदी

---

१ Thus M; चाथैन॰ all the other MSS.

२ Thus M; ॰थैनं the other MSS.

३ Thus M; तस्याभ्यर्धे BG; तस्याभ्यर्धेदश्वा॰ Bo U.

४ Thus M; चोपानीत्य the other MSS.

५ प्राञ्चमासादयत्यथ (sec. m. ॰मायातयत्यथ), omitting the partic. and मस्नशोचा M.

सप्तपद्यष्टापदी भुवनानु प्रथताꣳ स्वाहेत्यथ स्विष्टकृता चरत्यथैतं गर्भं यथाहृतं प्रतिपर्याहृत्योत्तरार्धे[1] आहवनीयस्य प्रत्यञ्चमासाद्य भस्मनाभिसमूहति मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षतां पिपृतां नो भरीमभिरित्यध्वर्युरेतत्कोग्रमित्रं भवति' ब्राह्मणमुत्तरम्' ॥ १४ ॥ षष्ठः ॥

अजवशया यक्ष्यमाणो भवति' स यान्यहान्यनेषसंपन्नानि मन्यते तेष्वाग्नेयमष्टाकपालं निर्वपति' या[2] एता[2] ब्राह्मणाभिविहिता देवतास्तासामेनामेकस्यै देवताया आलभते' [3]तस्या [3]उपाकरणीययोरनुवर्तयत्या वायो भूव शुचिपा इति' नियोजने ऽनुवर्तयत्याकूत्यै त्वा कामाय त्वा[4] समृधे[4] त्वेति' पर्यग्नौ क्रियमाणे पशु[4] किक्किटाकारं जुहोति किक्किटा ते मनः प्रजापतये स्वाहा किक्किटा ते प्राणं वायवे स्वाहा किक्किटा ते चक्षुः सूर्याय स्वाहा किक्किटा ते श्रोत्रं द्यावापृथिवीभ्याꣳ स्वाहा किक्किटा ते वाचꣳ सरस्वत्यै स्वाहेत्यथैनामन्तरेण चात्वालोत्करावुदीचीं नीयमानामनुमन्त्रयते त्वं तुरीया वशिनी वशासि सकृद्यत्त्वा मनसा गर्भ आशयत्। वशा त्वं वशिनी गच्छ देवान्त्सत्याः सन्तु यजमानस्य कामा इत्युपासने ऽनुवर्तयत्यजासि रयिष्ठा पृथिव्याꣳ सीदोर्ध्वान्त-

---

१ प्रतिपरिहृत्य॰ M.

२ Thus M; यायो एत्य GU; याया एत्य Be; यायोप्रा B.

३ तस्योपा॰ M.

४ om. M.

रिक्षमुपतिष्ठस्व दिवि ते बृहद्भा इत्यथास्यै वपां जुहोति तन्तुं तन्वन्रजसो भानुमन्विहीत्यथास्यै हविर्जुहोति मनसो हविरसि प्रजापतेर्वर्ण इत्यथास्या अवदानानां[1] प्राश्नाति गात्राणां ते गात्रभाजो भूयास्मेत्यथ वै भवति तस्यै वा एतस्या एकमेवादेवयजनं यदालब्धायामभ्रो भवति यदालब्धायामभ्रः स्यादप्सु वा प्रवेशयेत्सर्वं वा प्राश्नीयादित्युत्सर्गमेतस्या अप्सु प्रवेशनमेतेनैवास्यै मन्त्रेणावदानानां प्राश्यायेतरदप्स्वनुप्रहरेदिति बौधायनो[2] ऽनुनिधायमेनामद्यादित्याश्मीगविरित्यथ[3] वै भवति सा वा एषा त्रयाणामेवावरुद्धा संवत्सरसदः सहस्रयाजिनो गृहमेधिनस्त एवैतया यजेरंस्तेषामेवैषाप्तेति तेषामु हैवैनयैका[4] यजते ॥ १५ ॥

अथातो जयानामेव होमो जयान्होष्यन्नुपकल्पयते बाधकं स्रुवं च स्रुचं च बाधकान्परिधीञ्छरमयं बर्हिर्वैभीदकमिध्ममित्यथ[5] हृत्वाग्निमुपसमाधाय शरमयं बर्हिः स्तीर्त्वा बाधकान्परिधीन्परिधाय वैभीदकमिध्ममभ्यज्य[5] स्वाहाकारेणाभ्याधाय बाधकेन स्रुवेणोपघातं जुहोति चित्तं च स्वाहा चित्तिश्च स्वाहेति त्रयोदश स्रुवाहुतीरपि वा बाधकेन स्रुवेण बाधक्यां

१ अवदानानि M but cp. infra l. 7.

२ Thus MU; बौधायनो Be BG.

३ अद्येद् i.s.o. अद्याद् M.

४ Thus MBG; तेषामुहैवैनयैको Be U.

५ Thus M; ०वैभीतक० the other MSS.

स्रुचि चतुर्गृहीतं गृहीत्वा सर्वान्मन्त्रान्समनुद्रुत्य जुहोति चित्तं च चित्तिश्चाकूतं चाकूतिश्च विज्ञातं च विज्ञानं च मनश्च शक्वरीश्च दर्शश्च पूर्णमासश्च बृहच्च रथंतरं च प्रजापतिर्जयानिन्द्राय वृष्णे प्रायच्छदुग्रः पृतनाज्येषु तस्मै विशः समनमन्त सर्वाः स उग्रः स हि हव्यो बभूव स्वाहेत्यथ वै भवति देवासुराः संयत्ता आसंस्त इन्द्रः प्रजापतिमुपाधावत्तस्मा एताञ्जयान्प्रायच्छत्तानजुहोत्ततो वै देवा असुरानजयन्यदजयंस्तज्जयानां जयत्वꣳ। स्पर्धमानेनैते होतव्या। जयत्येव तां पृतनामिति ब्राह्मणमथ वै भवति येन कर्मणेर्त्सेत्तत्र होतव्या इति। स यत्कर्मणेर्त्सेदिदं[1] मे समृध्येतेति तस्मिन्नभ्यातानाञ्जुहुयादित्यभ्यातानान्होष्यन्नुपकल्पयते पर्णमयꣳ स्रुवं च स्रुचं च पर्णमयान्परिधीन्कुशमयं बर्हिः पर्णमयमिध्ममित्यथ वृथाग्निमुपसमाधाय कुशमयं बर्हिः स्तीर्त्वा पर्णमयान्परिधीन्परिधाय पर्णमयमिध्ममभ्यज्य स्वाहाकारेणाभ्याधाय पर्णमयेन स्रुवेणोपघातं जुहोत्यग्निर्भूतानामधिपतिः स मावत्विति सप्तदश स्रुवाहुतीर्हुत्वा वाचयति पितरः पितामहा इत्यपि वा पर्णमयेन स्रुवेण पर्णमय्याꣳ स्रुचि चतुर्गृहीतं गृहीत्वा सर्वान्मन्त्रान्समनुद्रुत्य हुत्वान्ततो वाचयति पितरः पितामहा इत्यथ समस्तानामेव होमो। ऽभ्यातानानेवाग्रे जुहुयादथ जयानथ राष्ट्रभृतो। ब्राह्मणमुत्तरम्। ॥ १९ ॥ सप्तमः ॥

---

१ Thus M; यत्कर्मणेर्त्सं° the other MSS.

अथ वै भवति राष्ट्रकामाय होतव्या इति' राष्ट्रकामाय होष्यन्नुपकल्पयते शम्यापरिधीन्नित्यंय[1] तथाग्निमुपसमाधाय शम्यापरिधीन्परिधाय निशायाᳩ शम्यापरिधौ द्विः स्वाहाकारᳩ राष्ट्रभृतो जुहोत्यृताषाडृतधामेति' राष्ट्रं वै राष्ट्रभृतो' राष्ट्रेणैवास्मै राष्ट्रमवरुन्द्धे' राष्ट्रमेव भवतीति ब्राह्मणमंय वै भवत्यात्मने होतव्या इत्यात्मने होष्यन्तथाग्निमुपसमाधाय निशायाᳩ शम्यापरिधौ द्विः स्वाहाकारᳩ राष्ट्रभृतो जुहोति' राष्ट्रं वै राष्ट्रभृतो' राष्ट्रं प्रजा' राष्ट्रं पशवो' राष्ट्रं यच्छ्रेष्ठो भवति राष्ट्रेणैव राष्ट्रमवरुन्द्धे' वसिष्ठः समानानां भवतीति ब्राह्मणमंय वै भवति ग्रामकामाय होतव्या इति' ग्रामकामाय होष्यन्नधिदेवने तथाग्निमुपसमाधाय निशायाᳩ शम्यापरिधौ द्विः स्वाहाकारᳩ राष्ट्रभृतो जुहोति' राष्ट्रं वै राष्ट्रभृतो' राष्ट्रᳩ सजाता' राष्ट्रेणैवास्मै राष्ट्रᳩ सजातानवरुन्द्धे' ग्राम्येव भवतीति ब्राह्मणमंय वै भवत्यधिदेवने जुहोत्यंधिदेवन एवास्मै सजातानवरुन्द्धे' त एनमवरुद्धा उपतिष्ठन्त इति ब्राह्मणमंय वै भवति रथमुख ओजस्कामस्य होतव्या इत्योजस्कामस्य[2] होष्यन्नुपर्यग्नौ रथमुखं प्रवृह्य[3] निशायाᳩ शम्यापरिधौ द्विः स्वाहाकारᳩ राष्ट्रभृतो जुहोत्योजो वै राष्ट्रभृत' ओजो रथ' ओजसैवास्मा ओजो ऽवरुन्द्ध' ओजस्व्येव भवतीति ब्राह्मणमंय

---

[1] Thus MGB ; शम्याःपरि॰ U Be.

[2] ॰कामाय MSS. exc. M.

[3] परिवृह्य MSS. exc. M.

वै भवति यो राष्ट्रादपभूतः स्यात्तस्मै होतव्या ' यावन्तो ऽस्य रथाः स्युस्तान्ब्रूयाद्युङ्ध्वमिति ' राष्ट्रमेवास्मै युनक्तीति ब्राह्मणमथ वै भवत्याकूतयो वा एतस्याक्लृप्ता यस्य राष्ट्रं न कल्पते ' स्वरथस्य दक्षिणं चक्रं प्रवृह्य नाडीमभिजुहुयादिति ' म[1] स्वरथस्यैव दक्षिणं चक्रं प्रवृह्योपर्यग्नौ रथनाडीं प्रमृज्य[2] निग्रायाꣳ ग्न्यापरिधौ द्विः स्वाहाकारꣳ राष्ट्रभृतो जुहोत्याकूतीरेवास्य कल्पयति ' ता अस्य कल्पमाना राष्ट्रमनुकल्पत इति ब्राह्मणम् ' ॥ १७ ॥

अथ वै भवति संग्रामे संयत्ते होतव्या इति ' संग्रामे संयत्ते होष्यन्नुपकल्पयते मान्थुकमिध्ममित्यथ प्रत्यमित्रमग्निमुपसमाधाय मान्थुकमिध्ममभ्यज्य स्वाहाकारेणाभ्याधाय निग्रायाꣳ ग्न्यापरिधौ द्विः स्वाहाकारꣳ राष्ट्रभृतो जुहोत्यङ्गारा एव प्रतिवेष्टमाना अमित्राणामस्य सेनां प्रतिवेष्टयन्तीति ब्राह्मणमथ वै भवति य उन्माद्येत्तस्मै होतव्या इत्युन्मत्ताय होष्यन्नुपकल्पयते नैयग्रोधमौदुम्बरमाश्वत्थं शाचमिध्ममित्यथ वृथाग्निमुपसमाधायैतमिध्ममभ्यज्य स्वाहाकारेणाभ्याधाय निग्रायाꣳ ग्न्यापरिधौ द्विः स्वाहाकारꣳ राष्ट्रभृतो [3]जुहोत्येते वै गन्धर्वाप्सरसां गृहाः ' स्व एवैनानायतने शमयतीति ब्राह्मणमथ वै भवत्यभिचरता प्रतिलोमꣳ होतव्या इत्यभिचरन्होष्यन्स्वकृत[4]

---

१ only given by M.

२ प्रमृज्य M Be ; प्रवृह्य the other MSS.

३ ... ३ (p. 184, 2) left out in M.

४ probably read : इति सोऽभिचरन्हो° ।

इरिणे प्रदरे वास्रुतो ऽर्वाञ्चो तृणाग्निमुपसमाधाय निशायाꣳ सभ्यापरिधौ द्विः स्वाहाकारꣳ[1] राष्ट्रभृतो[2] जुहोति ' यद्वाचः क्रूरं तेन वषट्करोति ' वाच एवैनं क्रूरेण प्रवृश्चति ' ताजगार्तिमार्च्छतीति ब्राह्मणमथ वै भवति यस्य कामयेतान्नाद्यमाददीयेति तस्य सभायामुत्तानो निपद्य भुवनस्य पत इति तृणानि संगृह्णीयादिति ' स यस्य कामयेतान्नाद्यमाददीयेति तस्य सभायामुत्तानो निपद्य भुवनस्य पत इति तृणानि संगृह्णात्यथैनान्यादाय हरतीदमहममुष्यामुष्यायणस्यान्नाद्यꣳ हरामीत्यन्नाद्यमेवास्य हरति ' षड्भिर्हरतीति ब्राह्मणमथैनानि स्वस्यां वा सभायाꣳ स्वेषु वामात्येष्वपिसृजति ' प्रजापतिनैवास्यान्नाद्यमादायर्तवो ऽस्मा अनुप्रयच्छन्तीति ब्राह्मणमथ वै भवति यो ज्येष्ठबन्धुरपभूतः स्यात्तꣳ स्थले ऽवसाय्य ब्रह्मौदनं चतुःशरावं पक्त्वा तस्मै होतव्या इति ' स यो ज्येष्ठबन्धुरपभूतः स्यात्तꣳ स्थले ऽवसाय्य ब्रह्मौदनं चतुःशरावं पक्त्वा निशायाꣳ सभ्यापरिधौ द्विः स्वाहाकारꣳ राष्ट्रभृतो जुहोति ' वर्ष्म वै राष्ट्रभृतो ' वर्ष्म स्थलं ' वर्ष्मणैवैनं वर्ष्म समानानां गमयतीति ब्राह्मणमथ वै भवति चतुःशरावो भवति ' दिक्ष्वेव प्रतितिष्ठति ' क्षीरे भवति ' रुचमेवास्मिन्दधात्युद्धरति शृतत्वाय ' सर्पिष्वान्भवति मेध्यत्वाय ' चत्वार आर्षेयाः प्राश्नन्ति ' दिशामेव ज्योतिषि जुहोतीति ब्राह्मणम् ' ॥ १८ ॥

---

१ ०कारेण the MSS.

२ (p. 183.17) २...२ left out in M.

अथ वै भवति देविका निर्वपेत्प्रजाकाम इति' प्रथमं धातारं प्रजाकामस्य करोति' प्रथमं पशुकामस्य' मध्यतो ग्रामकामस्य' मध्यतो ज्योगामयाविनः' प्रथमं यक्ष्यमाणस्योत्तममीजानस्य' प्रथमं मेधाकामस्य' मध्यतो रुक्कामस्य' ता वा एताः वीरे हृता भवन्ति' ता यत्सह सर्वा निर्वपेदीश्वरा एनं प्रदहो' द्वे प्रथमे निरुप्य धातुस्तृतीयं निर्वपेत्तथो एवोत्तरे निर्वपेत्तथैनं न प्रदहन्त्यथो यस्मै कामाय निरुप्यते तमेवाभिसंप्राप्नोतीति ब्राह्मणमथ वै भवति यत्सायंप्रातरग्निहोत्रं जुहोत्याहुतीष्टका एव ता उपधत्ते यजमानो' ऽहोरात्राणि वा एतस्येष्टका य आहिताग्निर्यत्सायंप्रातर्जुहोत्यहोरात्राण्येवाप्तेष्टकाः कृत्वोपधत्ते' दश समानत्र जुहोति' दशाक्षरा विराड्विराजमेवाप्त्वेष्टकां कृत्वोपधत्ते' ऽथो विराज्येव यज्ञमाप्नोति' चित्यश्चित्यो ऽस्य भवति' तस्माद्यत्र दशोषित्वा प्रयाति तद्यज्ञवास्त्वंवास्त्वेव तद्यत्ततो ऽर्वाचीनमिति' स यत्र दशोषित्वा प्रयास्यन्भवति तदग्निष्वे ऽनसि समवसमयन्ते[1] यदस्य[1] समवसमयितव्यं[1] भवत्यवास्त्वेव तद्यत्ततो ऽर्वाचीनꣳ' रुद्रः खलु वै वास्तोष्पतिर्यद्हुत्वा वास्तोष्पतीयं प्रयायाद्रुद्र एनं भूत्वाग्निरनूत्थाय हन्याद्वास्तोष्पतीयं जुहोति' भागधेयेनैवैनꣳ शमयति' नार्तिमार्छति यजमान इति ब्राह्मणमथ वै भवति यद्युक्ते जुहुयाद्यथा प्रयाते वास्तावाहुतिं जुहोति तादृगेव तद्यद्युक्ते

---

१ Thus M only; all the other MSS. are here wholly corrupted.

जुहुयाद्यया चेम आहुतिं जुहोति तादृगेव तद्धुतमस्य वास्तोष्पतीयꣳ स्याद्दक्षिणो युक्तो भवति सव्यो ऽयुक्तो' ऽथ वास्तोष्पतीयं जुहोतीति' स यत्र दक्षिणो युक्तो भवति सव्यो ऽयुक्तस्तत्प्रत्याच्छेद्यां[1] पर्णमय्याꣳ स्रुचि चतुर्गृहीतं गृहीत्वाहवनीये वास्तोष्पतीयं जुहोति' वास्तोष्पते प्रतिजानीह्यस्मानित्यनुद्रुत्य वास्तोष्पते शग्मया सꣳसदा त इति जुहोत्यथैताꣳ स्रुचमुपनिधाय सव्यं युक्त्वा प्रयात्युभयमेवाकरपरिवर्गमेवैनꣳ शमयतीति ब्राह्मणमथ वै भवति यदेकया जुहुयाद्दर्विहोमं कुर्यात्पुरोनुवाक्यामनूच्य याज्यया जुहोति सदेवत्वायेति ब्राह्मणमथ वै भवति यद्युत आदध्याद्रुद्रं गृहानन्वारोहयेददवहाणान्यसंप्रचाप्य प्रयायाद्यया यज्ञवेशसं वाद्भुतं वा तादृगेव तदयं ते योनिर्ऋत्विय इत्यरण्योः समारोहयत्येष वा अग्नेर्योनिः' स एवैनं योनौ समारोहयत्यथो खल्वाहुर्यदरण्योः समारूढो नश्येदुदस्याग्निः सीदेत्पुनराधेयः स्यादिति' या ते अग्ने यज्ञिया तनूस्तयेह्यारोहेत्यात्मन्समारोहयत इति' स आत्मन्समारोहयते या ते अग्ने यज्ञिया तनूस्तयेह्यारोहात्मात्मानमच्छा वसूनि कृण्वन्नस्मे नर्या पुरूणि। यज्ञो भूत्वा यज्ञमासीद स्वां योनिं जातवेदो भुव आजायमानः सक्षय एहीत्यथैनमुपावरोहयत उपावरोह जातवेदः पुनस्त्वं देवेभ्यो हव्यं वह नः प्रजानन्। आयुः प्रजाꣳ रयिमस्मासु धेह्यजस्रो

---

१ Thus MGUB Bhav.; प्रत्याहेयां Be. This word occurs also in the Baudh. pitṛmedhasūtra (p. 13, 1).

दीदिहि नो दुरोण इति। यजमानो वा अग्नेर्योनिः। स्वायामेवैनं योन्याꣳ समारोहयत इति ब्राह्मणम्। ॥ १९ ॥ अष्टमः ॥

उक्तो ऽन्वारम्भो। ऽथ वै भवत्यृषयो वा इन्द्रं प्रत्यक्षं नापश्यन्तं वसिष्ठः प्रत्यक्षमपश्यत्सो ऽब्रवीद्ब्राह्मणं ते वक्ष्यामि यथा त्वत्पुरोहिताः प्रजाः प्रजनिष्यन्ते ऽथ मेतरेभ्य ऋषिभ्यो मा प्रवोच इति। तस्मा एतान्स्तोमभागानब्रवीत्ततो वसिष्ठपुरोहिताः प्रजाः प्राजायन्तेति। तस्मादाहुर्वासिष्ठं ब्रह्मत्वमिति। स यत्राह ब्रह्मन्स्तोष्यामः प्रशास्तरिति तद्ब्रह्मा[1] प्रसौति देव सवितरित्येतां प्रतिपदं कृत्वा रश्मिरसि क्षयाय त्वा क्षयं जिन्वेत्येतस्यानुवाकस्यैकैकमुपादाय प्रसौति। स एवमेव प्रसुवन्दशभिरग्निष्टोमं प्रसौति त्रयोदशभिरत्यग्निष्टोमं पञ्चदशभिरुक्थ्यꣳ षोडशभिः षोडशिनꣳ सप्तदशभिर्वाजपेयमेकान्नत्रिꣳशतातिरात्रꣳ सर्वैरप्तोर्यामꣳ। स यत्र राथंतराय सन्धये प्रसर्पन्ति तदाह वसुको ऽसि वेषश्रिरसि वस्यष्टिरसीति। स एवमेव प्रसौत्याप्तोर्यामादथातो[2] ऽतिक्रमाणामेवाभिचरन्भ्रातृव्यवान्स्पर्धमानो ऽभिचरणीयमिष्ट्वान्यायात्य संवत्सरमेतैः क्रमैः क्रमेताग्निना देवेन पृतना जयामि गायत्रेण छन्दसा त्रिवृता स्तोमेन रथंतरेण साम्ना वषट्कारेण वज्रेण पूर्वजान्भ्रातृव्यानधरान्पादयाम्यवैनान्बाधे प्रत्येनान्नुदे ऽस्मिन्क्षये ऽस्मिन्भूमिलोके यो ऽस्मान्द्वेष्टि यं च वयं द्विष्मो विष्णोः क्रमेणात्येनान्क्रामामीन्द्रेण देवेन पृतना जयामि

१ तद् is left out in all MSS. exc. M.

२ प्रसौत्यप्तोर्या॰ M.

त्रैष्टुभेन छन्दसा [1]पञ्चदशेन स्तोमेन बृहता साम्ना वषट्कारेण वज्रेण सहजान्भ्रातृव्यानधरान्पादयाम्यवैनान्बाधे प्रत्येनान्नुदे ऽस्मिन्क्षये ऽस्मिन्भूमिलोके यो ऽस्मान्द्वेष्टि यं च वयं द्विष्मो विष्णोः क्रमेणात्येनान्क्रामामि[1] विश्वेभिर्देवेभिः पृतना जयामि जागतेन [1]छन्दसा सप्तदशेन स्तोमेन वामदेव्येन साम्ना वषट्कारेण वज्रेणापरजान्भ्रातृव्यानधरान्पादयाम्यवैनान्बाधे प्रत्येनान्नुदे ऽस्मिन्क्षये ऽस्मिन्भूमिलोके यो ऽस्मान्द्वेष्टि यं च वयं द्विष्मो विष्णोः क्रमेणात्येना[1]न्क्रामामीत्यपि वाभिचरणीयास्विष्टिष्वनुवर्तेतापि वापोद्धृत्येतरान्क्रमान्संवत्सरमेतैः क्रमैः क्रमेतांꣳ शुक्रामन्थिनोरधिद्रवणमथातो ऽनीमोचाणामेव[2] । वैश्वकर्मणानि हुत्वा गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वा गार्हपत्ये जुहोत्यन्वारब्धे यजमाने ॥ २० ॥

ये देवा यज्ञहनो पृथिव्यामध्यासते । अग्निर्मा तेभ्यो रक्षतु गच्छेम सुकृतो वयꣳ स्वाहेत्यपरं चतुर्गृहीतं गृहीत्वा गार्हपत्य एव जुहोति ये देवा यज्ञमुषः पृथिव्यामध्यासते । अग्निर्मा तेभ्यो रक्षतु गच्छेम सुकृतो वयꣳ स्वाहेत्यथाग्नीध्रमभिप्रेत्यागन्म मित्रावरुणा वरेण्या रात्रीणां भागो युवयोर्यो अस्ति । नाकं गृभ्णानाः सुकृतस्य लोके तृतीये पृष्ठे अधि रोचने दिव इत्यथाग्नीध्रं हुत्वा स्रुचि चतुर्गृहीतं गृहीत्वाग्नीध्रे जुहोत्यन्वारब्धे

१, १ The two passages marked at the beginning and the close by १ and १ are left out by all the MSS. exc. M.

२ ॰नीमो॰ MBG (sec. m.); ॰निमो॰ Be UG (pr. m.).

यजमाने ये देवा यज्ञहनो ऽन्तरिक्षे ऽध्यासते। वायुर्मा तेभ्यो रक्षतु गच्छेम सुकृतो वयꣳ स्वाहेत्यथापरं चतुर्गृहीतं गृहीत्वाग्नीध्र एव जुहोति ये देवा यज्ञमुषो ऽन्तरिक्षे ऽध्यासते। वायुर्मा तेभ्यो रक्षतु गच्छेम सुकृतो वयꣳ स्वाहेत्यथाहवनीयमभिप्रैति यास्ते राचीः सवितर्देवयानीरन्तरा द्यावापृथिवी वियन्ति। गृहैश्च सर्वैः प्रजया न्वग्रे सुवो रुहाणास्तरता रजाꣳसीत्यथाहवनीयं हुत्वा स्रुचि चतुर्गृहीतं गृहीत्वाहवनीये जुहोत्यन्वारब्धे यजमाने ये देवा यज्ञहनो दिव्यध्यासते। सूर्यो मा तेभ्यो रक्षतु गच्छेम सुकृतो वयꣳ स्वाहेत्यथापरं चतुर्गृहीतं गृहीत्वाहवनीय एव जुहोति ये देवा यज्ञमुषो दिव्यध्यासते। सूर्यो मा तेभ्यो रक्षतु गच्छेम सुकृतो वयꣳ स्वाहेत्यथाहवनीयमुपतिष्ठते येनेन्द्राय समभरः पयाꣳस्युत्तमेन हविषा जातवेदः। तेनाग्ने त्वमुत वर्धयेमꣳ सजातानꣳ श्रैष्ठ्य आधेह्येनमिति' यज्ञहनो वै देवा यज्ञमुषः सन्ति' त एषु लोकेष्वासत आददाना विमथ्नाना यो ददाति यो यजते तस्य' ये देवा यज्ञहनः पृथिव्यामध्यासते ये अन्तरिक्षे ये दिवीत्याहेमानेव लोकाꣳस्तीर्त्वा सगृहः सपशुः सुवर्गं लोकमेतीति ब्राह्मणमपि वा तिस्र एव गार्हपत्ये जुहोति तिस्र आग्नीध्रे तिस्र आहवनीये' ऽपि वा गार्हपत्याज्जपन्नुद्द्रवेदाहवनीयादुत्क्रोदवसानीयेष्टिरंहैतां[1] तृतीयां प्रकृताहुतिं जुहोति सूर्यो मा देवो देवेभ्यः पातु वायुरन्तरिक्षाद्यजमानो ऽग्निर्मा पातु चक्षुषः

१ ०जपन्ननुद्रवेद० M Be; ०जपन्नुद्रवेद० BUG.

स्वाहेत्यथाभिचरन्बभ्रुवे बभ्रुवत्सायै कार्ष्मर्यमयेन पात्रेण पयो जुहोति यच्च शूष सवितर्विश्वचर्षण एतेभिः सोम नामभिर्विधेम ते तेभिः सोम नामभिर्विधेम ते स्वाहेति । साचादस्य हृदयं भित्त्वान्त्राणि परिकामयाते[1] । स्तृणुते ह्येव[2] तं[2] भ्रातृव्यमथ येनास्यर्त्विजाꣳ स्पर्धा स्यात्तमाह मास्य चमसमनुप्रसृप्तादभिमर्शनं[3] करिष्यामीति । तस्यैतेनैव मन्त्रेण चमसं जुहुयात्तमूर्ध्वो ऽवाङ्गा[4] राजातिपवत । उक्तं पात्नीवतस्य [5]श्रयणसुक्तमादित्यग्रहस्योद्धननसुक्ता[6] प्रायणीयस्य स्रुवाहुतिरुक्तोदयनीयस्योक्तं यूपस्योपस्थानम् । ॥ २१ ॥ नवमः ॥

उक्तानि पत्नीयजूꣳष्येवमेवैताः स्रुचो यथैतद्ब्राह्मणमुक्तो दधिग्रहो । ऽथ वै भवत्याज्यग्रहं गृह्णीयात्तेजस्कामस्येति । बर्हिषी अन्तर्धायाज्यग्रहं गृह्णाति । सोमग्रहं गृह्णीयाद्ब्रह्मवर्चसकामस्येत्यंꣳशूनुपसंसृज्य सोमग्रहं गृह्णात्यथैतं महाव्रतीये ऽग्नि प्राजापत्यमतिग्राह्यं गृह्णाति त्वे क्रतुमपि वृञ्जन्ति विश्व इत्यनु-

१ Thus M; ॰कामयातैव Be; ॰कामयातोव B; ॰कामयान्त्येव U; ॰कामयातैव G (pr. m.), ॰कामयातैव G (sec. m.). परिकामयातेर्निष्क्रामति (var. निष्कामयति) Bhav.

२ Thus M Bhav.; ह्येतं The other MSS.

३ Thus M; ॰नुप्रसृप्ताद्॰ BUG; ॰नुप्रसृप्याद्॰ Be.

४ Thus M; i.s.o. ऽवाङ्वा राजाति॰ Be U: वाराहाद्याति॰; G: वाराहाद्याति; B: वारोहाद्याति॰ ।

५ Thus (श्रयथ॰) M Be (cp. viii. 14 श्रीयाति); अपथ॰ BU; अमथ॰ G.

६ Corrected (उद्धनन॰) according to viii. 9 s.f. (उद्धन्ति); उदाहनन॰ MUGB; Be wholly corr.

ध्रुत्योपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णामीति ' परिमृज्य सादयत्येष ते योनिः प्रजापतये त्वेत्यथातः प्राणभृतानामेव ग्रहणꣳ ' संस्थꣳ राजानं पुञ्जीकृत्वा[1] नवाꣳशूꣳस्प्राच आयातयत्ययं पुरो भुवस्तस्य प्राणो भौवायनो वसन्तः प्राणायनो गायत्री वासन्ती गायत्र्यै गायत्रं गायत्रादुपाꣳशुरुपाꣳशोस्त्रिवृत्त्रिवृतो रथंतरꣳ रथंतराद्वसिष्ठ ऋषिः प्रजापतिगृहीतया त्वया प्राणं गृह्णामि प्रजाभ्य इत्ययं दक्षिणा विश्वकर्मेति नव दक्षिणायातयत्ययं[2] पश्चाद्विश्वव्यचा इति नव प्रतीच आयातयतीदमुत्तरात्स्वरिति नवोदीच आयातयतीयमुपरि मतिरिति नवोपरिष्टात्प्रदक्षिणं पर्यायातयति ' तानपानभृद्भिः प्रत्यूहति प्राची दिशां वसन्त ऋतूनामग्निर्देवता ब्रह्म द्रविणं त्रिवृत्स्तोमः स उ पञ्चदशवर्तनिस्त्र्यविर्वयः कृतमयानां पुरोवातो वातः सानग ऋषिरिति ' वाचयति पितरः पितामहाः परेऽवर इति ये पुरस्ताद्भवन्ति ' दक्षिणा दिशामिति ये दक्षिणतो भवन्ति ' प्रतीची दिशामिति ये पश्चाद्भवन्त्युदीची दिशामिति य उत्तरतो भवन्त्यूर्ध्वा दिशामिति य उपरिष्टात्प्रदक्षिणं पर्यायातिता[3] भवन्ति ' ते वा एते प्रायणीयोदयनीययोरेव

---

१ Thus (पुञ्जी॰) M ; पुंजं BG ; पुजं Be U.

२ Thus M ; दक्षिणायायातयत्य॰ Be GU ; B defect.

३ Conjecturally ; पर्यांशातिता BG ; पर्यांशातिता M ; पर्यांनिशातिता U ; पर्येनिशातिता Be.

नियुक्ता दशमे ऽहꣳस्तदु[1] रात्रिसत्त्रेष्वप्यग्निष्टोम[1] आमयाविन उपहूतो वा गृह्णीयादगदो हैव भवति ' ॥ २२ ॥ दशमः ॥

अथ वै भवत्युभये वा एते प्रजापतेरध्यसृज्यन्तेति ब्राह्मणमेव ' युवꣳ सुराममश्विनेति सौत्रामण्यामेव[2] भवत्यथ वै भवतीयं वा अग्निहोत्रीयं वा एतस्य निषीदति यस्याग्निहोत्री निषीदति ' तामुत्थापयेदिति ' स यस्याग्निहोत्री निषीदति तामुत्थापयत्युदस्थाद्देव्यदितिर्विश्वरूप्यायुर्यज्ञपतावधात् । इन्द्राय कृण्वती भागं मित्राय वरुणाय चेत्यथ वै भवत्यवर्तिं वा एषैतस्य पाप्मानं प्रतिख्याय निषीदति यस्याग्निहोत्र्युपसृष्टा निषीदति ' तां दुग्ध्वा ब्राह्मणाय दद्याद्यस्यान्नं नाद्यादिति ' स यस्याग्निहोत्र्युपसृष्टा निषीदति तामेतदेव दुग्ध्वा ब्राह्मणाय ददाति ' न चास्यात ऊर्ध्वमन्नमत्त्यथ वै भवति पृथिवीं वा एतस्य पयः प्रविशति यस्याग्निहोत्रं दुह्यमानꣳ स्कन्दति ' तदभिमन्त्रयेतेति ' स यस्याग्निहोत्रं दुह्यमानꣳ स्कन्दति तदभिमन्त्रयते ' यदद्य दुग्धं पृथिवीमसृक्त यदोषधीरत्यसरद्यदापः । पयो गृहेषु पयो अघ्नियासु पयो वत्सेषु पयो अस्तु तन्मयीत्याह ' पय एवात्मन्गृहेषु पशुषु धत्ते ' ऽप उपसृजत्यद्भिरेवैनदाप्नोतीति ब्राह्मणमथ वै भवति यो वै यज्ञस्यार्तेनानार्तꣳ संसृजत्युभे वै ते तर्ह्यार्च्छत ' आर्च्छति खलु वा

---

१ Thus M; B and G (sec. m.) om. अपि; तदुरात्रिसत्त्रेष्वष्टोम U; तदतिरात्रे सत्रे ष्टोम Be; तदुरात्रिसत्त्रेष्टष्टोम G (pr. m.).

२ एष i.s.o. एव M.

एतदग्निहोत्रं यद्दुह्यमानꣳ स्कन्दति यदभिदुह्यादिति[1] । स यस्याग्निहोत्रं दुह्यमानꣳ स्कन्दति नैनदभिदोग्धि । तदेव यादृक्कीदृक् च होतव्यमथान्यां दुग्ध्वा पुनर्होतव्यमनार्तिनैवार्तिं यज्ञस्य निष्करोतीति ब्राह्मणमथ वै भवति यद्युद्धृतस्य स्कन्देद्यत्ततो हुत्वा पुनरेयाद्यज्ञं विच्छिन्द्याद्यच्च स्कन्देत्तन्निषद्य पुनर्गृह्णीयादिति । स[2] यत्रैव स्कन्दति तदेव स्थालीं निधायातिशिष्टमानीय पुनरभ्युन्नीय तदेव यादृक्कीदृक् च होतव्यमथान्यां दुग्ध्वा पुनर्होतव्यमनार्तिनैवार्तिं यज्ञस्य निष्करोतीति ब्राह्मणमथ वै भवति वि वा एतस्य यज्ञश्छिद्यते यस्याग्निहोत्रे ऽधिश्रिते श्वान्तरा धावति । रुद्रः खलु वा एष यदग्निर्यद्गामन्वत्यावर्तयेद्रुद्राय पशूनपिदध्यादपशुर्यजमानः स्याद्यदपो ऽन्वतिषिञ्चेदनाद्यमग्नेरापो ऽनाद्यमाभ्यामपिदध्याद्गार्हपत्याद्भस्मादायेदं विष्णुर्विचक्रम इति वैष्णव्यर्चाहवनीयाद्ध्वꣳसयन्नुद्द्रवेदिति । स वैष्णव्यर्चाहवनीयाद्ध्वꣳसयन्नुद्द्रवति । यज्ञो वै विष्णुर्यज्ञेनैव यज्ञꣳ संतनोतीति ब्राह्मणमथ भस्मना शुनः पदमपिवपति शान्त्या इति ब्राह्मणम् । ॥ २३ ॥

अथ वै भवति नि वा एतस्माहवनीयो गार्हपत्यं कामयते नि गार्हपत्य आहवनीयं यस्याग्निमनुद्धृतꣳ सूर्यो ऽभिनिम्रोचति । दर्भेण हिरण्यं प्रबध्य पुरस्ताद्धरेदथाग्निमथाग्निहोत्रमिति । स यस्याग्निमनुद्धृतꣳ सूर्यो ऽभिनिम्रोचति दर्भेण

१ Thus M; तदभिदु॰ B Be G; न तदभिदु॰ U.

२ om. Be U.

हिरण्यं प्रबध्य परिकर्मी पूर्वः प्रतिपद्यते ऽन्वग्ब्राह्मण आर्षेय दक्षिणेनान्वगात्मनाग्निहोत्रेणैत्यैतद्धिरण्यमाहवनीयस्यायतने माद्खिलापोद्धृत्य हिरण्यं प्रदक्षिणमावृत्येषं प्रतिष्ठापयत्यथ वै भवत्यग्निहोत्रमुपसाद्या तमितोरासीत' श्रतमेव हतमनुम्रियते' ऽन्तं वा एष आत्मनो गच्छति यस्याम्यत्यन्तमेष यज्ञस्य गच्छति यस्याग्निमनुद्धृतꣳ सूर्यो ऽभिनिम्रोचति' पुनः समन्य जुहोत्यन्तेनैवान्तं यज्ञस्य निष्करोतीति ब्राह्मणमथ वै भवति वरुणो वा एतस्य यज्ञं गृह्णाति यस्याग्निमनुद्धृतꣳ सूर्यो ऽभिनिम्रोचति' वारुणं चरुं निर्वपेत्तेनैव यज्ञं निष्क्रीणीत इति ब्राह्मणमथ वै भवति नि वा एतस्याहवनीयो गार्हपत्यं कामयते नि गार्हपत्य आहवनीयं यस्याग्निमनुद्धृतꣳ सूर्यो ऽभ्युदेति' चतुर्गृहीतमाज्यं पुरस्ताद्धरेद्याग्निमथाग्निहोत्रमिति' स यस्याग्निमनुद्धृतꣳ सूर्यो ऽभ्युदेति चतुर्गृहीतेनाज्येन परिकर्मी पूर्वः प्रतिपद्यते ऽन्वग्ब्राह्मण आर्षेय दक्षिणेनान्वगात्मनाग्निहोत्रेणैत्यैतदाज्यमाहवनीयस्यायतने माद्खिलापोद्धृत्याज्यमथैषं प्रतिष्ठापयत्यथ वै भवति पराची वा एतस्मै व्युच्छन्ती व्युच्छति यस्याग्निमनुद्धृतꣳ सूर्यो ऽभ्युदेत्युषाः केतुना जुषतां यज्ञं देवेभिरन्वितम्। देवेभ्यो मधुमत्तमꣳ स्वाहेति प्रत्यञ्चिषद्याज्येन जुहुयात्प्रतीचीमेवास्मै विवासयतीति ब्राह्मणमथ वै भवत्यग्निहोत्रमुपसाद्या तमितोरासीत' श्रतमेव हतमनुम्रियते' ऽन्तं वा एष आत्मनो गच्छति यस्याम्यत्यन्तमेष यज्ञस्य गच्छति यस्याग्निमनुद्धृतꣳ सूर्यो ऽभ्युदेति' पुनः समन्य जुहोत्यन्तेनैवान्तं यज्ञस्य निष्करोतीति

ब्राह्मणमथ वै भवति मित्रो वा एतस्य यज्ञं गृह्णाति यस्याग्निमनुद्धृतꣳ सूर्यो ऽभ्युदेति । मैत्रं चरुं निर्वपेत्तेनैव यज्ञं निष्क्रीणीत इति ब्राह्मणमथ वै भवति यस्याहवनीये ऽनुद्वाते गार्हपत्य उद्वायेद्यदाहवनीयमनुद्वाप्य गार्हपत्यं मन्थेद्विच्छिन्द्याद्भ्रातृव्यमस्मै जनयेद्यद्वै यज्ञस्य वास्तव्यं क्रियते तदनु रुद्रो ऽवचरति । यत्पूर्वमन्ववस्येद्वास्तव्यमग्निमुपासीत । रुद्रो ऽस्य पशून्घातुकः स्यादाहवनीयमुद्वाप्य गार्हपत्यं मन्थेदिति । स आहवनीयमुद्वाप्य गार्हपत्यं मन्थतीतः प्रथमं जज्ञे अग्निः स्वाद्योनेरधि जातवेदाः । स गायत्रिया त्रिष्टुभा जगत्या देवेभ्यो हव्यं वहतु प्रजानन्निति । छन्दोभिरेवैनꣳ स्वाद्योनेः प्रजनयतीति ब्राह्मणमथ वै भवति गार्हपत्यं मन्थति । गार्हपत्यं वा अन्वाहिताग्नेः पशव उपतिष्ठन्ते । स यदुद्वायति तदनु पशवो ऽपक्रामन्तीत्यथैनमुपतिष्ठत इषे रय्यै रमस्व सहसे द्युम्नायोर्जे पत्यायेत्यथैनमुपसमिन्द्धे सारस्वतौ त्वोत्सौ समिन्धातꣳ सम्राडसि विराडसीति । ॥ २४ ॥

अथ वै भवति वज्रो वै चक्रं । वज्रो वा एतस्य यज्ञं विच्छिनत्ति यस्यानो वा रथो वान्तराग्नी यात्याहवनीयमुद्वाप्य गार्हपत्यादुद्धरेदिति । स आहवनीयमुद्वाप्य गार्हपत्यादग्निमुद्धरति यदग्ने पूर्वं प्रभृतं पदꣳ हि ते सूर्यस्य रश्मीनन्वाततान । तत्र रयिष्ठामनुसंभरैतꣳ सं नः सृज सुमत्या वाजवत्येति । पूर्वेणैवास्य यज्ञेन यज्ञमनुसंतनोतीति ब्राह्मणमथैनमुपतिष्ठते त्वमग्ने सप्रथा असि जुष्टो होता वरेण्यः । त्वया यज्ञं वितन्वत इत्यग्निः सर्वा देवता देवताभिरेव यज्ञꣳ संतनोतीति ब्राह्मणमथाग्नये

पथिकृते पुरोडाशमष्टाकपालं निर्वपत्यन्वाहार्यमासाद्यानड्वाहं ददाति । सा प्रसिद्धेष्टिः संतिष्ठते । ऽथ वै भवति यस्य प्रातःसवने सोमो ऽतिरिच्यते माध्यंदिनꣳ सवनं कामयमानो ऽभ्यतिरिच्यत इति । स[1] प्रातःसवने सोमे ऽतिरिक्ते प्राङायन्नाह होतुश्चमसमनून्नयध्वमुन्नेतः सर्वश एव राजानमुन्नय मातिरीरिच इति । होतृचमसमेव प्रथममुन्नयन्ति यथोपपादमितरान्त्सर्वश एव राजानꣳ समुन्नीयोत्तरवेद्याꣳ सꣳसादयन्त्यथाप उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ्[2] द्रुत्वा[2] स्तोत्रमुपाकरोति । स्तुवते । तदेतद्गायत्रꣳ साम पञ्चदशं गौर्धयति मरुतामिति धयद्वतीषु कुर्वन्ति । होत्र एषोत्तमेति प्राहुः । समानमत ऊर्ध्वमथ वै भवति यस्य माध्यंदिने सवने सोमो ऽतिरिच्यत आदित्यं तृतीयसवनं कामयमानो ऽभ्यतिरिच्यत इति । स[1] माध्यंदिने सवने सोमे ऽतिरिक्ते प्राङायन्नाह होतुश्चमसमनून्नयध्वमुन्नेतः सर्वश एव राजानमुन्नय मातिरीरिच इति । होतृचमसमेव प्रथममुन्नयन्ति यथोपपादमितरान्त्सर्वश एव राजानꣳ समुन्नीयोत्तरवेद्याꣳ सꣳसादयन्त्यथाप उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ् द्रुत्वा स्तोत्रमुपाकरोति । स्तुवते । तदेतद्गौरिवीतꣳ साम सप्तदशं वण्महाꣳ असि सूर्येत्येतासु[3] कुर्वन्ति । होत्र एषोत्तमेति प्राहुः । समानमत ऊर्ध्व-

---

१ om. M.

२ प्रत्यङ्द्रुत्य Be.

३ Thus M; एतावत् i.s.o. °एतासु all the other MSS.

मथ वै भवति यस्य तृतीयसवने सोमो ऽतिरिच्येतोक्थ्यं कुर्वीत । यद्युक्थ्ये ऽतिरिच्येतातिरात्रं कुर्वीत । यद्यतिरात्रे ऽतिरिच्यते तं वै दुष्प्रज्ञानमित्यतिरात्रे ऽतिरिक्ते प्राञ्चायन्नाह होतुश्चमसमनून्नयध्वमुन्नेतः सर्वेश एव राजानमुन्नय मातिरीरिच इति । होतृचमसमेव प्रथममुन्नयन्ति यथोपपादमितरान्त्सर्वेश एव राजानं समुन्नीयोत्तरवेद्यां संसादयन्त्यथाप उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ् द्रुत्वा स्तोत्रमुपाकरोति । स्तुवते । तदेतद्बृहत्सामैकविंशं वैष्णवीषु शिपिविष्टवतीषु कुर्वन्ति । होत्र एषोत्तमेति प्राहुः । समानमत ऊर्ध्वम् । ॥ २५ ॥

¹इति नु छन्दोगबह्वृचेषु कामयमानेषु । ते चेन्न कामयेरन्प्रातःसवने ऽतिरिक्ते यां स्थालीमलं राज्ञे ऽतिग्रहाय मन्यते तस्या उपरिष्टादाग्रयणमानीयाधस्तादुपस्तृणाति । त्रिरभिविष्यन्दयति । सो ऽभिविष्यन्दमानः सर्व आग्रयणः संपद्यते । तं त्रिरभिहिंकृत्य परिमृज्य सादयति । माध्यंदिने सवने ऽतिरिक्ते तथैव यां स्थालीमलं राज्ञे ऽतिग्रहाय मन्यते तस्या उपरिष्टादाग्रयणमानीयाधस्तादुपस्तृणाति । त्रिरभिविष्यन्दयति । सो ऽभिविष्यन्दमानः सर्व एवाग्रयणः संपद्यते । तं तथैव त्रिरभिहिंकृत्य परिमृज्य सादयति । तृतीयसवने ऽतिरिक्ते हारियोजनमेवात्राभिविष्यन्दयति । न हि पुनर्ग्रहणं विद्यते । ऽथातो

¹ Cp. Rudradatta on Āp. XIV. 18. 13.

ध्रुवस्यैव[1] परिह्वीणस्य[1] सौम्यांश्चैन्द्राग्निभ्यामेनमृग्भ्यां परिगृह्य जुहुयादिन्द्राग्नी[2] वै देवानां पुनःपुनरभ्युपाकार[3] यजामह इत्येतदेकमाश्विनीभ्यामेनमृग्भ्यां परिगृह्य जुहुयादश्विनौ वै[4] देवानां भिषजौ ताभ्यामेवास्मै भेषजं करोतीत्येतदेकं । वैष्णवीभ्यामेनमृग्भ्यां परिगृह्य जुहुयाद्यद्वै यज्ञस्यातिरिच्यते विष्णुं तच्छिपिविष्टमभ्यतिरिच्यत इत्येतदेकमवभृथेनैनं सहाभ्यवहरेद्यथा सेऽन्यानि सोमलिप्तानि पात्राण्येवं स एव भविष्यतीत्येतदेकं । बर्हिषैनं सहाभ्युपोषेदेष वा अग्निर्वैश्वानरो यत्प्रदाव्यो । ऽग्नय एव वैश्वानराय सृज्यते । ध्रुव एवमग्नौ वैश्वानरे हुतो भविष्यतीत्येतदपरमथ पुनर्दीक्षते । यज्ञो ह[5] वै[5] यज्ञस्य प्रायश्चित्तिरिति[6] न्वेकाहयाजिनो । ऽथ सत्त्रिणां । मार्जालीये[7] परिष्यन्दं[7] निष्यन्दनवन्तं[7] हत्वा तदेनं निनयन्ति । श्वो भूते हि ते सोष्यन्तो[8] भवन्ति । ॥ २६ ॥ एकादशः ॥

उक्तः संसवो । ऽथ वै भवत्यार्तिं वा एते नियन्ति येषां दीक्षितानां प्रमीयते । तं यदववर्जेयुः क्रूरकृतामिवैषां लोकः

१ ध्रुवस्य परिह्वीणस्यैव M.

२ इन्द्रौ i.s.o. इन्द्राग्नी all exc. M.

३ Thus MGU; ०भ्युपकारं Be; B om. ऽभि।

४ हि Be.

५ Thus M Be; हैव the other MSS.

६ ०रिती again most of the MSS.

७ Thus MB Bhav.; मार्जालीयोपरिविष्यंदनवंतं Be UG (pr. m.); मार्जालीये परिविष्यंदन्निष्यंदनवंतं G (sec. m.).

८ Thus MU; सोष्यंतौ Be BG.

स्वादोहर इहेति ब्रूयादिति । दीक्षितं चेदुपतपदिन्द्रेदाग्नीध्रीयशयनो[1] ह[2] भवति । तदस्मै भक्षानाहरन्ति यावदलं भक्षाय मन्यते । स यद्यगदो[3] भवति पुनरैति । यद्यु वै प्रैति सर्वेभ्यो ऽग्निभ्यो ऽङ्गारान्निर्वर्त्यारण्योरग्नीन्समारोह्यान्तरेण चात्वालोत्करावुदङ्ङुपनिर्हृत्य तेनैनं दहेयुस्तं त्रिरात्रेण शीतीकृत्वा संचिनुयुस्ते तथाकृतेन[4] षडहसंस्थां[4] काङ्क्षेयुरथ संस्थिते षडहे ऽस्थिकुम्भं[5] याचति । तस्मिन्संचितमवधाय तं दक्षिणतो वेद्यै निधाय सर्पराज्ञिया ऋग्भिः स्तुयुरियं[6] वै सर्पतो राज्ञ्येवैनं परिददति । वृद्धं तदित्याहुर्यत्स्तुतमननुशस्तमिति । होता प्रथमः प्राचीनावीती मार्जालीयं परीयाद्धामीरनुब्रुवन्सर्पराज्ञीनां[6] कीर्तयेदिति । तेषां तथा परीतानामध्वर्युर्जघन्यः पर्यैत्यथ यज्ञोपवीतं कृत्वा यथेतं त्रिः पुनः प्रतिपरियन्ति । तेषां तथा परीतानामध्वर्युः पूर्वः पर्यैत्यथैनमादायान्तरेण चात्वालोत्करावश्मानं चास्थिकुम्भं च निधायाद्भिरवोक्षत्यप[7] नः शोशुचदघमिति । तस्मिन्मैत्रावरुणायान्यहान्यूहन्त्यथातिशिष्टं सत्रस्यासते । तस्यावभृथवेलायामस्थिकुम्भं निधायाद्भिरवोक्षत्यैतद-

---

१ Thus M; ॰ध्रीमौवेश॰ the other MSS.

२ om. M.

३ Thus M; यचहाग॰ Bo; यद्युहाग॰ the other MSS.

४ कृतेनाषड॰ M Bo.

५ स्थि left out by all exc. M.

६ The passage from इयं वै unto धामीरनुब्रुवन् left out by all exc. M.

७ ॰वोक्षत्यप BG.

वभ्रुय उ[1] वैवेष[1] भवत्यपि[1] वा[1] यो[1] ऽस्य स्वो[2] नेदिष्ठी स्यात्तस्य स्थाने तं दीक्षयेत्संवत्सरे ऽग्नीनि याजयन्त्यथ[3] वै भवति ॥ २७ ॥

अमुर्थं वा एतस्मादर्धं कृत्वा पशवो वीर्यमपक्रामन्ति यस्य यूपो विरोहति । त्वाष्ट्रं बहुरूपमालभेतेति । सत्त्रिणां चेद्यूपो विरोहेत्संप्रच्छिद्यास्य[4] चषालं सवनीयस्य त्वाष्ट्रमुपालम्भ्यं कुर्युरपि वा त्वाष्ट्रं ब्रह्मौदनं श्रपयित्वैताः शाखाः प्रहरेयुः प्र वा तच्छ्णुयुरपि वा त्वाष्ट्रीः सुवाहुतीर्हुत्वैताः शाखाः प्रहरेयुः प्र वा तच्छ्णुयुरपि वा त्वाष्ट्र[5]त्वष्ट[5] इत्येव[5] ब्रूयादित्यथ वै भवत्यार्तिमेते नियन्ति येषां दीक्षितानामग्निरुद्वायति । यदाहवनीय उद्वायेद्यत्तं मन्थेद्विच्छिन्द्याद्भ्रातृव्यमस्मै जनयेद्यदाहवनीय उद्वायेदाग्नीध्रादुद्धरेद्यदाग्नीध्र उद्वायेद्गार्हपत्यादुद्धरेद्यद्गार्हपत्य उद्वायेदत एव पुनर्मन्थेदत्र वाव स निलयते । यत्र खलु वै निलीनमुत्तमं पश्यन्ति तदेनमिच्छन्ति । यस्माद्दारोरुद्वायेत्तस्यारणी कुर्यात्क्रुमुकमपि कुर्यादिति । स यस्माद्दारोरुद्वायति तस्यारणी कृत्वा क्रुमुकशकलमन्ववधाय[6] तान्येवावक्षाणानि संनिधाय मन्थेदिति । स तान्येवावक्षाणानि संनिधाय मन्थतीतः प्रथमं जज्ञे

---

१ Thus M; उवेवैष भवत्यपिवायो G; उवैष भवति यो U; इवेवैष भवत्यपिवा यो B; उवैषद्यकनयो Be.

२ All MSS. ins. वा exc. M.

३ याजयत्यथ Be U.

४ Thus MBG; °हेत्संप्रच्छि° Be.

५ Thus M; त्वाष्ट्र' त्वाष्ट्रेत्येव B; त्वाष्ट्रत्वाष्ट्रेत्येव GU; त्वाष्ट्रेत्येव Be.

६ Thus MU Be; क्रुमुकं° BG; °मन्ववधाय MUG Be; °मन्वाधाय B.

अग्निः स्वाद्योनेरधि जातवेदाः । स गायत्रिया त्रिष्टुभा जगत्या देवेभ्यो हव्यं वहतु प्रजानन्निति । छन्दोभिरेवैनꣳ स्वाद्योनेः प्रजनयतीति ब्राह्मणम् । ॥ २८ ॥

अथ यद्याहवनीयगार्हपत्यावुद्वायेयातां गार्हपत्यं मथित्वाग्नीध्रीयादाहवनीयमुद्धरेदथ यद्याग्नीध्रीयगार्हपत्यावुद्वायेयातां गार्हपत्यं मथित्वाग्नीध्रीयमुद्धरेदथ यद्याग्नीध्रीयाहवनीयावुद्वायेयातां गार्हपत्यादाग्नीध्रीयमुद्धृत्य तत आहवनीयमुद्धरेदथ यदि सर्व[1] एवोद्वायेयुर्गार्हपत्यं मथित्वाग्नीध्रीयमुद्धृत्य तत आहवनीयमुद्धरेदित्यथ वै भवति गार्हपत्यं मन्थति । गार्हपत्यो वा अग्नेर्योनिः । स्वादेवैनं योनेर्जनयति । नास्मै भ्रातृव्यं जनयतीति ब्राह्मणमथ वै भवति यस्य सोम उपदस्येत्सुवर्णꣳ हिरण्यं द्वेधा विच्छिद्यर्जीषेऽन्यदाधूतुयाज्जुहुयादन्यदिति । स यस्य सोम उपदस्यति तत्सुवर्णꣳ हिरण्यं द्वेधा विच्छिद्यर्जीषेऽन्यदाधूनोति शुल्बे चमसेऽन्यदवधाय जुहोति । सोममेवाभिषुणोति सोमं जुहोतीति ब्राह्मणमथ वै भवति सोमस्य वा अभिषूयमाणस्य प्रिया तनूरुदक्रामत्तत्सुवर्णꣳ हिरण्यमभवद्यत्सुवर्णꣳ हिरण्यं कुर्वन्ति प्रिययैवैनं तनुवा समर्धयन्तीति ब्राह्मणमथ वै भवति यस्याक्रीतꣳ सोममपहरेयुः क्रीणीयादेव । सैव ततः प्रायश्चित्तिरिति ब्राह्मणमथ वै भवति यस्य क्रीतमपहरेयुरादाराꣳश्च फाल्गुनानि चाभिषुणुयादित्यादाराः चुद्रवणानि[2] ।

---

१ सर्वेत M.

२ Thus M; चुवक॰ the other MSS.

फाल्गुनानि हैमवतानि । तेषामलाभे श्वेतकानां प्रतिनिधिर्विज्ञायते तृतीयस्यामितो दिवि सोम आसीत्तं गायत्र्याहरत्तस्य पर्णमच्छिद्यत । तत्पर्णो ऽभवत्तत्पर्णस्य पर्णत्वमिति । तस्मात्पर्णत्सरूणामेवाभिषवः[1] कार्य इति । शृतेन प्रातःसवने श्रीणीयादिति । शृतमेतद्भवति । दध्ना मध्यंदिन इति । दध्येतद्भवति । नीतमिश्रेण तृतीयसवन इति । विमथितꣳ सपिल्लकमुद्धृतं[2] प्राङ्नवनीतभावादित्येतदाचक्षते । ऽग्निष्टोमः सोमः स्याद्रथंतरसामा । य एवर्त्विजो वृताः स्युस्त एनं याजयेयुरिति । त एवैनं याजयन्त्येकां गां दक्षिणां दद्यादित्येकां गामच दक्षिणां ददाति । यदिह दास्यन्भवति तदमुत्र ददाति । पुनः सोमं क्रीणीयाद्यज्ञेनैव तद्यज्ञमिच्छति । सैव ततः प्रायश्चित्तिरिति ब्राह्मणमथ वै भवति सर्वाभ्यो वा एष देवताभ्यः सर्वेभ्यः[3] कामेभ्यः[3] सर्वेभ्य स्तोमेभ्यः सर्वेभ्यश्छन्दोभ्यः सर्वेभ्यः पृष्ठेभ्य आत्मानमागुरते यः सत्त्रायागुरत । एतावान्खलु वै पुरुषो यावदस्य वित्तꣳ सर्ववेदसेन यजेतेत्यतिरात्रं विश्वजितमुपयन्त्यथाच[4] सर्ववेदसं ददाति । सर्वपृष्ठो ऽस्य सोमः स्यात्सर्वाभ्य एव

---

१ Thus M; ॰त्सरूकषिवेवाभि॰ BG; ॰त्सरूकषिह्वेवाभि॰ U; ॰त्सरूकषिह्वेवाभि॰ Be.

२ Thus all; are we to read सपिल्लक॰? सपिल्लकमप्राङ्नवनी॰ Be U; सपिल्लकंसुद्धनकंप्राङ्नवनी॰ M, but the न seems to be cancelled.

३ om. M.

४ थाच om. M.

देवताभ्यः सर्वेभ्यः कामेभ्यः सर्वेभ्य स्तोमेभ्यः सर्वेभ्यश्छन्दोभ्यः सर्वेभ्यः पृष्ठेभ्य आत्मानं निष्क्रीणीत इति ब्राह्मणम्' ॥ २९ ॥

पवमानः सुवर्जन इति सौत्रामण्यामेष भवति' ब्राह्मणमुत्तरमथ वै भवति तस्माद्वैश्वदेवेन यजमानः संवत्सरीणाꣳ स्वस्तिमाशास्त इत्याशासीत' तस्माद्वरुणप्रघासैर्यजमानः परिवत्सरीणाꣳ स्वस्तिमाशास्त इत्याशासीत' तस्मात्साकमेधैर्यजमान इदावत्सरीणाꣳ स्वस्तिमाशास्त इत्याशासीत' तस्माच्छुनासीरीयेण यजमानोऽनुवत्सरीणाꣳ स्वस्तिमाशास्त इत्याशासीतेत्यथ वै भवत्यग्नेः कृत्तिकाः शुक्रं परस्ताज्ज्योतिरवस्तादिति नक्षत्रेष्टकाभिर्विकल्पन्त इति ब्रुवते' ऽथ वै भवति यत्पुण्यं नक्षत्रं तद्वट्कुर्वीतोपव्युषमिति[1]' प्रातः कुर्वीत' संगवे कुर्वीत' मध्यंदिने कुर्वीतापराह्णे कुर्वीत' सायं कुर्वीत' यावति तत्र सूर्यो गच्छेद्यत्र जघन्यं पश्येत्तावति कुर्वीत' यत्कारी स्यात्पुण्याह एव कुरुत इति' ब्राह्मणमुत्तरे ब्राह्मणमुत्तरे' ॥ ३० ॥ द्वादशः ॥

॥ इति चतुर्दशः प्रश्नः ॥

१ Thus M and Bhav.; तद्दकु॰ the other MSS.; the text of T. Br. I. 5. 2. 1. has वषट्कुर्वीत but cp. the comm.

[1]अश्वमेधेन यक्ष्यमाणो भवति राजा विजितौ सार्वभौमः । स एतद्देवयजनं जोषयत आश्विनं प्रागाश्विनं दक्षिणाश्विनं प्रत्यगाश्विनमुदक् । छिन्दन्ति वृक्षांश्च स्थलानि भिन्दन्ति प्रति निम्नान्पूरयन्ति किꣳशारूणि निरस्यन्ति । नदीनां तीर्थानि सर्वतःप्रस्रवणानि पल्वलानि कुर्वन्त्यथैतौ ह्रदौ मध्यतो देवयजनस्य जोषयते सꣳस्थाविषावनुपदासिनौ पुष्यनामानौ यद्येवं विन्दन्ति । यद्यु वा एवं न विन्दन्ति शालैनावभिवाह्याभिर्वाभिहार्याभिर्वाद्भिः पूरयन्ति । यथा त्वेव सꣳस्थाविषावनुपदासिनौ पुष्यनामानौ भवतस्तथा । तावपरेण मध्यतो देवयजनं जोषयते द्विस्तावद्यथाग्नेर्विधायां । तच्छालां कुर्वन्ति प्राचीनवꣳशां द्विच्छतीकाशां दक्षिणतो वर्षीयसीं । तस्यै दक्षिणतो ऽश्वशालां कुर्वन्ति । नडश्वत्थानाꣳ[2] क्षौमाणामवाचीनाग्राणामश्वव्रजं[3] कुर्वन्त्यथास्यैते संभारा उपकॢप्ता भवन्त्यश्वो रूपीयो यो[4] ऽस्य[4] सदंश्वानाꣳ शतमश्वास्त्वन्ये ऽपरिमिता

---

1 As all the MSS., with the exception of M, are mostly very corrupted, the text is given according to M; when the reading of M differs from the reading taken up in the text, this is mentioned; but otherwise the various readings of the other MSS. are, as a rule, not given.

2 नडश्वत्थानं M, but cp. Āp. XX. 7. 7.

3 क्षौमाणाम॰ M; क्षिरौनुष्माणाम॰ B Be (pr. m.); क्षिमष्माणाम॰ Be (sec. m.); क्षिरौमष्माणाम॰ U.

4 Thus corrected, cp. infra XV. 8 s. f.; यो om. M; यस्य the other MSS.

निरमणा निरष्टाः कृष्णश्च श्वा चतुरक्षो द्वौ दासावनुजायै च पुत्रो ऽन्वाधेयायै च जरत्पूर्वा चैवैकश्चाभ्यूहः मैध्रकं च सुमलं पौंश्चलेयश्च[१] चत्वारि शतानि गोसृणाꣳ शतं तल्प्यानाꣳ राजपुत्राणाꣳ शतमराज्ञामुग्राणाꣳ[२] शतꣳ सूतग्रामणीनाꣳ शतं क्षत्तसंग्रहीतृणां चत्वारो महान्त ऋत्विजस्तानन्वितरे तान्काले ऽपदातीन्त्समावहन्ति ॥ १ ॥

श्वा सुब्रह्मण्यायाश्चतुष्टयीरापो दिग्भ्यः संभृताश्चतुरः[३] माहस्थानिष्कान्सुवर्णरजतौ च रुक्मौ द्वे अन्ये हिरण्ये द्वौ वीणागाथिनौ ब्राह्मणं च राजन्यं च द्वे रशने मौञ्जीं च कुशमयीं चोभे चयोद्गारत्व्यावैतेनोपक्लृप्तेन चित्रामायतीमुपरमत्यश्च[४] चित्रयेत्यरण्योरग्नीन्त्समारोह्य शालामभिप्रैति ये ते पन्थानः सवितः पूर्व्यासो ऽरेणवो वितता अन्तरिक्षे। तेभिर्नो अद्य पथिभिः सुगेभी रक्षा च नो अधि च देव ब्रूहीत्युत्तरेण शालां परीत्य पूर्वया द्वारा शालां प्रपाद्य गार्हपत्यस्यायतने मथित्वाग्नीन्विहृत्य गार्हपत्यमुपतिष्ठते नमो ऽग्नये पृथिविक्षिते लोककृते लोकमस्मै यजमानाय देहीति नमो वायवे

---

१ All MSS. the accus.

२ उग्राणां left out in all the MSS.

३ We would expect here and in the following words also the nomin.

४ Thus M; अश्व i.s.o. अश्च all the other MSS.; cp. supra p. 145, 3, and infra XVIII. 8, 16.

ऽन्तरिक्षक्षिते लोकस्पृते लोकमस्मै यजमानाय देहीत्यन्वाहार्यपचनं । नमः सूर्याय दिविक्षिते लोकस्पृते लोकमस्मै यजमानाय देहीत्याहवनीयमथास्यैतत्पुरस्तादेव जघनेनाग्निशालामेकापक्षावं विमितं कारितं भवति । तदृत्याग्निमुपसमाधाय मृत्यवे स्वाहा मृत्यवे स्वाहेति नवतिमाहुतीर्जुहोति प्रथमाय स्वाहेत्येकादश । शतायुर्वै पुरुषः शतवीर्य आत्मैकशतो यावानेव पुरुषस्तस्मान्मृत्युमवयजत इति ब्राह्मणमथ केशश्मश्रु वापयित्वा लोमानि संहृत्य नखानि निकृत्य दतो धाव्य स्नातावहते वाससी परिदधाते । उभौ मानुषेणालङ्कारेणालङ्कृतौ भवतो ऽहतवाससावथाभ्यां व्रतोपायनीयं पाचयति । तस्याश्नितौ भवतः सर्पिर्मिश्रस्य पयोमिश्रस्याथापराह्णे सुखयोर्हिरण्ये अन्वस्येते ॥ २ ॥

सुवर्णं यजमानो रजतं पत्नी रजतानि वा यदि बह्व्यो भवन्त्यथास्य वाचंयमस्य सायमग्निहोत्रं जुहोत्युपसंगच्छन्त एनमेते राजगृह्याः सूतग्रामण्यः[1] क्षत्तसंग्रहीतारः कारुविशा[2] इति । तेभ्यः पष्ठौहीं वेहतं ददाति । तां ते पचमाना रमयन्तो जागरयन्त आसते । ऽथ प्रातराचममाचामन्तौ हिरण्ये प्रोषतस्ते पौंश्चलेय आदत्ते । ऽथादित्यमुद्यन्तमुपतिष्ठन्ते द्रष्ट्रे नम उपद्रष्ट्रे नमो ऽनुद्रष्ट्रे नमः ख्यात्रे नम उपख्यात्रे नमो ऽनुख्यात्रे नमः शृण्वते नम उपशृण्वते नमो ऽनुशृण्वते नमः

---

१ Thus B ; ग्रामण्यः the other MSS.

२ cp. XVIII. 18.

मते नमो ऽमते नमो जाताय नमो जनिष्यमाणाय नमो भूताय नमो भविष्यते नम इत्यथ वैश्वदेवीꣳ सांग्रहणीं निर्वपति । सा प्रसिद्धेष्टिः संतिष्ठते । यावदेवाचाध्वर्युश्चेष्टति तावदेष प्रतिप्रस्थाता चतुष्टयीष्वप्सु ब्रह्मौदनꣳ श्रपयित्वाभिघार्योदञ्चमुद्वासयत्यथैतां प्राचीं निर्णिज्योपस्तीर्य तस्यामेतꣳ रजतꣳ रुक्मं प्रक्षालितमवदधाति । तस्यामेनमसंप्रक्षिपन्निवोद्धरति सर्पिरासेचनं कृत्वा प्रभूतमाज्यमानीयाथोपरिष्टात्सुवर्णꣳ रुक्मं प्रक्षालितमवदधात्यथैतान्महत[1] ऋत्विज[1] उत्तरतो ऽनुदिशमुपवेश्य ताननुपूर्वमाचमय्य तेभ्य एनं भूमिꣳ स्पृशन्ननुच्छिन्दन्निवोपोहति । ॥ ३ ॥

स आह ब्राह्मणाय राजानस्त्वानेन माश्वेन मेध्येन स्वस्ति समापयाता[2] ब्रह्मज्यताया[3] इति । [4]तं तथेतीतरे प्रत्याहुरनेन त्वामश्वेन मेध्येन स्वस्ति समापयिष्यामो ब्रह्मज्यताया इत्यथ

---

१ महर्त्विजः M, but cp. supra p. 205. 5.

२ Thus M; समीपयाता the other MSS. I am in doubt whether we ought to read समापयाथाब्रह्मज्यताया (समापयाथ conj.); in this case the avagraha should be read before ब्रह्मज्यताया (line 13); but the following अथ ब्रह्मज्यतामस्मै संजानते seems to plead against this reading.

३ Thus M; ब (or इ) ज्यताया all the other MSS.; by this omission of ह्म it is clear that all the MSS., with the exception of M, derive from one common source.

४ This passage left out in all the MSS. exc. M.

ब्रह्मव्यतामस्मै संजानते । ऽथैनान्त्सꣳप्राश्नाति मनुष्यसत्त्रमाय्यप्रत्यवरूढान्तो धारयाध्वा इत्यथैतस्मिन्नर्पिरावेचने रशने संतर्प्य परिक्रमिभ्यो प्रयच्छति । द्विरपरं प्राश्य प्रयाꣳसन्ति राद्धस्ते ब्रह्मौदन इति[1] । तेभ्यश्चतुरः साहस्रान्निष्कान्ददाति सुवर्णरजतौ च रुक्मावेव ये चत्वाभिषेक्तारस्ते ऽध्वर्युमभिषिञ्चन्ति । स आह ब्राह्मणाय राजानमाध्वर्युरेतौ द्वौ संवत्सरौ राजा भविष्यति तस्य शुश्रूषध्वं यो ह्यस्य[2] न शुश्रूषिष्यते सर्वस्वं तं[3] ज्यास्यन्तीत्यथाध्वर्युरेतौ द्वौ संवत्सरौ राजा भवति । यजमान इतीतरमाचक्षते । स आह ब्रह्मन्नश्वं मेध्यं भन्त्स्यामि देवेभ्यः प्रजापतये तेन राध्यासमिति । बधानेतीतरः प्रत्याह देवेभ्यः प्रजापतये तेन राध्नुहीति । ॥ ४ ॥ प्रथमः ॥

अथ रशनामादत्ते देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे इत्यादायाभिमन्त्रयत इमामगृभ्णन्रशनामृतस्येति । तयाश्वमभिदधात्यभिधा असि भुवनमसि यन्तासि धर्तासि सो ऽग्निं वैश्वानरꣳ सप्रथसं गच्छ स्वाहाकृतः पृथिव्यां यन्ता राड् यन्तासि यमनो धर्तासि धरुण इत्येवमेव द्वितीयाꣳ रशनामादत्ते । तयैवमेवाश्वमभिदधाति । ते अश्वस्यानुपृष्ठमनुपृणक्त्यैतस्मिन्काले ऽनुजायै च पुत्रो ऽन्वाधेयायै च श्वशुराभ्याꣳ श्वानमभिधत्तो । ऽथैष पौꣳश्चलेयो जरत्पूर्वया

१ This passage (cp. 207. 12) left out in all the MSS. exc, M.

२ ह om. M.

३ तम् Be., त M; UB om. this passage.

सव्यं जानु वेष्टयित्वा सैध्रकेण मुसलेन श्वानमनूपतिष्ठते । ऽध्वर्युः पुरस्तात्प्रतिपद्यते सह शतेन तल्प्यानाꣳ राजपुत्राणां । ब्रह्मा दक्षिणतः सह शतेनाराज्ञामुग्राणाꣳ । होता पश्चात्सह शतेन सूतग्रामणीनामुद्गातोत्तरतः सह शतेन क्षत्तसंग्रहीतॄणां । मध्ये ऽश्वः श्वा चाथ दक्षिणꣳ ह्रदमभिप्रयान्ति । द्यौस्ते पृष्ठं क्रमैरत्यक्रमीदाव्याकान्वाजीति त्रिभिरनुवाकैरा क्रोडादश्वमभिधावयन्ति[1] । तमध्वर्युः पुरस्तात्प्रत्यङ्मुखस्तिष्ठन्प्रोक्षत्यनेनाश्वेन मेध्येनेष्ट्वायꣳ राजा वृत्रं वध्यादिति । तस्यानु प्रोक्षणꣳ शतं तल्प्या राजपुत्राः प्रोक्षन्ति । ब्रह्मा दक्षिणत उदङ्मुखस्तिष्ठन्प्रोक्षत्यनेनाश्वेन मेध्येनेष्ट्वायꣳ राजाप्रतिधृष्यो ऽस्त्विति । तस्यानु प्रोक्षणꣳ शतमराजान उग्राः प्रोक्षन्ति । होता पश्चात्प्राङ्मुखस्तिष्ठन्प्रोक्षत्यनेनाश्वेन मेध्येनेष्ट्वायꣳ राजास्यै विशो बहुग्वै बह्वश्वायै बह्वजाविकायै बहुव्रीहियवायै बहुमाषतिलायै बहुहिरण्यायै बहुहस्तिकायै बहुदासपुरुषायै रयिमत्यै पुष्टिमत्यै बहुरायस्पोषायै बहुसर्वधनायै राजास्त्विति । तस्यानु प्रोक्षणꣳ शतꣳ सूतग्रामण्यः[2] प्रोक्षन्त्युद्गातोत्तरतो दक्षिणामुखस्तिष्ठन्प्रोक्षत्यनेनाश्वेन मेध्येनेष्ट्वायꣳ राजा सर्वमायुरेत्विति । तस्यानु प्रोक्षणꣳ शतं क्षत्तसंग्रहीतारः प्रोक्षन्ति । दिग्भ्यो ऽश्वꣳ समुक्षन्तीति ब्राह्मणमथास्यैव पौꣳश्चलेयः सꣳश्लिष्टो भवति यदा स्वोपमी-

१ °धापयंति M.

२ Thus BU; °ण्यः M Bo.

वास्यैव शुनः प्रहर्ताशीत्युपमीक्षत एव पौंश्चलेयः सैध्रकेण मुसलेन शुनः प्रहन्ति ' तमत एवानुमन्त्रयते ॥ ५ ॥

यो अर्वन्तं जिघांसति तमभ्यमीति वरुण इति ' तमश्वस्याधस्तादुपास्य दक्षिणापप्लावयति परो मर्तः परः श्वेत्यथास्य ब्रह्मा हस्तं गृह्णाति ब्रह्मणो वा यजमानो ऽहं च त्वं च वृत्रहन्त्संबभूव सनिभ्य आ । अरातीवा चिदद्रिवो ऽनु नौ शूर मंसते भद्रा इन्द्रस्य रातय इत्यथैतमैषीकमभ्यूढं मौञ्जीभ्यां रज्जुभ्यामन्तयोरभिदधाति ' तदु ह वेतसशाखो-पसंनद्धा भवति ' तदेतेन शतं तस्या राजपुत्रा विविच्यन्ते ' तेषामनु विवेकमितरे ' द्वे अन्यतरमन्तं शते गृहीतो द्वे अन्यतरमन्तं शते ' अथैनान्संशास्त्यनेनैषीकेणाभ्यूढेनाभ्यु-हन्त[१] इव पुरस्तात्प्रत्यञ्चमूर्मिणाश्वमभिधावयाता[२] इत्यभि-धाव्यमाने[३] ऽध्वर्युर्यजमानं वाचयत्यभि क्रत्वेन्द्र भूरध ज्मन्न ते विव्यङ्महिमानं रजांसि । स्वेना हि वृत्रं शवसा जघन्थ न शत्रुरन्तं विविदद्युधा त इत्यथैनं संवेश्य दक्षिणापप्लावय-त्यथैतमश्वं प्रदक्षिणमावर्त्य शालामानयति यदातो अपो अगमदिन्द्रस्य तनुवं प्रियाम् । एतं स्तोतरेतेन पथा पुनर-

---

१ ०भ्यूहंत MSS. exc. M.

२ ०भिधापयाता M ; ०धावयंता the other MSS. ; if अभिधावयाता is the correct reading we have here a form of the same kind as समाप-याता (supra p. 207, 12).

३ ०धाव्यमाने again M.

श्वमावर्तयामि न इति । तमध्वर्युः पूर्वाभि स्तोकीयाभिरन्वैत्यग्नये स्वाहा सोमाय स्वाहेत्येतेनानुवाकेन पुनःपुनरभ्युपाकारं यावदस्य स्तोका उपरमन्त्यथैतमश्वमग्रेण शालां प्राञ्चं स्थापयित्वा प्रपद्यास्यैव सावित्राणि जुहोत्यग्नये स्वाहा वायवे स्वाहेति सर्वाय सावित्रमष्टाकपालं प्रातर्निर्वपत्यासाच पुरस्ताद्भागाज्जुहोत्यग्नये[1] स्वाहा स्वाहेन्द्राग्निभ्यामिति पञ्च । पुरस्तात्स्विष्टकृतस्त्रयोऽग्नीतिमध्यचरितान्युपजुहोतीङ्काराय स्वाहेङ्कृताय स्वाहेत्यसमुदिते त्रयोदश प्रद्रावाज्जुहोत्यायनाय[2] स्वाहा प्रायणाय स्वाहेति । सा प्रसिद्धेष्टिः संतिष्ठते । ऽथैतमश्वं प्रदक्षिणमावर्त्य पूर्वया द्वारा शालां प्रपाद्यान्तर्वेदि प्राञ्चं स्थापयित्वाह ॥ ६ ॥

यद्वा इदमाहुः पदेपदे ह वा अश्वस्य मेध्यस्याध्वर्युर्जुहोतीहैव वयं तद्धोष्यामो यथा नः पदेपदे हुतं भविष्यतीति । तस्य पत्सु धृतीर्जुहोत्यक्ष्णया वा पर्यायिणीर्वेह धृतिः स्वाहेह विधृतिः स्वाहेह रन्तिः स्वाहेह रमतिः स्वाहेत्यथैनं प्राञ्चमुत्क्राम्य प्रोक्षति प्रजापतये त्वेति पुरस्तादिन्द्राग्निभ्यां त्वेति दक्षिणतो वायवे त्वेति पश्चाद्विश्वेभ्यस्त्वा देवेभ्य इत्युत्तरतो देवेभ्यस्त्वेत्यधस्तात्सर्वेभ्यस्त्वा देवेभ्य इत्युपरिष्टादथैनमतिप्रोक्षेण प्रोक्षति कृष्यै त्वा क्षेमाय त्वा रय्यै त्वा पोषाय त्वा पृथिव्यै त्वान्तरिक्षाय त्वा दिवे त्वा सते त्वासते त्वाद्भ्यस्त्वौषधीभ्यस्त्वा

---

१ ०भागाज्जुहो० M. २ प्रद्रवां MSS., but cp. infra 214, 9.

विश्वेभ्यस्त्वा भूतेभ्य इत्यथास्य[१] रूपाणि जुहोत्यञ्जेताय स्वाहाञ्जिसक्थाय स्वाहा कृष्णाय स्वाहा श्वेताय स्वाहेत्येताभ्यामनुवाकाभ्यामथास्योपोत्थायाश्वनामभिर्दक्षिणं कर्णमाजपति विभूर्मात्रा प्रभूः पित्राश्वो ऽसि हयो ऽस्यत्यो ऽसि नरो ऽस्यर्वासि सप्तिरसि वाज्यसि वृषासि नृमणा असि ययुर्नामासीत्यथैनमुपतिष्ठत आदित्यानां पत्वान्विहीत्यथैनꣳ रशनाभ्यामुत्सृजति भूरसि भुवे त्वा भव्याय त्वा भविष्यते त्वा विश्वेभ्यस्त्वा भूतेभ्य इत्यथैनं देवताभ्यः परिददाति देवा आशापाला एतं देवेभ्यो ऽश्वं मेधाय प्रोक्षितं गोपायतेत्यथास्मा एतानपरिमिताञ्छिरमणाञ्छिरष्ठानुपावसृजन्त्यथैनमेतानि चत्वारि शतानि गोप्तृणामनुयुञ्जते प्रासकवचा विततवरूथा यथा युद्धाय तथा[२] । तेभ्यः पक्वाशनं प्रसौति । ॥ ७ ॥

स आह ब्राह्मणांश्च राजन्यांश्च य इमे पक्वाशनमुपावहरिष्यन्ते मयाप्रसूता मोपवादिष्टेति । स आह ब्राह्मणांश्च राजन्यांश्च बहिर्देवयजनादाह्वनं व्युदचध्वं यस्यायं वडवाभिः सꣳसृज्यते सर्वस्वं तं ज्यास्यतीति । ते बहिर्देवयजनादाह्वनं व्युदचन्ते[३] । ऽश्वैश्चैव षाण्डैरश्वतरैश्च । न वडवाभिर्ना-

---

१ The passage अथास्य up to श्वेताय स्वाहेत्येताभ्यामनुवाकाभ्याम् left out in all exc. M.

२ Thus M, which, however, omits तथा; all the other MSS. are wholly corrupted.

३ Thus M; वदचंति Be; युदचंति U; युदचं B.

श्वतरीभिरथैतौ[1] वीणागाथिनावतिप्रष्टंस्तौ[2] । ऽथैष ब्राह्मणो वीणागाथी गायतीत्यददा इत्ययजथा इत्यपचथा इत्येवं मिश्राः स्विष्टो गाथाः । कामचारो ऽस्य । स्थानाच्चैवैनं गोपायन्ति वाहनाच्चाथ यद्यश्वमुपतपदिन्द्रत्याग्नेयो ऽष्टाकपालः सौम्यश्चरुः सावित्रो ऽष्टाकपालः पौष्णश्चरू रौद्रश्चरुरित्यथ यदि नावगच्छत्यग्नये वैश्वानराय द्वादशकपालो मृगाखर इत्यथ यदि वडवाभिः सꣳसृज्यते ऽग्नये ऽꣳहोमुचे ऽष्टाकपालः सौर्यं पयो वायव्य आज्यभागो । यद्यभिवाति रौद्रो । यदि स्रावः पौष्णो । यद्यप्सु वारुणो । यदि काणः[3] सौर्यं । एतासामार्तीनां यां कां[4] च[4] न्येति[4] । सहस्त्वेव[5] प्रायश्चित्तिरथ यो ऽस्य[6] सद्मानाꣳ सत्तमस्तमुत्सृजत्यथातो रशनाभ्यामेव प्रतिपद्यते । समानं कर्मा परिदानात् । ॥ ८ ॥ द्वितीयः ॥

उत्सृज्याश्वं वैश्वदेवान्पशूनालभन्ते । तेषां पशुपुरोडाशाननुवर्तन्ते वैश्वदेवहवीꣳषि । वैश्वदेवहवीꣳषि वैवैषां पशुपुरोडाशा भवन्ति । ताननुवर्तते मध्यमा सावित्री[7] । प्रसिद्धाः[8]

---

१ °थैनौ M.

२ Thus M; U om. प्र; Be B: °नावितिस्ष्टस्तौ; the expression occurs also in the gṛhyasūtra I. 15.

३ काणः M; कारुकः the other MSS.; but cp. Āp. xx. 7. 18.

४ कांचिन्येति M.

५ Uncertain; सहस्त्वेव M Be; सृत्वेव B; सहदेव U.

६ अस्य M.

७ Thus M; सावित्राः BU; सावित्रः Be.

८ Instead of प्रसिद्धः or प्रसिद्धाः as the other MSS. have it here and infra, M consequently प्रसिद्धं, but cp. the expression प्रसिद्धैर्हि संतिष्ठते।

पशवः संतिष्ठन्ते । ऽथापराह्णे सवित्र आसवित्रे पुरोडाशं द्वादशकपालं निर्वपति । सा प्रसिद्धेष्टिः संतिष्ठते । ऽथ पौर्णमासवैमृधाभ्यामिष्ट्वा प्रसिद्धं निवर्तयते । ऽथैतौ वीणागाथिनावतिप्रसृष्टौतो । ऽथैष राजन्यो वीणागाथी गायती-त्यजिना इत्ययुध्यथा इत्यसुर संग्राममहन्नित्येवं मित्रास्तिस्रो गाथाः । प्रातरग्निहोत्रे हुते ब्राह्मणो वीणागाथी गायति सायमग्निहोत्रे हुते राजन्यस्तावेवमेव संवत्सरं गायतो । ऽथ सावित्रमष्टाकपालं प्रातर्निर्वपत्यासाद्य पुरस्ताद्धागाज्जुहोत्यनुदिते[1] धृतीय जुहोति मद्रावाऽग्य[2] जुहोति । सा प्रसिद्धेष्टिः संतिष्ठते । ऽथ मध्यंदिने सवित्रे प्रसवित्रे पुरोडाशमेकादशकपालं निर्वपति । सा प्रसिद्धेष्टिः संतिष्ठते । ऽथापराह्णे सवित्र आसवित्रे द्वादशकपालं निर्वपति । सा प्रसिद्धेष्टिः संतिष्ठते । ऽथ श्वो भूते सावित्रीभिरेव प्रतिपद्यते । स एवमेव सावित्रीभिरहरहर्यजमानश्चतुरो मास एति काममिष्ट्या कामं पशुबन्धेन कामं यवाग्रयणेनाथ चतुर्षु मासेषु पर्यवेतेषु सावित्र्येष्ट्वा वरुणप्रघासान्पशूनालभन्ते । ॥ ९ ॥

तेषां पशुपुरोडाशाननुवर्तन्ते वरुणप्रघासहवींऽषि । वरुणप्रघासहवींऽषि वैवैषां पशुपुरोडाशा भवन्ति । ताननुवर्तते मध्यमा सावित्री । प्रसिद्धाः पशवः संतिष्ठन्ते । ऽथापराह्णे

१ °ताद्धागाजुहो° M as above, p. 211, 6.

२ Thus M; मद्रवांश the other MSS.; the value of the word is उद्गातः ।

सवित्र आसवित्रे पुरोडाशं द्वादशकपालं निर्वपति । सा प्रसिद्धेष्टिः संतिष्ठते । ऽथ पौर्णमासवैमृधाभ्यामिष्ट्वा प्रसिद्धं निवर्तयते । ऽथ श्वो भूते सावित्रीभिरेव प्रतिपद्यते । स एवमेव सावित्रीभिरहरहर्यजमानो ऽपराꣳश्चतुरो मास एति काममिष्ट्वा कामं पशुबन्धेन कामꣳ श्यामाकाग्रयणेनाथ चतुर्षु मासेषु पर्यवेतेषु पौर्णमास्या उपवसथ आनीकवतं पशुमालभते । तस्य पशुपुरोडाशमनुवर्तत आनीकवतꣳ हविरानीकवतो वैवास्य पशुपुरोडाशो भवति । तमनुवर्तते प्रथमा सावित्री । प्रसिद्धः पशुः संतिष्ठते । ऽथ मध्यंदिने सांतपनं पशुमालभते । तस्य पशुपुरोडाशमनुवर्तते सांतपनꣳ हविः । सांतपनो वैवास्य पशुपुरोडाशो भवति । तमनुवर्तते मध्यमा सावित्री । प्रसिद्धः पशुः संतिष्ठते । ऽथापराह्णे सवित्र आसवित्रे पुरोडाशं द्वादशकपालं निर्वपति । सा प्रसिद्धेष्टिः संतिष्ठते । ऽथ सायं गृहमेधीयेन चरत्यथापररात्रे पूर्णदर्व्येण[१] चरत्यथ प्रातः क्रैडिनं पशुमालभते । तस्य पशुपुरोडाशमनुवर्तते क्रैडिनꣳ हविः । क्रैडिनो वैवास्य पशुपुरोडाशो भवति । तमनुवर्तते प्रथमा सावित्री । प्रसिद्धः पशुः संतिष्ठते । ऽथ मध्यंदिने साकमेधान्पशूनालभन्ते[२] । ॥ १० ॥

---

१ पूर्णदर्वेण all, but cp. vol. I, p. 142. 5 ; Āp. has also पूर्णदर्व्ये, but the Sat. Br. पूर्णदर्वे ; the word occurs again xvii. 57 and in the Dvaidha ; Bhav. in his comm. on the latter has °दर्व्ये ।

२ लभंते MU Be; लभते B.

तेषां पशुपुरोडाशाननुवर्तन्ते महाहवींꣳषि ' महाहवींꣳषि वैवैषां पशुपुरोडाशा भवन्ति ' ताननुवर्तते मध्यमा सावित्री ' प्रसिद्धाः पशवः संतिष्ठन्ते ' ऽथापराह्णे पितृयज्ञेन चरति ' पितृयज्ञेन चरित्वा त्रैयम्बकैश्चरति ' त्रैयम्बकैश्चरित्वादित्यं पशुमालभते ' तस्य पशुपुरोडाशमनुवर्तत आदित्यꣳ हविरादित्यो वैवास्य पशुपुरोडाशो भवति ' तमनुवर्तत उत्तमा सावित्री ' प्रसिद्धः पशुः संतिष्ठते ' ऽथ पौर्णमासवैमृधाभ्यामिष्ट्वा प्रसिद्धं निवर्तयते ' ऽथ श्वो भूते सावित्रीभिरेव प्रतिपद्यते ' स एवमेव सावित्रीभिरहरहर्यजमानो ऽर्धचतुर्थान्मास एति काममिष्ट्वा कामं पशुबन्धेन कामं ब्रीह्याग्रयणेनाथामावास्याया उपवसथीये ऽहन्सावित्र्येष्ट्वौद्दाग्निकानि सावित्राणि ज्वलोखाः संस्थाप्य पशुशीर्षाणि च वायव्यं पशुमालभते ' तस्य प्राजापत्यस्तूपर उपालम्भ्यो भवति ' तयोः प्रसिद्धं वपाभ्यां चरित्वा पशुपुरोडाशौ निर्वपति ' तावनुवर्तेते मध्यमा सावित्री ' प्रसिद्धौ पशू संतिष्ठेते ' अथापराह्णे सवित्र आसवित्रे पुरोडाशं द्वादशकपालं निर्वपति ' सा प्रसिद्धेष्टिः संतिष्ठते ' ऽथ श्वो भूते सावित्रीभिरेव प्रतिपद्यते ' स एवमेव सावित्रीभिरहरहर्यजमान एतमर्धमासमेति काममिष्ट्वा कामं पशुबन्धेनाथ चतुर्षु मासेषु पर्यवेतेषु सावित्र्येष्ट्वा ॥ ११ ॥

शुनासीरीयान्पशूनालभन्ते[1] ' तेषां पशुपुरोडाशाननुवर्तन्ते शुनासीरीयहवींꣳषि ' शुनासीरीयहवींꣳषि वैवैषां पशु-

१ ०लभंते M, ०लभते the other MSS.

पुरोडाशा भवन्ति । ताननुवर्तते मध्यमा सावित्री । प्रसिद्धाः पशवः संतिष्ठन्ते । ऽथापराह्णे सवित्र आसवित्रे पुरोडाशं द्वादशकपालं निर्वपति । सा प्रसिद्धेष्टिः संतिष्ठते । ऽथ पौर्णमासवैमृधाभ्यामिष्ट्वा यजमानायतन उपविश्य चेष्टा श्मश्वा लोहितायसस्य च क्षुरेण शीर्षक्ति च वर्तयते परि च वपते पुरस्तादेवाग्रे ऽथ दक्षिणतो ऽथ पश्चादथोत्तरतो ऽथोपरिष्टात्संतिष्ठन्ते चातुर्मास्याः पशवः संतिष्ठन्ते सावित्र्यः ।

॥ १२ ॥ तृतीयः ॥

अथाश्वशालायामश्वं नियच्छन्त्यथैनं तीर्थादानीय पवयित्वा चित्रविषमग्निदीक्षणीयामिष्टिं निर्वपति । तस्यै तावत्युत्सीदन्ति यावन्ति दीक्षणीयायाः । अथाध्वर्युः प्रदक्षिणमावृत्य प्रत्यङ्ङाद्रुत्य पत्नीः संयाज्य प्राङेत्य ध्रुवामाप्याय्य त्रीणि पूर्वाणि वैश्वदेवानि जुहोति स्वाहाधिमाधीताय स्वाहेत्यथ सप्त प्राणाहुतीर्जुहोति प्राणाय स्वाहा व्यानाय स्वाहेत्येकविंशिनीं दीक्षां जुहोति पृथिव्यै स्वाहान्तरिक्षाय स्वाहेति । पञ्चाध्वरदीक्षाहुतीर्जुहोति[1] षडग्निदीक्षा एकामृतुदीक्षां स्रुवो देवानां कर्मणेति । सप्ताहान्येतयेष्ट्या यजत इति । स त्रीणि त्रीण्येव पूर्वाणि वैश्वदेवानि जुहोत्युत्तरामुत्तरामृतुदीक्षां । द्वे[2] अन्तत[2] ऋतुदीक्षे[2] जुहोति महीमू षु सुत्रामाणमित्येतदे-

---

[1] Thus M, °दीक्षाजुहोति the other MSS.

[2] Thus M; वेदेनतेऋतु° Be; वेदनतऋतु° U; वेदनतऋतु° B.

28

वाहदींक्षते । संवत्सरमुख्यं[1] बिभर्ति । द्वादशोपसदो । ऽथैन-
मेता यथाजातं विशः पर्यवस्यन्ति । नेदीय एनमेते[2] कर्मकृत
उपसंगच्छन्ते तक्षाणश्च रथकृतश्च[3] मयकृतश्च[3] कुलालाश्च दयाः
कर्मारा नखकृतः सप्तमे । ऽथैनाꣳस्तक्ष्णः सꣳशास्ति ॥ १३ ॥

एकशतं बैल्वानि दार्वाचितानि छिन्दत[4] तानि प्रवकलानि कृत्वाचाय[5] चिनुतैकविꣳशतिं यूपाञ्छिन्दतैकविꣳशत्यरत्नीन्[6] रज्जुदालमग्रिष्ठं पौतुद्रवावुपस्थावानौ षड् बैल्वान् षट् खादिरान् षट् पालाशान्पालाशमुपशयं पालाशं पात्नीवतं पालाशं विशालयूपमेकतयानि दारुमयाणि पात्राणि कुरुत षट्त्रिꣳशतꣳ स्रुवान्दीर्घदण्डान् षट्त्रिꣳशतमनुवेषान्दीर्घदण्डाꣳश्चत्वारि[7] वाष्टौ वेन्द्राणमानि चतुस्रक्काणि हस्वस्रक्काणि यथा समानि यूपार्यैः स्रुरपरिमितान्यारोहणमहानसानि कुरुतैकं वैतसं कटं कुरुताश्वस्योपस्तरणायेत्यथैतान्यथकृतः सꣳशास्ति

---

१ °मुख्यं M.

२ एवमेवे M.

३ °कृताश्चामयकृत° M; °कृताश्चायकृत° Be: the other MSS. are defective; cp. infra 219, 1.

४ Thus M (we expect छिन्त), छिंदंति the other MSS.

५ Uncertain; कृत्वारचायां M; कृत्वायचायं BU; कृत्वायचायं Be (pr. m.), कृत्वाचायं Be (sec. m.?); cp. infra xv. 19 (223, 19).

६ Thus M; °त्यरत्निं the other MSS.

७ Thus (only °वेषां°) M; षट्त्रिंशतं दर्वीं दीर्घदंडांश्च° UBe; B om. these words. What is meant by अनुवेष I do not see. Read perhaps °शतं दर्वीर्दीर्घदण्डाश्च°; cp. p. 224 8.

स्थरथं कुरुतापरिमितान्वयान्कुरुतेत्यथैताञ्चर्मकृतः संशास्त्यपरिमितं चर्मण्यं कुरुतेत्यथैनान्कुलालान्संशास्ति यथैकविंशतिविधायाग्नय एवमिष्टकाः कुरुत तिस्रो महतीः कुम्भीः कुरुत यथाश्वं तूपरं गोमृगमित्येतान्माङ्गाञ्छ्रपयेयुरपरिमिता स्थालीः कुरुतेति ॥ १४ ॥

अथैतान्कालायसकृतः संशास्ति सायकं कुरुत सिक्तिमंकल्पोदकं[1] क्षुरं क्षुरत्सरुꣳ सुवर्णꣳ सुवर्णत्सरुं चतुरः कालायसान्लोहायसत्सरूꣳश्चतुरो लोहायसान्कालायसत्सरून्षट्त्रिꣳशतꣳ सुवर्णान्रजतत्सरून् षट्त्रिꣳशतꣳ रजतान्सुवर्णत्सरूꣳस्त्रीणि च शतानि त्रयस्त्रिꣳशतं च सौवर्णानाꣳ सूचीनां त्रीणि च शतानि त्रयस्त्रिꣳशतं च राजतानां त्रीणि च शतानि त्रयस्त्रिꣳशतं च सैसानामेकं कालायसस्य कमण्डलुं कुरुताश्वतेजन्यै अपणायेत्यथैतान्सुवर्णकृतः संशास्ति परःशतꣳ शतपलान्निष्कान्कुरुत सुवर्णरजते महिम्नोः पात्रे कुरुतैकतयानि सौवर्णानि पात्राणि कुरुत यावत्यः पत्नयस्तावतः[2] सौवर्णानुपशयान्कुरुत रजतग्रन्थीन्राजतान्वा सुवर्णग्रन्थीन्यावत्यः पत्नयस्तावन्ति[3] सौवर्णानि कुम्बकुरीराणि कुरुत रजतशङ्कूनि राजतानि वा सुवर्णशङ्कूनि यावत्यः पत्नयस्तावतः[4] सौवर्णान्क-

---

१ I have simply accepted the reading of M; if it is correct, I do not see; सक्तिमदृक्षोदकं Be B; सक्तिमदक्षादकं U.

२ पत्न्यः MSS., but cp. Āp. xx. 157 and infra.

३ पत्न्य॰ MBU; पत्नय॰ Be.

४ पत्न्य॰ all.

मण्डलूंकुरुत रजतराशांश्चाराजतान्वा सुवर्णराशानेकꣳ सौवर्णं विधवनं कुरुत त्रीणि सौवर्णानि धवित्राणि कुरुत रजतदण्डानि राजतानि वा सुवर्णदण्डानि सहस्रꣳ सौवर्णान्काचान्कुरुत सहस्रꣳ राजतान्सहस्रꣳ सामुद्रान्हिरण्मयं कशिपु[1] हिरण्मयं[2] षड्वीशꣳ[2] हिरण्मयꣳ[2] संदानमिति[2] । ॥ १५ ॥

अथैतानध्वरकृतः[3] सꣳशास्त्यपरिमितान्यष्टमानि कुरुतेत्यथास्यैतान्यन्यान्युपक्लृप्तानि भवन्ति शतं घृतचर्माणि शतं मधुचर्माणि शतं तण्डुलचर्माणि शतं पृथुकचर्माणि शतं लाजाचर्माणि शतं करम्भचर्माणि शतं धानाचर्माणि शतꣳ सक्तुचर्माणि शतं मस्तुचर्माणि शतं प्रियङ्गुतण्डुलचर्माणीत्यथास्यैत एकविꣳशतिः प्रतिप्रस्थातारः सꣳशिष्टा भवन्त्यात्मना द्वाविꣳशास्ते[4] जनपदेभ्यः पशून्समचन्ति[5] तथारूपान्यथारूपाꣳस्ते विदुर्ग्रामेषु ग्राम्यानचन्त्यरण्य आरण्यान्गिरिषु गैरेयान्नदीषु नादेयान्पस्वरेषु वयाꣳसि कुम्भीषु सरीसृपानिति । ॥ १६ ॥ चतुर्थः ॥

प्रसिद्धः[6] संनिवापो । ऽथ प्रायणीयेन चरति । प्रायणीयेन चरित्वा पदेन चरति । पदेन चरित्वार्षभे चर्मन्सहस्रेण

---

१ ०पु॑ M.

२ Thus M; हिरण्मयं विंशंहिरण्मयं संदानानीति BU Be (pr. m.); हिरण्मयमुपबर्हणं षट्चिंशं हिरण्मयं संदानानीति Be (sec. m.).

३ Thus M; ०नाध्वसंस्कृतः the other MSS.

४ ०विंशतिस्ते M.

५ Thus M; समर्चन्ति the other MSS.

६ प्रसिद्धं M.

राजानं क्रीत्वोह्यातिथ्यं निर्वपत्यातिथ्येन प्रचर्याथान्वहं प्रवर्ग्योपसद्भ्यां प्रचरति । द्वादशाह एवैष । एकविंशतिविधोऽग्निर्निधीयते । तस्यैकविंशतिच्छदिः सदो भवत्यथाहवनीयं प्रणयत्याहवनीयं प्रणीय सदोहविर्धाने संमिनोति । सदोहविर्धाने संमित्याग्नीषोमौ प्रणयत्यग्नीषोमौ प्रणीय यूपस्याहृता यूपमुच्छ्रयति । स्वर्वन्तꣳ रज्जुदालमग्निष्ठमुत्सृज्याग्नीषोमीयं पशुमुपाकरोति । तस्य प्रसिद्धं वपया चरित्वा वसतीवरीर्गृहीत्वाथ पशुपुरोडाशं निर्वपति । तमनुवर्तन्तेऽष्टौ देवसुवाꣳ हवीꣳष्यग्नये[1] गृहपतय[1] इत्येतान्यग्नये[1] गायत्रायेत्येषा च दशहविरिष्टिसंस्था एता याज्यापुरोनुवाक्या भवन्ति समिद्दिशामाशया नः सुवर्विदितीडान्ताः पशुपुरोडाशाः संतिष्ठन्ते । पत्नीसंयाजान्ताः पशुर्हृदयशूलान्त इत्येके । ऽथ वसतीवरीः परिहृत्य पयाꣳसि विशिष्योपवसन्त्यथातो महारात्र एव बुध्यन्ते । समानं कर्म परिधीनां[2] परिधानात्परिधिष्वनुवर्तयति कस्त्वा युनक्ति स त्वा युनक्त्विति षण्मध्यमे षड् दक्षिणार्धे पञ्चोत्तरार्धे । ऽथ राजानमुपावहृत्य प्रातरनुवाकमुपाकरोति । परिहिते प्रातरनुवाकेऽपो ऽच्छैत्यद्भिरुदैत्यग्निष्टोमं क्रतुमुपैति । प्रसिद्धो ऽभिषवः । प्रसिद्धं ग्रहा गृह्यन्ते । समानं कर्म पवमानात्पवमानꣳ स्वस्त्यन्याचति बर्हिष्च शतपत्रं चायाहोद्गात-

१ अग्नये गृ॰ इत्येतानि om. M.

२ परिधि M.

वर्ंहिष्ठ ते शतपक्षं चाश्वो म उद्गायत्विति। ते ऽस्य वालधिꣳ समन्वारभन्ते ऽग्निष्टे वाजिन्युङ्क्तु त्वारभे स्वस्ति मा संपारय वायुष्टे वाजिन्युङ्क्तु त्वारभे स्वस्ति मा संपारयादित्यस्ते वाजिन्युङ्क्तु त्वारभे स्वस्ति मा संपारयेत्यथोदञ्चो ऽभि[1] पवमानꣳ सर्पन्त्युत्तरत एष वडबाव्रज उच्छ्राय्या परिश्रितो भवति। तं विहृषन्त्यभ्यश्वं वडवाः क्रन्दन्त्यभ्यश्वो वडवाः क्रन्दति। सो ऽश्वोद्गीथस्तत्पुण्या वाचः संप्रवदन्ति। ॥ १७ ॥

उदगासीदयमश्वो मेध्य आयुरुदगासीत्क्षत्रमुदगासीद्ब्रह्मवर्चसमुदगासीदिदमुदगासीदिदमुदगासीदिति पुण्या वाचः संप्रवदन्त्युत्सृजन्ति वडबा। अश्वशालायामश्वं निपद्यन्त्यथास्मा आसुकुम्भिकमन्नमुपकिरन्त्यथाहोद्गातर्धेनुशतं[2] च ते शतपक्षं च त्वं म उद्गायेति। तस्य चतसृषु बहिष्पवमानो[3]। ऽष्टाखष्टाखाख्यानि[3]। द्वादशो माध्यंदिनः पवमानः। षोडशानि पृष्ठानि। सविꣳश[4] आर्भवः[4] पवमानश्चतुर्विꣳशमग्निष्टोमसाम। तं चतुष्टोम इत्याचक्षते। समानं कर्माश्विनाद्ग्रहादाश्विनं ग्रहं गृहीत्वैकादश रशना आदाय यूपमभ्यैति। सर्वेषाꣳ रज्जुदा-

---

१ भि all.

२ Thus (आसुकुम्भिकमन्नमु°) M; आकुम्भसंभिनमु° the other MSS.

३ Thus corrected, cp. infra xviii. 34 and S'at. Br. xiii. 5. 1. 1. °पवमानोष्टाष्टा न्याख्यानि, with ख्या above the lacuna, M; °पवमानेष्टाष्टा-न्याख्यानि BU; °पवमानोऽष्टाष्टान्याख्यानि Be.

४ Thus M; सविंशतिरार्भवः BU; विंशतिरार्भवः Be; cp. infra l.c.

त्वमग्निष्ठमुत्सृज्यैकादशिनान्पशूनुपाकरोति । तेषां प्रसिद्धं वपाभिश्चरित्वा प्रसर्पन्ति प्रातःसवनाय । तदृजुधा संतिष्ठते । प्रसर्पन्ति माध्यंदिनाय सवनाय । प्रसिद्धो ऽभिषवः । प्रसिद्धं ग्रहा गृह्यन्ते । समानं कर्म दाक्षिणेभ्यो । दाक्षिणानि हुत्वाष्टौ संवर्गाहुतीर्जुहोत्यर्वाङ् यज्ञः संक्रामत्विति । तृतीयं दक्षिणानां ददाति । वैश्वकर्मणानि हुत्वा नव पर्याप्तीर्जुहोति भूतं भव्यं भविष्यदिति । नाचाम्यभिषेको । ऽहीनसंततिं करोत्यृजुधा माध्यंदिनꣳ सवनꣳ संतिष्ठते । प्रसर्पन्ति तृतीयसवनाय । प्रसिद्धमादित्यग्रहेण चरित्वाग्रयणं गृह्णाति । समानं कर्म पवमानात्पवमानेन चरित्वा स्वे धामन्पशुभिश्चरति[1] । तेषां नाना मनोता नाना देवता नाना प्रत्यभिमर्शना नाना वसाहोमाः समानो वनस्पतिः समानः स्विष्टकृत्प्रैषवान्समानेडा समान्यो दिशो । नाना दिश इत्येके । समानं कर्म पत्नीसंयाजेभ्य । उपकाश एवैषो ऽग्निष्टोमश्चतुष्टोमः संतिष्ठते पत्नीसंयाजान्तः । ॥ १८ ॥ पञ्चमः ॥

अथास्यैतानि व्रतमौचाणि चर्माण्युपस्तीर्णानि भवन्त्युत्तराꣳ श्रोणिमुत्तरेण पञ्चसꣳहितान्यथैतेषां हतचर्मणां विꣳशतिं वा चतुर्विꣳशतिं वापोद्धृत्याथेतरैरक्षाणि संप्रयुवन्त्यथैतेषां दार्वाचितानां विꣳशतिं वा चतुर्विꣳशतिं वा मध्ये ऽग्नेरचायं[2]

---

१ चरंति M.

२ Thus M; ग्रेरचासं BU; ग्ररायसं Bo.

चित्वायेतराणि[1] संछिद्यसंछिद्यैव संप्रकिरन्ति । तदेतां चतुरस्रां देवपुरमध्यात्ममायातयत्यपि वा पद्मपुच्छानभिनिरूहति[2] यथा समावती यूपाग्रैः स्याद्यथैनाꣳ[3] समुच्छ्रित्य[3] परिश्रयन्ति । तस्योदीचीं द्वारं कुर्वन्ति । तदेतानीन्द्राणसान्युपवर्तयन्ति चत्वार्यनुदिशमवान्तरदिशास्वितराणि यद्यष्टौ भवन्ति । तेषां चत्वारश्चत्वार एकैकमधिरोहन्ति दशान्ये रात्रिकर्मिणो । ऽथैभ्य स्थालीभिराज्यान्यभिहरन्त्यष्टमैरन्नान्यथाध्वर्युरादत्ते[4] स्रुवं च दीर्घदण्डं दर्विं[5] च दीर्घदण्डामाददत एकविꣳशतिं[6] प्रतिप्रस्थातारो दशान्ये रात्रिकर्मिणो । ऽथाध्वर्युः स्रुवेणाज्यस्योपहत्य त्रीणि पूर्वाणि वैश्वदेवानि जुहोति । स्वाहाधिमाधीताय स्वाहेति स्रुवैरेवाज्यानां जुह्वति दत्वते स्वाहेति दर्वैरन्नानामदन्तकाय स्वाहेति । त एवमेवैतमनुवाकं । यदैतस्यानुवाकस्य पारं यन्त्यथैतेनानुवाकेन व्यवदधाति । ॥ १९ ॥

पूर्वा स्तोकीया अथैतमनुवाकं दिश्या । अथैतमनुवाकमुत्तरा स्तोकीया अथैतमनुवाकमेकविꣳशिनीं दीक्षामथैतमनुवाकमृतुदीक्षा अथैतमनुवाकमश्वस्य सावित्राण्यथैतमनुवाकं ।

---

१ चित्वा॰ M.

२ Thus M; ॰पुच्छानामभिनिरूहति Be; ॰पुच्छानामभिनिरूहन्ति U; ॰पुच्छ-नामभिनिरूहयन्ति B.

३ ॰थैनांस्सम॰ Be.

४ ॰होमैरन्नान्य॰ M, but cp. supra p. 220, 6.

५ Thus MBU; दर्वीं Be.

६ Thus M; ॰शतिः Be; ॰शति BU.

त एवमेवैताननुवाकानेतेनैवानुवाकेन । यद्देतेषामनुवाकानां पारं यन्त्यथैताननुवाकानुपसंक्रामन्ति वैश्वदेवानि चाश्वाङ्गानि च द्वावश्वरूपाणामोषधीनां च वनस्पतीनां च द्वावपाꣳ संधानानां चाभिधानानां च संप्लवस्त्वैक । उक्तः स्वारो होमस्त एवमेवैताननुवाकानेतेनैवानुवाकेन । यद्देतेषामनुवाकानां पारं यन्त्यथैताननुवाकानभिनिवर्तन्ते ॥ २० ॥

एकस्मै स्वाहा द्वाभ्याꣳ स्वाहेति । त एवमेवैताननुवाकानेतेनैवानुवाकेन पुनःपुनरभ्युपाकारं जुह्वत्यथ वसतीवरीणां परिहरणकाले ऽधिद्रवन्ति । परिहृतासु वसतीवरीष्वाङ्गतायाꣳ सुब्रह्मण्यायां पुनरेवाधिद्रवन्ति । त एवमेवैताननुवाकानेतेनैवानुवाकेन पुनःपुनरभ्युपाकारं जुह्वतः समाप्नुवन्ति । तानि वा एतान्यश्वस्य सर्वायुषाणीत्याचक्षते । ॥ २१ ॥

समाप्नय इति हैक आहुरेतैर्हि सर्वाꣳ रात्रिं जुह्वत्यथ प्रातरनुवाकमुपाकरिष्यन्तावधद्रवतो ऽध्वर्युश्च प्रतिप्रस्थाता च द्वावन्यावधिद्रवतो रात्रिकर्मिणावथ[1] राजानमुपावहृत्य प्रातरनुवाकमुपाकरोति । परिहिते प्रातरनुवाके ऽपो ऽच्छैत्यग्निरुद्रैत्युक्थ्यं[2] क्रतुमुपैति । समानं कर्मोपाꣳश्वोरुपाꣳशुꣳ होष्यन्निन्द्राणममधिद्रुत्य चतस्रः सुवाहुतीर्जुहोत्युषसे स्वाहा व्युष्ट्यै स्वाहोदेष्यते स्वाहोद्यते स्वाहेति । प्रसिद्धो ऽभिषवः । समानं

१ ०कर्मिणावथ M.

२ रुद्रैति M; रुद्रेति the other MSS.

कर्मान्तर्यामादन्तर्यामꣳ होष्यन्निन्द्राणममधिद्रुत्य चतस्रः सुवाङ्कतीर्जुहोत्युदिताय स्वाहा सुवर्गाय स्वाहा लोकाय स्वाहा सर्वस्मै स्वाहेत्येवैतदुदित आदित्य उपरमन्ति रात्रिकर्मिणो । व्यवच्छिन्दन्ति परिश्रयणानि । निवर्तयन्तीन्द्राणमानि । प्रसिद्धꣳ सुवर्णद्रव्यैर्ग्रहा गृह्यन्ते । समानं कर्माग्रयणाद्ग्रहादाग्रयणं गृहीत्वा सुवर्णरजताभ्यां द्वौ महिमानौ ग्रहौ गृह्णाति यः प्राणतो य आत्मदा इत्यथोक्थ्यं गृह्णाति । समानं कर्माश्विनाद्ग्रहादाश्विनं ग्रहं गृहीत्वा चतुर्विꣳशतिꣳ रशना आदाय यूपानभ्यायन्ति चतस्रश्चतस्र इतरे परिकर्मिणः । स्वर्वन्तꣳ राज्जुदालमग्निष्ठमुत्सृज्य तस्माद्दक्षिणमेव पूर्वं पौतुद्रवमुपस्थावानमुच्छ्रयति ॥ २२ ॥

अथोत्तरं । ऐन्द्रदक्षिणतो बैल्वाꣳस्त्रीनुत्तरतस्त्रीनैन्द्रदक्षिणतः खादिराꣳस्त्रीनुत्तरतस्त्रीनैन्द्रदक्षिणतः पालाशाꣳस्त्रीनुत्तरतो । ऽथैतं पालाशमुपशयं दक्षिणतो न्यस्यति तूष्णीꣳ । स्वर्वन्तान्यूपानुत्सृज्याथाध्वर्युरग्निष्ठ उपाकरोत्यश्वं तूपरं गोमृगमित्येताꣳस्त्रीन्प्राजापत्यानथ पर्यङ्ग्यानुपाकरोत्याग्नेन्द्रं[1] कृष्णललाममैन्द्रापौष्णं पौष्णमाग्नेयौ कृष्णग्रीवौ त्वाष्ट्रौ लोमशसक्थौ शितिपृष्ठौ बार्हस्पत्यौ धात्रे पृषोदरꣳ सौर्यं बलक्षं पेत्वमित्यथाध्वर्युरग्निष्ठ एवोपाकरोत्यग्नये ऽनीकवते रोहिताञ्जिरनड्वा-

१ ०त्याग्नेन्द्रं M (sec. m.); ०त्याग्नेयं M (pr. m.) and all the other MSS., but cp. infra xv. 26 med. (229. 16).

नित्येकादशांथाध्वर्युरग्निष्ठ एवोपाकरोति सोमाय स्वराज्ञे ऽनोवाहावनड्वाहाविति इन्द्रिनो[1] । ऽथाध्वर्युरग्निष्ठ एवोपाकरोतीन्द्राय राज्ञे सूकर इत्येकादशारण्यान्सैषाग्निष्ठे पशुषष्टिर्भवत्यथ रोहितो धूम्ररोहित इति दशाष्टादशिनो ऽनुवाकास्तेषां पूर्वा एव नवतो दक्षिणेषु यूपेषूपस्थापयन्त्युत्तरा नवत उत्तरेष्वाग्नेन्द्रा दक्षिणेषां मुख्या भवन्त्यैन्द्रासूरा उत्तरेषामथ मयुः प्राजापत्य इति दश दशिनो ऽनुवाकास्तेषां पूर्वा एव पञ्चतो दक्षिणेषु यूपेषूपस्थापयन्त्युत्तराः पञ्चत उत्तरेषु । सोमापौष्णा दक्षिणेषां मुख्या भवन्त्यैन्द्रापौष्णा उत्तरेषामथैतस्मिन्नुपह्वये मनसैव यं द्वेष्टि तमुपाकरोति । यद्यु वै न देष्यादुस्ते ऽमुरित्यनुदिशत्यैतस्मिन्काल आहवनीये स्रुवाहुतिं जुहोत्युपाकृताय स्वाहेति । ॥ २३ ॥ षष्ठः ॥

अथैतमश्वमग्रेण यूपान्स्वरथे युनक्ति युञ्जन्ति ब्रध्नमरुषं चरन्तं परि तस्थुष इत्यथास्य पृष्ठं मर्मृज्यते रोचन्ते रोचना दिवीत्येवमेवोत्तरं योग्यं युनक्ति । तस्यैवमेवोत्तरतः[2] प्रष्टिमुपनियुनक्ति । तयोः पृष्ठं मर्मृज्यते युञ्जन्त्यस्य काम्या हरी

१ चतुर्विंशतिं पशून् i.s.o. इन्द्रिनः M. But TS. v. 6. 21 are enumerated only 22 paśus. The reading of M, however, would agree with the statement made infra (l. 3), that there are 60 paśus (3+11+11+24 (22 acc. to the Saṃhitā!)+11). Should the text of TS. l.c. be incomplete?

२ °वोत्तरं M but cp. supra xi. 6 (p. 73, 3); this passage is left out in all the other MSS.

विपक्षसा रथे। शोणा धृष्णू नृवाहसेत्यथ केतुं कृण्वन्नकेतव इति ध्वजं प्रतिमुञ्चत्यथ यजमानं वर्मसंनहनीयाभिः संनह्यति जीमूतस्येव भवति प्रतीकमिति चतुर्दशभिर्यथारूपमथ रथमुपतिष्ठते वनस्पते वीड्वङ्गो हि भूया इति तिसृभिरनुच्छन्दसमथ दुन्दुभिमुपश्वासयत्युपश्वासय पृथिवीमुत द्यामिति तिसृभिरनुच्छन्दसमथ दक्षिणᳲ ह्रदमभिप्रयाति यौक्ते पृष्ठं क्रमैरत्यक्रमीदाज्याक्रान्ताजीति त्रिभिरनुवाकैरा क्रोडेभ्योऽश्वानभिधावयन्त्यथैतᳲ[1] रथं प्रदक्षिणमावर्त्य शाखामानयति यद्वातो अपो अगमदिन्द्रस्य तनुवं प्रियाम्। एतᳲ स्तोतरेतेन पथा पुनरश्वमावर्तयासि न इति' तानध्वर्युरुत्तराभि स्तोकीयाभिरन्वैत्यग्नये स्वाहा सोमाय स्वाहेत्येतेनानुवाकेन पुनःपुनरभ्युपाकारं यावदेषाᳲ स्तोका उपरमन्त्यथैतमश्वमग्रेण यूपान् स्वरथात्प्रमुच्य सौवर्णेन संदानेन संदित्वाध्वर्योरावसथं द्वियोगं वर्तयन्त्यथ महिषी वावाता परिवृक्तीत्येता अस्मै [2]गन्धान्गणान्मणीᳲश्चादायाभ्यायन्त्यश्वं' तस्य यत्प्राक् क्रोडात्तन्महिष्यभ्यनक्ति वसवस्त्वाञ्जन्तु गायत्रेण छन्दसेति पौतुद्रवेण प्रतिहितानां जायाभिः सहाथ यत्प्रतीचीनं क्रोडादा नाभेस्तद्वावाताभ्यनक्ति रुद्रास्त्वाञ्जन्तु त्रैष्टुभेन छन्दसेति ॥ २४ ॥

गौल्गुलवेनाराज्ञां जायाभिः सहाथ यत्प्रतीचीनं नाभेरा

---

१ °भिधापर्यत्य° M (as supra xv. 5 and 6, p. 209. 7, 210. 12); °भिनापर्यत्य° the other MSS.

२ Thus M; बंधान्ग्रमथान्मथी° Be; गंधाग्रथामथी° BU.

पुच्छात्तत्परिवृत्यभ्यनक्त्यादित्यास्त्वाञ्जन्तु जागतेन छन्दसेति मौक्तेन[१] सूतग्रामणीनां च क्षत्तसंग्रहीतॄणां च जायाभिः सह । तस्य ये प्राचीनं वक्षसः केशास्तेषु महिषी सहस्रꣳ सौवर्णान्काचानावयति भूरिति प्रतिहितानां जायाभिः सहाथ ये प्रतीचीनं वक्षसः केशास्तेषु वावाता सहस्रꣳ राजतान्काचानावयति भुव इत्यराज्ञां जायाभिः सहाथैषा परिवृक्ती वालेषु सहस्रꣳ सामुद्रान्काचानावयति सुवरिति सूतग्रामणीनां च क्षत्तसंग्रहीतॄणां च जायाभिः सह । यथेतं पत्नयो[२] यन्त्यथ महिषी वावाता परिवृक्ती साहानसौ[३] दासीत्येता[४] अस्मै मधुमिश्राँल्लाजानुपकिरन्ति ॥ २५ ॥

लाजी३ञ्छाचीꣳ३न्यशो[५] ममां३[५] यव्यायै गव्याया एतद्देवा अन्नमत्तैतदन्नमद्धि प्रजापत इति । यस्यै ह्यन्नमत्ति तस्यै ह्यार्धुका प्रजा[६] भवतीति[६] विज्ञायते । ऽथैतमश्वꣳ संदानात्प्रमुच्य निर्मन्थ्यस्याहृता निर्मन्थ्येन प्रचरति प्रहुत्याभिहुत्याथाध्वर्युरग्निष्ठे नियुनक्त्यश्वं तूपरं गोमृगमित्यथास्य पर्यङ्ग्यान्नियुनक्त्याग्नेन्द्रं कृष्णललाममैन्द्रापौष्णं पौष्णमित्येताꣳस्त्रीन्ललाट ।

---

१ Thus M; मौक्ते the other MSS.; cp. Āp. xx, 15. 12 (मौक्तिकेन) ।

२ Thus all (not पत्न्यो) ।

३ Thus M; महानसौ BU; महानषि Be.

४ Thus M; दौसौ॰ the other MSS.

५ Pluti sign not in MSS.

६ M om. प्रजा and reads भवंतीति ।

आग्नेयौ कृष्णग्रीवौ ग्रीवासु । त्वाष्ट्रौ लोमशसक्थौ सक्थ्योः । शितिपृष्ठौ बार्हस्पत्यौ पृष्ठे । धात्रे पृषोदरमुदरे । सौर्यं बलक्षं पेत्वं पुच्छ इत्यथाध्वर्युरग्निष्ठ एव नियुनक्त्यग्नयेऽनीकवते रोहिताञ्जिरनड्वानित्यथाध्वर्युरग्निष्ठ एव नियुनक्ति सोमाय स्वराज्ञेऽनोवाहावनड्वाहावित्यथाध्वर्युरग्निष्ठ एव नियुनक्तीन्द्राय राज्ञे सूकर इति । सर्वानेवारण्यान्नियोजनेनैवानुवर्तयते[१] यांश्च ग्राम्याणां पशूनामुत्सृजन्त्यथारण्यांश्चाथ दक्षिणान्प्रतिप्रस्थातारो नियुञ्जन्त्यथोत्तरानथैतमश्वं नित्येन प्रोक्षणेन प्रोक्ष्यातिप्रोक्षणेन प्रोक्षति जज्ञि बीजमिति । नित्येनैवेतरान्पशूनथ दक्षिणान्प्रतिप्रस्थातारः प्रोक्षन्त्यथोत्तरानथैतमश्वमन्तरेण यूपान्प्रोक्षणीरवघ्रापयति ॥ २६ ॥

अग्निः पशुरासीत्तेनायजन्त स एतं लोकमजयद्यस्मिन्नग्निः स ते लोकस्तं जेष्यस्यथावजिघ्र । वायुः पशुरासीदादित्यः पशुरासीदिति । यदि नावजिघ्रति पुनरेवावघ्रापयत्यग्निः पशुरासीत्तेनायजन्त स एतं लोकमजयद्यस्मिन्नग्निः [२]स ते लोकस्तस्मात्त्वान्तरेष्यामि यदि नावजिघ्रसि । वायुः पशुरासीदादित्यः पशुरासीदिति । यदि नावजिघ्रति पुनरेवावघ्रापयत्यग्निः पशुरासीत्तेनायजन्त स एतं लोकमजयद्यस्मिन्नग्निः[२] स ते लोकस्तं जेष्यसि यद्यवजिघ्रसि । वायुः पशुरासीदादित्यः

१ Thus M; °वर्तयति the other MSS.

२ ... २ This passage is found in M only.

पशुरसीदितीश्वरो ऽवघ्रातोरित्येतस्मिन्काल[1] आहवनीये स्रुवाहुतिं जुहोत्यावब्धाय स्वाहेति । ॥ २७ ॥ सप्तमः ॥

अथेध्मात्समिधमाददान आहाग्नये समिध्यमानायानुब्रूहीत्यभ्यादधातीध्मं । परि समिधꣳ शिनष्टि । वेदेनोपवाजयत्यनूक्तासु सामिधेनीषु स्रुवेणाघारमाघारयति । संमृष्टे स्रुग्भ्यामुत्तरमथासꣳस्पर्शयन्स्रुचावुदङ्ङत्याक्रम्य जुह्वाश्वं[2] तूपरं गोमृगमित्येतान्समनक्त्यथ पर्यङ्ग्यानथेतरानथ दक्षिणानथोत्तरानथ यथायतनꣳ स्रुचौ सादयित्वा प्रवरं प्रवृणीते । प्रसिद्धमृत्विजो वृणीते । सीदति होता । प्रसवमाकाङ्क्षति । प्रसूतः स्रुचावादायात्याक्रम्याश्राव्याह समिद्भ्यः प्रेष्येति । समिद्धो अञ्जन्कृदरं मतीनामित्येता अश्वस्याप्रियो भवन्ति । वषट्कृते जुहोति प्रेष्य प्रेष्येति चतुर्थाष्टमयोः समानयमानो ऽष्टमे सर्वꣳ समानयते । परि स्वाहाकृतीभ्यः सꣳस्रावꣳ शिनष्टि । दश प्रयाजानिष्ट्वोदङ्ङत्याक्रम्य सुवर्णं च सायकं च याचति । तौ जुह्वामक्त्वा ताभ्यामश्वं तूपरं गोमृगमित्येतान्समनक्ति । कार्ष्णायसैः पर्यङ्ग्यान्लोहायसैरितरान्सुवर्णैर्दक्षिणान्रजतैरुत्तरानथ यथायतनꣳ स्रुचौ सादयित्वाह पर्यग्नये क्रियमाणायानुब्रूहीति । नित्ये पर्यग्निकरणे ऽनुवर्तयति मेषस्त्वा पचतैरवतु लोहितग्रीवश्छागैः शल्मलिरिति । पर्यग्निकृतानामेतेषां पशूनामुत्सृजन्त्यवौ[3] द्वे धेनू

---

१ Thus (वघ्रातो॰) M. only ; वघ्राणे॰ or वघ्रापे॰ the other MSS.

२ जुह्वा om. M.

३ Thus M ; ॰त्सृजन्त्यपि the other MSS.

भौमी दिग्भ्यो वडवे द्वे धेनू भौमी वैराजी पुरुषी द्वे[1] धेनू भौमी इन्द्राय राज्ञे सूकर इति सर्वानेवाचारण्यानथ[2] पर्यग्निकृतैः पशुभिरुदञ्चः प्रतिपद्यन्ते । तेषामैन्द्रासूरा उत्तरार्धा भवन्त्यथ उपचारतो । ऽथैनेताध्वर्युर्वपाश्रपणीभ्यामन्वारभते । पृथगितरान्परिकर्मिण उदञ्चो नयन्त्यनुपूर्वमव्यतिषजन्तो । ऽथ याचति बर्हिश्च शतपलं च कृत्तिं चाधीवासं च कशिपु तार्प्यं चेत्युत्तरत एतद्धक्ष्णꣳ सꣳस्तीर्णं भवति । तदश्वाय निहन्यमानायोपास्यति बर्हिश्च शतपलं च कृत्तिं चाधीवासं च कशिपु चेत्येतत्पञ्चतयं । तार्प्येण संज्ञप्यमानं यामेन साम्ना प्रस्तोतानूपतिष्ठते । पृथगितरेभ्यस्तत इतरान्प्राचो वोदीचो वा निघ्नन्त्यंकणतो मायून्संज्ञपयतेत्युक्त्वैतेनैव यथेतमेत्य पृषदाज्यावकाश आसते । ऽथैतौ ब्रह्मोद्यं वदतो होता च ब्रह्मा चान्तरेण यूपं चाहवनीयं च । दक्षिणतो ब्रह्मा भवत्युत्तरतो होता । होता ब्रह्माणं पृच्छति ॥ २८ ॥

किꣳ स्विदासीत्पूर्वचित्तिः किꣳ स्विदासीद्बृहद्वयः । किꣳ स्विदासीत्पिशंगिला किꣳ स्विदासीत्पिलिप्पिलेति । तमितरः प्रत्याह द्यौरासीत्पूर्वचित्तिरश्व आसीद्बृहद्वयः । रात्रिरासीत्पिशंगिलाविरासीत्पिलिप्पिलेति । तमितरः पृच्छति कः स्विदेकाकी चरति क उ स्विज्जायते पुनः । किꣳ स्विद्धिमस्य भेषजं किꣳ स्विदावपनं महदिति । तमितरः प्रत्याह

---

१ द्वेद्वे M.

२ चच om. M.

सूर्य एकाकी चरति चन्द्रमा जायते पुनः । अग्निर्हिमस्य भेषजं भूमिरावपनं महदिति । तमितरः पृच्छति पृच्छामि त्वा परमन्तं पृथिव्याः पृच्छामि त्वा भुवनस्य नाभिम् । पृच्छामि त्वा वृष्णो अश्वस्य रेतः पृच्छामि वाचः परमं व्योमेति । तमितरः प्रत्याह वेदिमाहुः परमन्तं पृथिव्या यज्ञमाहुर्भुवनस्य नाभिम् । सोममाहुर्वृष्णो अश्वस्य रेतो ब्रह्मैव वाचः परमं व्योमेति । संज्ञप्तान्प्राहुर्जुहोति संज्ञप्ताहुतिं यत्पशवो मायुमक्रषतेत्यथ सप्त प्राणाहुतीर्जुहोति प्राणाय स्वाहा व्यानाय स्वाहेति । षट्त्रिꣳशतमश्वस्तोमीयाञ्जुहोति[1] यदक्रन्दः प्रथमं जायमानो मा नो मित्रो वरुणो अर्यमा ये वाजिनं परिपश्यन्ति पक्वमुत स्मास्य द्रवतस्तुरण्यत इत्यथाभ्यायन्ति शमितार उपेतनेति । पाशेभ्यः पशून्प्रमुच्यमानाननुमन्त्रयते ऽदितिः पाशान्प्रमुमोक्त्वेतानिति । पृथगविशाखाभिरुपमथ्येमां दिशं निरस्यन्त्यरातीयन्तमधरं कृणोमि यं द्विष्मस्तस्मिन्प्रतिमुञ्चामि पाशानित्यथैताः पत्नयः सौवर्णैरुदकमण्डलुभिरुदायन्ति । ता अश्वस्यानुपृष्ठं प्राणानाप्याययन्त्यो[2] यन्त्यनुपूर्वमितरेषां[2] पशूनामथैषा महिषी प्राश्य केशान्वासः परिधाय सौवर्णेन विधवनेन विधुवाना चिरपसलैरश्वं पर्येत्यवन्ती स्थावन्तीस्त्वावन्तु प्रियं त्वा प्रियाणां वर्षिष्ठमाप्यानां निधीनां त्वा निधिपतिꣳ हवा-

---

१ ॰स्तोमीयांजुहोति M. (cp. Āp. xx. 21. 11); ॰स्तोमीयंजु॰ (cp. T. Br. III. 9. 12. 1.) the other MSS.

२ Thus M; ॰प्याययंत्यनुपूर्वे॰ the other MSS.

सहे वसो ममेति ' त्रिः परीत्योत्तरतस्तिष्ठति प्रतिहितानां जायाभिः सहैवं वावाता राज्ञां जायाभिः सहैवं परिवृक्ती सूतग्रामणीनां च क्षत्तसंग्रहीतॄणां च जायाभिः सह ' यथेतं पत्नयो यन्त्यथैतमश्वꣳ सर्वैरलङ्कारैरलङ्कृत्य परिश्रयन्ति ' तस्योदीचीं द्वारं कुर्वन्त्यथैतां महिषीꣳ सर्वैरलङ्कारैरलङ्कृत्य[1] तां[1] निह्नुवानां[1] गर्हमाणामध्वर्युरुदानयत्यम्बे अम्बाल्यम्बिके न मा नयति कश्चन। ससस्त्यश्वक इति ' साश्वमुत्तरत उपसंविश्य शिरस्तो वास उपधत्ते[2] ' तावध्वर्युस्तार्प्येण[2] संप्रोर्णोति सुभगे काम्पीलवासिनि सुवर्गे लोके संप्रोर्ण्वाथामित्यथैषा महिष्युपस्थे शेफमाधत्त आहमजानि गर्भधमा त्वमजासि गर्भधम्। तौ सह चतुरः पदः संप्रसारयावहा इति ' तामध्वर्युरनुमन्त्रयते वृषा वाꣳ रेतोधा रेतो दधात्विति प्रतिपद्य य आसां कृष्णे लक्ष्मणि सर्दिगृदिं परावधीदित्यातो ' ऽथैषा पत्नी गर्हते ॥ २९ ॥

अम्बे अम्बाल्यम्बिके न मा यभति कश्चन। ससस्त्यश्वक इति ' तां यजमानो ऽभिमेथत्यूर्ध्वामेनामुच्छ्रयतादिति ' सा तथैव गर्हते ' तां वावाताभिमेथति यद्धरिणी यवमत्तीति ' सा तथैव गर्हते ' तां परिवृक्त्यभिमेथतीयं यका शकुन्तिकेति ' सा तथैव गर्हते ' ताꣳ सर्वं गणा अभिमेथन्ते[3] माता च ते

---

१ Thus M; ॰संह्नतां निह्नवानां the other MSS.

२ Thus M; उपन एता अध्वर्यु॰ Be; उपनैता अध्वर्यु॰ B; उपैता अध्वर्यु॰ U.

३ Thus, ātmanepadam, all.

पिता च त इति । नाच गर्हते । मुहूर्तमश्वमुपसंविश्योपोत्थाय वासः परिधायाद्भिर्मार्जयत आपो हि ष्ठा मयोभुव इति तिसृभिरनुच्छन्दसं दधिक्राव्णो अकारिषमिति चतुर्थीꣳ । सर्व एव सुरभिमतीमृचं जपन्ति ये यज्ञे ऽपूतं[1] वदन्ति । नयन्ति पत्नीं । व्यवच्छिन्दन्ति परिश्रयणमश्वस्यालङ्करणमध्वर्योरावसथꣳ हरन्त्यथैतस्मिन्कल्मलिग्रर्चं आज्यपिष्टानि संयुत्य तैरनुलोममश्वं प्रलिम्पन्त्यथ[2] महिषी वावाता परिवृक्तीत्येता अस्मै गणान्सूचीरादायाभ्यायन्त्यश्वं । तस्य यत्प्राक् क्रोडात्तस्मिन्महिषी सौवर्णाभिः सूचीभिरसिपथान्कल्पयन्त्येति गायत्री त्रिष्टुब् द्विपदा या चतुष्पदेति द्वाभ्यां प्रतिहितानां जायाभिः सहाथ यत्प्रतीचीनं क्रोडादा नाभेस्तस्मिन्वावाता राजताभिरुत्तराभ्यां द्वाभ्यामराज्ञां जायाभिः सहाथ यत्प्रतीचीनं नाभेरा पुच्छात्तस्मिन्परिवृक्ती सीसाभिरुत्तराभ्यां द्वाभ्याꣳ सूतग्रामणीनां च क्षत्तसंग्रहीतॄणां च जायाभिः सह । यथेतं पत्न्यो यन्त्यध्वर्योरावसथꣳ सूचीर्हरन्त्यथ सुवर्णं च सायकं च याचति । ताभ्यामश्वस्य क्रोडमापिनष्टीत्यमश्वं[3] विशास्तेति[3] । कस्त्वा छ्यति कस्त्वा विशास्तीत्येतत्षडृचं यजमानं वाचयति । यदैतस्य सूक्तस्य पारमेत्यथाध्वर्युरश्वस्य क्रोडात्पिशितमुत्पिनष्टी-

१ The avagraha added by me.

२ •म्लिंपंत्यथ MB; •म्लिपत्यथ Be U.

३ Thus M; क्रोडमापिनसिश्रंमश्वंपिरशानमेति Be; क्रोडमापिनविर्धमश्च (श्वं) त्वं पिशानमेति BU.

त्यमश्वं[1] विग्रमतेत्या३मिति[1] । नाश्वस्य वपा भवति । चन्द्रमिव मेदः परिवृत्तꣳ[2] साश्वस्य वपा । वपा[3] तूपरस्यैवं गोमृगस्य । कालायसैः पर्यङ्ग्याणां लोहितायसैरितरेषाꣳ सुवर्णैर्दक्षिणेषाꣳ रजतैरुत्तरेषाम् । ॥ ३० ॥

अश्वस्यैवाध्वर्युर्वपया प्रथमया प्रतिपद्यते । ऽनूचीरितरा आहरन्त्यश्वस्यैव वपायै प्रतितप्यमानायै बर्हिषो ऽग्रमुपास्यत्युपेतरा यच्छन्त्युत्तरतो ऽश्वस्य तूपरस्य गोमृगस्येति वपाः श्रपयन्ति दक्षिणत इतरेषां पशूनामश्वस्यैव वपाꣳ स्वाहाकृत्याभिजुहोत्युपेतरा यच्छन्त्यथ [4]स्वाहाकृतिप्रैषेण चरित्वा मꣳस्रावेण पृषदाज्यमभिघार्याश्वस्यैव वपामभिघारयत्युपेतरा यच्छन्त्यथ पुरस्तात्स्वाहाकृतिꣳ[4] स्वाहाकृतिꣳ हुत्वा सुवर्णेन महिमानं जुहोति तस्य ते द्यौर्महिमेत्यथोपस्तीर्य द्विः स्रुवेणाश्वस्यैव[5] वपाꣳ समवलुम्पन्नाह प्रजापतय इत्युपांशु हयस्य छागस्योस्रस्य वपानां मेदसो ऽवदीयमानस्यानुब्रूहीत्युच्चैर्यावतीः[6] स्रुक्संभवत्यथेतराः पात्र्या वेडसूनेन वोपोद्यच्छन्ते । द्विरभि-

१ Thus (without, however, the pluti sign) M; °मनुचपिनहि इत्य- मश्वं विम्रासवै इत्यामिति Be, and thus also BU (but यं i.s.o. इत्य) ।

२ °वृत्तं MSS. exc. M.

३ वपां M.

४...४ left out in all the MSS. exc. M.

५ एव om. M.

६ वदीयमानानामनु° M, cp. supra xi. 5 (p. 70, 11).— यावती M, यावति the other MSS. cf. supra l.c.

धारयन्त्यथाक्रम्याश्राव्याह प्रजापतय इत्युपांशु हयस्य छागस्योस्रस्य वपा[1]मेदः प्रस्थितं प्रेष्येत्युच्चैर्वषट्कृते वपा[2] जुहोत्यथोपरिष्टाद्व्रजतेन महिमानं जुहोति तस्य ते पृथिवी महिमेत्यथ पर्यङ्ग्याणां वपाभिश्चरन्त्यथेतरेषामथ दक्षिणेषां प्रतिप्रस्थातारो वपाभिश्चरन्त्यथोत्तरेषां । यांश्च ग्राम्याणां पशूनामुदस्याचीदारण्यांश्च स्वाकृत्यस्तेषां वपाभ्यः प्रतिजुहोत्युपांश्वेतेषां पशुजातानां वपाभिश्चरन्ति प्राजापत्यानाꣳ सावित्राणाꣳ सारस्वतानां पौष्णानां याम्यानां पितृदेवतानां द्यावापृथिव्यानां वायव्यानाꣳ सौर्याणां वैश्वकर्मणानामित्यथोपरिष्टात्स्वाहाकृतिꣳ स्वाकृतिꣳ हुत्वा वपाश्रपणीरनुप्रहृत्य समुत्क्रम्य चात्वाले मार्जयन्ते । ऽथ पशून्विशास्ति[3] शमितरित्याह सांवस्य लोमापिकृतीर्मांयस्याखि[4] संशारीर्यथाक्रमेनं[4] विकृत्य शामित्रे कुम्भ्याꣳ समवशमयतादेवं स्तूपमेवं गोमृगमथ दक्षिणमश्वशफं गोमृगकण्ठमिति शामित्रे निष्पचतादथस्मयेन कमण्डलुनाश्वतेजनीꣳ श्रपयतादित्यथ सावित्रꣳ हुत्वा प्रसर्पन्ति प्रातःसवनाय । तदृजुधा संतिष्ठते । ॥ ३१ ॥

अष्टमः ॥

---

१ वपा M ; वपां B Be U.

२ वपां MB ; वपा Be.

३ Thus M ; संशास्ति Be B ; समास्ति U.

४ Thus M ; लोमविकृतीमांस्याखि संशारायथा० B ; लोमाविकृतीमांस्याखि संशारायथा० U ; लोमाविकृतंनती etc. (as U) Be.

अथ सावित्रꣳ हुत्वा प्रसर्पन्ति माध्यंदिनाय सवनाय । प्रसिद्धो ऽभिषवः । प्रसिद्धं ग्रहाः गृह्यन्ते । समानं कर्मा दाक्षिणेभ्यो । दाक्षिणानि हुत्वाष्टौ संवर्गाहुतीर्जुहोत्यर्वाङ् यज्ञः संक्रामत्विति । कामं दक्षिणानां[1] ददाति । वैश्वकर्मणानि हुत्वा नव पर्याप्तीर्जुहोति भूतं भव्यं भविष्यदिति । प्रसिद्धो ऽन्यभिषेको[2] । ऽहीनसंततिं करोत्यृजुधा माध्यंदिनꣳ सवनꣳ संतिष्ठते । ऽथ सावित्रꣳ हुत्वा प्रसर्पन्ति तृतीयसवनाय । प्रसिद्धमादित्यग्रहेण चरित्वाग्रयणं गृह्णात्यथोक्थ्यं गृह्णाति । समानं कर्मा पवमानात्पवमानेन चरित्वाथैतान्पशून्याचत्यश्वं तूपरं गोमृगमित्यथ पर्यङ्ग्यानथेतरानथ दक्षिणानथोत्तरानुत्तरतो ऽश्वस्य तूपरस्य गोमृगस्येति हविरुपसादयन्ति दक्षिणत इतरेषां पशूनामथ वैतसे कटे ऽश्वस्य[3] हृदयं निधाय सुवर्णेन च सायकेन च तस्याग्रे ऽवद्यन्नाह ॥ ३२ ॥

मनोतायै हविषो ऽवदीयमानस्यानुब्रूहीत्येकादशावदानान्यवद्यत्येवं तूपरस्यैवं गोमृगस्य । कालायसैः पर्यङ्ग्याणां लोहायसैरितरेषाꣳ सुवर्णैर्दक्षिणेषाꣳ रजतैरुत्तरेषां । नाश्वस्य[4] तूपरस्य गोमृगस्येति स्विष्टकृते ऽवद्यत्यवद्यन्तीतरेषां पशूनां ।

---

१ M ins. प्रति after कामं and leaves a blank for two akṣaras before दक्षि॰ ।

२ Thus M; भिषवो the other MSS.

३ श्वꣳ M.

४ Thus M; वाश्वस्य the other MSS.

नान्यस्य[1] तूपरस्य गोमृगस्येतीडामवद्यत्यवद्यन्तीतरेषां पशूनामथैतमश्वं[2] वैतसे कटे यथाङ्गं[3] चिनोति । पुरस्तात्प्रत्यञ्चं तूपरमायातयति । पश्चात्प्राचीनं गोमृगमथ जुह्वुपभृतावाददान आह प्रजापतय इत्युपाꣳशु हयस्य छागस्योस्रस्य हविषोऽनुब्रूहीत्युच्चैरत्याक्रम्याश्राव्याह प्रजापतय इत्युपाꣳशु हयस्य छागस्योस्रस्य हविः प्रस्थितं प्रेष्येत्युच्चैर्वषट्कृते तान्सहैव कटेनाग्नावनुप्रहरति ॥ ३३ ॥

द्यौस्ते पृष्ठं क्रमैरत्यक्रमीदाज्याक्रान्वाजीति त्रिभिरनुवाकैरथ पर्यङ्ग्याणाꣳ हविर्भिश्चरन्त्यथैतरेषामथ दक्षिणेषां प्रतिप्रस्थातारो हविर्भिश्चरन्त्यथोत्तरेषां । याꣳश्च ग्राम्याणां पशूनामुदस्थाचीदारण्याꣳश्च स्रुवाहुत्यस्तेषाꣳ हविर्भ्यः प्रतिजुहोत्युपाꣳश्वेतेषां पशुजातानाꣳ हविर्भिश्चरन्तीत्युक्तमेतदथ पुरस्ताद्वनस्पतेः समान्यो दिशः प्रतियजत्यथ वनस्पतिना चरत्यथ पुरस्तात्स्विष्टकृतो गोमृगकण्ठेन प्रथमामश्वतेजनीमुपजुहोत्यथ स्विष्टकृता चरत्येतस्मिन्काल आहवनीये स्रुवाहुतिं जुहोति हुताय स्वाहेति । ॥ ३४ ॥

अथैतं प्रसेकमग्नावायातयति दक्षिणतो वोदञ्चं पश्चादा प्राञ्चं । तस्य स्रुगिव पूर्वार्धो[4] भवत्येवमेव मध्यं । चमस इव

१ Thus M Be ; नानाश्वस्य UB.

२ MSS. exc. M. ins. here पशूनां ।

३ Thus M ; यथासं Be ; यथार्थं BU.

४ पूर्वार्धो M ; पूर्वार्धौ the other MSS., but cp. supra x. 54 (p. 56, 9).

बुध्नस्तस्मिंश्चतुर[1] उपस्तृणान आहाप्रमत्तः संततमानय स्रोगान्निगदिष्यामीति । स यत्र धाराग्निं प्राप्नोति तत्प्रतिपद्यते स्रोगान्दंष्ट्राभ्यां मण्डूकाञ्जम्भ्येभिरिति चतुर्दशानुवाकान्प्रयामाय स्वाहेति पञ्चदशमथ द्वे आहुती जुहोतीक्षुवर्दाय स्वाहा वक्षिवर्दाय स्वाहेति षट्त्रिंशतमश्वस्तोमीयाꣳस्तिस्रो[2] द्विपदा इमा नु कं भुवना सीषधेमापो हि ष्ठा मयोभुव इति चांचैतं प्रत्येकमग्नावनुप्रहरत्यथैनꣳ सꣳस्रावेणाभिजुहोति । समानं कर्मानूयाजेभ्यो ऽथ पुरस्तादुत्तमस्यानूयाजस्याश्वशफेनाश्वतेजनीसुपजुहोति[3] । समानं कर्मा पत्नीसंयाजेभ्यो ऽथ पुरस्तादुत्तमस्य पत्नीसंयाजस्यायस्मयेन कमण्डलुनाश्वतेजनीसुपजुहोत्यृजुधेकविंश उक्थ्यः संतिष्ठते पत्नीसंयाजान्तो ऽथ वसतीवरीः परिहृत्य पयाꣳसि विश्रित्योपवसन्ति । ॥ ३५ ॥

नवमः ॥

अथातो महारात्र एव बुध्यन्ते । प्रातराज्यानि गृहीत्वा राजानमुपावहृत्य प्रातरनुवाकमुपाकरोति । परिहिते प्रातरनुवाके ऽपो ऽच्छैत्यद्भिरुदैत्यतिरात्रं[4] क्रतुमुपैति । प्रसिद्धो ऽभिषवः । प्रसिद्धं ग्रहा गृह्यन्ते । समानं कर्माश्विनाद्ग्रहादाश्विनं ग्रहं गृहीत्वैकादश रशना आदाय यूपमभ्यैति । स्वर्वन्तꣳ

---

१ बुध्नंतस्मि॰ all, but cp. l.c.

२ ॰स्तोमियास्तिस्रो MSS.

३ अयस्य i.s.o. अश्व॰ (before तेजनीम्) all the MSS. exc. M.

४ Thus M; the other MSS. are more or less defective.

राज्ञुदावमग्निष्ठमुत्सृज्यैकादश प्रातर्गव्यान्प्राजापत्यान्पशूनुपाकरोति । तेषां प्रसिद्धं वपाभिश्चरित्वा प्रसर्पन्ति प्रातःसवनाय । तदृजुधा संतिष्ठते । प्रसर्पन्ति माध्यंदिनाय सवनाय । प्रसिद्धो ऽभिषवः । प्रसिद्धं ग्रहा गृह्यन्ते । समानं कर्म दाक्षिणेभ्यो । दाक्षिणानि हुत्वाष्टौ संवर्गाहुतीर्जुहोत्यर्वाङ् यज्ञः संक्रामत्वित्यवग्रिष्टं दक्षिणानां ददाति । वैश्वकर्मणानि हुत्वा नव पर्याप्तीर्जुहोति भूतं भव्यं भविष्यदित्युत्सन्नो ऽभ्यभिषेको । नाचाहीनसंततिं करोत्यृजुधा माध्यंदिनꣳ सवनꣳ संतिष्ठते । प्रसर्पन्ति तृतीयसवनाय । प्रसिद्धमादित्यग्रहेण चरित्वाग्रयणं गृह्णात्यथोक्थ्यं गृह्णाति । समानं कर्म पवमानात्पवमानेन चरित्वा स्वे धामन्पशुभिश्चरति । तेषाꣳ समानी मनोता समानी देवता समानः प्रत्यभिमर्शनः समानो वसाहोमः समानो वनस्पतिः समानः स्विष्टकृत्प्रैषवान्समानीडा समान्यो दिशः । समानं कर्म पत्नीसंयाजेभ्यः । पत्नीः संयाज्य प्राङेत्य ध्रुवामाप्याय्याभूतीयानुभूतीय जुहोत्या मे गृहा भवन्त्वग्निना तपो ऽन्वभवदित्येताभ्यामनुवाकाभ्यामथ भूताभव्यौ होमौ जुहोति भूताय स्वाहा भविष्यते स्वाहेत्यथाध्वरिकाणि समिष्टयजूꣳषि हुत्वा दशाग्निकान्युपजुहोति । समानं कर्मावभृथादथैतस्मिन्नवभृथे द्वितीयामवभृथाहुतिꣳ हुत्वा दश वारुणान्युपजुहोति नमो राज्ञे नमो वरुणायेत्यथ मृत्यवे स्वाहा मृत्यवे स्वाहेति नवतिमाहुतीर्जुहोति प्रयासाय स्वाहायासाय स्वाहेत्येकादश । शतायुर्वै पुरुषः

शतवीर्यं आत्मैकशतो यावानेव पुरुषस्तस्मान्मृत्युमवयजत इति ब्राह्मणम् । ॥ ३६ ॥

अथैष आत्रेयो विहृतः शुक्लो विक्लिधस्तिलकवान्पिङ्गाक्षः[1] खलतिर्विकटः कुनखी कुब्जः शिपिविष्टो नग्न उपमज्जति[2] । तस्य मूर्ध्नि जुहोति जुम्बकाय स्वाहेत्यथास्मा एतच्छतं विषयं ददात्यथैनमिषुजितात्प्रधमन्ति[3] मा मे राष्ट्रे वात्सीरिति[3] । प्रसिद्धो ऽवभृथ । उदयनीययेष्ट्वा मैत्रावरुणीं वशामुपाकरोति । तस्यै सौरीर्नव श्वेता वशा इत्युपालम्भ्या भवन्ति । तासां प्रसिद्धं वपाभिश्चरित्वाग्रेण गार्हपत्यं पात्नीवतमुत्क्रम्य तस्मिञ्छगलं कल्माषं किकिदीविं विदीगयमिति त्वाष्ट्रान्पशूनुपाकरोति । तान्पर्यग्निकृतानुत्सृज्याज्येन संस्थां करोत्यथ पशुपुरोडाशान्निर्वपति पशुपुरोडाशौ वाथ पुरस्तात्पशुपुरोडाशस्विष्टकृतो दश यव्यान्युपजुहोति नमो राज्ञे नमो वरु-

---

१ तिलकावान्पिंगलाक्षः M.

२ Thus M; उपदिश्यति the other MSS.

३ Wholly uncertain. ददात्यथैनमिषुजितान्प्रधमंति मा मे राष्ट्रे वात्सीरिति M; ददात्यैनामिषु(षि) तान्प्रधमंतिमामे राष्ट्रेष्वेवाथवात्सीरिति B Be (pr. m.); ददात्येनामिषुषितान्प्रधमंतिमामे राष्ट्रेष्वेवाथवात्सीरिति Be (sec. m); ददात्यैनामिषुषितान्प्र॰ etc. (as B) U; this is certain, that प्रधमंति is a third person of a verb; I have conjectured प्रधमन्ति (cp. S'āṅkh. śrs. xvi. 18, 20: निरवेधन्ति); then the foregoing must be an ablative; but whether इषुजितात् is the correct reading I do not see.

णायेत्यथ पुरस्तात्पशुस्विष्टकृतो दश[1] गव्यान्युपजुहोति मयोभूर्वातो अभिवातूस्रा इति । प्रसिद्धं पशवः संतिष्ठन्ते ऽथोदवसानीययेष्ट्वाग्रेणाहवनीयं विशालयूपमुच्छ्रित्य तस्मिन्नेतान्पशूनुपाकरोत्याग्नेयमैन्द्राग्नमाश्विनमिति । तेषां प्रसिद्धं वपाभिश्चरित्वा पशुपुरोडाशान्निर्वपति । ताननुवर्तन्ते ऽष्टौ देवसुवाꣳ हवीꣳष्यग्नये ऽꣳहोमुचे ऽष्टाकपाल इत्येषा च दशहविरिष्टिस्तस्या एता याज्यापुरोनुवाक्या भवन्ति ॥ ३७ ॥

अग्नेर्मन्वे प्रथमस्य प्रचेतस इत्यथ पुरस्तात्पशुपुरोडाशस्विष्टकृतो दश ब्रह्मवर्चसान्युपजुहोत्या ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामित्यथ पुरस्तात्पशुस्विष्टकृतो दश संनतिहोमानुपजुहोत्यग्नये समनमत्पृथिव्यै समनमदिति । प्रसिद्धं पशवः संतिष्ठन्ते । ऽथैतैरन्वहं द्वादशभिर्ब्रह्मौदनैश्चरति । तेषामुक्तं चरणं यथामुत्रैकस्यान्यच[2] रशनाभ्यामर्चिभ्य एतान्परःशतं शतपलान्निष्कान्ददाति । सुवर्णरजते मद्विमोः पात्रे ददात्यैकतयानि[3] सौवर्णानि पात्राणि ददाति हिरण्मयं कशिपु[4]

---

१ om. M.

२ Thus M (for अमुत्र cp. supra xv. 4); यथामुत्रैकमन्यच the other MSS.; as all the MSS. contain a case form of एक, I did not venture to change यथामुत्रैवमन्यच, *i.e.*, yathā amutra evam, a. r.

३ Thus M; ॰त्येनानि the other MSS.

४ ॰पु॰ or ॰पु॑ MU.

हिरण्मयं[1] पड्वीशꣳ[1] हिरण्मयꣳ संदानमित्यथ[2] वीणागाथिभ्याꣳ शतं विपथौ ददात्यथर्तुपशुभिर्यजत[3] ऋतुपर्यायं वा समानेषु वाग्न्यायतनेषु पिशङ्गास्त्रयो वासन्ताः सारङ्गास्त्रयो ग्रैष्माः पृषन्तस्त्रयो वार्षिकाः पृश्नयस्त्रयः शारदाः पृश्निसक्थास्त्रयो हैमन्तिका अवलिप्तास्त्रयः शैशिराः संवत्सराय निवचस इत्यथ देविकाहविर्भिर्यजते। ऽथ त्रैधातवीयया यजते। ऽथ सौत्रामण्या यजते। संतिष्ठते ऽश्वमेधस्त्रिभिः संवत्सरैः। संतिष्ठते ऽश्वमेधः संतिष्ठते ऽश्वमेधः। ॥ ३८ ॥ दशमः ॥

॥ इति पञ्चदशः प्रश्नः ॥

---

१ Left out in the MSS. exc. M.

२ संदामि॰ MSS. exc. M.

३ यजत M, यजेत the other MSS.

द्वादशाहेन यक्ष्यमाणो भवत्येको वा बहवो[1] वैतो[1] ह्येको[1] दक्षिणावता यजते । स[2] यद्येको[2] यदि बहवो ऽमावास्याया एव षडहेनोपरिष्टाद्दीक्षन्ते । ते[3] गृहपतेररण्योः संजानते पृथग्वा । ते यदि गृहपतेररण्योः संजानते मथित्वा गार्हपत्यमाहवनीयमुद्धरन्ति[4] । ग्रामाद्धुतश्रपणमाहरन्ति । यद्यु वै पृथक् संजानते गृहपतिरेव प्रथमो मन्थते[5] । तदेवेतरे[6] पर्युपविश्य मथित्वामथित्वैव गार्हपत्यꣳ संनिवपन्ति । तस्मादेकवद्भूतादाहवनीयमुद्धरन्ति । ग्रामाद्धुतश्रपणानाहृत्य संनिवपन्त्यथ यदि पश्चादपर[7] आगच्छति मथित्वैव गार्हपत्ये ऽधि निवपत्याहवनीये ऽधि ग्रामाद्धुतश्रपणमाहृत्याप्यर्जत्युपो[8] एनं[8] पूर्वेषु कर्मसु क्रियन्ते । ऽथातः वपनस्यैव मीमाꣳसा । गृहपतिमेवाध्वर्युः प्रथमं वपयत्यथ होतारमथ ब्रह्माणमथोद्गातारं प्रतिप्रस्थाताध्वर्युं वपयति प्रस्तोतारं प्रशास्तारं ब्राह्मणाच्छꣳसिनमाग्नीध्रः प्रतिप्रस्थातारं वपयत्यच्छावाकं नेष्टारं पोतारꣳ

---

१ Thus M only (regarding उतो हि cp. infra xvi. 13 : 260, 5); बहवो वा यद्येको all the other MSS.

२ Given only by M.

३ Only in M.

४ Thus M only ; •हरन्ति all the other MSS.

५ मंथति M.

६ तदेवे• all the MSS. exc. M.

७ पश्चेनापर M.

८ Thus M; •माहृत्याप्यर्जत्यु• T Be 11 D; •माहृत्यनिवपंत्यपुत्सृजत्यु• B Be; •माहृत्यनिवपत्यथैनं U.

सदस्यमुन्नेताग्नीध्रं पवयति ग्रावस्तुतꣳ सुब्रह्मण्यं प्रतिहर्तार-मात्मानमन्ततस्तं चेद्ब्रूयुरध्वर्युर्वाव[१] सर्वस्य पवयिता स नः सर्वा-न्पवयत्विति स एवैनान्सर्वान्पवयत्यपि वान्योऽन्यं पवयन्ति[२] यद्यधीयन्तो भवन्ति । ॥ १ ॥

तेषां प्रसिद्धा दीक्षणीयेष्टिस्तायते । सकृदाश्राविते स यथाह भरतवदिति तद्गृहपतेरेवार्षेयं प्रथमं वृणीते[३] ऽथ होतुरथात्मनो ऽथ ब्रह्मणो ऽथोद्गातुरथ प्रतिप्रस्थातुरथ प्रस्तोतुरथ प्रशास्तुरथ ब्राह्मणाच्छꣳसिनो ऽच्छावाकस्य सदस्य-स्याग्नीध्रः पोतुर्नेष्टुर्ग्रावस्तुत उन्नेतुः सुब्रह्मण्यस्य प्रतिहर्तु-रन्ततो । ब्रह्मण्वदिति समानं । ते[४] सर्वे[४] एव[४] दीक्षाकृतिषु समन्वारभन्ते । गृहपतिमेवाध्वर्युरुच्चैः कृष्णाजिने वाचयति । तदेवेतरे[५] ऽनुनिष्क्रामन्त्यपि[६] वान्योऽन्यं वाचयन्ति यद्यधी-यन्तो भवन्ति । ते यथोत्साहं व्रतदुघमुपयन्त्येकैकां[७] वा बह्वीर्वा । तेषां यथैव प्रवरानुपूर्व्यमेवं[८] घर्मोच्छिष्टे[९] ऽति-

१ Thus MTD Be 11 U (pr. m.); वा (i. s. o. वाव) B Be U (sec. m).

२ Thus M; sing. the other MSS.

३ प्रवृणीते M.

४ Thus M; ते सर्वे (without एव) T Be 11 U D; समानमंततः सर्व एव B Be.

५ Thus MUD; तदेवेतरे the other MSS.

६ Thus M; नुनिष्क्राम॰ all the other MSS.

७ Thus (व्रतदुघमु॰) Be 11 DUT; ॰दुघमुप॰ B; ॰दुघ उप॰ M.

८ एवं om. M.

९ Thus M B Be; ॰च्छिष्टेभ्य॰ T Be 11 DU.

याज्ञभक्षेषु[1] षोडशिनि । षष्ठ्यामुपसद्युत्तरवेदिꣳ संनिवपन्ति यद्यनग्निचित्यो भवत्यथ यदि साग्निचित्यः प्रथमायामेवोपसद्युत्तरवेदिꣳ संनिवपन्ति । ॥ २ ॥

तेषां द्वादश दीक्षा द्वादशोपसदो द्वादशाहं प्रसुता[2] । न द्वादशाहे ऽग्निं चिन्वीतेत्येक आहुश्चिन्वत उ हैके । प्रसिद्धेन कर्मणोपवसथाद्यन्ति । तेषां ज्योतिष्टोमो वैश्वानरः प्रायणीयो ऽतिरात्रस्तायते । स यत्र माध्यंदिने सवने तृतीयसवनाय वसतीवरीभ्यो ऽवनयति तद्वसतीवरीकलशे यावन्मात्रीरतिशिष्याग्नीध्रं[3] हृत्वा छायायै चातपतश्च सन्धौ स्थापयति हविष्मतीरिमा आपो हविष्मान्देवो अध्वरो हविष्माꣳ आविवासति हविष्माꣳ अस्तु सूर्य इत्येषाच्छीनसंततिरेतामेव पुनःपुनश्चोदयिष्याम[4] इति वदन्तः । सो ऽत्र चैव[5] यज्ञस्य पुनरालम्भं जपति यज्ञायज्ञियस्य[6] वा स्तोत्रे शंयुवाके वा । तेषां ज्योतिष्टोमो वैश्वानरः प्रायणीयो ऽतिरात्रः संतिष्ठते । तस्मिन्सꣳ-

१ Thus M T Be 11 DU; ०भक्षे B Be.

२ प्रसुतः all the MSS. exc. M, cp. infra xvi. 12 init.

३ Thus (यावन्मात्रीर०) MT Be 11; ०मात्रीम० D; ०मात्रम० B Be U.— All the MSS. exc. M: ०वशिष्य ।

४ Thus M B Be; ०ष्यामह T Be 11 DU.

५ Thus M in accordance with the Dvaidha; चोचैव T Be 11 U; चोत्रैव B Be; चौचैव D.

६ ०यज्ञियस्य T Be 11 DU; ०यज्ञीयस्य MB Be.

स्थिते विवर्तयन्ति[1] परिधीननुप्रहरन्ति[1] प्रस्तरं । पत्नीसंयाजान्तो ऽतिप्रैषेण ब्रह्मा वाचं यच्छति । परिहितासु वसतीवरीष्वाहुतायाꣳ सुब्रह्मण्यायां ब्रह्मा वाचं विसृजते । प्रतिपद्यते[2] दिवा प्रातरनुवाकेनाह्ना संक्रामन्होता छन्दाꣳस्यन्वाह निमील्याध्वर्युरुपाꣳशुं जुहोति रात्र्यै रूपमिति वदन्तस्तायते त्रिवृदग्निष्टोमो रथंतरसामा । माहेन्द्रस्य स्तोत्रे रथो युक्तो ऽत्याधावति[3] । रथशब्देन माहेन्द्रस्य स्तोत्रमुपाकरोत्येतावदेवैतदहः शिल्पं क्रियते । ऽहीनसंततिं करोत्यथ श्वो भूते तायते पञ्चदश उक्थ्यो बृहत्सामा । दुन्दुभिनैतदहरध्वर्युर्माहेन्द्रस्य[4] स्तोत्रमुपाकरोत्येतावदेवैतदहः शिल्पं क्रियते । ऽहीनसंततिं करोत्यथ श्वो भूते तायते सप्तदश उक्थ्यो वैरूपसामाधावेनैतदहरध्वर्युर्माहेन्द्रस्य स्तोत्रमुपाकरोत्येतावदेवैतदहः शिल्पं क्रियते । ऽहीनसंततिं करोत्यथ श्वो भूते तायत एकविꣳश उक्थ्यो वैराजसामाग्नेयस्य[5] षोडशी[5] चातियाज्यावनतियाज्यः[5] षोडशीत्येक आहुरेकविꣳशमेतदहर्न्यूङ्ख्यं[6] भवति[6] । विराजां वा

---

१ Plural MT Be 11 DU and Dvaidha; singular B Be.

२ Plural M.

३ Thus M; धावति Keś.; यावति Be TD; भवति B Be.

४ Thus M; दुंदुभिशब्देनैतद॰ the other MSS.

५ Thus M only; ॰ग्नेयश्च षोडशी च नातियाज्यः Be; ॰ग्नेयश्च षोडशिनातियाज्यः B; ॰ग्नेयं च षोडशिनो चातियाज्याश्च नातियाज्यः Be 11 T (the latter only षोडशीनि) UD.

६ Thus M; न्यूङ्खयंति all the other MSS.

प्रतिपत्सु न्यूङ्खयन्ति शस्त्रे[1] वेत्येतदेकमथापरं[2] प्रातरनुवाके न्यूङ्खयन्ति हविष्कृत्सूभयेषु प्रस्थितेषु माहेन्द्रस्याश्रावणे । न तत ऊर्ध्वं न्यूङ्खयन्तीत्यरणीदस्य[3] एतदहरध्वर्युर्माहेन्द्रस्य स्तोत्रमुपाकरोति । तदुद्गातुर्दक्षिण[4] ऊरौ मन्थति[5] । तं जातꣳ सर्व एवाभिहिङ्कुर्वन्ति । ॥ ३ ॥

तस्य मीमाꣳसा । गार्हपत्ये ऽनुप्रहरेत्प्रतिष्ठाकामानामाग्नीध्रे[6] प्रजाकामानाꣳ[7] । शामित्रे पशुकामानामाहवनीये स्वर्गकामानामित्यथानादृत्य तदाहवनीय[8] एवानुप्रहरति भवतं नः समनसाविति । प्रहृत्याभिजुहोत्यग्नावग्निश्चरति प्रविष्ट इत्येतावदेवैतदहः शिल्पं क्रियते । ऽहीनसंततिं करोत्यथ यो भूते तायते चित्रव उक्थ्यः आकरमाकैन्द्रो ऽतिग्राह्यो । ऽद्भिरेतदहरवकाभिश्चाभिरध्वर्युर्माहेन्द्रस्य[9] स्तोत्रमुपाकरोति । तासां

---

१ शस्त्रेष्वे Be B.

२ न ins. TD Be 11 U.

३ Thus MT Be 11 UD; °रणीभ्याने° B Be.

४ तदुद्गा° M.

५ मंथति M.

६ °ग्नीध्रीये B Be U.

७ प्रजननका° M.

८ Thus M only; तंतमाह° T Be 11 DU (pr. m.); तमाह° U (sec. m.); इतमाह° B Be.

९ All MSS. ins. एव after अद्भिर्, exc. M.

सौमाऽस्मा । चात्वाले ऽवनयेदाप्लावे निनयेत्प्रोक्षणी:[१] कुर्वीत[२] पुरोडाशीयानि पिष्टानि संयौयादित्येनादृत्य[३] तदुन्नाढ-व्यधीना एवैना: कुर्यादुद्गातारो[४] हैताभिरस्थेगेयानाऽ साम्नाऽ शुचऽ शमयन्तो मन्यन्ते । ता ड चेदध्वर्यवे प्रब्रूयुरपो ऽध्वव-हरतेत्येव ब्रूयादित्येतावदेवैतदह: शिल्पं क्रियते । ऽहीनसंततिं करोत्यथ श्वो भूते तायते चयस्त्रिऽश उक्थ्यो रैवतसामा सौर्या ऽनियाम्नो । ऽद्भिरेवैतदहर्दूर्वामिश्राभिरध्वर्युर्माहेन्द्रस्य स्तोत्रमुपाकरोति । ॥ ४ ॥

तासामुक्ता सौमाऽस्मा । स्वयमृतुयाजमेवैतदहर्भवति । नैतदहरन्योऽन्यस्मृतुयाजं यजन्ति[५] । स यत्राहाध्वर्यू यजतमिति तदध्वर्यू जघनेन हविर्धाने उपविश्य स्वयमृतुयाजं यजतो ये३[६] यजामहे ऽश्विनाध्वर्यू आध्वर्यवादृतुना सोमं पिवता-मर्वाञ्चमद्य यय्यं नृवाहणं रथं युञ्जाथामिह वां विमोचनम्। पृङ्क्तं हवीऽषि मधुना हि कं गतमथा सोमं पिवतं वाजिनी-वसू ऋतुना सोमं पिवतां वौऽषदिति । स यत्राह गृहपते यजेति तद्गृहपतिर्जघनेन गार्हपत्यमुपविश्य स्वयमृतुयाजं यजति

१ वनयेत्प्रो॰ M Be B.

२ Thus M; कुर्वते the other MSS.

३ संयौयादि॰ MDU T Be 11; संयूयादि॰ B Be.

४ All MSS. exc. M ins. तद्ध after कुर्यात्।

५ Plural only M.

६ Sign of pluti only in D Be B.

ये३[1] यजामहे ऽग्निं गृहपतिं गार्हपत्यात्सुगृहपतयस्त्वयाग्न इमे सुन्वन्तो यजमानाः स्युः सुगृहपतिस्त्वमेभिः सुन्वद्भिर्यजमानैः स्या[2] अग्निर्गृहपतिर्गार्हपत्यादृतुना सोमं पिबतु जोष्यग्ने समिधं जोष्याहुतिं जोषि ब्रह्म जन्यं जोषि सुष्टुतिम् । विश्वेभिर्विश्वाꣳ ऋतुना वसो मह उशन्देवाꣳ उशतः पायया हविर्ऋतुना सोमं पिबतु वौ३षदिति । [3]सांवाग्निनमेतदहर्भवत्युत्तरतो वत्सान्धारयन्ति दक्षिणतो माहेन्द्रस्य स्तोत्रे ऽन्तरेण[4] सदोहविर्धाने संवाश्य[5] वत्सान्मातृभिः सꣳसृजन्ति[6] । बध्नन्ति वत्सानुत्सृजन्ति माहेन्द्रस्य[7] स्तोत्रमुपाकरोत्यथापराह्ने[7] उक्थ्यपर्यायेषु शिल्पानि क्रियन्ते । पारुच्छेपीर्होता शꣳसति । वालखिल्या मैत्रावरुणो विहरति । वृषाकपिं ब्राह्मणाच्छꣳसी शꣳसत्येवयामरुतमच्छावाकः । संतिष्ठते पृष्ठ्यः

---

१ Sign of pluti only in B Be UD.

२ स्याद् all.

३ The passage सांवाग्नि° up to उपाकरोति (line 9) is given here by MB Be (sec. m) only; the other MSS. give it in kh. 6 after the words बृहत्सामानम् (252, 3). U agrees with M with this exception that only the first words सांवाग्निनमेतदहर्भवति are given after बृहत्सामानम् ।—सांकाग्निन° all.

४ Thus MB Be; स्तोत्रे ऽन्तरेण the other MSS.

५ Thus M only; संविश्य all the other MSS.

६ समवसृ° M.

७ माहेन्द्रस्तो° उपाकरोति not found in M.

षडहो। ऽहीनसंततिं करोत्यथ वसतीवरीः परिहृत्य पयांसि विमिश्र्योपवसन्ति। ॥ ५ ॥ प्रथमः ॥

अथ श्वो भूते चतुर्विंशं छन्दोममुपयन्ति बृहत्सामानमथ श्वो भूते चतुश्चत्वारिंशं छन्दोममुपयन्ति रथंतरसामानमथ श्वो भूते ऽष्टाचत्वारिंशं छन्दोममुपयन्ति बृहत्सामानमथ श्वो भूते चतुर्विंशमग्निष्टोममुपयन्ति रथंतरसामानमविवाक्यमेतदहर्भवति। नैतदहरन्योऽन्यस्मा उपहताय व्याङ्गोषया[1] वा नाराशंस्या वा विब्रूयादिति। तदु वा आहुर्न वै यज्ञः संतिष्ठते यत्र विब्रूयादिति। विब्रूयादिति[2] वै[2] नो[2] ब्राह्मणं भवति। नैतदाद्रियेत[3]। नाद्रियेतेति[3] स्थितिरननुष्टुभमेतदहर्भवति। नानुष्टुभो ऽधीयते[4]। ते चेदनुष्टुभमुद्धरेरन्नध्वर्युरनुष्टुभ[5] उद्धरेदमूर्या उप सूर्ये याभिर्वा सूर्यः सह। ता नो हिन्वन्त्वध्वरमित्येतया सौर्या[6] गायत्र्या वसती-

---

१ Thus T Be 11 DU; व्याङ्गर्गायाषा B Be; व्याङ्गरथवाषा M, but above थ and वा two akṣaras are written, which I am unable to decipher.

२ Thus M; the other MSS. विब्रूयादिति once only and चैवैनो।

३ Thus M; most of the other MSS. om. here and at the collateral passages (xvi. 6 s. fin., xvi. 16 s. fin.) नाद्रियेत।

४ धीयते all the MSS. exc. M.

५ Thus Be, and M, which inserts only चेद् after अध्वर्युः।—अनुष्टुभमु॰ both times B; the whole passage runs thus in T Be 11: तंचेन्ननुचनुभम उद्धरेदेनुष्टुभ उद्धरेदसूर्या; in U; तचंननुवननुष्टुभ उद्धरेदे अनुष्टुभ उद्ध दसूर्या; in D: तंचेननुचननुष्टुभमुद्धरेदेनुष्टुभ उद्धरेदसूर्या।

६ Thus M only; सौर्यचा all the other MSS.

वरोर्ग्रह्णीयादूर्दे त्वा मनसे त्वेत्यपोद्धृत्यैतामन्यथा सौम्या[1] गायत्र्या राजानमुपावहरेद्विष्णो त्वं नो अन्तम इत्यपोद्धृत्यैतामन्यया वैष्णव्या गायत्र्या राजानमुपतिष्ठेत । स उ चेद्विद्वाननुष्टुभमभिव्याहरत्यत्यक्रमिषमिति[2] होत्रे प्राह । होतानाप्रस्थापयिता । होतास्य तदक्षरैरपिवपति[3] । स उ चेन्मन्येतामितकामो[4] वा अहमस्मि यद्ब्रह्मयं वेदे यजुर्मयमेव[5] तद्यावेवाचर्यौ[5] वेदौ तौ[5] संपादयेतामिति[5] नैतदाद्रियेत । नाद्रियेतेति स्थितिः । संतिष्ठत एष चतुर्विंशो ऽग्निष्टोमो रथंतरसामा । ॥ ६ ॥

तस्मिन्संस्थिते समिद्धारा[6] यन्त्यांहत्य[6] समिध आग्नी-

---

१ Thus M only; सौर्या B Be; सौर्यया Be 11 TUD.

२ The text is corrupt in all the MSS., and I am at a loss how to emend; अत्यक्रमिषम् is my conjecture; अचमिषमिति B; अमिषमिति Be; अचयामिषमिति TDU; अचयामिषति Be 11; अनुमन्या (or न्या) सुश्रौषमिति M. Probably we are to read an iṣ-aorist 1 ps. sing. act. Keś. has: सत्याभिषमिति नोचैर्जताच्चि नाशिता (*sic*).

३ Thus conjecturally. All the MSS. ॰वपति exc. M, which has ॰पवयति ।

४ ॰कामा MT Be 11 DU; ॰कामः B Be, which om. वा; all the MSS. exc. M begin a new kh. with अहमस्मि ।

५ Thus M; यजुर्मयं वैतान्यावावेवाचरायषो वेदो ततो संपा॰ T Be 11 D; यजुर्मयं वैतान्यचरायषो वेदो संपा॰ B Be; यजुर्मयं वैतान्यावेवाचरायषो वेदो संपा॰ U.

६ Thus corrected; समिद्वारयंत्या॰ MSS.

श्रौये संन्यस्यन्ति[१] । तेषु समन्वारब्धेष्वाहवनीये स्रुवाहुतिं[२] जुहोति प्रजापतये स्वाहेति मनसाथ सदः प्रसर्पन्ति तूष्णीꣳ-स्तोमाय । संप्रसृप्तान्विदित्वाध्वर्युर्मनसैव प्राङ् द्रुत्वा मनसेमां[३] पात्रं हृत्वा मनसान्यं[४] ग्रहं प्रजापतये गृह्णात्युपयामगृहीतो ऽसि प्रजापतये त्वा जुष्टं गृह्णामीति[५] । यदिदं किं च तदिति मनसा परिमृज्य सादयत्येष ते योनिः प्रजापतये त्वेत्यथाप उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ् द्रुत्वा मनसैव स्तोत्रमुपाकरोति । मनसा[६] प्रसौति[६] । मनसा प्रस्तौति । मनसोद्गायति । मनसा प्रतिहरति । मनसा होत्र एषोत्तमेति प्राङ्मनसा होताह्वयते । मनसाध्वर्युः प्रत्याह्वयते । मनसा शꣳसति । मनसा प्रतिगृणाति । यदेतस्य[७] मानसस्य ग्रहस्य पारमेत्यथ होतोच्चैस्तुर्होढिन्व्याचष्टे । तस्मा[८] अध्वर्युः प्रतिगृणाति ॥ ७ ॥

ओꣳ होतस्तथा होतः सत्यꣳ[९] होतररात्स्म होतरिति ।

---

१ सं॰ found in M only.

२ सुवाहुतीर् T Be 11 UD.

३ Thus M ; मनसैव the other MSS.

४ All the MSS. exc. M. om. अन्यं ।

५ इति om. M.

६ om. B Be U.

७ यद्देतस्य B Be.

८ तस्माद् T Be 11 UD.

९ Be 11 TD ins. च, not M Be BU, cp. xii. 16 (109, 14).

यद्वु वै होता नाध्येत्यन्य[१] उ[१] होत्राशंसी शंसति। तस्मा उ प्रतिप्रस्थाता प्रतिगृणाति। यदैतेषां पारं यन्त्यथाध्वर्युर्मनसैव प्राङ् द्रुत्वा मनसैव तं ग्रहमुपोद्यच्छते[२]। मनसाश्रावयति। मनसा प्रत्याश्रावयति। मनसा वषट्कृतानुवषट्कृते हुत्वा हरति भक्षं। मनसा समुपहूय भक्षयन्ति। मनसा निर्णिज्य पात्रं प्रयच्छति। संतिष्ठत एष तूष्णींशंसोमो। ऽथर्त्विजो विसृच्छत्यधिवृक्षसूर्ये[३] वाचं विसृजध्वा इदं[४] नक्षत्रेषू इ[४] इत्यधिवृक्षसूर्य[४] इति वै नो ब्राह्मणं भवति। तेऽधिवृक्षसूर्य एव वाचं विसृजन्ते। तानन्वैवासीनान्परिश्रयन्ति। पत्नीशाले पत्नीः परिश्रयन्त्यथानतिसर्पन्तावध्वर्यू धिष्ण्यायान्बर्हिर्भ्यामौदुम्बरीं समन्वारभेते इह धृतिरिह विधृतिरिह रन्तिरिह रमतिरिति[५]। ते यथासमुदितं[६] वाचं विसृजन्ते॥ ८॥

अथातः सर्पणस्यैव मीमांसा। दक्षिणस्य हविर्धानस्याधो-

१ Thus MT B 11; ॰न्यतु D; ॰न्यो B Be.

२ Most of the MSS. have the plural.

३ विसृजंत्य॰ all exc. M.

४ Thus emended hesitatingly; विसृजध्वाम्नक्षत्रेषू—त्यधि॰ M; विसृजध्वासंनक्षत्रेषू इत्यधि॰ T Be 11 D; विसृजध्वासंनक्षत्रेष्वित्यधि॰ U; विसृजध्वमिति वासंनक्षत्रेष्विति वा अधि॰ B Be; Keś.: समाप्ते तूष्णींशंसोमे ऽध्वर्युः ऋत्विजो विसृजति अधिवृक्षसूर्ये वाचं विसृजध्वमा (sic) नक्षत्रेष्विति। इतर ऋत्विजः प्रतिब्रूयुः अधिवृक्षसूर्ये वाचं विसृजामहे (sic) इति वा। उदितेषु नक्षत्रेषु विसृजामहे (sic) इति वा।

५ Thus M B Be and cp. Āp. XXI. 12. 7; रमतामिति T Be 11 DU.

६ ॰दितां M.

ऽधो ऽयꣳ सर्पंर्युरेतेन ह वै सर्पाः सहपुस्तंनो वै ते जीर्णास्तनूरपाघ्नतेति । तद् वा आहुर्यो वा अपथेन प्रतिपद्यते स्थाणुं वा हन्ति गर्तं[1] वा पतति भ्रेषꣳ स न्येति । वषट्कारपथेनैव सर्पंर्युरेष वाव[2] स्वर्ग्यः[2] पन्था यद्वषट्कारपथ इति । तद् वा आहुः पराङिव वा एषो ऽशान्तः पन्था यद्वषट्कारपन्थो । ऽध्वर्युपथेनैव सर्पंर्युरेष वा[3] अर्वाचः[3] पराचः[3] स्वर्ग्यः पन्था यदध्वर्युपथ इति । ते ऽध्वर्युपथेनैव सर्पन्ति । तेषु समन्वारब्धेष्वाहवनीये स्रुवाहुतिं जुहोत्युपसृजन्धाचे वत्सं धारयन्भुवनो धयन्। रायस्पोषमिषमूर्जमस्मासु दीधरत्स्वाहेति । समुत्क्रम्य चात्वालदेशे जपन्ति वागेतु वागुपैतु वाङ्मोपैतु वाग्यदकर्म यन्नाकर्म यदत्यगाम यन्नात्यगाम यदत्यरीरिचाम ॰ यन्नात्यरीरिचाम प्रजापतौ[4] प्रजापतिं[4] तत्पितरमप्येत्विति[4] । तद्वाच्यन्ततः[5] प्रतितिष्ठन्ति । तेषां य एव प्रायणीयो ऽतिरात्रः स उदयनीयः । सत्त्रादुदवसाय

---

[1] गर्तं B Be.

[2] Thus M; वाव पराचः स्वर्ग्यः B Be; वाचस्वर्ग्यः T; वाचस्वर्ग्यः Be 11 DU.

[3] Text not wholly certain: वा अवाच पराच M; वावपराचः all the other MSS.

[4] Thus U (sec. m.) B Be; प्रतिपत्तौ तत्प्रजापतौ तत्पितर॰ T Be 11 D; M reads as B, but with तत् also before प्रजापतिं।

[5] Thus B Be; तद्वाच्यांततः Be 11 DU; तदाच्यांततः T; तावद्वाच्यंततः M.

ज्योतिष्टोमेनाग्निष्टोमेन चतुष्टोमेन पृष्ठ्यशमनीयेन सहस्रदक्षिणेनैकैको यजेत । ॥ ९ ॥ द्वितीयः ॥

अथातो यज्ञक्रतोरेव मीमांसैन्द्रवायवाग्रं प्रथममहः । शुक्राग्रं द्वितीयमाग्रयणाग्रं तृतीयं च चतुर्थं चैन्द्रवायवाग्रं पञ्चममहः । शुक्राग्रꣳ षष्ठं च सप्तमं चाग्रयणाग्रमष्टममहरैन्द्रवायवाग्रे[1] नवमदशमे[1] । इति[2] न्वा[2] अध्वर्युतो[2] । ऽथ छन्दोगबह्वृचतो । [3]गायत्रीप्रातःसवनः [3]प्रथमस्त्रिरात्रस्त्रिष्टुम्माध्यंदिनो[4] जगत्तृतीयसवनो[5] । जगत्प्रातःसवनो द्वितीयस्त्रिरात्रो गायत्रीमाध्यंदिनस्त्रिष्टुप्तृतीयसवनस्त्रिष्टुप्प्रातःसवनस्तृतीयस्त्रिरात्रो जगन्माध्यंदिनो गायत्रीतृतीयसवन इति[6] । तस्मात्तच्छन्दस[7] उपयन्ति । ॥ १० ॥

---

१ Thus MT Be11 UD and Keś; चैन्द्रवायवाग्रमष्टममहः शुक्राग्रं नवममहरैन्द्रवायवाग्रं दशमम् B Be; on the whole passage cp. also Āp. xxi. 14. 5.

२ My correction; इतीन्वध्व० M; इतीन्वाध्व० T Be 11 DU; इतीमेऽध्व० B Be.

३ Thus M only; गायत्रीप्रातःसवनं प्रथमं त्रिरात्रं the other MSS.

४ Thus M only (on the form त्रिष्टुब्म० cp. TS. vii. 2. 8. 3); त्रिष्टुप्मा० B Be11; त्रिष्टुभमा० Be TD; त्रिष्टुभीमा० U.

५ All exc. M जगतीतृती०।

६ T Be11 DU om. इति and read ०सवनस्तस्मा०; on this whole passage cp. Sāy. on Ait. Br. iv. 25. 10.

७ Thus all exc. M, which has: तस्मात्तुमंछंद and Be 11 which reads: तस्माच्छंदस। The reading of M might be correct.

अथातः पशुकॢप्तेरेव मीमाꣳसैन्द्राग्नाः पशवः स्युरित्येक आहुरग्नेरयं लोको वायोरन्तरिक्षमसाविन्द्रस्य । यदैन्द्राग्नः पशुर्भवति वायव्यो वसाहोम इमानेव[1] तल्लोकान्प्रीणन्त[1] एषु लोकेषु प्रतितिष्ठन्तो यन्त्यथ[2] ये[3] ऽनैन्द्राग्नान्प्रतिपद्यन्ते[3] यथा श्रेयसे ऽनाहृत्य[4] पापीयस आहरन्ति[5] तादृक्तत्तस्मादैन्द्राग्नाः[6] पशवः स्युरित्येतदेकमतिरात्रपशवो ऽभितो मध्य ऐन्द्राग्ना । एकादशिना[7] अभितो मध्य ऐन्द्राग्नाः । सर्वाग्नेया[8] एव स्युरित्येतदेकꣳ । सर्वैन्द्रा[9] एव स्युरित्येतदेकꣳ । सर्वप्राजापत्या[10] एव स्युरित्येतदेकꣳ । सर्वैकादशिना[11] एव स्युरित्येतदपरं । तेषाꣳ सर्वैकादशिनैर्यतां प्रसिद्धमेव प्रथमे ऽहनि प्रथमामेका-

---

१ Thus M; इमानेवैतेलों॰ B Be; इमानैवतैलों॰ T Be 11 D; इमानेव-नैलों॰ U. – प्रीणंत M, प्रीषयंत all the other MSS.

२ यांत्यथ M.

३ Thus M (without, of course, avagraha); येन्येनैन्द्राग्नाप्र॰ U; येन्येनैन्द्राग्नाः प्र॰ B Be; येन्येनैन्द्राग्नांप्र॰ T Be 11 D.

४ नान्येनाहृत्य M.

५ आहरति MU Be 11 D; आहरंति B Be.

६ तत् after तादृक् found in Be B only.

७ ऐका॰ M only, but cp. TS. vi. 6. 5. 1.

८ सर्व आग्ने॰ Be.

९ Thus MU; सर्व ऐन्द्रा B Be; सर्वैन्द्राग्ना T Be 11 D.

१० Thus M; सर्वे or सर्वाः प्रा॰ the other MSS.

११ सर्व ऐका॰ B Be.

दग्निनीमालभन्त[1] आग्नेयस्य वारुणमुपालम्भ्यं[2] कुर्वन्ति । तथास्यैतानि दश मध्यमान्यहान्यनतिरिच्यमानाः पशवो ऽनुभवन्ति । प्रसिद्धमेवोत्तमे ऽहन्युत्तमामेकादशिनीमालभन्त[1] । आग्नेयस्य वा वारुणस्य वा वैश्वदेवमुपालम्भ्यं कुर्वन्ति । ॥ ११ ॥

तदु वा आहुर्यद्द्वादश[3] दीक्षा द्वादशोपसदो द्वादशाहं प्रसुताः कथमस्यैतान्यहानीष्टान्याप्रीतानि[4] पशुमन्ति भवन्तीति । तिस्र एकादशिन्यो ऽग्नीषोमीयो वैश्वदेवो ऽनूबन्ध्या । षट्त्रिंशतमेते[5] पशवः [6]षट्त्रिंशतमेतान्यहान्येवमस्यैतान्यहानीष्टान्याप्रीतानि पशुमन्ति भवन्तीति । तदु वा आहुर्यद्द्वादश दीक्षा द्वादशोपसदो द्वादशाहं प्रसुताः कथं द्वादशाहेन संवत्सर आप्यत इति । द्वादश पौर्णमास्यो द्वादशाष्टका द्वादशामावास्या । एतानि ह[7] वै[7] संवत्सरस्य वर्षिष्ठान्यहान्येता-

---

१ ०भन्त MB Be; ०भत the other MSS. (cp. Āp. xxi. 14. 7); the last time DU also plural.

२ Thus M; वारुणस्य वा वैश्वदेवमुपा० B Be; वा वरुणस्य etc. (as B Be) T Be 11 UD.

३ यद् om. all the MSS. exc. M.

४ M only has preserved this correct reading, all the other MSS. are badly corrupt.

५ Thus all; are we to correct ०त्रिंशत एते ?

६ Thus all, exc. M, which reads : षट्त्रिंशमेतान्य० ; are we again to correct षट्त्रिंशत एतानि ?

७ Thus B Be; ह om M; नवे TBe 11 DU.

न्यनु संवत्सर आप्यते । [1]समाप्तो द्वादशाहः । समाप्तः संवत्सरकाम । एवं द्वादशाहेन संवत्सर आप्यते[1] । ॥ १२ ॥ तृतीयः ॥

संवत्सराय दीक्षिष्यमाणाः समवस्यन्ति । तद्ध स्मैतत्पूर्वे संवत्सरꣳ समवसायासते ऽन्योऽन्यस्यानूक्तं[2] च मानुषं च विजिज्ञासमाना । उतो[3] श्लोकः ग्रमरयस्य[4] कर्ता भवति । ते चतुरहे पुरस्तान्माघ्यै पौर्णमास्यै दीक्षन्ते । तेषामेकाष्टकायां क्रयः संपद्यत । इति नु यदि समामविज्ञाय[5] दीक्षन्ते । यद्यु वा एतस्यामेवैकाष्टकायाꣳ समां[6] विजिज्ञासन्ते[6] चतुरह एव पुरस्तात्फाल्गुन्यै वा चैत्र्यै वा पौर्णमास्यै दीक्षन्ते । तेषामपरपक्षस्याष्टम्यां क्रयः संपद्यते । तेनैकाष्टकां न छम्बट्कुर्वन्ति । तेषां पूर्वपक्षे सुत्या संपद्यते । पूर्वपक्षं मासा अभि संपद्यन्ते । पूर्वपक्षे प्रसवः पूर्वपक्षे वैषुवतं पूर्वपक्ष उत्थानꣳ । समानं द्वादशाहिकं कर्म । तथैव षष्ठ्यामुपसद्युत्तरवेदिꣳ संनिवपन्ति यद्यनग्निचित्यं भवत्यथ यदि साग्निचित्यं प्रथमायामेवोपसद्युत्तरवेदिꣳ संनिवपन्ति । ॥ १३ ॥

१...१ Thus M; i. s. o. संवत्सरकाम एवं T Be 11 DU : संवत्सरकामेत्काम एवं; acc. to B Be the passage runs thus: एवं द्वादशाहेन संवत्सर आप्यते समाप्तो द्वादशाहः समाप्तः संवत्सरक्रतुः ।

२ Thus M Be ; °स्यानूक्तं Be 11 ; °स्यायुक्तं BUD.

३ Thus M Be (sec. m.), cp. supra xvi. 1 (p. 245, 1) ; उद्गाता the other MSS.

४ The word occurs again xvii. 43 and Drāhy. v. 4. 11.

५ समांविज्ञाय M.

६ Thus M ; समामविज्ञायासते Be ; समामविज्ञासते the other MSS.

तेषां द्वादश दीक्षा द्वादशोपसदः संवत्सरं प्रसुता । न संवत्सरे ऽग्निं चिन्वीतेत्येक आहुश्चिन्वत उ हैके । प्रसिद्धेन कर्मणोपवसथाद्यन्ति । तेषां प्रसिद्धं ज्योतिष्टोमो वैश्वानरः प्रायणीयो ऽतिरात्रः संतिष्ठते । तस्मिन्संस्थिते चतुर्विंशमुक्थ्यमारम्भणीयमुभयसामानमुपयन्त्यथाभिप्लवं षडहमुपयन्ति । [1]ज्योतिरग्निष्टोमो गौरुक्थ्य आयुरुक्थ्यो गौरुक्थ्य आयुरुक्थ्यो ज्योतिरग्निष्टोमस्तं चतुरुपयन्ति । रथंतरं बृहद्रथंतरं बृहदिति विपर्यासं पृष्ठे भवतः । पृष्ठ्यः षडहः । स मासस्तेनैवं संपन्नेन पञ्च मासान्यन्त्यथैतं षष्ठं मासं संभार्यं संभरन्ति । त्रयो ऽभिप्लवाः षडहास्तान्यष्टादशाहानि । प्रायणीयारम्भणीयौ । तानि विंशतिरहानि । पृष्ठ्यः षडहो ऽभिजित्त्रयः परःसामानः । स मासो । ऽथ वैषुवतमथैतं वैषुवते ऽहन्येकविंशमग्निष्टोममुपयन्ति बृहत्सामानं । तस्य सौर्यो ऽतिग्राह्यः सौर्यः पशुरुपालम्भ्यस्तद्धैतदेके[2] दिवैवैतेनाह्ना प्रतिपद्यन्त उदित आदित्ये दिवाकीर्त्यमहरिति वदन्तो । यथैवान्येषामह्नामेवमुपाकुर्यादिति मौद्गल्यस्तस्य महादिवाकीर्त्यं होतुः पृष्ठं विकर्णं ब्रह्मसामं भासो ऽग्निष्टोमो । ऽथोर्ध्वं वैषुवतात्त्रीनावृत्तान्स्वरानुपयन्त्यथ विश्वजितमुपयन्त्यथावृत्तं पृष्ठ्यं

१ The following acc. to M; the other MSS. are all more or less corrupt.

२ corrected hesitatingly; तद्धोनैवदेक M; तद्धोचैतदेके Be; तद्धोतेतदेके Be 11 D; तद्धोनन्तदेके B; तद्धोननदेके U pr. m.; तद्धोतुः तदेको U sec. m.; cp. infra. xvi. 16 (p. 263. 1) and xvii. 11.

षडहमुपयन्ति । [1]त्रयस्त्रिꣳशप्रभृत्याग्रयणायमेतद्दहर्भवत्यथावृत्तमेवाभिप्लवꣳ षडहमुपयन्ति ॥ १४ ॥

ज्योतिरग्निष्टोम आयुरुक्थ्यो गौरुक्थ्य आयुरुक्थ्यो गौरुक्थ्यो ज्योतिरेवाग्निष्टोमस्तं तथैव चतुरुपयन्ति । बृहद्रथंतरं बृहद्रथंतरमिति विपर्यासं[2] पृष्ठे[3] भवतः । पृष्ठ्यः षडहः पुरस्तात्तं मासंस्तेनैवꣳ संपन्नेन पञ्च मासानन्वर्थैतꣳ[4] षष्ठं मासꣳ संभार्यꣳ संभरन्ति । द्वावभिप्लवौ षडहौ तानि द्वादशाहानि । गोआयुषी तानि चतुर्दश । चत्वार्यूर्ध्वं वैषुवतात्तान्यष्टादश । दशरात्रो महाव्रतं चातिरात्रश्च । स मासस्तदेतन्मासिपृष्ठं गवामयनम् । ॥ १५ ॥ चतुर्थः ॥

अनुत्सर्गं बृहद्रथंतराभ्यामित्योत्तमे मासि महत्पृष्ठान्युपेयुस्तद्द्वितीयं गवामयनं । दशमास्य[5] तृतीयमभिप्लवाश्चाचीयन्ति[5] च तदङ्गिरसामयनं । पृष्ठ्याश्चाचीयन्ति च तदादित्यानामयनमग्निष्टोमाश्चाचीयन्ति च तत्प्रजापतेरयनं । प्रायणीयोदयनीयावभितो मध्ये ऽग्निष्टोमास्तद्द्वितीयं प्रजापतेरयनꣳ । सर्वाग्निष्टोमा[6] एव स्युरिति तत्तृतीयं प्रजापतेरयनमथातो

---

१ त्रयस्त्रिंशप्र॰ M; त्रयस्त्रिंशत्प्र॰ the other MSS.

२ All MSS. exc. M ins. इति ।

३ Thus M; पृष्ठौ Be UD; पृष्ठ्यो B; पृष्ठ्यो Be 11.

४ Thus M; मासाश्चर्यंत्य॰ B Be 11 DU (pr. m.); मासानुपर्यंत्य॰ Be

५ Thus M; दशममास्यं तृतीयमभि॰ Be; दशमासाश्चाभिप्ल॰ BU (pr. m.); दशममासमभिप्ल॰ Be 11 U (sec. m.).

६ सर्वेऽग्नि॰ Be.

ग्रहक्लृप्तेरेव मीमांसा। तद्धैतदेके[1] सारस्वतवैष्णवौ ग्रहौ गृह्णन्ति प्रायणीयादिवाग्रे ऽतिरात्रादोदयनीयादाम्वै सरस्वती यज्ञो विष्णुस्ते वाचं चैव यज्ञं च मध्यतः परिगृह्यानार्ता उदृचं गमिष्याम[2] इति वदन्तस्तदु वा आहुर्यद्वाचा[3] यज्ञस्तायते तेन सरस्वत्याप्ता[4] यदु[5] यज्ञस्तेन[5] विष्णुना वै[6] नो ब्राह्मणं भवति। सारस्वतवैष्णवौ ग्रहौ गृह्णीयादिति नैतदाद्रियेत[7]। नाद्रियेतेति[7] स्थितिः। ॥ १६ ॥

अथातो ऽंश्वदाभ्ययोरेव ग्रहणं। प्रायणीये ऽदाभ्यं गृह्णीयादंशुं वैषुवते ऽदाभ्यं महाव्रत उभौ प्रायणीय उभौ वैषुवत उभौ महाव्रते। यत्र क्व चैवैनौ[8] गृह्णीयादित्येतदपरम्। अथातः परःसाम्नामेव ग्रहणं। ते वा एते परःसामानः पुरस्ताद्वैषुवतात्त्र्यहमन्वहमितः पराञ्चो गृह्यन्त उपयामगृहीतो ऽस्यद्भ्यस्त्वौषधीभ्यो जुष्टं गृह्णाम्युपयामगृहीतो ऽस्योषधीभ्यस्त्वा

---

१ Thus Be; तद्धोतैतदेके MUD; तद्धोतदेके Be 11; तद्धोतेतदेके B; cp. supra p. 261, 14.

२ ॰ष्यामह Be and M, but, if I see right, the ह has been struck out.

३ ॰र्यांवाचा M.

४ All MSS. exc. M ॰प्ता इति।

५ Thus M; यद्यज्ञस्तेन Be; यज्ञंयज्ञस्तेन the other MSS.

६ वै om. BUD Be (pr. m.).

७ Thus M (cp. supra p. 252, 10); नैतदाद्रियेत आद्रियेतेति the other MSS.

८ Thus M; चैनौ the other MSS.

प्रजाभ्यो जुष्टं गृह्णाम्युपयामगृहीतोऽसि प्रजाभ्यस्त्वा प्रजापतये जुष्टं गृह्णामीत्यथ वैषुवतेऽह्नि शुक्राग्रा ग्रहा गृह्यन्ते[1] समानं कर्माग्रयणाद्ग्रहादाग्रयणं[2] गृहीत्वा चोन्परःसाम्नो गृह्णात्युपयामगृहीतोऽस्यद्भ्यस्त्वौषधीभ्यो जुष्टं गृह्णाम्युपयामगृहीतोऽस्योषधीभ्यस्त्वा प्रजाभ्यो जुष्टं गृह्णाम्युपयामगृहीतोऽसि प्रजाभ्यस्त्वा प्रजापतये जुष्टं गृह्णामीत्यथ सौर्यर्चा[2] सौर्यमतिग्राह्यं गृह्णाति ॥ १७ ॥

तरणिर्विश्वदर्शत इत्यनुद्रुत्योपयामगृहीतोऽसि सूर्याय त्वा भ्राजस्वते जुष्टं गृह्णामीति[1] परिमृज्य सादयत्येष ते योनिः सूर्याय त्वा भ्राजस्वत इत्यथावृत्तान्गृह्णात्युपयामगृहीतोऽसि प्रजाभ्यस्त्वा प्रजापतये जुष्टं गृह्णाम्युपयामगृहीतोऽस्योषधीभ्यस्त्वा प्रजाभ्यो जुष्टं गृह्णाम्युपयामगृहीतोऽस्यद्भ्यस्त्वौषधीभ्यो जुष्टं गृह्णामीति[1] सन्नेतदहरतिग्राह्या गृह्यन्त इति ब्राह्मणमथोर्ध्वं वैषुवतादहरहरन्वहमावृत्तानेव गृह्णाति वैश्वकर्मणादित्याभ्यां विपर्यासमुपयामगृहीतोऽसि प्रजाभ्यस्त्वा प्रजापतये जुष्टं गृह्णामीत्यथ वैश्वकर्मणं[1] विश्वकर्मन्हविषा वावृधान इत्यनुद्रुत्योपयामगृहीतोऽस्योषधीभ्यस्त्वा प्रजाभ्यो जुष्टं गृह्णामीत्यथादित्यमदितिर्न उरुष्यत्वित्यनुद्रुत्योपयामगृहीतोऽस्यद्भ्यस्त्वौषधीभ्यो जुष्टं गृह्णामीत्यथ वैश्वकर्मणमथादित्यमथोर्ध्वं त्र्यहाद्वैश्वकर्मणादित्याभ्यामेव विपर्यासमेत्या

१ षड् ins. M.

२ om. B Be 11 UD.

महाव्रतात्तावुभौ सह महाव्रते गृह्येते । अथैतं महाव्रतीये ऽह्नि प्राजापत्यमतिग्राह्यं गृह्णाति । त्वं क्रतुमपिवृञ्जन्ति विश्व इत्यनुद्रुत्योपयामगृहीतो ऽसि प्रजापतये त्वा जुष्टं गृह्णामीति । परिमृज्य सादयत्येष ते योनिः प्रजापतये त्वेति । ॥ १८ ॥

अथातः पशुक्लृप्तेरेव सौमाꣳसौकैन्द्राग्नानां[१] प्रशꣳसातिरात्रपशवो ऽभितो मध्य ऐन्द्राग्ना । ऐकादशिना[२] अभितो मध्य ऐन्द्राग्नाः । सर्वाग्नेया[३] एव स्युरित्येतदेकꣳ । सर्वैन्द्राग्ना[४] एव स्युरित्येतदेकꣳ । सर्वप्राजापत्या[५] एव स्युरित्येतदेकꣳ । सर्वैकादशिना[६] एव स्युरित्येतदपरं । तेषाꣳ सर्वैकादशिनैर्यतां[७] प्रसिद्धमेवोत्तमस्य दशरात्रस्य तृतीये ऽहन्सप्तदश उक्थ्य एकादशिन्याप्यते । तस्य नवाहान्यपशून्यतिरिच्यन्ते । तेष्वेतानेव ब्राह्मणवतः पशूनालभन्ते वैष्णवं वामनमित्येताꣳस्तेषामेवं[८] यतां बार्हस्पत्यो वैषुवते सवनीयः संपद्यते । तस्य सौर्यमुपालभ्यं कुर्वन्ति । यद्यु वा एतानेव[९] ब्राह्मणवतः पशून्न विन्दन्ति नवैतानि मध्यमानि सांवत्सरिकाण्यहान्यैन्द्राग्नपशूनि

---

१ Thus M; सौमाꣳसा उक्तैवैन्द्राग्नानां Be; सौमाꣳसा ऐन्द्रा॰ B Be 11 UD.

२ Thus M; एका॰ the other MSS.

३ सर्वं आग्ने॰ MSS. exc. M.

४ सर्वं ऐ॰ MSS; this passage is missing in M.

५ सर्वप्रा॰ MSS. exc. M.

६ Thus M; सर्वं ऐका॰ Be; सर्वं एका॰ the other MSS.

७ Thus M; युतां or यताः the other MSS.

८ ॰मेवं M Be; ॰मेव the other MSS.

९ M; एतंनव Be 11 BUD; एतानेव Be.

कुर्वन्ति । तेषामेवं यतामैन्द्राग्नो वैषुवते सवनीयः संपद्यते । तस्य सौर्यमुपालम्भ्यं कुर्वन्ति । सावित्रो महाव्रते । तस्य प्राजापत्यस्तूपर ऐन्द्रस्तूर्षभ उपालम्भ्यौ भवतः । ॥ १९ ॥

पञ्चमः ॥

श्वो महाव्रतमित्युपकल्पयते [१]ऽपरिमिताश्चयानपरिमितान्दुन्दुभीꣳस्तावत[२] उ[२]वेवाजिसृतस्तूर्म[२] चेडसंवर्त[३] च भूमिदुन्दुभिमार्षभं चर्म मलाङ्कूलं ब्राह्मणं च शूद्रं चार्द्रं[४] च चर्मकर्त[९] । प्रेङ्खꣳ होता कूर्चावध्वर्युर्बृसीर्होत्रका[५] औदुम्बरीमुद्गातासन्दीमुपकल्पयते[१] । वाणं च शततन्तुमाघाटीः पिञ्छोलाः[६] कर्करीका इति तदु पत्नयः । कटपरिवारं च मिथुनौ चापरिमिताश्च दास्यस्तावत उ[७]वेवोदकुम्भानर्थेत[७] महाव्रतीये ऽह्नि पञ्चविꣳशमग्निष्टोममुपयन्ति रथंतरसामानꣳ । समानं कर्मा माहेन्द्राद्ग्रहान्माहेन्द्रं ग्रहं[८] गृहीत्वाथैतान्संभारानायातयति । जघनेनाग्नीध्रं गर्त[९] खानयित्वार्षभेण क्रूरचर्मणोत्तरलोम्नाभि-

---

१...१ This passage found in M and Be sec. m. only.

२ तावत एवा॰ Be.

३ Corrected (cp. infra p. 267. 5); चेडासंवर्त M; चेषुसं॰ Be.

४ om. Be.

५ ॰ब्रंसी॰ M Be.

६ पिङ्खोला: M here and infra.

७ Thus M; एवोद॰ the other MSS.

८ om. all exc. M Be.

९ कर्त M Be I1 (pr. m.) D.

विघ्नन्ति[१] । तस्य लाङ्गूलमुत्खिद्य हन्तानूपतिष्ठते । ऽथैतान्दुन्दुभीननुदिशमासञ्जयति । नानाहननैरनाघ्नन्त[२] एते हन्तारो ऽनूपतिष्ठन्ते । ऽथैते रथाः समन्तं देवयजनं परीत्योत्तरतस्तिष्ठन्ति[३] । तेषां तिसृधन्वी राजपुत्रो मुख्यो भवति । ॥ २० ॥

तस्मा अग्रेणाग्नीध्रमिडसंवर्तं[४] चर्मकर्तं व्यवास्यति । तं काल एव प्रस्त्यावृणन्त्यथैतौ ब्राह्मणश्च शूद्रश्चान्तरेण सदोहविर्धाने तिष्ठत आर्द्रं चर्मकर्तमादाय । प्रेङ्खꣳ होतारोहते । कूर्चावध्वर्युरुपस्तृणीते हमीर्हीचका । औदुम्बरीमुद्गातासन्दीमारोहत्यादत्ते वाणꣳ शततन्तुं माघाटीभिः पिञ्छोलाभिः कर्करीकाभिरित्युद्गातारं पत्नयः पर्युपविशन्त्यथ दक्षिणे वेद्यन्ते कटपरिवारे मिथुनौ संप्रवादयतो[५] । ऽथैता दास्य उदकुम्भानधिनिधाय मार्जालीयं पर्युपविशन्त्यथाध्वर्युः कूर्चयोरासीनो माहेन्द्रस्य स्तोत्रमुपाकरोति । स्तुवते माहेन्द्राय । प्रस्तुते साक्षि संप्रैषमाहाजिसृत आजिं धावत दुन्दुभीन्समाघ्नताभिषोतारो ऽभिषुणुताग्नीदाशिरं विनयोलूखलमुदादय प्रतिप्रस्थातः

१ °भिर्विनिघ्नन्ति M; cp. supra XI. 10 (p. 79. 4) and infra XVII. 39, XVIII. 18.

२ Corrected; नानाघातननैराघ्नत M; नानाहननैरनाघ्नत B Be 11 UD; नानाघननैरन्वाघ्नन्ता Be.

३ Thus M; परीत्यरथंतोत्तरतस्ति° all the other MSS.

४ Thus M; °मिधुसंवर्तं all the other MSS.

५ Thus M; संप्रवादेतो BUD (pr. m.) Be 11 (pr. m.); संभवतो Be 11 (sec m.) D (sec. m.); संप्रवादेयतो Be.

सौम्यस्य विद्धीति । यथासंप्रैषं ते कुर्वन्ति । धावन्त्याजिसृत । आघ्नन्ति दुन्दुभीन्संप्रवदन्ति वाच । आघाटीभिः पिञ्छोलाभिः कर्करीकाभिरित्युद्गातारं पत्न्य उपगायन्ति । ॥ २१ ॥

भद्रमु नाम सामास्ति । तदु वाचोपगीयते[1] । ऽथैष[1] तिसृधन्वी राजपुत्रश्चर्मावभिनत्ति । तं ब्राह्मणो ऽनूपतिष्ठते मापराद्धीर्मातिव्याद्धीरिति । तत्तथैव त्रिभिरन्तर्हितमवभिनत्त्यथैतौ[2] ब्राह्मणश्च शूद्रश्चार्द्रे चर्मकर्ते व्यायच्छेते इमे ऽराद्धुरिमे सुभूतमक्रन्निति ब्राह्मण । इम उद्वासीकारिण इमे दुर्भूतमक्रन्निति वृषलो । ब्राह्मणः संजयति । नश्यति वृषलः । संवर्तते मिथुनावथैता दास्य उदकुम्भानधिनिधाय मार्जालीयं परिनृत्यन्त्युपस्थानुपघ्नत्य दक्षिणान्पदो निघ्नन्तीरिदंमधु[3] गायन्त्यस्तासाꣳ सकृत्परीतानां प्रथमां वाचयति ॥ २२ ॥

गाव एव सुरभयो गावो गुग्गुलुगन्धयः । गावो घृतस्य मातरस्ता इह सन्तु भूयसीर्हैमहाꣳ इदं मध्वित्युपस्थानुपघ्नत्य दक्षिणानेव पदो निघ्नन्ति । द्वितीयं परीतानां प्रथमामेव वाचयति ननु गावो मह्नीरस्य गङ्गाया उदकं पपुः । पपुः सरस्वत्ये नद्यै ताः[4] प्राचीरुज्जगाहिरे[4] हैमहाꣳ इदं मध्वित्यु-

---

१ Thus M; ॰पगायंतेथैष BUD Bo 11; ॰पगायंत्यथैष Be.

२ I. s.o. अवभिनत्ति B Bo 11 UD: भवति।

३ Thus M and cp. Āp. XXI. 19. 18; निघ्नंतीदं॰ the other MSS.

४ Thus M; ताः प्रातरप्राचीमं जगाभिरे (or जगाभिः) the other MSS.; Keś.: ताः प्राचीर्वोजंगाधिरे; cp. Āp. XXI. 20. 3.

पश्चानुपहृत्य दक्षिणानेव पदो निघ्नन्ति । तृतीयं परीतानां प्रथमामेव वाचयति यदा राखन्द्यौ[१] वदतो[१] ग्राम्यं[२] मक्षीरदाग्रकौ[२] । क्षेमाध्यवस्यतो ग्रामे[३] नानत्त्वाꣳस्तष्यते वहन्दैमत्याꣳ इदं मध्वित्त्रिर्यथैना उत्तरेण मार्जालीयं तिष्ठन्त्यो वाचयतीदमेव मधु सारघमयꣳ सोमः सुतो बृहत् । तमिन्द्र परितातृपीर्दैमत्याꣳ इदं मध्विति । ता अत ऊर्ध्वमिदं मध्विदं मध्विदं मध्वित्येव[४] परियन्ति । तेषां य एव प्रायणीयो ऽतिरात्रः स उदयनीयः । सत्त्रादुदवसाय ज्योतिष्टोमेनाग्निष्टोमेन[५] चतुष्टोमेन पृष्ठशमनीयेन सहस्रदक्षिणेनैकैको यजेत । ॥ २३ ॥ षष्ठः ॥

स्वर्गकामो द्विरात्राय दीक्षते । तस्यापरिमिता दीक्षा द्वादशोपसदः । स तथा राजानं क्रीणाति यथा मन्यते द्विरात्रस्य मे सतो ऽमावास्याया उपवसथीये ऽहन्पूर्वमहः संपत्स्यत उत्तरमभिनुत्तरमिति । तस्य तथा संपद्यते । ऽभिप्लवः पूर्वमहर्भवति गतिरुत्तरं । ज्योतिष्टोमो ऽग्निष्टोमः पूर्वमहर्भवति । तेजस्तेनावरुन्द्धे । सर्वस्तोमो ऽतिरात्र उत्तरꣳ । सर्वस्याप्त्यै सर्वस्यावरुद्ध्यै । गायत्रं पूर्वे ऽहन्साम भवति । त्रैष्टुभ-

---

१ Uncertain ; राखंद्यौर्वदतो M ; राखद्योद्यो वदतो Be 11 ; रात्रौखद्यौतो वदतो Be ; घाराद्यौर्वदतो U ; D indistinct.

२ Thus M; ग्राम्यमंक्षी॰ Be Be 11.

३ ग्रामे M ; ग्रामो the other MSS.

४ ॰त्येवमेव M.

५ Thus M Be ; ज्योतिष्टोमेन चाग्निष्टोमेन the other MSS.

मुत्तरे' रथंतरं पूर्वं ऽहन्साम भवति' बृहदुत्तरे' वैखानसं पूर्वं ऽहन्साम भवति' षोडश्युत्तरे' हविष्मन्निधनं पूर्वमहर्भवति' हविष्कृन्निधनमुत्तरं' नानैवार्धमासयोर्भवतो नानावीर्ये भवत इति ब्राह्मणꣳ' संतिष्ठते द्विरात्रस्त्रिरात्रेण यक्ष्यमाणो भवति' स उपकल्पयते सहस्रं' तस्मिन्नुन्नतो वेहद्वामन इति भवन्त्ययास्यैषा सहस्रतम्यन्यतएनी कण्डूकृतोपक्लृप्ता[1] भवति' दीक्षते' रोहिण्या पिङ्गलयैकहायन्या सोमं क्रीणाति' द्वादशोपसदः' ॥ २४ ॥

तायते प्रथमे ऽहन्नग्निष्टोमस्तस्य त्रिवृत्प्रातःसवनं पञ्चदशं माध्यंदिनꣳ सवनꣳ सप्तदशं तृतीयसवनꣳ' स दाक्षिणानि हुत्वाग्नीध्रे स्रुवाहुतिं जुहोति त्वꣳ सहस्रमानय। उन्नत उद्वत्स्याभिनस्त्वचम्। सा मा सहस्र आभज प्रजया पशुभिः सह पुनर्माविशताद्रयिरित्युन्नत एतेषां त्रयाणां त्रिꣳशच्छतानां[2] प्रथमो नीयते' ऽहीनसंततिं करोति' तायते द्वितीये ऽहन्नुक्थ्यस्तस्य पञ्चदशं प्रातःसवनꣳ सप्तदशं माध्यंदिनꣳ सवनमेकविꣳशं तृतीयसवनꣳ' स दाक्षिणानि हुत्वाग्नीध्रे स्रुवाहुतिं जुहोत्यूर्गस्याङ्गिरस्यूर्णम्रदा ऊर्जं मे यच्छ पाहि मा मा मा हिꣳसीः सा मा सहस्र आभज प्रजया पशुभिः सह पुनर्माविशताद्रयिरिति' वेहद्वेतेषां त्रयाणां त्रिꣳशच्छतानां[2] प्रथमा[3] नीयते' ऽहीनसंततिं करोति' तायते तृतीये ऽह-

१ Thus M and Karmāntasūtra; कर्णदक्कृतो° the other MSS.

२ Sic MSS.!

३ प्रथमो M Bc.

अतिरात्रसंस्थः सप्तदशं प्रातःसवनमेकविꣳशं माध्यंदिनꣳ सवनं त्रिणव आर्भवः पवमानस्त्रयस्त्रिꣳशमग्निष्टोमसामैकविꣳशान्युक्थानि सषोडशिकानि ' षोडशं प्रथमꣳ रात्रिसाम पञ्चदशानीतराणि त्रिवृद्राथंतरः[1] सन्धिः ' स दाक्षिणानि हुत्वाग्नीध्रे स्रुवाहुतिं जुहोति त्वꣳ सहस्रस्य प्रतिष्ठासि[2] वैष्णवो वामनस्त्वम् । सा[3] मा सहस्र आभज प्रजया पशुभिः सह पुनर्माविशताद्रयिरिति ' वामन एतेषां त्रयाणां चत्वारिꣳशच्छतानां[4] प्रथमो नीयते ' नात्राहीनसंततिं करोति ' ॥ २५ ॥

अथैताꣳ सहस्रतमीमुत्तरेणाग्नीध्रं[5] पर्याणीयाहवनीयस्यान्ते द्रोणकलशमवघ्रापयेदाजिघ्र कलशं मह्युरुधारा पयस्वत्या त्वा विशन्त्विन्दवः समुद्रमिव सिन्धवः । सा मा सहस्र आभज प्रजया पशुभिः सह पुनर्माविशताद्रयिरिति ' प्रजयैवैनं पशुभी रय्या समर्धयति प्रजावान्पशुमान्रयिमान्भवति य एवं वेदेति ब्राह्मणमथ वै भवति तया सहाग्नीध्रं परेत्य पुरस्तात्प्रतीच्यां तिष्ठन्त्यां जुहुयादिति ' स तया सहाग्नीध्रं परेत्य पुरस्तात्प्रतीच्यां तिष्ठन्त्यां जुहोत्युभा जिग्यथुर्न पराजयेथे न पराजिग्ये कतरश्चनैनोः । इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा

---

१ Thus M; बृहद्राथंतरः Be; बृहद्रथंतरः the other MSS.

२ प्रतिष्ठा असि all, also M.

३ स M.

४ Thus M only (sic!); चत्वारिꣳशतानि all the other MSS.

५ ॰ग्नीध्रीयं MSS.; U sec. m. ॰ग्नीध्रं ।

सहस्रं वि तदैरयेथामिति। त्रेधाविभक्तं वै त्रिरात्रे सहस्रꣳ साहस्रीमेवैनां करोति। सहस्रस्यैवैनां मात्रां करोतीति ब्राह्मणमथास्यै रूपाणि जुहोत्यञ्ज्येतायै स्वाहा कृष्णायै स्वाहा श्वेतायै स्वाहेत्यथास्या उपोत्थाय नामभिर्दक्षिणं कर्णमाजपतीडे रन्ते ऽदिते सरस्वति प्रिये प्रेयसि महि विश्रुत्येतानि ते अघ्न्ये नामानि सुकृतं मा देवेषु ब्रूतादिति। देवेभ्य एवैनमावेदयत्यन्वेनं देवा बुध्यन्त इति ब्राह्मणम्। ॥ २६ ॥

अथैताꣳ सहस्रतमीमन्तरेण चात्वालोत्करावुदीचीं नीयमानामनुमन्त्रयते सा मा सुवर्गं लोकं गमय सा मा ज्योतिष्मन्तं लोकं गमय सा मा सर्वान्पुण्याँल्लोकान्गमय सा मा प्रतिष्ठां गमय प्रजया पशुभिः सह पुनर्माविशताद्रयिरिति। प्रजयैवैनं पशुभी रय्यां प्रतिष्ठापयति। प्रजावान्पशुमान्रयिमान्भवति य एवं वेदेति ब्राह्मणमथ वै भवति तामग्नीधे वा ब्रह्मणे वा होत्रे वोद्गात्रे वाध्वर्यवे वा दद्यात्सहस्रमस्य सा दत्ता भवति सहस्रमस्य प्रतिगृहीतं भवतीति ब्राह्मणमथ वै भवति यस्तामविद्वान्प्रतिगृह्णाति तां प्रतिगृह्णीयादेकासि न सहस्रमेकां त्वा भूतां प्रतिगृह्णामि न सहस्रमेका मा भूताविश मा सहस्रमित्येकामेवैनां भूतां प्रतिगृह्णाति न सहस्रं य एवं वेदेति ब्राह्मणमथ वै भवति स्योनासि सुषदा सुशेवा स्योना माविश सुषदा माविश सुशेवा माविशेत्याह। स्योनैवैनꣳ सुषदा सुशेवा भूताविशति नैनꣳ हिनस्तीति ब्राह्मणमथ वै भवति ब्रह्मवादिनो वदन्ति सहस्रꣳ सहस्रतम्यन्वेती३

सहस्रतमीꣳ सहस्राꣳमिति । यत्प्राचीमुत्सृजेत्सहस्रꣳ सहस्रतम्यन्वियात्तांसहस्रमप्रज्ञात्रꣳ । सुवर्गं लोकं न प्रजानीयात्तां प्रतीचीमुत्सृजति । ताꣳ सहस्रमनु पर्यावर्तते । सा प्रजानती सुवर्गं लोकमेति । यजमानमभ्युत्सृजतीति । तां पुरस्तात्प्रतीचीं यजमानमभ्युत्सृजति । क्षिप्रे सहस्रं प्रजायत उत्तमा नीयते प्रथमा देवान्गच्छतीति ब्राह्मणं । तेन हैतेन रौहिणेयः क्रोथुनिः[1] कौशाम्बो[2] यास्क ऋतुमुखेषु विहृतेनेजे[3] । ऽथो[3] हाजमाम[3] सग्रको गार्ग्य आरुणेरन्तेवासी । स[4] ह[4] सꣳस्थामदृष्ट्वोवाच[4] ननु सत[5] एकाहाꣳ इति । नेति हैनं प्रत्युवाच । तꣳ होपेयाय । तस्मा उ हैनꣳ स उवाच । तेन ह स्म[6] समस्तेनैव[6] यजते । तमेतं गर्गत्रिरात्र इत्याचक्षते । ॥ २७ ॥ सप्तमः ॥

चतुरो वीरानवरुरुत्समानसुद्रराजाय दीक्षते । [7]तस्यापरिमिता दीक्षा द्वादशोपसदः संस्थाहान्यग्निष्टोमा एवैते चतु-

---

[1] Thus M; काथुनि B Be 11 D; क्राथनिः Be.

[2] कौकाबो B.

[3] Thus M; विहृतेनेजेताजमाम B Be 11 DU; विहृते नेयजेताथो हाजमाम Be.

[4] Thus M; संचसꣳस्थो (स्था) हद्दोवाच B Be 11 UD; सहस्रं हद्दोवाच Be.

[5] Doubtless corrupt; thus reads M; नर Be 11 D; नर BU; नप Be.

[6] Thus M; क्ष (स्म) समस्ते (स्ते) नैव the other MSS.

[7] From here unto दीक्षते, p. 274. 5, left out in M.

त्रिꣳशाः पवमाना[1] उच्चस्तोमाः[1] स्युरित्येतदेकमेकोऽग्निष्टोमो द्वावुक्थ्यावथातिरात्रश्छन्दोगानु[2] सामविकल्पं[3] पृच्छेयुरित्येतदपरं। त्रिꣳ श्रद्धादेवं यजमानं चत्वारि वीर्याणि नोपानमन्तेज इन्द्रियं ब्रह्मवर्चसमन्नाद्यमित्येतान्कामानवरुन्धमानश्चतूरात्राय[4] दीक्षते। तस्यापरिमिता दीक्षा द्वादशोपसदस्तस्याहान्यग्निष्टोमा एवैते चतुष्टोमाः स्युरित्येतदेकमेकोऽग्निष्टोमो द्वावुक्थ्यावथातिरात्रश्छन्दोगानु[2] सामविकल्पं पृच्छेयुरित्येतदपरं। पुष्टिकामश्चतूरात्राय दीक्षते। तस्यापरिमिता दीक्षा द्वादशोपसदो। ऽथ वै भवति पुरोडाशिन्य उपसदो भवन्तीति। प्रथमे चतूरात्र आग्नेय आज्य आग्नेयमष्टाकपालꣳ सायंप्रातरन्ववधाय जुहोति। द्वितीये चतूरात्रे सौम्य आज्ये सौम्यं चतुष्कपालꣳ सायंप्रातरन्ववधाय जुहोति। तृतीये चतूरात्रे वैष्णव आज्ये वैष्णवं त्रिकपालꣳ सायंप्रातरन्ववधाय जुहोति। तस्य त्रिवृत्सप्तदशौ विपर्यासꣳ स्तोमौ भवतः। प्राणो वै त्रिवृदन्नꣳ सप्तदशः प्रजापतिः। प्राणाच्च खलु वा इदमन्नाद्याच्च

---

१ Thus (without visarga) Be; पवमानस्तोमा B Be 11 UD.

२ I am in doubt whether छन्दोगान् सा॰ पृ॰ or छन्दोगानु सा॰ पृ॰ should be put into the text; Be has each time the last mentioned reading, M presents once the first, once the last mentioned; the other MSS. छंदोगाह्नन् or ॰ह्नु or छंदोगाह्न।

३ स्तोमवि॰ B Be 11 DU; सामवि॰ Be.

४ Thus Be; ॰मवरुन्धत्स्य (त्सु) कामस्य॰ B Be 11 UD.

परिगृह्य प्रजापतिः प्राजायत । प्राणाच्चैवैतदन्नाद्याच्च परिगृह्य यजमानः प्रजायते । तस्माद्वान्यग्निष्टोमा एवैते चतुस्त्रिंशपवमानाः स्युरित्येतदेकमेको ऽग्निष्टोमो द्वावुक्थ्यावथातिरात्रश्छन्दोगानु[1] सामविकल्पं इच्छेयुरित्येतदपरम् । ॥ २८ ॥

प्रजातिकामो[2] वा व्याप्तकामो वा पशुकामो वा[3] वाचो[3] वान्तं[3] परिजिगांसन्त्संवत्सराय दीक्षते । तस्यापरिमिता दीक्षा द्वादशोपसदस्तस्याहानि त्रिवृदग्निष्टोमः पञ्चदश उक्थ्यः सप्तदश उक्थ्यः पञ्चविंशो ऽग्निष्टोमो महाव्रतवान्विश्वजित्सर्वपृष्ठो ऽतिरात्रः । सारस्वतेनायनेनैष्यन्तो[4] दृषद्वत्यां गा उपकल्पयन्त ऋषभैकादशा[5] अन्या[6] ऋषभैकशता[7] अन्यास्तेषामाश्वत्थौ हविर्धानं चाग्नीध्रं च भवतस्तद्धि सुवर्ग्यं । चक्रीवती भवत । उलूखलबुध्न एषां यूपो भवति । ते सरस्वत्यै जघन्योदके[8] दीक्षन्ते । तेषामयमेव त्रिवृदग्निष्टोमः संतिष्ठते । तस्मिन्संस्थिते ऽभि यूपं वहन्त्यभि धिष्णियान्हरन्त्यग्निष्ठे ऽनसि

१ Cp. page 274, note 2.

२ प्रजापतिकामो all MSS. exc. M.

३ Thus M Be; वावाचमंत Be 11 वावाचामंत BUD.

४ ०नैष्यन्तो (०ते) MSS. exc. M.

५ Thus M; ऋषभैकादश Be; ऋषभैका Be 11 BUD.

६ om. M.

७ Thus all, exc. M, which has ऋषभैकादशता ।

८ Thus B Be 11 UD; जघनेनोदके Be M.

समवशमयन्ते[1] यद्येषाꣳ समवशमयितव्यं[1] भवति। ते[2] ऽनेनैव[2] पृष्ठ्येन[2] षडहेन प्रतिपद्यन्ते। ऽहरहः शम्यान्यासेशम्यान्यासे यजमाना आक्रोशन्तो ऽभ्यानिमिच्छमाना यदा दश शतं कुर्वन्त्यथैकसुत्यानं। यदा शतꣳ सहस्रं कुर्वन्त्यथैकसुत्यानं। यदेषां प्रमीयेत यदा वा जीयेरन्नथैकसुत्यानं शाचे वा प्रस्रवणे। ॥ २९ ॥

अथातो सुन्वयनमित्याचक्षते। अमणः खारीविवधौ[3] सरस्वत्यै जघन्योदके[4] ऽग्नये व्रतपतये पुरोडाशमष्टाकपालं निर्वपति। सा प्रसिद्धेष्टिः संतिष्ठते। ऽथैताꣳ सवनेष्टिं निर्वपत्याग्नेयमष्टाकपालमैन्द्रमेकादशकपालं वैश्वदेवं द्वादशकपालमिति। तया समस्तया वा[5] विह्रतया वा प्रतिपद्यते। ऽहरहः शम्यान्यासेशम्यान्यासे यजमान[6] आक्रोशन्नभ्यानिमिच्छमानो[7] यदेनं[8] प्रतिराध्नुवन्ति यदा वास्यैतं खारीविवधमाच्छिन्दन्त्यथैकसुत्यानं[9] शाचे वा प्रस्रवणे। ॥ ३० ॥ अष्टमः ॥

---

१ Thus Be; समाशम॰ M; the other MSS. are wholly corrupt.

२ Thus M; सनेवष्टहेन B Be 11 UD; वेनेवपटृष्ठेन Be.

३ Thus M; ॰विवधः Be; शारीवधा the other MSS.

४ Corrected; जघनोदके M Be 11; जघनेनोदके the other MSS.

५ All exc. M om.

६ यजमाना M.

७ Corrected; ॰क्रोशमभ्या॰ B Be 11 UD; ॰क्रोशंभ्या॰ Be; ॰क्रोशंनीभ्या॰ M.

८ Thus MU Be 11; यदैवं BD; यदेवं Be.

९ Thus M Be; शारीविवेधमा॰ Be 11; राशौविवेधुमा BUD.

पशुकामः सप्तरात्राय दीक्षते । तस्यापरिमिता दीक्षा द्वादशोपसदस्तस्याहानि त्रिवृदग्निष्टोमः पञ्चदश उक्थ्यः सप्तदश उक्थ्य एकविꣳश उक्थ्यस्त्रिणव उक्थ्यः पञ्चविꣳशो ऽग्निष्टोमो महाव्रतवान्विश्वजित्सर्वपृष्ठो ऽतिरात्रो । बृहद्रथंतरे पूर्वेष्वहःसूपेत्य प्रत्यक्षं विश्वजिति पृष्ठान्युपयन्ति । ब्रह्मवर्चसकामो ऽष्टरात्राय दीक्षते । तस्यापरिमिता दीक्षा द्वादशोपसदस्तस्याहानि त्रिवृदग्निष्टोमः पञ्चदश उक्थ्यः सप्तदश उक्थ्य एकविꣳश उक्थ्यस्त्रिणव उक्थ्यस्त्रयस्त्रिꣳश उक्थ्यः पञ्चविꣳशो ऽग्निष्टोमो महाव्रतवान्विश्वजित्सर्वपृष्ठो ऽतिरात्रः । प्रजासु वा चुचुकासु ज्योगामयावी वा नवरात्राय दीक्षते । तस्यापरिमिता दीक्षा द्वादशोपसदस्तस्याहानि ज्योतिर्गौरायुरित्येतमेव त्र्यहं त्रिरुपयन्ति । तेषामायुरतिरात्र उत्तममहर्भवति । प्रजातिकामो वा व्यावृत्कामो वाभिचरन्वाभिचर्यमाणो[1] वा दशरात्राय दीक्षिष्यमाणो दशहोतारꣳ हुत्वा दशरात्राय दीक्षते । तस्यापरिमिता दीक्षा द्वादशोपसदस्तस्याहानि त्रिवृदग्निष्टोमो ऽग्निष्टुदाग्नेयीषु भवति । पञ्चदश उक्थ्य ऐन्द्रीषु । त्रिवृदग्निष्टोमो वैश्वदेवीषु । सप्तदशो ऽग्निष्टोमः प्राजापत्यासु तीव्रसोम । एकविꣳश उक्थ्यः सौरीषु । सप्तदशो ऽग्निष्टोमः प्राजापत्यासूपहव्यस्त्रिणवावग्निष्टोमावभित ऐन्द्रीषु । त्रयस्त्रिꣳश उक्थ्यो वैश्वदेवीषु । विश्वजित्सर्वपृष्ठो ऽतिरात्रः । ॥ ३१ ॥

---

१ वाभिचरन् left out in all exc. M.

प्रजाकामा एकादशरात्राय दीक्षन्ते । तस्यापरिमिता दीक्षा द्वादशोपसदस्त्र्याहानि ज्योतिरतिरात्रः । पृष्ठ्यः षडहस्त्रयश्छन्दोमा । अथातिरात्रो । ऽथाहीनविधिः पृष्ठ्यः षडहस्त्रयश्छन्दोमा । दशममहरथातिरात्रो । ऽथायं पौण्डरीक एकादशरात्रो ऽयुतदक्षिणो ऽश्वसहस्रदक्षिणस्तस्यापरिमिता दीक्षा द्वादशोपसदस्त्र्याहान्यभ्यासङ्ग्यः षडहस्त्रयश्छन्दोमा । दशममहरथातिरात्रो । ऽन्वहꣳ सहस्रꣳसहस्रं ददात्युत्तमे ऽहन्यश्वसहस्रं[1] ददात्यथातो ज्योतिरयनमित्याचक्षते । स भरतद्वादशाह इत्येक आहुर्दीक्षन्ते । तस्यापरिमिता दीक्षा द्वादशोपसदस्त्र्याहानि ज्योतिरतिरात्रो[2] । ज्योतिरग्निष्टोमो । ऽष्टौ ज्योतीꣳष्युक्थ्या[3] । ज्योतिरेवाग्निष्टोमो । ज्योतिरेवातिरात्र एतौ द्वादशाहौ । दशमं चाहरतिरात्रं च महाव्रतं व्यवदधाति । स एवैव[4] त्रयोदशरात्रः । ॥ ३२ ॥ नवमः ॥

अथ पूर्वश्चतुर्दशरात्रो । ऽतिरात्रः । पृष्ठ्यः षडहः । प्रत्यङ् षडहो । ऽथातिरात्रो । ऽथोत्तरश्चतुर्दशरात्रो । ऽतिरात्रो । ज्योतिर्गौरायुरिति त्र्यहः । पृष्ठ्यः षडहः । प्रत्यङ् त्र्यहो । ऽथातिरात्रो । ऽथ पूर्वः पञ्चदशरात्रो । ऽतिरात्रो । ज्योतिर्गौरायुरिति त्र्यहो । दशरात्रो । ऽथातिरात्रो । दशमं चाहरतिरात्रं च

[1] त्र्यह॰ M.

[2] Thus MUD; ज्योतिरात्रो B Be; Be 11 def.

[3] Thus M (sec. m.) BUD; ॰क्थ्यानि M (pr. m.) Be; Be 11 def.

[4] Thus Be B 11 DU; स चेव B; स एव M.

महाव्रतं[1] व्यवदधाति । स एवैवाब्राह्मणः[2] षोडशरात्रो । ऽथोत्तरः पञ्चदशरात्रो । ऽतिरात्रस्त्रिवृदग्निष्टोमो[3] । ज्योतिर्गौरायुरिति[3] त्र्यहः । पृष्ठ्यः षडहः । प्रत्यङ् त्र्यहो । ऽथातिरात्रो । ऽथ सप्तदशरात्रो । ऽतिरात्र । एकः पञ्चाहो । दशरात्रो । ऽथातिरात्रो । दशमं चाहरतिरात्रं च महाव्रतं[1] व्यवदधाति । स एवैवाब्राह्मणो[2] ऽष्टादशरात्रो । ऽथ विंशतिरात्रो । ऽतिरात्रो । ज्योतिर्गौरायुरिति त्रयस्त्र्यहाः । पृष्ठ्यः षडहः । प्रत्यङ् त्र्यहो । ऽथातिरात्रो । ऽथैकविंशतिरात्रो । ऽतिरात्रः । पृष्ठ्यः षडहः । सप्तैतानि मध्यमानि सांवत्सरिकाण्यहानि भवन्ति । प्रत्यङ् षडहो । ऽथातिरात्रः । ॥ २३ ॥ दशमः ॥

अथ पूर्वश्चतुर्विंशतिरात्रो । ऽतिरात्रो ज्योतिर्गौरायुरिति चत्वारस्त्र्यहा दशरात्रो ऽथातिरात्रो । दशमं चाहरतिरात्रं च महाव्रतं[1] व्यवदधाति । स एवैवाब्राह्मणः[2] पञ्चविंशतिरात्रो[4] । ऽथोत्तरश्चतुर्विंशतिरात्रो । ज्योतिरतिरात्रः । पृष्ठ्यः षडहस्त्रयस्त्रिंशात्त्रयस्त्रिंशमुपयन्त्यथानिरुक्तं पृष्ठ्यं षडहमुपयन्ति । त्रिवृत आयतने त्रयस्त्रिंशमुक्थ्यमुपयन्ति[5] रथंतरसामानं । तस्य चतुर्विंशाः पवमाना भवन्ति । पञ्चदशस्यायतने त्रिणव-

---

१ All MSS. exc. M ins. च ।

२ Some of the MSS. एवैवब्राह्मणः ।

३ त्रिवृदग्निष्टुब्ज्यो° M.

४ Thus M Be; चतुर्विंशति° B Be 11 DU.

५ अग्निष्टोमम् i.s.o. उक्थ्यम् M.

मुक्थ्यमुपयन्ति बृहत्सामानं' तस्याष्टाविꣳशाः पवमाना भवन्ति' सप्तदशस्यायतन एकविꣳशमुक्थ्यमुपयन्ति वैरूपसामानं' तस्य द्वात्रिꣳशाः[1] पवमाना भवन्ति' स एवायतन[2] एकविꣳशमुक्थ्यमुपयन्ति वैराजसामानं' तस्य षट्त्रिꣳशाः पवमाना भवन्ति' स एवायतने[2] त्रिणवमुक्थ्यमुपयन्ति शाक्वरसामानं' तस्य चत्वारिꣳशाः पवमाना भवन्ति' स एवायतने त्रयस्त्रिꣳशमुक्थ्यमुपयन्ति रैवतसामानं' तस्य चतुश्चत्वारिꣳशाः पवमाना भवन्ति' त्रयस्त्रिꣳशात्त्रयस्त्रिꣳशमुपयन्ति' तस्याष्टाचत्वारिꣳशाः पवमाना भवन्त्यथावृत्तं पृष्ठ्यꣳ षडहमुपयन्ति' ॥ ३४ ॥

त्रिवृतो ऽधि त्रिवृतमुपयन्ति' स्तोमानाꣳ संपत्त्यै प्रभवाय' ज्योतिरग्निष्टोममुपयन्त्यथातिरात्रो' ऽथ त्रिꣳशद्रात्रो' ज्योतिरतिरात्रः' पृष्ठ्यः षडहस्त्रयस्त्रिꣳशात्त्रयस्त्रिꣳशमुपयन्ति' त्रिणवमुपयन्त्येकविꣳशमुपयन्ति' त्रिवृतमग्निष्टुतमुपयन्ति' पञ्चदशमिन्द्रस्तोममुपयन्ति' सप्तदशमुपयन्त्येकविꣳशमुपयन्ति' चतुर्विꣳशमुपयन्ति' चतुर्विꣳशात्पृष्ठान्युपयन्ति' त्रयस्त्रिꣳशात्त्रयस्त्रिꣳशमुपयन्ति' त्रिणवमुपयन्ति' द्वावेकविꣳशावुपयन्ति' चतुरश्चतुष्टोमान्स्तोमानुपयन्त्यथातिरात्रो' ऽथ द्वात्रिꣳशद्रात्रो' ऽतिरात्रो' ज्योतिर्गौरायुरिति नव त्र्यहाः' प्रत्यङ् त्र्यहो' ऽथातिरात्रो' ऽथ त्रयस्त्रिꣳशद्रात्रो' ऽतिरात्रस्त्रयः

१ Thus M Bo 11; द्वाविꣳशाः the other MSS.
२ स om. M.

पञ्चाहा ' विश्वजित्सर्वपृष्ठो ऽतिरात्र ' एकः पञ्चाहो ' दशरात्रो ' ऽथातिरात्रो ' दशमं चाहरतिरात्रं च महाव्रतं[1] व्यवदधाति ' स उवेवाम्नाम्नणश्चतुस्त्रिंशद्रात्रः[2] ' ॥ ३५ ॥ एकादशः ॥

अथ षट्त्रिंशद्रात्रो ' ज्योतिरतिरात्रश्चत्वारो ऽभिप्लवाः षडहा ' दशरात्रो ' ऽथातिरात्रो ' दशमं चाहरतिरात्रं च महाव्रतं व्यवदधाति ' स उवेवाम्नाम्नणः[2] सप्तत्रिंशद्रात्रो ' ऽथैकस्मान्नपञ्चाशद्रात्रो ' ऽतिरात्रस्त्रयस्त्रिवृतो ऽग्निष्टोमा ' अथातिरात्रो ' दश पञ्चदशा उक्थ्या ' अथातिरात्रस्तेषां षोडशिमद्दशममहर्भवति ' द्वादश सप्तदशा उक्थ्या ' अथातिरात्रः ' पृष्ठ्यः षडहो ' ऽथातिरात्रो ' द्वादशैकविंशा उक्थ्या ' अथातिरात्रो ' ऽथ संवत्सरकृप एकस्मान्नपञ्चाशद्रात्रो ' ऽतिरात्र ' आरम्भणीयमहस्त्रयो ऽभिप्लवाः षडहास्तान्यष्टादशाहानि ' प्रायणीयारम्भणीयौ ' तानि विंशतिरभिजित्त्रयः परःसामानो ' ऽथ वैषुवतं ' त्रयो ऽर्वाक्सामानो ' ऽथ विश्वजिदावृत्तो ऽभिप्लवः षडहो ' गोआयुषी ' दशरात्रो ' महाव्रतं चातिरात्रश्चाथैकषष्टिरात्र[3] ' एतस्यैव सतो ऽभितो नवरात्रं पृष्ठ्यौ षडहावुपोहति ' तयोरावृत्त उत्तरो ' ऽथ

---

१ All MSS. exc. M ins. च ।

२ उवोम्ना॰ Be.

३ The passage चथैकषष्टिरात्र up to चातिरात्रश्च (p. 282. 2) is left out in all the MSS. exc. M Be, and the tradition preserved by Be is rather corrupt, cp. Pañc. br. XXIV. 19. 1.

शतरात्रोˈ ऽतिरात्रो ज्योतिर्गौरायुरिति अहश्चतुर्दशा-
भिप्लवाः षडहा दशरात्रो महाशतं चातिरात्रश्चाथ सहस्र-
रात्रोˈ ऽतिरात्रो नवनवतिस्त्रिवृतो ऽग्निष्टोमाः शतं पञ्च-
दशा उक्थ्याः शतꣳ सप्तदशा उक्थ्याः शतमेकविꣳशा
उक्थ्याः शतं त्रिणवा उक्थ्याः शतं त्रयस्त्रिꣳशा उक्थ्याः
शतं चतुर्विꣳशा उक्थ्याः शतं चतुश्चत्वारिꣳशा उक्थ्याः
शतमष्टाचत्वारिꣳशा उक्थ्या नवनवतिरेव[1] त्रिवृतो ऽग्नि-
ष्टोमा अथातिरात्रःˈ ॥ ३६ ॥ द्वादशः ॥

॥ इति षोडशः प्रश्नः ॥

---

१ Thus Be; ॰नवतिमेव the other MSS.

अतिरात्रं करिष्यन्नुपकल्पयते चतुरो ऽतिरात्रपशूनरुणपिशङ्गमश्वमौदुम्बरꣳ षोडशिपात्रं चतुःस्रक्ति ज्यायसो ऽश्मणा ज्यायस एकधनान् । दीक्षते । रोहिण्या पिङ्गलयैकहायन्या सोमं क्रीणाति । द्वादशोपसदः । प्रसिद्धेन कर्मणोपवसथादेत्याथ[1] वसतीवरीः परिहृत्य पयाꣳसि विश्रित्योपवसन्त्य् । अथातो महारात्र एव बुध्यन्ते । प्रातराज्यानि गृहीत्वा राजानमुपावहृत्य प्रातरनुवाकमुपाकरोति । परिहिते प्रातरनुवाके ऽपो ऽच्छैत्यद्भिरुदेत्यातिरात्रं[2] क्रतुमुपैति । प्रसिद्धो ऽभिषवः । प्रसिद्धं ग्रहा गृह्यन्ते । समानं कर्माग्रयणाद्ग्रहाद् । आग्रयणं[3] गृहीत्वा षोडशिनं गृह्णात्यातिष्ठ वृत्रहन्रथमित्यनुद्रुत्योपयामगृहीतो ऽसीन्द्राय त्वा षोडशिने जुष्टं गृह्णामीति । परिमृज्य सादयत्येष ते योनिरिन्द्राय त्वा षोडशिन इत्य् । अथोक्थ्यं गृह्णाति । समानं कर्माश्विनाद्ग्रहाद् । आश्विनं ग्रहं[4] गृहीत्वा चतस्रो रशना आदाय यूपमभ्येति । स्वर्वन्तं यूपमुत्सृज्य चतुरो ऽतिरात्रपशूनुपाकरोत्याग्नेयमैन्द्राग्नमैन्द्रꣳ[5] सारस्वतीं

---

१ Thus U, cp. supra XVI. 3 (p. 247. 6) ; ॰णोपवसथादेत्याथ M ; ॰णोपवसथादेत्याय D ; ॰णोपवसथादेत्याथ Tr ; ॰णोपवसथादेत्य Be ; ॰णोपवसथादेथ B Be 12 ; ॰णोपवसथ्यादेथ H.

२ उदैति M, उदेति the other MSS.

३ ग्रहं ins. B 12 D.

४ om. B Be.

५ हविष्कꣳ ins. M.

मेषीमिति[1] । तेषां प्रसिद्धं वपाभिश्चरित्वा प्रसर्पन्ति प्रातःसवनाय । तद्दुधा संतिष्ठते । प्रसर्पन्ति माध्यंदिनाय सवनाय । प्रसिद्धो ऽभिषवः । प्रसिद्धं ग्रहा गृह्यन्ते । समानं कर्माग्रयणाद्ग्रहादाग्रयणं[2] गृहीत्वा[2] षोडशिनमभिगृह्णातीन्द्रमिद्धरी वहत इत्यनुद्रुत्योपयामगृहीतो ऽसीन्द्राय त्वा षोडशिने जुष्टं गृह्णामीति । परिमृज्य सादयत्येष ते योनिरिन्द्राय त्वा षोडशिन इत्यथोक्थ्यं गृह्णात्युधा माध्यंदिनꣳ सवनꣳ संतिष्ठते । प्रसर्पन्ति तृतीयसवनाय । प्रसिद्धमादित्यग्रहेण चरित्वाग्रयणं गृह्णात्यथ षोडशिनमभिगृह्णात्यसावि सोम इन्द्र त इत्यनुद्रुत्योपयामगृहीतो ऽसीन्द्राय त्वा षोडशिने जुष्टं गृह्णामीति । परिमृज्य सादयत्येष ते योनिरिन्द्राय त्वा षोडशिन इत्यथोक्थ्यं गृह्णाति । ॥ १ ॥

समानं कर्म पवमानात्पवमानेन चरित्वा स्वे धामन्यग्रऽभिश्चरति[3] । तेषां नाना मनोता नाना देवता नाना प्रत्यभिमर्शना नाना वसाहोमाः समानो वनस्पतिः समानः स्विष्टकृन्मेषवान्समानीडा समान्यो दिशो । नाना दिश इत्येके । समानं कर्म ध्रुववच्चमसेभ्यो । ध्रुववद्भि-

१ Instead of इति B Be and U (sec. m.) have the clause: यदि वा सारस्वतौ मेषीमेवोपाकुर्यात्; Tr. has the same words after इति; they are clearly an interpolation, cp. the Dvaidha.

२ D ins. षष्ठं and reads गृहीत्वाथ ।

३ Thus Tr Be 12 HD; चरन्ति the other MSS.

श्चमसैश्चरित्वा त्रिभिरुक्थ्यपर्यायैश्चरतीन्द्रावरुणाभ्यामिन्द्राबृहस्पतिभ्यामिन्द्राविष्णुभ्यामित्यथ षोडशिना चरिष्यन्प्राङायन्नाह होतुश्चमसमनून्नयध्वमुन्नेतः सोमं प्रभावयेति ' होतृचमसमेव प्रथममुन्नयन्ति ' यथोपपादमितरान्समुन्नीयोत्तरवेद्याꣳ सꣳसादयन्ति ' तदेतꣳ षोडशिनꣳ सह सꣳसादयन्त्यथैनमुपतिष्ठते ॥ २ ॥

यस्मान्न जातः परो अन्यो अस्ति य आविवेश भुवनानि विश्वा । प्रजापतिः प्रजया संविदानस्त्रीणि ज्योतीꣳषि सचते स षोडशी ॥ एष ब्रह्मा य ऋत्वियः । इन्द्रो नाम श्रुतो गणे ॥ प्र ते महे विदथे शꣳसिषꣳ हरी । य ऋत्वियः प्र ते वन्वे । वनुषो हर्यतं मदम् ॥ इन्द्रो नाम घृतं न यः । हरिभिश्चारु सेचते । श्रुतो गण आ त्वा विशन्तु । हरिवर्पसं गिर इत्यथाप उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ् द्रुत्वा समयाविषिते सूर्ये हिरण्येन षोडशिनं स्तोत्रमुपाकरोति ' पुरस्तात्प्रत्यञ्चमरुणपिशङ्गमश्वं धारयन्ति श्यामं वा ' हिरण्यꣳ संप्रदाय स्तुवते ' ॥ ३ ॥

होत्र एषोत्तमेति प्राङ्होतुः कालात्पराङावर्तते ऽध्वर्युर्भ्येनमाह्वयते होता ' प्रत्याह्वयते ऽध्वर्युः ' शꣳसति ' प्रतिगृणात्यथ यत्र होतुरभिजानात्या त्वा वहन्तु हरय इति तदुभयतोमोदं[1] प्रतिगृणात्योथा मोद इव मदे मदा मोद

---

1 °मोदं M Tr Be B; °मदं Be 12 DU; मंद H.

इवोमयेत्यथ[1] यच होतुरभिजानाति प्रप्र वस्त्रिष्टुभमिति तन्नमिद्धसुक्थं[2] प्रतिगीर्य प्राङ्ङेत्योद्यच्छत एतᳲ षोडशिनं यद्यमनूद्यच्छन्ते चमसानथाश्रावयत्यो श्रावयास्तु श्रौषडुक्थशा यज सोमानामिति । वषट्कृते[3] षोडशिनं जुहोतीन्द्राधिपते ऽधिपतिस्त्वं देवानामस्यधिपतिं मामायुष्मन्तं वर्चस्वन्तं मनुष्येषु कुर्विति । वषट्कृतानुवषट्कृते द्विर्जुहोति । तथैव द्विर्द्विः सर्वाᳲ-स्चमसाञ्जुहोत्यथ भक्षैः प्रत्यञ्च आद्रवन्त्यनुसवनभक्ष इन्द्रेण षोड-शिना पीतस्येति । तस्य[4] व्युदितो[4] भक्षो । यजमानवशो हि[5] यजमानस्य होतृवशो होतुस्तौ तु चेदध्वर्यवे प्रब्रूयातां वषट्कर्तुर्भक्ष इत्येव ब्रूयात्तथात्मानं भक्षान्नान्तरेति[6] । तस्य भक्षः ॥ ४ ॥

इन्द्रश्च सम्राड्वरुणश्च राजा तौ ते भक्षं चक्रतुरग्र एतम् । तयोरनु भक्षं भक्षयामि वाग् जुषाणा सोमस्य तृप्यतु तस्य त इन्द्रेण षोडशिना पीतस्य मधुमत उपहूतस्योपहूतो भक्षया-मीति । निर्णिज्य पात्रं प्रयच्छत्यथैतमरुणपिशङ्गमश्वं ददाति

---

१ The pratigara thus only in the Vivaraṇa; all the MSS. (exc. only M, which has the first time also मोद इव) and Keś. read मोदैव i.s.o. मोद इव।

२ तत् only found in MDUBe 12.

३ Thus M Tr Be 12 Be UD Keś.; वषट्कृतानुवषट्कृते HB.

४ Thus MDH(= विविधमुक्तः); तस्याव्युदितो the other MSS.

५ Thus Be 12 HDU Keś.; च Be B; om. M Tr.

६ Thus M (writing: भक्षांना॰); भक्षमंतरेति Be 12; भक्षांतरेवेति H Tr; भक्षांतरेवोति U; भक्षांतरे Be; भक्षानंतरे B; D om. this passage.

श्यामं वा। होतृचमसमेवैते त्रयः समुपहूय भक्षयन्ति। यथाचमसं चमसान्हिन्व म इत्यात्मानं प्रत्यभिमृशन्ते। नाप्याययन्ति चमसान्सर्वभक्षा[1] मार्जयन्ते। ऽथ संप्रैषमाह प्रतिप्रस्थातराग्रयणस्थालीयं गृहस्थालीयानि जाघनीः पृषदाज्यं गोपायाग्नीद्राश्विनं ते द्विकपालꣳ शृतमप्यपररात्रे[2] ऽस्त्विति। यथासंप्रैषं तौ कुरुतो। ऽथ विनिःसृप्य रात्रये प्रसर्पन्ति। संप्रसृप्याग्निदित्वाध्वर्युः प्राङ्गायत्याह ॥ ५ ॥

होतुश्चमसमनून्नयध्वमुन्नेतः सोमं प्रभावयेति। होतृचमसमेव प्रथममुन्नयन्ति यथोपपादमितरान्संसुन्नीयोत्तरवेद्याꣳ सꣳसाद्यन्त्यथाप उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ् हुत्वा स्तोत्रमुपाकरोति। स्तुवते। स्तोत्र एषोत्तमेति प्राङ्होतुः कालात्पराङावर्तते ऽध्वर्युरभ्येनमाह्वयते होता। प्रत्याह्वयते ऽध्वर्युः। शꣳसति। प्रतिगृणाति। प्रसिद्धमुक्थ्यं प्रतिगीर्य प्राङेत्योद्यच्छत एतꣳ होतृचमसमनूद्यच्छन्ते चमसानथाश्रावयत्यो श्रावयास्तु श्रौषडुक्थशा यज सोमानामिति। वषट्कृतानुवषट्कृते द्विर्जुहोति। तथैव द्विर्द्विः सर्वाꣳश्चमसाञ्जुहुत्वाथ भक्षैः प्रत्यञ्च आद्रवन्त्यनुसवनभक्ष इन्द्रेण पीतस्येति। होतृचमसमेवैते त्रयः समुपहूय भक्षयन्ति। यथाचमसं चमसान्हिन्व म

---

१ M here and infra ॰भक्षा।

२ Thus HB Tr Be and cp. Karmānta ; शृतमथापर॰ U ; शृतमद्यापर॰ M Be 12 D, Keś.

इत्यात्मानं प्रत्यभिमृशन्ते ' नाप्याययन्ति चमसान्सर्वंभक्षा मार्जयन्ते ' ऽथ प्राङायन्नाह ॥ ६ ॥

मैत्रावरुणस्य चमसमनून्नयध्वमुन्नेतः सोमं प्रभावयेति ' मैत्रावरुणचमसमेव प्रथममुन्नयन्ति ' यथोपपादमितरान्त्संमुन्नीयोत्तरवेद्याꣳ सꣳसादयन्त्यथाप उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ् द्रुत्वा स्तोत्रमुपाकरोति ' स्तुवते ' मैत्रावरुणायैषोत्तमेति प्राङ्मैत्रावरुणस्य कालात्पराङावर्तते ऽध्वर्युरभ्येनमाह्वयते मैत्रावरुणः ' प्रत्याह्वयते ऽध्वर्युः ' शꣳसति ' प्रतिगृणाति ' प्रसिद्धमुक्थ्यं प्रतिगीर्य प्राङेत्योद्यच्छत एतं मैत्रावरुणचमसमनूद्यच्छन्ते चमसानथाश्रावयत्यो श्रावयास्तु श्रौषडुक्थ्या यज सोमानामिति ' वषट्कृतानुवषट्कृते द्विर्जुहोति ' तथैव द्विर्द्विः सर्वाꣳश्चमसाञ्जुह्वत्यथ भक्षैः प्रत्यञ्च आद्रवन्त्यनुसवनभक्ष इन्द्रेण पीतस्येति ' मैत्रावरुणचमसमेवैते त्रयः समुपह्वय भक्षयन्ति ' यथाचमसं चमसाञ्छिन्व स इत्यात्मानं प्रत्यभिमृशन्ते ' नाप्याययन्ति चमसान्सर्वंभक्षा मार्जयन्ते ' ऽथाह प्रतिप्रस्थातश्चमसगणौ ते प्रचरेति ' तच्छ्रुत्वा प्रतिप्रस्थाता प्राङायन्नाह ॥ ७ ॥

ब्राह्मणाच्छꣳसिनश्चमसमनून्नयध्वमुन्नेतः सोमं प्रभावयेति ' ब्राह्मणाच्छꣳसिचमसमेव प्रथममुन्नयन्ति ' यथोपपादमितरान्त्संमुन्नीयोत्तरवेद्याꣳ सꣳसादयन्त्यथाप उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ् द्रुत्वा स्तोत्रमुपाकरोति ' स्तुवते ' ब्राह्मणाच्छꣳसिन एषोत्तमेति प्राङ्ब्राह्मणाच्छꣳसिनः काला-

त्पराङावर्तते प्रतिप्रस्थाताश्चैनमाह्वयते ब्राह्मणाच्छꣳसी । प्रत्याह्वयते प्रतिप्रस्थाता । शꣳसति । प्रतिगृणाति । प्रसिद्धमुक्थं प्रतिगीर्य प्राङेत्योद्यच्छत एतं ब्राह्मणाच्छꣳसिचमसमनूद्यच्छन्ते चमसानथाश्रावयत्यो श्रावयास्तु श्रौषडुक्थशा यज सोमानामिति । वषट्कृतानुवषट्कृते द्विर्जुहोति । तथैव द्विर्द्विः सर्वाꣳश्चमसाननुकल्पयन्त्यथ भक्षैः प्रत्यञ्च आद्रवन्त्यनुसवनभक्ष इन्द्रेण पीतस्येति । ब्राह्मणाच्छꣳसिचमसमेवैते त्रयः समुपहूय भक्षयन्ति । यथाचमसं चमसान्हिन्वन्त स इत्यात्मानं प्रत्यभिमृशन्ते । नाप्याययन्ति चमसान्सर्वभक्षा मार्जयन्ते । ऽथ प्राङायन्नाह ॥ ८ ॥

अच्छावाकस्य चमसमनून्नयध्वमुन्नेतः सोमं प्रभावयेत्यच्छावाकचमसमेव प्रथममुन्नयन्ति । यथोपपादमितरान्समुन्नीयोत्तरवेद्याꣳ सꣳसादयन्त्यथाप उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ् हुत्वा स्तोत्रमुपाकरोति । स्तुवते । ऽच्छावाकायैषोत्तमेति प्राङच्छावाकस्य कालात्पराङावर्तते प्रतिप्रस्थाताश्चैनमाह्वयते ऽच्छावाकः । प्रत्याह्वयते प्रतिप्रस्थाता । शꣳसति । प्रतिगृणाति । प्रसिद्धमुक्थं प्रतिगीर्य प्राङेत्योद्यच्छत एतमच्छावाकचमसमनूद्यच्छन्ते चमसानथाश्रावयत्यो श्रावयास्तु श्रौषडुक्थशा यज सोमानामिति । वषट्कृतानुवषट्कृते द्विर्जुहोति । तथैव द्विर्द्विः सर्वाꣳश्चमसाननुकल्पयन्त्यथ भक्षैः प्रत्यञ्च आद्रवन्त्यनुसवनभक्ष इन्द्रेण पीतस्येत्यच्छावाकचमसमेवैते त्रयः समुपहूय भक्षयन्ति । यथाचमसं चमसान्हिन्वन्त स

इत्यात्मानं प्रत्यभिमृशन्ते । नाप्याययन्ति चमसान्सर्वभक्षा मार्जयन्ते । होत्रे प्रथमꣳ स्तुवते ऽथ मैत्रावरुणायाथ ब्राह्मणाच्छꣳसिने ऽथाच्छावाकायाध्वर्युः पूर्वाभ्यां चमसगणाभ्यां प्रचरति प्रतिप्रस्थातोत्तराभ्याꣳ । सर्वं ऐन्द्रा[1] यद्धाश्चमसगणा[1] भवन्तीति[2] न्वा[2] अयं[2] प्रथमश्चतुःपर्यायः[3] संतिष्ठत । एवमेव द्वितीयः संतिष्ठत । एवं तृतीयो । मध्यमेन पर्यायेण शिल्पवन्त इव चरन्त्यथ विनिःसृप्य राथंतराय संधये प्रसर्पन्ति । ॥ ९ ॥

संप्रसृप्तास्विदित्वाध्वर्युः प्राङायन्नाह होतुश्चमसमनून्नयध्वमुन्नेतः सर्वांश्च एव राजानमुन्नय मातिरीरिच इति । होतृचमसमेव प्रथममुन्नयन्ति । यथोपपादमितरान्सर्वांश्च एव राजानꣳ श्रुणीयोत्तरवेद्याꣳ सꣳसादयन्ति । [4]तदेतमाश्विनमुपस्तीर्णाभिघारितꣳ सह सꣳसादयन्त्यथाप[5] उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ् द्रुत्वा स्तोत्रमुपाकरोति । स्तुवते । होत्र एषोत्तमेति प्राङ्होतुः कालात्पराङावर्तते ऽध्वर्युरभ्येनमाह्वयते होता । प्रत्याह्वयते ऽध्वर्युः । शꣳसति । प्रतिगृणात्या

---

१ Thus Be 12, M (the last however चमचा॰); HTr DU om. यद्धा; Be B चमसगणाभ्यां प्रचरति i. s. o. सर्वं ... भवन्तीति न्वा ।

२ भवंतीतीन्वा अयं M; भवंतीतीन्वायं U; the other MSS. om. इति न्वा or न्वा alone.

३ चतुष्पर्यायः M.

४ Thus Tr; तदेतदाश्वि॰ all the other MSS.; after आश्विनम् some of the MSS. have पुरोडाशम् here and *infra* (p. 291, 4 and 6).

५ Thus MTr Be DHU; सꣳ om. Be 12 B.

महाह्नाच्छ्रस्यते[1] । परःसहस्रमाश्विनं भवतीति ब्राह्मणं । प्रसिद्धमुक्थ्यं प्रतिगीर्य प्राङायन्नाहाश्विभ्यां तिरोअह्नियानाꣳ सोमानामनुब्रूहीति । प्राङेत्योद्यच्छत एतꣳ होतृचमसमनूद्यच्छन्त आश्विनमुपोद्यच्छन्ते चमसानथाश्रावयत्यो श्रावयास्तु श्रौषडश्विभ्यां तिरोअह्नियान्सोमान्प्रस्थितान्प्रेष्येति । वषट्कृते जुहोति । [2]तदेतमाश्विनमुपस्तीर्णाभिघारितꣳ सह जुह्वति । वषट्कृतानुवषट्कृते द्विर्जुहोति । तथैव द्विर्द्विः सर्वाꣳश्चमसाञ्जुहुत्वाथ भक्षैः प्रत्यञ्च आद्रवन्त्यनुसवनभक्षो ऽश्विभ्यां पीतस्येति । तस्य भक्षः सर्वगणस्य ते सर्वगणाश्विभ्यां पीतस्य तिरोअह्नियस्य सोमस्य सुषुतस्य मधुमत उपहूतस्योपहूतो भक्षयामीति । होतृचमसमेवैते त्रयः समुपहूय भक्षयन्ति । यथाचमसं चमसाञ्छिन्न स इत्यात्मानं प्रत्यभिमृशन्ते । नाप्याययन्ति चमसान्सर्वभक्षा मार्जयन्ते । ऽथ संप्रैषमाहाग्नीदौपयजानङ्गारानाहरोपयष्टरुपसीद ब्रह्मन्प्रस्थास्यामः समिधमाधायाग्नीदग्नीन्सकृत्सकृत्संमृड्ढीत्याहरन्त्येतानाग्नीध्रादौपयजानङ्गाराꣳस्तानवेण होतारं निवपत्युपसीदत्युपयष्टा गुदतृतीयैश्चैतानि गुदतृतीयान्येकादशधा कृत्वोपयष्टोपयजति । समानमत ऊर्ध्वꣳ संतिष्ठते ऽतिरात्रः । ॥ १० ॥ प्रथमः ॥

---

१ Thus HD; महोह्नना॰ Tr; महानह्ना॰ M; महानाह्ना॰ Be 12 B; महानाम्ना॰ U; महानाम्नात् Be; my copy of the vivaraṇa (Burnell MSS.) reads: आह्नद्वाह्नात्, the words are explained thus: यावद्दिस्वह आतपो भवति तावत्।

२ तदेतदा॰ all the MSS. exc. Tr.

एकादशिनीं करिष्यन्नुपाकृतिꣳ हुत्वाथ तां दिशमेति यत्र त्रयोदश यूपान्वेत्स्यन्मन्यते। तानुपशयद्वादशान्याश्चीवत-त्रयोदशान्छित्त्वावाहयत्या[1] वा हारयत्यौत्स्य निखिष्ठत्यैवं तक्ष्णानामेव स्वरून्कुरुते[2]। ऽथास्यैषा पूर्वेद्युरेव रथाक्षेणैकादशधा वेदिर्विमिता भवति। स यत्राग्निष्ठस्य यूपावटं परिलिखति तदेतꣳ रथाक्षं याचति। तेन दक्षिणतो[3] मिमीत उपरसंमितं यूपावटं परिलिखत्यथोदङ् मिमीत उपरसंमितमेव यूपावटं परिलिखति। स एवमेव दक्षिणमुत्तरमित्यष्टौ यूपावटान्परिलिखति। तद्धैतदेक[4] उपवसथीय एवाहन्येतान्यूपानुच्छ्रयन्ति[5] यजमानो वा अग्निष्ठो ऽङ्गानामितरे[6] रूपमिति[6] वदन्तः। स

---

१ °दशाꣳश्छि° H only.— °छित्त्वावाहरत्या HU; छित्त्वावाहयत्या MB Be Ms Msc (the latter: तान्छित्त्वा मनुष्यैर्यद्वा आवाहयति विहारसमीपे प्रापयति। आ वा हारयति ... शकटादिना आहारयति वा). Probably this is the true reading and accordingly also IV. 1 (vol. I, p. 106, 12; in the note read Ekādaśini-Sūtra i.s.o. Aptoryāma-Sūtra) should be corrected.

२ Thus MU Be; स्वरूंकु° the other MSS.

३ दक्षिणा MU.

४ Thus Be U Msc; तद्वैकदेक B; तदोवेतदेक M; तथोतैतदेक H; तथैतदेक Ms; cp. *supra* p. 261, 14; 263, 1.

५ °येतान् om. M.

६ Thus M Be Ms Msc; the other MSS. (U is def.) seem to point to another reading: ऽङ्गानीतरे यूपा इति।

यद्येनं तत्रानुच्छ्रयन्तं ब्रूयाद्ब्रह्मा[1] त्वा[1] ऽयं यजमानो भविष्यतीति तथा हैव स्यात्तदु वा आहुर्यदिमे[2] यूपा अपशवः शूलीभूतास्तिष्ठेयुर्यज्ञवास्तुरूपमिव स्याद्यज्ञवेशसमिव । श्वो भूत एवाहन्येतान्यूपानुच्छ्रयेदिति । तान्छ्वो भूत एवोच्छ्रयन्त्यग्निष्ठ एकादशिनीर्रशनाः[3] परिवीय वासयन्ति । ॥ ११ ॥

समानं कर्माश्विनाद्ग्रहादाश्विनं ग्रहं गृहीत्वैकादश रशना आदाय यूपमभ्यैति[4] । तदेते यूपाः प्रक्षालिताः प्रपन्नाः संपन्नचषालाः प्रागवटेभ्य उपशेरते । स्वर्वन्तमग्निष्ठमुत्सृज्य तस्माद्दक्षिणमेव पूर्वमुपस्थावानमुच्छ्रयत्यथोत्तरम् । स एवमेव दक्षिणमुत्तरमित्यष्टौ यूपानुच्छ्रयत्यथ वै भवत्युपरसंमितां मिनुयात्पितृलोककामस्येति समा उपरेषु भवन्ति । रशनसंमितां मनुष्यलोककामस्येति समा रशनासु भवन्ति । चषालसंमितामिन्द्रियकामस्येति समाश्चषालेषु भवन्ति । सर्वान्समान्प्रतिष्ठाकामस्येति सर्वान्समान्प्रतिष्ठाकामस्य करोति । ये त्रयो मध्यमास्तान्समान्पशुकामस्येति तान्समान्पशुकामस्य करोति ।

---

१ Thus M; °ह्मांगेमान्त्वा, ह्मंगान्त्वा, यथेंगान्त्वा the other MSS; °ह्मांगोवा Ms.

२ यदिमे M Bhav.; यदिमि Be; यदीमे the other MSS.

३ Thus conjecturally; ऐकादशिना° (or नी?) M; एकादशिन° the other MSS.; एकादश° Ms and Msc. Cp. Ap. XIV. 5. 12.

४ यूपान° M Be; यूपम° the other MSS., also Ms and Msc.

व्यतिषजेदितरानिति व्यतिषजति ' स एवमेव[1] दक्षिणमुत्तरमित्यष्टौ यूपान्व्यतिषजति ' ॥ १२ ॥

अथ वै भवति यं कामयेत प्रमायुकः स्यादिति गर्तमितं तस्य मिनुयादुत्तरार्ध्यं वर्षिष्ठमथ ह्रसीयाꣳसमित्युत्तरार्ध्यमत्र वर्षिष्ठं मिनोति दक्षिणार्ध्यꣳ ह्रसीयाꣳसमेषा वै गर्तमिद्यस्यैवं मिनोति ताजक्प्रमीयत इति ब्राह्मणं ' दक्षिणार्ध्यं वर्षिष्ठं मिनुयात्सुवर्गकामस्याथ ह्रसीयाꣳसमिति दक्षिणार्ध्यमत्र वर्षिष्ठं मिनोत्युत्तरार्ध्यꣳ ह्रसीयाꣳसमाक्रमणमेव तत्सेतुं यजमानः कुरुते सुवर्गस्य लोकस्य समष्ट्या इति ब्राह्मणमथ वै भवति यदेकस्मिन्यूपे द्वे रशने परिव्ययति तस्मादेको द्वे जाये विन्दते ' यन्नैकाꣳ रशनां द्वयोर्यूपयोः परिव्ययति तस्मान्नैका द्वौ पती विन्दत इति ब्राह्मणमथ वै भवति यं कामयेत स्त्र्यस्य जायेतेत्युपान्ते तस्य व्यतिषजेदित्युपान्ते तस्य व्यतिषजति ' स्त्र्येवास्य जायत इति ब्राह्मणमथ वै भवति यं कामयेत पुमानस्य जायेतेत्याान्तं तस्य प्रवेष्टयेदित्याान्तं तस्य प्रवेष्टयति ' पुमानेवास्य जायत इति ब्राह्मणमथैतमुपशयं दक्षिणतो न्यस्यति तूष्णीꣳ ' स्वर्वन्तान्यूपानुत्सृज्याग्नेयमेवाग्निष्ठ उपाकरोति ॥ १३ ॥

सारस्वतीमुत्तरे सौम्यं दक्षिणे पौष्णमुत्तरे बार्हस्पत्यं दक्षिणे वैश्वदेवमुत्तर ऐन्द्रं दक्षिणे मारुतमुत्तर ऐन्द्राग्नं दक्षिणे सावित्रमुत्तरे वारुणं दक्षिणे ' ऽथ वै भवति यदि

---

१ एव om. M ; एवम् om Ms.

कामयेत यो ऽवगतः सो ऽपरुध्यतां यो ऽपरुद्धः सो ऽवगच्छत्वित्यैन्द्रस्य लोके वारुणमालभेत वारुणस्य लोक ऐन्द्रं । य एवावगतः सो ऽपरुध्यते यो ऽपरुद्धः सो ऽवगच्छतीति ब्राह्मणमथ[1] वै[1] भवति[1] यदि कामयेत प्रजा मुह्येयुरिति पशून्व्यतिषजेदिति । पशूनेवास्य[2] व्यतिषजति । प्रजा एव मोहयतीति ब्राह्मणमथ वै भवति यदभिवाहतो ऽपां वारुणमालभेत प्रजा वरुणो गृह्णीयाद्दक्षिणत उदञ्चमालभते ऽपवाहतो ऽपां प्रजानामवरुणग्राहायेति ब्राह्मणमथैतस्मिन्नुपग्रये मनसैव यं द्वेष्टि तमुपाकरोति । यद्यु वै न द्वेष्याखुस्ते पशुरित्यनुदिशति । समानं कर्मा पर्यग्निकरणात्पर्यग्निकृतानामेतेषां पशूनां पञ्च दक्षिणार्ध्यान्पशूनुपक्रम्यैव स्थापयित्वा द्वावुपातिनीयायेतरैर्व्यतिषजत्यथ पर्यग्निकृतैः पशुभिरुदञ्चः प्रतिपद्यन्ते । तेषां वारुण उत्तरार्ध्यो भवत्याग्नेय उपचारत । आग्नेयमेवाध्वर्युर्वपाश्रपणीभ्यामन्वारभते पृथगितरान्परिकर्मिण उदञ्चो नयन्त्यनुपूर्वमव्यतिषजन्तस्तेषां प्रसिद्धं वपाभिश्चरित्वा प्रसर्पन्ति प्रातःसवनाय । तद्वृजुधा संतिष्ठते । ॥ १४ ॥ द्वितीयः ॥

अथ वै भवतीष्टं वपया भवत्यनिष्टं वशयाथ पात्नीवतेन प्रचरतीति । स यथैकादशिन्या अनुबन्ध्ययेष्टं[3] वपया भवत्यनिष्टं वशया तन्मथनेन गार्हपत्यमौपसदायां वेद्याऽ

१ अथ वै भ॰ om. Be BU.

२ एव om MH Ms.

३ ॰बंधस्ये॰ MH.

साम्नयजुर्हरतीदमेव प्रसिद्धं पौरोडाशिकं' त्रिर्यजुषा तूष्णीं चतुर्थं' पूर्वं परिग्राहं परिगृह्णाति' करणं जपत्युद्धन्त्युद्धृतादाग्नीध्रस्त्रिर्हरति' यदाग्नीध्रस्त्रिर्हरत्यथाग्रेण[1] गार्हपत्यं पात्नीवतस्य यूपावटं परिलिखति' समानं कर्मा स्रुचाꣳ सादनात्सादयित्वा स्रुचो ऽग्रेण गार्हपत्यं पात्नीवतमुच्छ्रित्य तस्मिꣳस्त्वाष्ट्रꣳ साण्डमजं पशुमुपाकरोति[2]' तं पर्यग्निकृतमुत्सृज्याज्येन सꣳस्थां करोत्यथ चतुर आज्यस्य गृहीत्वाह त्वष्ट्र इत्युपाꣳश्वनुब्रूहीत्युच्चैरत्याक्रम्याश्राव्याह त्वष्टारमित्युपाꣳशु यजेत्युच्चैर्वषट्कृते जुहोतीति नु वपायाः प्रतिचरति' चतुर एवाज्यस्य गृहीत्वाह त्वष्ट्र इत्युपाꣳश्वनुब्रूहीत्युच्चैः' ॥ १५ ॥

अत्याक्रम्याश्राव्याह त्वष्टारमित्युपाꣳशु यजेत्युच्चैर्वषट्कृते जुहोतीति नु पशुपुरोडाशस्य प्रतिचरति' चतुर एवाज्यस्य गृहीत्वाहाग्नय इत्युपाꣳश्वनुब्रूहीत्युच्चैरत्याक्रम्याश्राव्याहाग्निमित्युपाꣳशु यजेत्युच्चैर्वषट्कृत उत्तरार्धपूर्वार्धे ऽतिहाय पूर्वा आहुतीर्जुहोतीति नु पशुपुरोडाशस्य स्विष्टकृतः प्रतिचरति' चतुर एवाज्यस्य गृहीत्वाह त्वष्ट्र इत्युपाꣳश्वनुब्रूहीत्युच्चैरत्याक्रम्याश्राव्याह त्वष्टारमित्युपाꣳशु यजेत्युच्चैर्वषट्कृते जुहोतीति नु हविषः प्रतिचरत्याज्येन दिशो जुहोति' पृषदाज्येन वनस्पतिमाज्यस्य स्विष्टकृतमाज्यस्येडामवद्यति' पृषदाज्येनानू-

१ यदाग्नीध्रस्त्रिर्हरति found in MUH only.

२ पशुम् om. Ms.

याजान्यजति । सो ऽत्रैव पत्नीः संयाज्यात्रैव समिष्टयजूंषि[1] जुहोति । संतिष्ठते पात्नीवतः । ॥ १६ ॥ तृतीयः ॥

अथ वै भवति यो ऽग्न्याधेयेन नर्ध्नोति स पुनराधेयमाधत्ते यो ऽग्निं चित्वा नर्ध्नोति स पुनश्चितिं चिन्वीत इत्यग्निं चित्वा व्यानानो द्वादशेष्टका उपकल्पयते ऽष्टौ याजुषीश्चतस्रो लोकंपृणाः । स यद्य[2] ह्योत्तरवेदिर्व्याघारितोपन्युप्तसंभारा[2] भवति तद्वाभ्यामात्मन्यग्निं[3] गृह्णीते मयि गृह्णाम्यग्रे अग्निं यो नो अग्निरिति । स्वयंचितिं जपति यास्ते अग्ने समिधो यानि धामेति । श्वेतमश्वमभिमृश्याष्टौ याजुषीरुपदधाति येनर्षयस्तपसा सत्रमासतेति । चतस्रो लोकंपृणा लोकं पृण छिद्रं पृणेत्यथ चितिकॢप्त्याभिमृशति चित्तिमचित्तिं चिनवद्वि विद्वानित्याग्नेय्या गायत्र्यैतां चितिमभिमृश्य द्वाभ्यामवद्रवति वाङ्म आसन्प्राणद्वा इति । तायते पशुबन्धो वाग्निष्टोमो वा । स प्रज्ञातः संतिष्ठते । ॥ १७ ॥ चतुर्थः ॥

[4]जर्वरो गृहपतिर्धृतराष्ट्र ऐरावतो ब्रह्मा दत्तस्तापसो होता पृथुश्रवा दूरेश्रवा[5] उद्गाता श्यावश्वाजगावश्च[6] प्रस्तोतृप्रति-

१ °ष्टयजुर् MH.

२ Thus M; तद्येद्वोत्त° D; यथाद्वोत्त° the other MSS.

३ Thus M Be B U; °त्मंनग्निं or °त्मन्नग्निं Be 7 D.

४ On the following cp. Baudh. gṛhs. III, adhy. 10 and Pañc br. XXV, 15.

५ Found in M only.

६ Thus M; श्याव° or ग्राव° the other MSS.

हर्तारौ शितिपृष्ठो मैत्रावरुणस्तक्षको वैशालेयो ब्राह्मणाच्छꣳस्युपरीतिस्तार्क्ष्यः[१] सदस्यः शिखातिशिखौ नेष्टापोतारावरुणो[२] ऽग्नी[२] ऽच्छावाकश्चक्रपिशङ्गावाग्नीध्रावजिरो[३] माहेयः सुब्रह्मण्यो ऽर्बुदो ग्रावस्तुत्साण्ड उन्नेता पशुको[४] ध्रुवगोपः कौतुस्तावध्वर्यू[५] अरिमेजयश्च जनमेजयश्चैते वै सर्पाणाꣳ राजानश्च राजपुत्राश्च खाण्डवे प्रस्थे सत्रमासत पुरुषरूपेण विषकामास्तेषां दशस्तोमान्यन्यान्यहान्यासन्दादशस्तोमान्यन्यान्याचीयन्ते[६] च स यद्यद्दशेति तस्मात्सर्पा दꣳशुका दꣳशुवीर्यास्तदेतल्लौक्यं[७] पौत्रीयं पशव्यꣳ सत्रं य एतदुपयन्ति नैतान्सर्पा हिꣳसन्ति ॥ १८ ॥ पञ्चमः ॥

तपो गृहपतिरिरा पत्नी ब्रह्मैव ब्रह्मा सत्यꣳ होतामृतमुद्गाता भूतं भविष्यच्च प्रस्तोतृप्रतिहर्तारावृतं मैत्रावरुण ऋतवः सदस्या आर्तवा उपगातारस्तेजो ब्राह्मणाच्छꣳसी यशो ऽच्छा-

---

१ Thus (उपरीतिस्) M; उपरिमिस् Be; उपरिशौस् U; उपगरस् Be 7 D; उपरिशौर्वस् B.

२ Uncertain; ॰वरुणोऽग्ना M; ॰वरुणाग्नी Be Be 7; वरुणाग्नो BUD; the Pañc. br. has वरुण आरुण्यः।

३ Thus M; ॰चक्रपिशं॰ Be 7 D; ॰चक्रपिशंग आग्नीध्रोऽजिरो B Be U.

४ Thus M; उन्नेतापशुको Be (thus also the MSS. of the Gṛhya); ॰पशुगोपो Be 7 BUD.

५ Thus M; कौतुस्ताव॰ BU; कौस्ताव॰ Be; क्रौंचस्ताव॰ Be 7 D.

६ ॰न्यान्यासन्दा ... न्यन्यान्य॰ om. M.

७ Thus M; दंशवीया॰ Be; दंशवीया॰ U; दंशवीया॰ B; in Be 7 the whole passage is left out.

वाकश्चित्तिश्चापचितिश्च नेष्टापोतारावग्निरेवाग्नीध्रो वाक्सु-ब्रह्मण्यो भगो ग्रावस्तुदूर्गुन्नेता बलं[1] भुवगोपो[1] मनोऽध्वर्यु-श्चक्षुः प्रतिप्रस्थाता सेदिश्चाग्नया[2] चेध्मवाहौ दिष्टिर्विंशास्ता[3] मृत्युः शमिता । ते वै विश्वसृजः प्रथमाः सत्रमासां चक्रिरे । तेषाꣳ शतꣳ समा दीक्षा आसच्छतमुपसदः सहस्रं प्रसुता-स्तदेषाभिवदति विश्वसृजः प्रथमाः सत्रमासत सहस्रसमं प्रसुतेन यन्तः । ततो मिषदमिषत्संबभूव ततो ह जज्ञे भुवनस्य गोपा इत्यग्निष्टोमैर्वाव[4] ते[4] तदीयुस्तदेतदृद्धमयनं[4] प्रजननं[5] यदग्निष्टोमाः । ॥ १९ ॥ षष्ठः ॥

कुण्डपायिनामयनेनैष्यन्तो दीक्षन्ते । पञ्च सर्वतो धुरा-स्तेषामियमेव प्रज्ञाता संवत्सरदीक्षा । समानं कर्मारम्भणीया-दारम्भणीयेनेष्ट्वैन्द्रं पयो दोहयति सांनाय्यस्य वावृता तूष्णीं वाथ वसतीवरीः परिहृत्याविशिष्य[6] पयाꣳस्युपवसन्त्यथ[6] श्वो भूत आमावास्येन हविषा यजन्ते । तेन यन्त्यष्टाविꣳशति-

---

१ Thus M; बलंभु॰ U; बलभु॰ Be B; चलङु॰ Be 7 D.

२ Thus MUDBe 7; सेदीक्षाग्नया Be; सेदिरवाग्नयो B.

३ धिषिर् i.s.o. दिष्टिर् M, but cp. Pañc. br. XXV. 18. 4.

४ Thus M (reading only तदिपु॰ i.s.o. तदीयु॰); ॰मैर्वाविचेतविदिस्तरे॰ Be; ॰मैर्वाविचेतविदिस्तरे॰ BU. ॰मैर्वावद्गतेभिरिदुस्तरे॰ D; ॰मैर्वावचतेभियुस्तरे॰ Be 7.

५ Uncertain; प्रजन M; प्रजनि all the other MSS.

६ Thus corrected with some hesitation; cp. Karmānta-Sūtra III. 25; पर्याहृत्य पयांसि विशिष्य M, but all the other MSS. पर्याहृत्य-विशिष्य पयांस्यु॰ ।

रहानि । प्रायणीयारम्भणीयौ । स मासः[१] । पौर्णमासहविर्भिर्यन्ति मासं । वैश्वदेवहविर्भिर्यन्ति[२] मासं । वरुणप्रघासहविर्भिर्यन्ति मासꣳ । साकमेधहविर्भिर्यन्ति मासꣳ । शुनासीरीयहविर्भिर्यन्ति षड्विꣳशतिरहान्यभिजित्त्रयः[३] परःसामानः । स मासो । वैषुवतं । त्रयो ऽर्वाक्सामानो । ऽथ विश्वजित्त्र्यस्त्रिꣳशेन[४] यन्ति मासं । त्रिणवेन यन्ति मासमेकविꣳशेन यन्ति मासꣳ । सप्तदशेन यन्ति मासं । पञ्चदशेन यन्ति मासं । त्रिवृता यन्ति द्वादशाहानि । गोआयुषी । तानि चतुर्दश । चत्वार्यूर्ध्वं वैषुवतात्तान्यष्टादश । दशरात्रो महाव्रतं चातिरात्रश्च । स मासः । ॥ २० ॥

अथैषां कुण्डानि । ते सर्व एव त्रिवेदसो[५] भवन्ति तदेषां कुण्डमथ यदन्योऽन्यमनुपरिसर्पं[६] याजयन्ति तदेषां कुण्डमथ यदत्सरुकैश्चमसैर्भक्षयन्ति[७] तदेषां कुण्डं । तेषां य एव ब्रह्मा स एव[८] ब्राह्मणाच्छꣳसी स पोताथ यो होता स एव मैत्रावरुणः सो ऽच्छावाको । ऽथ य उद्गाता स एव

१ Thus MB Be ; Be 7 D present here a lacuna of two akṣaras.

२ UBD here and *infra* each time यजन्ति i.s.o. यन्ति ।

३ षड्त्रिꣳशति° i.s.o. षड्विꣳशति° M.

४ After विश्वजित् Be ins. मासं ।

५ Thus M ; °वेदसौ the other MSS.

६ Thus M ; परि om. all the other MSS.

७ यत्सरुकै° M.

८ एव om. all exc. M.

प्रस्तोता स प्रतिहर्ताथ यो ऽध्वर्युः स एव प्रतिप्रस्थाता स नेष्टाथ य आग्नीध्रः स एव ग्रावस्तुत्[1] सुब्रह्मण्यः स उन्नेताथोपनिषदो[2]' ऽग्निश्चतुर्होता[2] वायुः पञ्चहोता चन्द्रमाः षड्ढोता प्रजापतिः सप्तहोतासावादित्यो नवहोतैता वै देवता एतेनायनेनायंस्ता वै ता आर्ध्नुवन्सुवर्गं[3] लोकमायन्य एवं विद्वांस एतेनायनेन यन्त्यृध्नुवन्त्येव सुवर्गं[4] लोकं यन्ति। ॥ २१ ॥ सप्तमः ॥

उत्सर्गिणामयनेनैष्यन्तो दीक्षन्ते' तेषामियमेव प्रज्ञाता संवत्सरदीक्षा' समानं कर्मा पृष्ठ्यात्षडहात्पृष्ठ्येन षडहेनैन्द्रं पयो दोहयति सांनाय्यस्य व्रता तूष्णीं वाथ वसतीवरीः परिहृत्याविग्रथ्य[5] पयांस्युपवसन्त्यथ प्रातरहरुत्सृज्य[6] ज्योतिष आयतने प्राजापत्यं पशुमालभन्ते' तस्य पशुपुरोडाशमनुवर्तते ऽग्नये वसुमते पुरोडाशो ऽष्टाकपालो' माध्यंदिन इन्द्राय मरुत्वते पुरोडाशमेकादशकपालं निर्वपन्त्यैन्द्रं सांनाय्यं' सा द्विहविरिष्टिः संतिष्ठते' ऽथैतदैन्द्रं सांनाय्यं समुपहूय भक्षयन्त्यथापराह्णे वैश्वदेवं द्वादशकपालं निर्वपन्ति वैश्वदेवं चरुं' ताभ्यां चरन्ति देवताप्रसृतीभ्यामिडान्ताभ्या-

---

१ All MSS. exc. M ins. एव ।

२ Thus M Be 7; ०निषदग्नि० Be B U; ०निषदौग्नि० D.

३ स्वर्गं all.

४ सुवर्गं M; स्वर्गं the other MSS.

५ परिहृत्यवि० MSS., cp. *supra* p. 209, n. 6.

६ अहर् om. Be 7 D.

मंथ[1] पशुना चरति मनोताप्रभृतिनेडान्तेनाथानूयाजैश्चरित्वा प्रदक्षिणमावृत्य प्रत्यङ्ङाद्रुत्य पत्नीः संयाज्य प्राङेत्य ध्रुवामाप्याय्य वसतीवरीः परिहृत्य पयांसि विशिष्योपवसन्त्यथ श्वो भूते गवा प्रतिपद्यन्ते । त एवमेवैतेन[2] यन्तो[2] मासिमास्युत्सृजन्तः पञ्च ज्योतींष्युत्सृजन्त्यथामुत आवृत्तांश्चतुरश्च[3] त्रयस्त्रिंशस्तोमानुत्सृजन्त्येकं[4] च ज्योतिरथ श्वो भूत आयुषैव प्रतिपद्यन्ते । ॥ २२ ॥ अष्टमः ॥

तपश्चितामयनेनैष्यन्तो[5] दीक्षन्ते । तेषामियमेव प्रज्ञाताग्निदीक्षा । समानं कर्म संनिवापात्प्रसिद्धः संनिवापो । ऽथ प्रायणीयेन चरति । प्रायणीयेन चरित्वा पदेन चरति । पदेन चरित्वा राजानं क्रीत्वोद्यातिथ्यं निर्वपत्यातिथ्येन प्रचर्यैतां पञ्चहविषमिष्टिं निर्वपत्याग्नेयमष्टाकपालमैन्द्रमेकादशकपालं वैश्वदेवं द्वादशकपालं बार्हस्पत्यं चरुं वैष्णवं त्रिकपालमिति । तया सकृदेवेष्ट्वा नाद्रियेरन्नित्येक आहुरेतयैवाहरहः संवत्सरं यजेरन्नित्येके । प्रथमे ऽहन्सर्वैरन्वहमेकैकया[6] षष्ठे ऽहन्सर्वैरन्वहमेकैकया । प्रथमे द्वादशाहे ऽग्निं चिन्वीतेत्येक आहुस्तदु

१ ॰प्रभृतीभ्या॰ MD Be 7; ॰प्रभृतिभ्या॰ Be BU.
२ Thus M; एवनैषोद्यंतो Be BU; एवतोत्यतो Be 7 D.
३ च om. M.
४ Thus M; त्रयस्त्रिंशांस्तो॰ the other MSS.
५ नाप॰ all exc. M.
६ चन्यासर्वै॰ M.

वा आह[१] रुद्रो वा एष यदग्निः ' स एतर्हि जातो यर्हि सर्वश्चितः ' स यथा वत्सो जात स्तनं प्रेप्सत्येवं वा एष एतर्हि भागधेयं प्रेप्सति ' संवत्सर उवेवास्यातो भागधेयं ' नैतस्याग्नां चनेयादित्युत्तमे[२] द्वादशाहे ऽग्निं चिन्वीतेत्येतदपरम् ' ॥ २३ ॥

अथातो ऽहरहश्चयनस्यैव मीमांसा ' सद्यश्चितिं निश्चिठन्त्य लोकंपृणा इष्टका उपदधन्मासमेति ' मासि तथादेवतं कुरुते ' द्वितीये मासे पुरीषचितिः ' सद्यश्चितिं निश्चिठन्त्य सुषिनो ऽनु प्रकारं[३] मासमेति ' मासि तथादेवतं कुरुते ' तृतीये मासे वषडचितिश्चतुर्थे[४] मासे पुरीषचितिः ' पञ्चमे मासे मध्यमा चितिः ' षष्ठे मासे पुरीषचितिः ' सप्तमे मासे वषडचितिरष्टमे[५] मासे पुरीषचितिर्नवमे मासे सप्त स्कन्ध्या उपदधात्या नचनेष्टकाभ्यो ' दशमे मासे[६] पुरीषचितिरेकादशे मासे[६] संयच्च प्रचेताश्चेत्येता उपदधात्या विकर्णीद्दादशस्य[७]

---

१ आह all exc. M.

२ My conjecture; between •ग्रां and नेया• M has a blank of one akṣara; all the other MSS. •ग्रांजनेया• ।

३ Thus Be BU; सुषिनानुप्र• M Be 7 D.

४ Thus M; (मासे)ऽन्वहंदचितिः Be; न्यहंदचितिः the other MSS. I am not sure about the meaning of वषड; it occurs repeatedly *infra* and once in the Karmānta. Perhaps वषड "without the tail (of the Agni)."

५ Thus M; हंद• the other MSS.

६ मासि all exc. M.

७ Thus M D U; विकर्णदा• B Be 7; विकर्णीद्दा• Be.

मासस्याष्टाविंशतिरहानि पुरीषमेकान्नत्रिंशे शतरुद्रीयं। श्वो भूते वसोर्धारा। ॥ २४ ॥

अथोपरिष्टान्मासमित्याचक्षते। मासस्य प्रथमेऽहन्सद्यश्चितिं निचिन्वन्ति सतयादेवतं[1] सकृद्दोहं। [2]मासं प्रवर्ग्योपसद्भ्यां यन्ति। द्वितीयस्य मासस्य प्रथमेऽहन्पुरीषचितिः। सद्यश्चितिं निचिन्वन्ति सतयादेवतं सकृद्दोहं। द्वितीयं[3] मासं प्रवर्ग्योपसद्भ्यां यन्ति। तृतीयस्य मासस्य प्रथमे [4]ऽहन्षडचितिश्चतुर्थस्य मासस्य प्रथमेऽहन्पुरीषचितिः। पञ्चमस्य मासस्य प्रथमेऽहन्मध्यमा चितिः। षष्ठस्य मासस्य प्रथमेऽहन्पुरीषचितिः। सप्तमस्य मासस्य प्रथमेऽहन्षडचितिरष्टमस्य मासस्य प्रथमेऽहन्पुरीषचितिर्नवमस्य मासस्य प्रथमेऽहन्सप्त स्कन्ध्या उपदधात्या नक्षत्रेष्टकाभ्यो। दशमस्य मासस्य प्रथमेऽहन्पुरीषचितिरेकादशस्य मासस्य प्रथमेऽहन्संयच्च प्रचेताश्चेत्येता उपदधात्या विकर्णेर्द्वादशस्य मासस्य प्रथमेऽहन्पुरीषचितिरेकान्नत्रिंशे शतरुद्रीयं। श्वो भूते वसोर्धारा। ॥ २५ ॥

अथ पुरस्तान्मासमित्याचक्षते। मासं प्रवर्ग्योपसद्भ्यां यन्ति।

---

१ Thus all, not °देवताम् ; also *infra*.

२ Be 7 BU ins. द्वितीयं।

३ om. B.

४ The whole passage from अहन्षड° up to मासस्योत्तमे (p. 305, 4) left out by all exc. M.

मासस्योत्तमे ऽहन्सर्वचितिं निस्तिष्ठन्ति सतयादेवतꣳ सस्रूददोहसं । द्वितीयं मासं प्रवर्ग्योपसद्भ्यां यन्ति । द्वितीयस्य मासस्योत्तमे ऽहन्पुरीषचितिः । सर्वचितिं निस्तिष्ठन्ति सतयादेवतꣳ सस्रूददोहसं । तृतीयस्य मासस्योत्तमे ऽहन्वण्डचितिश्चतुर्थस्य[1] मासस्योत्तमे ऽहन्पुरीषचितिः । पञ्चमस्य मासस्योत्तमे ऽहन्मध्यमा चितिः । षष्ठस्य मासस्योत्तमे ऽहन्पुरीषचितिः । सप्तमस्य मासस्योत्तमे ऽहन्वण्डचितिरष्टमस्य[2] मासस्योत्तमे ऽहन्पुरीषचितिर्नवमस्य मासस्योत्तमे ऽहन्सप्त स्कन्ध्या उपदधात्या नवचेष्टकाभ्यो । दशमस्य मासस्योत्तमे ऽहन्पुरीषचितिरेकादशस्य मासस्योत्तमे ऽहन्संयच्च प्रचेताश्चेत्येता उपदधात्या विकर्णीर्द्वादशस्य[3] मासस्याष्टाविꣳशे ऽहन्पुरीषमेकान्नत्रिꣳशे[4] शतरुद्रीयꣳ । श्वो भूते वसोर्धारा । ॥ २६ ॥

अथात उत्थानानामेव मीमाꣳसाभिजितेष्ट्वोत्तिष्ठेयुरित्येतद्ब्राह्मणसंपन्नमपि वाभिजितेष्टायैताꣳ[5] सवनेष्टिं [6]निर्वपन्त्याग्नेयमष्टाकपालमैन्द्रमेकादशकपालं वैश्वदेवं द्वादशकपाल-

---

१ Thus M Be 7; चन्वंद॰ B; चन्दंड॰ Be.

२ Thus M Be 7; चन्वंदचि॰ B; चन्दंदचि॰ Be.

३ Thus M; the other MSS. as *supra* (p. 303, 13).

४ ॰विꣳशे Be 7 D.

५ Thus MU; ॰ष्टायेनाꣳ B Be; ॰ष्टायैनां D; ॰ष्टुयैनां Be 7.

६ Thus M Be BU; निर्वपत्या॰ Be 7 D

मिति । तया समस्तया वा विहृतया वा प्रतिपद्यन्ते । वसतीवरीषु मृत्पिण्डमन्ववधायाहरहर्वसतीवरीः[1] परिहरमाणा यन्त्ययं संवत्सरसंपन्नं ब्रह्मणो[2]ऽयनमित्याचक्षते[2] । चतुरो मासो दीक्षाभिर्यन्ति चतुर उपसद्भिश्चतुरो मासः प्रसुतास्संदोह्यः क एतावत्तपस्तप्स्यन्त्यसाधारणं कुर्वीतान्तेवासिषु वोपहवमिच्छेत[3] दक्षिणावता वैनं याजयेयुरिति । सो ऽन्तेवासिषु[4] वैवोपहवमिच्छते[4] दक्षिणावता वैनं याजयन्ति । ॥ २७ ॥ नवमः ॥

अथ वै भवति छन्दश्चितं चिन्वीत पशुकाम इति । स छन्दश्चिदयं च क चाहुतिरागच्छति[5] जुहोत्येव तत्राथ[6] यदन्यदाहुतिभ्यः शरीरवद्यजुरेव तत्र जपति यजुरेव रशनयोर्यजुरश्वगर्दभयोर्यजुरश्वायै प्रहंजने[7] । यजते[7] वायव्येन पशुना । दीक्षते । विमायाग्निं परिखायापस्यायतने यजुरेव[8] तत्र[8] जपति यजुः सर्वासामिष्टकानामुपधाने । जुहोति शतरुद्रीयं । कुरुते वसोर्धाराः । श्येनचितं चिन्वीत सुवर्गकाम इत्ययमे-

---

१ °मन्ववधाय° MB Be U ; °मन्वाधाय° Be 7 D.

२ Thus M ; ब्राह्मणायन° the other MSS.

३ वा om. Be BU.— इच्छेत i. s. o. इच्छेत Be 7 D.

४ Thus M Be ; °षुवोपहव° Be 7 D ; °षूपहव° BU.— इच्छेते i. s. o. इच्छते all exc. M.

५ चाहुतीरागच्छंति M.

६ Thus M Be BU ; तद् Be 7 D.

७ प्रहंजनेयजते M ; प्रहंजनेवयजते B Be ; प्रहंजनेव DU.

८ °रेवत्र B Be U.

वैष[1] श्येनचित्कङ्कचितं[1] चिन्वीत यः कामयेत शीर्षण्वानमुष्मिँल्लोके स्यामित्येतस्यैव सतो ऽरत्निमात्रेण प्राक् शिर इव निरूहति । स तथा विमितो भवति यथा न बहिर्वेदि यूपः स्यादलजचितं चिन्वीत चतुःसीतं प्रतिष्ठाकाम इत्येतस्यैव सतो ऽरत्निमात्रेण पक्षावणीयाꣳसौ भवतस्तावन्मात्रेणापि पक्षौ वरीयाꣳसौ । तौ मनागपनतौ परोऽणीयाꣳसौ[2] भवत । एकैकामृचा[3] सीतां कृषति । प्रउगचितं चिन्वीत भ्रातृव्यवानित्येतस्यैव सतः समुदूह्याꣳसौ[4] प्रागायातयति । स तथा विमितो भवति यथा न बहिर्वेदि यूपः स्यादुभयतःप्रउगं चिन्वीत यः कामयेत प्रजातान्भ्रातृव्यान्नुदेय प्रतिजनिष्यमाणानित्येतस्यैव सतः समुदूह्यैव श्रोणी प्रत्यगायातयति । स तथा विमितो भवति यथा न बहिर्वेदि यूपः स्यात् । ॥ २८ ॥

रथचक्रचितं चिन्वीत भ्रातृव्यवानिति विज्ञायत । आकृतिविकारः शब्दसंयोगाद्यावानग्निः[5] सारत्निप्रादेशस्तावतीं भूमिं परिमण्डलां कृत्वानुशर्करमन्तःशर्करमिष्टकाः परिचिनोत्यथान्ततो[6] ऽयान्तरत । एवमेवा[7] स्वयमातृण्णाया । अथा-

१ Thus M only; इत्युपमावैष (or इत्यघायमेवैष) श्येनचितिः the other MSS.

२ परो om. all exc. M.

३ एकैकामच M; ऋचा om. Be.

४ Thus M Be BU; समुदूह्यैव श्रोणी Be 7 D.

५ Thus MBU; शुभसंयो॰ Be; षाषाः संयो Be 7 D.

६ Thus MD Be 7; ॰यांतरतो Be U; B. om.

७ Thus M; एवमेव the other MSS.

भितः स्वयमातृण्णां । मध्ये नाभिमिव करोति । तस्या [1]अनुदिशमवान्तरदिशमरानिव[2] नेमिमिवेष्टका[2] आयातयति । स एष रथचक्रचिद्वाहव्यवतः परिचय्यो । द्रोणचितं चिन्वीतान्नकाम इत्येतस्यैव सतो ऽरत्निमात्रेण प्रागोष्ठमिव निरूहत्यथ[3] मध्ये निम्नमिव[4] करोति । स एष द्रोणचिदन्नकामस्य परिचय्यः । समूह्यं चिन्वीत पशुकाम इति विज्ञायते । पुष्करपर्णꣳ रुक्मꣳ हिरण्मयं पुरुषꣳ स्रुचावित्येतल्लक्षणमित्याचक्षते[5] । कुरुत एव तदथो पुरीषस्यैवेष्टका[6] आयातयति । स एष समूह्यः पशुकामस्य परिचय्यः । परिचाय्यं चिन्वीत ग्रामकाम इत्यनुशर्करमन्तःशर्करमिष्टकाः परिचिनोत्यथान्ततो[7] ऽथान्तरत[7] । एवमेवा[8] स्वयमातृण्णायाः । अथाभितः स्वयमातृण्णामिष्टकाः परिचिनोति । स एष परिचाय्यो ग्रामकामस्य परिचय्यः । ॥ २९ ॥

---

१ °मवांतरदिश° M Be; °मवांतरदेश° B Be 7 UD.

२ °मराश्वनेमिमिमिवेष्टका MSS. exc. M, which has °मरानिवनेमिवेष्टका; perhaps an allusion to R.V. I. 32. 15, TBr. II. 8. 4. 3.

३ अथ i. s. o. अय all exc. M.

४ Thus M Be; घ्निमिव the other MSS.

५ °तल्लक्षण° M.

६ पुरुष° M.

७ Thus M; °थांततोथांतत B Be; °थोतथोथांतर Be 7 D; °थांततोथोतथांतत U.

८ Thus M; एवमेव the other MSS.

श्मशानचितं चिन्वीत यः कामयेत पितृलोक ऋध्नुयामिति । षट् प्राञ्चः पुरुषास्त्रयः पुरस्तात्तिर्यञ्चौ[१] द्वौ पश्चात्तिर्यञ्चौ स आत्मा । तस्य मात्रा । यदि ग्रीवदघ्नं पुरस्तान्नाभिदघ्नं पश्चाद्यदि नाभिदघ्नं पुरस्ताज्जानुदघ्नं पश्चाद्यदि जानुदघ्नं पुरस्ताद्गुल्फदघ्नं पश्चाद्यदि गुल्फदघ्नं पुरस्तात्समं भूमेः पश्चात् । स एष श्मशानचित्पितृलोककामस्य । अथ हैष कूर्मचिद्ब्राह्मणो । मध्य उत्पृष्ठः[२] परिकृष्य । एतस्यैव सतो ऽरत्निमात्रेण प्राक् शिर इव निरूहति । तस्यावान्तरदिशं पादानिवेष्टका आयातयति । स एष कूर्मचिद्ब्राह्मणो मध्य उत्पृष्ठः परिकृष्यः । ॥ ३० ॥ दशमः ॥

सौत्रामण्या यक्ष्यमाणो भवति । स उपकल्पयते रोहितं चर्मानडुहꣳ सीसं च क्लीबं च शष्पाणि च तोक्माणि[३] च व्रीहीन्नग्नहुं[४] चूर्णकृतं[५] त्रीणि नानावृक्ष्याणि पात्राणि त्रयान्सक्तूꣳस्त्रयाणि लोमानि यूपं च श्येनपत्त्रं च गर्भिणीं वडवामासन्दीमिण्डुं कुम्भं कारोतरं विशाख्यौ दीर्घवꣳशꣳ शिक्यꣳ शतातृण्णाꣳ शतमानꣳ हिरण्यꣳ सतं च वालं च ब्राह्मणमाकृत्या उच्छेषणस्य पातारं यदि ब्राह्मणं न विन्दति

१ °त्तिर्यञ्चौ all, but cp. J. As. Soc. of Bengal, 1875, p. 265.

२ Thus M Be BU; उत्कृष्टः Be 7; उत्सृष्टः D.

३ तोक्माणि M and thus also all the MSS. of the gṛhyasūtra I, 8; तोक्वानि the other MSS.

४ नग्नहू M.

५ °कृतां all exc. MT.

वल्मीकवपामथामावास्येन वा हविषेद्धा नक्षत्रे वार्येण शालाᳲ रोहिते चर्मणि सुरासोमः सᳲसन्नः[1] शेते । तं दक्षिणतः क्लीव उपास्ते । सीसेन क्लीवाच्छष्पाणि क्रीणातीदं तवेदं ममेति । क्रीतः सुरासोम इत्यथैनमादाय पूर्वया द्वारा शालां प्रपाद्य जघनेन गार्हपत्यमुपसादयत्यथैतेषां व्रीहीणामर्धानवघ्नन्त्यथे-तरान्गार्हपत्य[2] एककपालमधिश्रित्य[2] भर्जन्ति[3] । तेषां ये फलन्ति लाजास्ते[4] भवन्त्यथ य[5] उ[5] न फलन्ति तास्तर्यो । गार्हपत्ये नवां कुम्भीमधिश्रित्य प्रोदकमिवौदनᳲ[6] श्रपयन्त्यथैनं विस्राव्य कठिने[7] वा पाजके वा विषजन्त्यथैनान्भुग्णान-वघ्नन्ति[8] । तेषां यानि च क्षुद्राणि याश्च तर्यस्ता उत्सेके संप्रकिरन्ति । तं मासर इत्याचक्षते । ऽथ मानमादाय विमिमीत[9] एकᳲ शष्पाणां द्वे तोक्माणां[10] त्रीणि लाजानां

---

१ Thus (संसन्नः or संसंनः) MT Be U (pr. m.); संपंनः Be Tr U (sec. m.); समंनः H; Bhav. periphr. सादितः।

२ Thus Be Tr; ॰पत्येककपाल॰ U; ॰पत्य सकपाल॰ T; MHB om. एक॰; but cp. *supra* XIII. 25 (p. 136. 2).

३ Thus M, as *supra* l. c.; भर्जयंति the other MSS.

४ ते लाजा MT Tr.

५ Thus MT Tr; ये (omitting उ) the other MSS.

६ ॰मिवौदनं MH Be; ॰मिवोदनं Tr TBU.

७ Thus T Tr H; कठिने MB Be; U corrupt.

८ Thus M; भुग्णान Tr; भुग्नान् or शुग्नान् the other MSS; Bhav. once, भुग्णान्, once भुग्नान्।

९ वि om. M Tr T.

१० Thus Be; तोक्मानां the other MSS.

चत्वारि नग्नहोरथैतमोदनं चूर्णैरनुप्रकिरन्मासरेणावोक्षन्संपादयति[1] ॥ ३१ ॥

स्वादीं त्वा स्वादुना तीव्रां तीव्रेणामृताममृतेन सृजामि सꣳ सोमेनेत्यथैतामासन्दीमग्रेणाहवनीयं पर्याहृत्य दक्षिणतो निदधात्यासन्द्यामिण्ड्वमिण्ड्वे कुम्भं कुम्भे कारोतरमवदधात्यथैतमोदनमभितः कारोतरं परिचिनोत्यथैनमपिधायाभिमृशति सोमो ऽस्यश्विभ्यां पच्यस्व सरस्वत्यै पच्यस्वेन्द्राय सुत्राम्णे पच्यस्वेति । तिस्रः सꣳसृष्टा वसति । तिस्रो हि रात्रीः क्रीतः सोमो वसतीति ब्राह्मणमथ तिसृषु व्युष्टासु तायते त्रिपशुर्वा चतुष्पशुर्वा पशुबन्धो । ऽथास्यैषा पूर्वेद्युरेव सौत्रामणिकी वेदिर्विमिता भवति । तां परिस्तीर्य स्तम्बयजुर्हरति ॥ ३२ ॥

इदमेव प्रसिद्धं पौरोडाशिकं । त्रिर्यजुषा तूष्णीं चतुर्थं । पूर्वं परिग्राहं परिगृह्णाति । करणं जपत्युद्धन्त्युद्धृतादाग्नीध्रस्त्रिर्हरति । यदाग्नीध्रस्त्रिर्हरत्यथ चात्वालस्यावृता चात्वालं परिलिखत्युत्तरवेदेरावृतोत्तरवेदिं निवपत्युत्तरनाभिमुत्साद्य यूपावटं[2] खात्वाग्नेरावृता[2] द्वावग्नी प्रणयत आहवनीयादेवाध्वर्युरन्वाहार्यपचनात्प्रतिप्रस्थाताग्निवत्युत्तरं परिग्राहं परिगृह्य योयुपित्वा तिर्यञ्चꣳ स्फ्यꣳ स्तब्ध्वा संप्रैषमाह प्रोक्षणीरासादये-

१ °नुप्रकारं i s.o. °नुप्रकिरन् M T; संपादयति M (pr. m.), संपावयति M (sec. m.).

२ यूपा° खात्वा om. M Tr.

आबर्हिषमादाय स्रुवꣳ स्वधितिꣳ स्रुचश्च संमृड्ढि तूष्णीं पृषदाज्यग्रहणीं पत्नीꣳ संनह्याज्येन च दध्ना चोदेहि प्रतिप्रस्थातः सुरासोमस्य विद्धीत्यध्वर्युरेव प्रसिद्धं पाशुबन्धिकं कर्म चेष्टत्यथ प्रतिप्रस्थाता सुराꣳ[1] संपवय्य[1] सग्रहामादाय पूर्वया द्वारोपनिर्हृत्यान्तर्वेद्यासादयति । ॥ ३३ ॥

यावदेवाचाध्वर्युश्चेष्टति तावदेष प्रतिप्रस्थाता सत उदीचीनदशेन वालेन सुरां पुनाति पुनातु ते परिस्रुतꣳ सोमꣳ सूर्यस्य दुहिता । वारेण शश्वता तनेति । वायुः पूतः पवित्रेणेति यदि सोमातिपवितो भवत्यथादत्ते पर्णमयं पात्रं । तेन गृह्णाति कुविदङ्ग यवमन्त इत्यनुद्रुत्योपयामगृहीतोऽस्यश्विभ्यां त्वा जुष्टं गृह्णामीति । बर्हिषी अन्तर्धाय कुवलसक्तुभिश्च[2] सिꣳहलोमभिश्च श्रीणात्यपोद्धृत्य बर्हिषी श्येनपत्त्रेण परिमृज्य सादयत्येष ते योनिरश्विभ्यां त्वेत्यथादत्ते नैयग्रोधं पात्रं । तेन गृह्णाति कुविदङ्ग यवमन्त इत्यनुद्रुत्योपयामगृहीतोऽसि सरस्वत्यै त्वा जुष्टं गृह्णामीति । बर्हिषी अन्तर्धाय बदरसक्तुभिश्च व्याघ्रलोमभिश्च श्रीणात्यपोद्धृत्य बर्हिषी श्येनपत्त्रेण परिमृज्य सादयत्येष ते योनिः सरस्वत्यै त्वेत्यथादत्त आश्वत्थं पात्रं । तेन गृह्णाति कुविदङ्ग यवमन्त इत्यनुद्रुत्योपयामगृहीतोऽसीन्द्राय त्वा सुत्राम्णे जुष्टं गृह्णामीति ।

---

१ सुरासोमस्यपवय्य M.

२ च om. here and every time *infra* B Be H.

बर्हिषी अन्तर्धाय कर्कन्धुसक्तुभिश्च वृकलोमभिश्च श्रीणात्यपोह्य बर्हिषी श्येनपत्त्रेण परिमृज्य सादयत्येष ते योनिरिन्द्राय त्वा सुत्राम्ण इति। ॥ २४ ॥

ताञ्जघनेन स्रुग्दण्डान्प्राचो वोदीचो वायातयत्यथैताꣳ सुराꣳ सम्प्रेकामादाय दक्षिणमग्निमुपसꣳसर्पति[१]। तमभितो[२] गर्तौ[२] खानयति। तदुपसादयति विशाखौ[३] दीर्घवꣳशꣳ शिक्यꣳ शतातृण्णाꣳ शतमानꣳ हिरण्यꣳ सतं च वालं चाथ दक्षिणमग्निमग्रेण पुराणभस्मनः[४] खरं करोति। तदुपसादयति ब्राह्मणमाहृत्या उच्छेषणस्य पातारं। यदि ब्राह्मणं न विन्दति वल्मीकवपामथाप उपसृज्य यूपस्यावृता यूपमुच्छ्रयति। स्वर्वन्तं यूपमुत्सृज्याथैतान्पशूनुपाकरोत्याश्विनं धूम्रꣳ सारस्वतं मेषमैन्द्रमृषभं। बार्हस्पत्यं पशुं चतुर्थं यदि सोमातिपवितो भवति। तेषां प्रसिद्धं वपाभिश्चरित्वाश्विनसारस्वतावध्वर्युरादत्त। ऐन्द्रं प्रतिप्रस्थाता। ग्रहावादायोपोत्तिष्ठन्नाहाश्विभ्याꣳ[५] सरस्वत्या इन्द्राय सुत्राम्णे सुराम्णाꣳ[६] सोमानामनुब्रूहीति। युवꣳ सुराममश्विनेत्येतामन्वाहात्याक्रम्याश्रा-

१ Thus M Tr TBH: सर्पति Be U.

२ Thus (with न) B Be (pr. m.) H; °भितः ख° MT Tr; °भितो ख° Be (sec. m.).

३ विशाखे M.

४ Thus MT Tr; भस्मना B Be UH.

५ Thus M Tr.; उपतिष्ठन् i.s.o. उपोत्तिष्ठन् the other MSS.

६ Thus (cp. Āp. XIX. 2. 18) M Tr; सुराम्ण BH Be U; T def.

याज्याश्विभ्याꣳ सरस्वत्या इन्द्राय सुत्राम्णे सुराम्णः सोमान्प्रस्थितान्प्रेष्येति । मैत्रावरुणो होता यक्षदश्विना सरस्वतीमिन्द्रꣳ सुत्रामाणमिति । पुत्रमिव पितरावश्विनोभेति यजत्यंहाव्यग्ने हविरास्ये त इति वषट्कृते जुहोति । ॥ ३५ ॥

यस्मिन्नश्वास ऋषभास उक्षण इत्यनुवषट्कृते कृत्वाश्विनस्य सꣳस्रावꣳ सारस्वते ऽवनयति । सारस्वतस्य सꣳस्रावमैन्द्रे । तं ब्राह्मणो भक्षयति नाना हि वां देवहितं यदचेति द्वाभ्यां । [1]यदि ब्राह्मणं न विन्दति वल्मीकवपायामवनयत्येतेनैव मन्त्रेणाथैतानि पात्राणि वल्कशस्य[2] पूरयित्वा पर्णमये श्येनपत्त्रमवगूहति । तद्विशाख्यावुच्छ्रित्य दक्षिणाग्रं वꣳशं प्रोहति वꣳशे शिक्यꣳ सजति[3] शिक्ये शतातृण्णाꣳ शतातृण्णायां वालं वाले शतमानꣳ हिरण्मयैताꣳ सुराꣳ सप्रैकामादाय शतातृण्णायाꣳ समवनयति सोमप्रतीकाः पितरस्तृप्णुतेति । क्षरति[4] शतातृण्णेत्युपतिष्ठन्ते[5] पवमानः सुवर्जन इत्येतेनाष्टर्चेन । अथ यदि सोमातिपवितो भवति पितृणां याज्यानुवाक्याभिरुपतिष्ठन्त उदीरतामवर उत्परास आहं पितॄन्सुविद-

१ अथ ins. MT Tr.

२ Thus H; वल्कलस्य MTB Be U; विल्वस्य Tr.

३ Thus M Tr; सजयति T; सचति B Be U; सचयति H.

४ Thus Tr Be HU (sec. m.); क्षसि (sic) B; क्षरंति U (pr. m.); क्षरति MT.

५ Plural T Tr U (pr. m.); sing. the other MSS.

चाꣳ अविक्षोदं पितृभ्यो नमो अस्त्वित्यध्वर्युर्होता ब्रह्मा त उपतिष्ठन्ते । यथैव शतातृण्णां धारयति तस्मिन्दधाति प्रतिष्ठित्या इति ब्राह्मणं । तदेवैनां निधाय दक्षिणतो निदधात्यथैतानि पात्राणि पुराणभस्मनः खरे सादयति ॥ ३६ ॥

पितृभ्यः स्वधाविभ्यः स्वधा नमः पितामहेभ्यः स्वधाविभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधाविभ्यः स्वधा नम इत्यथ गर्भिणीं वडवां ददात्यथाप उपस्पृश्य बार्हस्पत्यस्य पशुपुरोडाशं याचति । तेन प्रचरति[1] देवताप्रभृतिनेडान्तेनाथ पशुभिश्चरति मनोताप्रभृतिभिरिडान्तैरथैतान्पुरोडाशान्याचत्यैन्द्रमेकादशकपालꣳ सावित्रं द्वादशकपालं वारुणं दशकपालमिति । तैश्चरति देवताप्रभृतिभिरिडान्तैरनूयाजैश्चरित्वा प्रदक्षिणमावृत्य प्रत्यङ्ङाद्रुत्य पत्नीः संयाज्य प्राङेत्य ध्रुवामाप्याय्य त्रीणि पाशुबन्धिकानि समिष्टयजूꣳषि जुहोति यज्ञ यज्ञं गच्छैष ते यज्ञो यज्ञपते देवा गातुविद इत्यथैतमवभृथꣳ सꣳसादयन्ति[2] यत्किंचित्पुरालिप्तं भवति तत्सर्व हृदयशूलानि भवन्त्यथैतत्समादायान्तरेण[3] चात्वालोत्करावुदङ्ङुपनिष्क्रामन्ति ॥ ३७ ॥

द्वे सृती अशृणवं पितृणामहं देवानामुत मर्त्यानाम् ।
ताभ्यामिदं विश्वं भुवनꣳ समेत्यन्तरा पूर्वमपरं च केतुमिति ।

---

१ चरति M Tr.

२ Thus M Tr Be; ॰सादयति HBU; संप्रकिरंति T.

३ भवंत्ये॰ HU; भवंतौत्स्ये॰ M; भवतौत्स्ये॰ T; भवत्ये॰ B Be.

समिद्धꣳ हृदयशूलैश्चरित्वाथैतानि पात्राण्युदकान्ते पराञ्चि सादयति यत्ते देव वरुण गायत्रच्छन्दाः पाशो ब्रह्मन्प्रतिष्ठितः। तं त एतेनावयज इति पर्णमयं । यत्ते देव वरुण त्रिष्टुप्छन्दाः पाशः क्षत्रे प्रतिष्ठितः। तं त एतेनावयज इति नैयग्रोधं । यत्ते देव वरुण जगतीछन्दाः पाशो विक्षु प्रतिष्ठितः। तं त एतेनावयज इत्याश्वत्थं । यत्ते देव वरुणानुष्टुप्छन्दाः पाशः पशुषु प्रतिष्ठितः। तं त एतेनावयज इति प्लाक्षं । तूष्णीꣳ सतं वासं च । समिद्धो ऽवभृथः । साम चैव नाह देवीराप एष वो गर्भ इति चाथाप्रतीक्षमायन्ति वरुणस्यान्तर्हित्यै । प्रपथे समिधः कुर्वत एधो ऽस्येधिषीमहीत्येत्याहवनीये ऽभ्यादधाति समिदसि तेजो ऽसि तेजो मयि धेहीत्यथाहवनीयमुपतिष्ठन्ते ऽपो अन्वचारिषꣳ रसेन समसृक्ष्महि। पयस्वाꣳ अग्न आगमं तं मा सꣳसृज वर्चसेत्यथ कुसीदेन सक्तुहोमेन चरत्यथ देवता उपस्थाय यूपमुपतिष्ठते। संतिष्ठते सौत्रामणी[1] । ॥ ३८ ॥ एकादशः ॥

[2]वेदमधीत्य स्नास्यन्नुपकल्पयत एरकां चोपबर्हणं च

१ सौत्रामणिः all exc. M; at the close of this adhyāya T adds इति चरकसूत्रम्।

२ The text of adhyāya 12 is based on M(ackenzie), cp. Preface, p. II, and on the following MSS. of the Gṛhyasūtra: Ma(dras), on the whole a very good copy in grantha; E(gmore), nāgarī copy of grantha original; T(anjore), grantha, breaking of after the words अपाशो ऽसौसुश्लाघ्य in kh. 41; H(aug), B(enares), these two closely related and on the whole rather bad. I made

नापितं च क्षुरं च दारूणि चोपस्करणं च शकलाꣳश्च दन्तधावनमुष्णाश्चापः शीताश्च सर्वसुरभिपिष्टं[1] चाञ्जनं च स्रजं चादर्शं चाहतं च[2] वासः प्रावरणं[3] च वसनान्तरं बादरं मणिꣳ सुवर्णोपधानꣳ सूत्रं च[4] प्रवर्तौ च दण्डं चोपानहौ च[5] कृष्णमानडुहं चर्म सर्वरोहितमित्येते ऽस्य संभारा उपक्लृप्ता भवन्ति । स्नानस्य मीमाꣳसा । रोहिण्याꣳ स्नायादित्येकं । प्राजापत्यं वा एतन्नक्षत्रं । तदस्य प्राजापत्य एव नक्षत्रे स्नातं भवत्यथो सर्वांश्रोहांश्रोहाणीति[6] । तिष्ये स्नायादित्येकं । बार्हस्पत्यं वा एतन्नक्षत्रं । तदस्य बार्हस्पत्य एव नक्षत्रे स्नातं भवत्यथो बृहस्पतिप्रसूतो ऽसानीत्युत्तरयोः फल्गुन्योः स्नायादित्येकं । भाग्यं वा एतन्नक्षत्रं । तदस्य भाग्य[7] एव

---

also use of G (gṛhyaprayoga MS. Burnell cvii, which cites often literally passages of the Gṛhya), Prm. (Prayogamālā printed at Bombay), Pś (Prayogaśikhāmaṇi, No. 3108 of the Leiden collection), Ks (Kanakasabhāpati's kārikā, Burnell cix) and Pc (Prayogacūḍāmaṇi, Telugu MS., collection Mackenzie No. 21). Adhyāya 13 is contained only in M and E. The two adhyāyas 12 and 13 are now also printed in the Grantha Edition of the Baudhāyana smārtasūtra, designed by me as "Ed."

१ सार्व॰ EG.

२ only in Ed. TE.

३ Thus EHG; प्रावारं MT, प्रपारं Ma. प्रवारणं Ed.

४ om. HBM (sec. m.).

५ om. THB Ma.

६ Thus B; रोहन्तीति i.s.o. रोहाणीति the other MSS. and Ed.

७ भग्य TM Ma.

नक्षत्रे स्वातं भवत्यथो भाग्यो ऽस्मानीति । हस्ते स्वायादित्येकं । सावित्रं वा एतन्नक्षत्रं । तदस्य सावित्र एव नक्षत्रे स्वातं भवत्यथो सवितृप्रसूतो ऽस्मानीति । चित्रायां स्वायादित्येकमैन्द्रं वा एतन्नक्षत्रं । तदस्यैन्द्र एव नक्षत्रे स्वातं भवत्यथो चित्रो ऽस्मानीति । विशाखयोः स्वायादित्येकमैन्द्राग्नं वा एतन्नक्षत्रं । तदस्यैन्द्राग्न एव नक्षत्रे स्वातं भवत्यथो विशाखो ऽस्मानि[1] प्रजया पशुभिरित्यैतेषामेकस्मिन्नापूर्यमाणपक्षे[2] पुरादित्यस्योदयाद्व्रजमभि प्रपद्यते । नैनमेतदहरादित्यो ऽभितपेत्तदह[3] स्वातानामु[4] ह[4] वा[4] एष एतत्तेजसा यशसा तपत्यन्तर्लोम्ना चर्मणा व्रजमभिविशन्ति[5] । पूर्वार्धमध्ये व्रजस्याग्निमुपसमाधाय संपरिस्तीर्याहरन्त्येतान्संभारान्सकृदेव सर्वान्त्संहर[6] सर्वाणि मानुषाणीत्येतस्माद्ब्राह्मणाद्दक्षिणतो[7] ब्राह्मण[8] उपविशत्युत्तरत[8] उदपात्रं पालाशीं च समिधं निदधात्य-

१ Thus HB ; स्यानीति the other MSS. and Ed.

२ Thus MB ; °त्येषामेकस्मिन्न° H ; °त्यैतेषामेतस्मिन्न° Ma TE. and Ed.

३ Thus all exc. Ma and Ed., which have तदहश्च i.s.o. तदह and E: °तपेन्नार्धंदिनतदहश्च स्वाता° ; Bhāradvāja also has the reading accepted by me on the authority of the best MSS. (=तदहः-स्वातानाम् as a compositum ?).

४ °मु ह वा only MT ; °मुष्मा वा Ma ; °मुष्मं the other MSS. ; मुष्मं वा Ed.

५ °भिनिर्घ्नंति MSS. (and Ed.) exc. E, which om. the second præpos. ; cp. *supra* XI. 10 (p. 79, 4), XVI. 20 (p. 267, 1), XVIII. 18.

६ Thus MT ; सर्वाणि i.s.o. सर्वान् HB ; संभरति i.s.o. सर्वान् E Ma., Ed.

७ Before दक्षिणतो Ma ET and Ed. ins. दर्भेषु ।

८ Thus M Ma HB ; ब्राह्मणमुपवेशयत्यु° E ; ब्रह्माणमुपविशत्यु° T.

परेणाग्निमुदीचीनप्रतिषेवणामेरकाꣳ साधीवासामास्तीर्य[1] तस्यां प्राङ्मुख उपविशत्युत्तरतो नापित उत्तरत उपबर्हणमामध्यंदिनं भिक्षां दद्यादपीह[2] गां पचेदग्ना चेदस्य[3] स्याद्चैतां[1] पालाशीꣳ समिधमाज्येनाक्त्वा मध्यंदिने ऽभ्यादधाति ॥ ३९ ॥

इमꣳ स्तोममर्हते जातवेदसे रथमिव संमहेमा मनीषया। भद्रा हि नः प्रमतिरस्य सꣳसद्यग्ने सख्ये मा रिषामा वयं तव स्वाहेत्यैरकायामुदीचीनशिरा निपद्यते त्र्यायुषं[4] जमदग्नेः कश्यपस्य त्र्यायुषमगस्त्यस्य[4] त्र्यायुषमृषीणां[4] त्र्यायुषं[4] यद्देवानां त्र्यायुषं[4] तन्मे अस्तु त्र्यायुषमित्युद्यमानमनुमन्त्रयते[4] शिवा मे भवथ सꣳस्पृश इति क्षुरमभिमन्त्रयते क्षुरो नामासि स्वधितिस्ते पिता नमस्ते अस्तु मा मा हिꣳसीरित्युप्यमानमनुमन्त्रयते यत्क्षुरेण वर्चयसि[5] वप्ता वपसि केशश्मश्रु वर्चय मे मुखं मा म आयुः प्रमोषीरिति श्मश्रूण्येवाग्रे वपते ऽथोपपक्षावथ केशान्यथोपपादमितराण्यङ्गान्येतस्माद्धेषा[6] जरमा[6] पूर्व आयुषि प्रयान्ति पूर्व आयुष्मादा भवन्ति

---

१ Thus Ma TE, Ed.; ०मुपस्तृणीते M; HB om. this passage.

२ ०दपि च Ed.

३ Thus E Ma; चेतस्य स्याद्० TH; चेतस्य स्याद्० B; चेस्याद्० M; चेदस्यस्याद्० Ed.

४ Thus EM Ma G, Ed.; चिरायुष० THB Prm.

५ Thus all exc. E: वर्धयसि and T: वर्चसि।

६ Or should we write ०षाजरसा? What may be the sense of these words?

य एवं विद्वाꣳसो लोमानि वापयन्ते । स यदि लोमानि वापयिष्यमाणः स्यात्केशश्मश्रु वापयित्वा लोमानि सꣳहृत्य नखानि निकृन्तयीताथैतानि समुच्चित्य ब्रह्मचारिणे प्रयच्छन्नाहेमानि हृत्वा दर्भस्तम्बे वोदुम्बरमूले वा निधत्तादिति । तानि स तत्र निदधात्यथापरेणाग्निं प्राङ्मुख उपविश्य मेखलां विस्रꣳसयत इमां विष्यामि वरुणपाशमिति । यो ऽस्य तत्र[1] राते:[1] पुत्रो वान्तेवासी वा भवति तस्मै प्रयच्छन्नाहेमाꣳ हृत्वा न्यग्रोधे वोदुम्बरमूले वा निधत्तादिति । तासु[2] स तत्र निदधातीदमहममुष्यामुष्यायणस्य शुचा पाप्मानमवगूहाम्युत्तरस्य[3] द्विषद्ध्य इति । वृकलैः सधाव्य दन्तान्भिधावयते[4] ऽन्नाद्याय व्यूहध्वं भगो राजायमागमत् । स मे मुखं प्रमर्पतु वर्चसे च भगाय चेत्युभयीरपः संनिषिच्योष्णासु शीता आनयति दैवमानुषस्य[5] व्यावृत्त्या इति । तासामञ्जलिनोपहत्याभिषिच्यापो हि ष्ठा मयोभुव इति तिसृभिर्हिरण्यवर्णाः शुचयः पावका इति तिसृभिः । षोढाविहितो वै पुरुष इत्येतस्माद्ब्राह्मणादथैतस्य[6] सर्वसुरभिपिष्टꣳ समुदायुत्य त्रिः प्रसिञ्चति ॥ ४० ॥

---

१ तत्रारातेः T Ma.

२ Thus TM Ma ; तासु EHB, Ed.

३ Thus (अवगूहामि) MHB Prm Pśm ; अपगू॰ T Ma EG Pc. Ed.

४ Thus M Prm ; ॰धावयते all the other MSS. and G, Ed.

५ दैव॰ ET and Bhāradvāja ; देव॰ the other MSS., Ed. and the Prayogas.

६ ॰थैतस्य Ma E, Ed. ; ॰रैतस्य MHB ; T indistinct.

नमः शाकजञ्जभाभ्यां नमस्ताभ्यो देवताभ्यो या अभिग्राहिणीरित्यनुलिम्पते[1] ऽप्सरासु[2] च[2] यो गन्धो गन्धर्वेषु च यद्यशः। दिव्यो यो मानुषो गन्धः स मामाविशतादित्यथाहतं परिधत्ते स्वा मा तनूराविश शिवा मा तनूराविशेत्येवमेवोत्तरासङ्गमेवमेवात[3] ऊर्ध्वमथैतं बादरं मणिꣳ सुवर्णोपधानꣳ सूत्रे प्रोत्य दर्व्यामाधाय दर्विदण्डे[4] सूत्रेण पर्यस्य जुहोतीयमोषधे त्रायमाणा सहमाना सहस्वती। सा मा करोतु सोमवर्चसꣳ सूर्यवर्चसं ब्रह्मवर्चस्विनमस्मादं[5] करोतु स्वाहेत्यथैनमुदपात्रे[6] ऽनुपरिप्लावयति[6] विश्वा उत त्वया वयं धारा उदन्या इव। अतिगाहेमहि द्विष इत्यपाश्नो ऽमीत्युत्क्राह्णया परिहरति वध्यꣳ हि प्रत्यञ्चं प्रतिमुञ्चन्ति व्याहृत्या इत्येतस्माद्ब्राह्मणादथैतौ प्रवर्तौ सूत्रे प्रोत्य दर्व्यामाधाय दर्विदण्डे[7] सूत्रेण पर्यस्य जुहोत्यायुष्यं वर्चस्यꣳ सुवीर्यꣳ रायस्पोषमौद्भिद्यम्[8]। इदꣳ हिरण्यं वर्चसे [9]जैत्रायाविशतादिमꣳ[10]

---

१ Thus Ma, Ed.: ०नुलिंपेत्यप० E: ०नुलिंपंतेप० T; ०नुलिंपेदप० M; ०नुलिंपेत्म० HB.

२ MTE and Ed. om.

३ Thus (उत्तरासंग्यम्) ET, Ed.; ०मेवासंग्यमे० M Ma; HB corr.

४ Thus M Ma; दर्वौ० ET Prm., and Ed.; HB om.

५ ०स्विनम० HM Ma B; ०स्विनम० T, Ed.; E indistinct.

६ Thus M; ०पात्रेप परि० T Ma E Prm, Ed.; पात्रेपानुपरि० HB Pś.

७ Thus M Ma HB; दर्वौ० EG and Ed.

८ ०मौद्भ्यम् M Ma G and Ed.; ०मौद्भिदम् EHB Prm Pś.

९ Thus MG, Ed.: जैत्राया० the other MSS. and Prm Pś.

१० इमꣳ M Ma EG and Ed.: इमाꣳ H: इमा B.

रयिꣳ स्वाहेति । द्वितीयां जुहोति शुनिमिवाहꣳ[1] हिरण्यस्य पितुरिव नामाग्रभैषम्[2] । तन्मा करोतु सोमवर्चसꣳ सूर्यवर्चसं ब्रह्मवर्चस्विनमन्नादं[3] करोतु स्वाहेति । तृतीयां जुहोत्युच्चैर्वाजि[4] पृतनासहꣳ[5] सभासाहं धनंजयम् । सर्वाः समृद्धीर्ऋद्धयो हिरण्ये याः समाहिताः स्वाहेति । चतुर्थीं जुहोति विराजं च स्वराजं चाभिष्टिर्या[6] च नो गृहे । लक्ष्मी राष्ट्रस्य या मुखे तया मा सꣳसृजामसि स्वाहेति । पञ्चमीं जुहोति यशो मा कुरु ब्राह्मणेषु यशो राजसु मा कुरु । यशो विश्येषु शूद्रेष्वहमस्मि यशस्तव[7] स्वाहेत्यथैनामुदपात्रे[8]ऽनुपरिप्लावयति[8] विश्वा उत त्वया वयमित्येतया । तयोरन्यतरमादाय दक्षिणे कर्ण आबध्नीत[9] आयुष्यं वर्चस्यमित्येताभिः

१ Thus (शुनिम्) M Ma Prm Pś and Ed.; शुनीम् EG; शुमिम HB; शुनम् only Ks.

२ Thus Pś; नामाग्रभैजषं Prm; नामाग्रद्यौचमग्राहं E; नामग्रहं M Ma BHG; नामाग्रहं, Ed.

३ °स्विनम° M Ma HB; °स्विनम° EG and Ed.

४ °वाँजि all exc. G, which has rightly °वाँदि ।

५ Thus the MSS.; शतनाजि the Prayogas.

६ Thus Prm; चाभिश्रीया G; चाभिश्रीया Pś; चाभिधीर्या Pc; चाभिवीर्या M Ma and Ed.; चाभिश्रीर्या E; चाभिश्राया BH.

७ Thus M Prm Pc G; यशस्तप Ma E, Ed.; यशन्तव Pś; यशस HB.

८ Thus M; °पात्रेपरि° Ma E Prm, Ed.; °पात्रेणानुपरि° B; °पात्रेणसुपरि° H.

९ Thus HB; आबध्नाति M Ma E Prayogas.

पञ्चभिरथैनमनुपरिवर्तयत[1] ऋतुभिष्ट्वार्तवैः संवत्सरस्य धायसा[2] तेष्ट्वा सहानुकरोमीत्येवमेवोत्तरं प्रवर्तमावध्नीते । ऽथ स्रजं प्रतिमुञ्चते[3] ॥ ४१ ॥

शुभिके शिर आरोह शोभयन्ती मुखं मम । मुखꣳ हि मम शोभय भूयाꣳसं च भगं कुरु ॥ यां त्वा जहार जमदग्निः श्रद्धायै कामायान्यै[4] । तां त्वेमां प्रतिमुञ्चे[5] ऽहं वर्चसे च भगाय चेति । त्रैककुदेनाञ्जनेनाङ्क्ते यदाञ्जनं त्रैककुदं जातꣳ हिमवत उपरि । तेन वामाञ्जे मयि पर्वतवर्चसमस्त्वित्यादर्शे परिपश्यते यन्मे मनः परागतमादर्शे परिपश्यतः । इदं तन्मयि पश्याम्यायुष्यं वर्चस्यं मे अस्त्वित्यथोपानहावुपमुञ्चते द्यौरसीति दक्षिणे पादे पृथिव्यसीत्युत्तरे । ऽथ दण्डमादत्ते सखा मा गोपायेति । छत्रमादत्ते दिव्यो ऽसि सुपर्णो ऽन्तरिक्षान्मा पाहीति । सो ऽत्रैवास्त आ नक्षत्राणामुदयादथोदितेषु नक्षत्रेषूपनिष्क्रम्य दिश उपतिष्ठते देवीः षडुर्वीरुरु नः कृणोत विश्वे देवास इह वीरयध्वमिति । मा हास्महि प्रजया मा तनूभिरिति नक्षत्राणि । मा राधाम द्विषते सोम राजन्निति चन्द्रमसꣳ ।

१ Thus M; ०वर्तयति Ma, Ed.; ०वर्तति H.

२ धायसा MBH, Ed.; धायया Ma; वायसा E (from grantha original!).

३ Thus M Ma E; ०मुचते B; ०मुच्यते H; ०मुञ्चति Ed.

४ Thus M Prm Ks Pś; कामायान्ये Ma, Ed.; राकायान्यै HB.

५ Thus Prm G; ०मुंचतु Ma E; ०मुंच M; ०मुञ्चामि Ed.

मसुपस्थाय[1] यद्यच्च[2] कामयते तदेतीत्येतत्समावर्तनम् । ॥

४२ ॥ द्वादशः ॥

अथेतरत्तूष्णीमेव[3] तीर्थं स्नात्वोदेत्यथ यदि रथं लभते रथंतरमसीति दक्षिणं चक्रमभिमृशति बृहदसीत्युत्तरं वामदेव्यमसीति मध्यमथ रथं प्रवर्तमानमनुमन्त्रयते ऽयं वामश्विना रथो मा दुःखे मा सुखे रिषदित्यथ यदि ग्रामरथं करिष्यन्भवत्यप उपस्पृश्येमामभिमृशतीह धृतिरिह विधृतिरिह रन्तिरिह रमतिरिह रमतामित्यथास्मा आचार्यः कूर्चमाहारयति । तं प्रदक्षिणं पर्यस्योदगावृत्त उपविशति पुरस्तादेनं प्रत्यञ्चमुपोहते राष्ट्रभृदस्याचार्यासन्दी मा त्वद्योषमित्यथास्मा उदकमाहारयति । तेनास्य पादौ प्रक्षालयत्यवनेक्तुः[4] पाणी संमृशति मयि महो मयि भगो मयि भर्गो मयि यश इत्यप उपस्पृश्य मयीन्द्रियं वीर्यमित्युरः प्रत्यात्मानं प्रत्यभिमृशते । ऽथास्मा अन्यदाहारयति । तत्प्रतिगृह्णात्या[5] म[5] अगादवर्चसा[5] यशसा सꣳसृज पयसा तेजसा च तं मा प्रियं प्रजानां कुर्वधिपतिं पशूनामिति ब्राह्मणः । प्रियं पशूनां कुर्वधिपतिं प्रजानामिति राजन्यस्तदुपस्पृश्य प्राक् सेक्तवा[6] इत्याह ।

१ Thus E; म उपस्थाय M; Ma HB, Ed. om. the first prepos.

२ Thus Ma E, Ed.; •स्थायैव यच MBH.

३ अथेतरतूष्णी• E; अथेतरंतूष्णी• M.

४ My conjecture; •त्यवनेक्तुः M; E omits this passage.

५ •त्या मा आगान्म• or आगन्म• MSS.

My conjecture; सक्तवा E Ps. सेक्तवा M.

मधुपर्कं प्रोक्तमभिमन्त्रयते स मावतु स मा पातु स मा जुषतामित्युभाभ्याꣳ हस्ताभ्यां प्रतिगृह्णाति ॥ ४३ ॥

आ[1] मा भगाद्वर्चसा यशसा सꣳसृज पयसा तेजसा च तं मा प्रियं प्रजानां कुर्वधिपतिं पशूनामिति ब्राह्मणः । प्रियं पशूनां कुर्वधिपतिं प्रजानामिति राजन्यस्तस्मिꣳश्चेत्किंचिदापतितꣳ[2] स्यात्तदङ्गुष्ठेन च महानाम्न्या चोपसंगृह्येमां दिशं निरस्यति नेष्टाविद्धं कृन्तामि या ते घोरा तनूस्तया तमाविश यो ऽस्मान्द्वेष्टि यं च वयं द्विष्म इत्यथाप उपस्पृश्य समुदायुत्य त्रिः प्राश्नाति प्राण[3] इदं[3] ते बलिꣳ हरामि श्रेष्ठं माधिपतिं कुर्विति । सोमो ऽसि सोमपं मा कुर्विति द्वितीयमन्नमस्यन्नादं मा कुर्विति तृतीयं । त्रिः पीत्वोच्छिष्टं ददाति[4] । यमात्मनः श्रेयाꣳसमिच्छेत्तस्मै शेषं दद्यादुपनीतां[5] गामनुमन्त्रयते[5] जहि मे पाप्मानमुपनेतुश्चेति[6] । तां कुर्वन्ति वोत्सृजन्ति वा । स यदि करिष्यन्भवति कुरुतेत्याहाथ यद्युत्स्रक्ष्यन्भवति तामनुमन्त्रयते गौर्धेनुभव्या माता रुद्राणां दुहिता वसूनाꣳ स्वसादित्यानाममृतस्य नाभिः । प्र णु वोचं चिकितुषे जनाय मा गामनागाम-

---

१ The mantras are abbreviated in the MSS.

२ °नस्मिꣳश्चित्किं° MSS.

३ प्राणा MSS; probably read प्राणेदं ।

४ om. M.

५ Thus E; °दुपवीतांगोमाम° M.

६ °मुपवेतुश्चेति MSS.

दितिं वधिष्ट ॥ पिबत्वुदकं तृणान्यत्त्वोत्सृजतेत्यथास्मा ओदन-माहारयति । तमश्नाति ब्रह्म त्वाश्नातु ब्रह्म त्वाश्नात्विति । तच्चतुष्टयो ऽर्थो दधि मधु घृतमाप इति । पञ्चतय इत्येके दधि पयो मधु घृतमाप इति । ॥ ४४ ॥ त्रयोदशः ॥

ब्राह्मणो ह सोमार्थः शुक्लेन पिङ्गाक्षेण मूर्धभिन्नेन[१] विस्रवता पथि समाजगाम । तꣳ होवाच कथा[२] विद्यां भगवन्तमिति । सोमो राजास्मीति हैनं प्रत्युवाच । तं मा कदध्वर्युरनैक्ष्यनविद्भ्यश्रौषीद्यत्रो[३] मा कदध्वर्युरनैक्ष्यनविदभिषुणोतीत्यमहं[४] तत्र विस्रवाण्यमावसौ ब्राह्मणो नैक्ष्यनानि वेद । तं गमिष्यामि । स म[५] इमान्वर्णान्सꣳरोपयिष्यतीति[६] । ते यथावस्थमवयन्ति[७] तदौदुम्बर्या शाखया पलाशशाखया वा स्रुवेण वाज्यलिप्तेन दध्ना पयसा वा मधुमिश्रेण नैक्ष्यनैर्नैक्षजीषमभिजुह्वति । यत्ते ग्राव्णा चिच्छिदुः सोम राजन्नित्येतेनानुवाकेनाभिर्गाभिर्यद्वतो न ऊनमित्येतया

१ मूर्धभिंनेन M Be ; मूर्धाभिषिक्तेन the other MSS.

२ Thus M ; कथं the other MSS.

३ The reading कदध्व॰ is my conjecture. M reads : कहदध्व॰, but a horizontal stroke has been put above the ह, cancelling this akṣara. कुदध्व॰ Be 7 ; कुदध्व॰ the other MSS.—॰भ्यश्रौषीद् my conjecture ; ॰भ्यश्रौषीद् M, ॰भ्याश्रौषीद् the other MSS.

४ कदध्व॰ M ; कुदध्व॰ Be 7 ; क्रध्वाध्व॰ or कुदध्व॰ the other MSS.

५ om. M.

६ ब्राह्मणान् i. s. o. वर्णान् M ; ॰रोपयिष्यामीति M.

७ यथवावस्थ॰ M.

च चतुर्दशभिर्ऋजीषमभिजुह्वति ' ते यत्रावभृथꣳ सꣳस्थिध्येयु-स्ताञ्ज्रूयाद्ये[1] नु राज्ञस्त्वचं भित्त्वा क्रूरं कृत्वेह ग्रावभिः । ॥ ४५ ॥

अशमयित्वा नैष्ठ्यनैर्यन्त्येवैवं[2] कृतागसः ॥ ये सोममसꣳस्थाप्याप: सꣳसाद्य सोमिनः[3] । सꣳस्थितो न इत्यायन्त्यसुत्वैनाह्निनस्ति सः ॥ अभिशूलैस्तुदन्ति यमस्य प्रतिषादने । यो ऽशमयित्वा नैष्ठ्यनैरथ नाकमधिरोहति ॥ वायुर्भूत्वा पवते त्रिदिवं नाकमुत्तमम् । यः शमयित्वा नैष्ठ्यनैरथ नाकमधिरोहति ॥ अध्वर्योर्यजमानस्य प्रतिप्रस्थातुरग्नीधः[4] । ब्रह्मणो होतुरुद्गातुर्द्ध राजैषां लोकमादत्ते न चाहौषुश्चतुर्दश ॥ ये चतुर्दश जुह्वति दध्न[5] एताः स्रुवाहुतीः । नैषां राजा लोकमादत्ते न प्रजां नोत[6] वाजिनम् ॥ आप्याययन्तो राजानं ग्रावभिः क्रूरमृत्विजः । पयसा शमयन्तो ऽस्य जुह्वतैव चतुर्दशेति ' ॥ ४६ ॥ चतुर्दशः ॥

अथ वै भवति ब्रह्मवादिनो वदन्ति स त्वै दर्शपूर्णमासौ यजेत य एनौ सेन्द्रौ यजेतेति ' वैमृधः पूर्णमासे ऽनुनिर्वाप्यो

१ यो i. s. o. ये M.

२ My conjecture; °नैर्यन्त्येवैवं M; °नैस्त्वान्येवं, °त्वान्येवं, °त्वात्वेवं the other MSS.

३ सौमिनः M.

४ Thus Be 7; °स्थातुराग्नीधः D Be; thus also but °ग्नः Be; °स्थातोनिताग्नीधः M.

५ दध्न Be 7, दध्ना the other MSS.

६ नोन M; नोद the other MSS.

दितिं वधिष्ट ॥ पिबतूदकं तृणान्यत्तोसुत्सृजतेत्यथास्मा ओदनमाहारयति । तमश्नाति ब्रह्म त्वाश्नातु ब्रह्म त्वाश्नात्विति । तच्चतुष्टयो ऽर्घो दधि मधु घृतमाप इति । पञ्चतय इत्येके दधि पयो मधु घृतमाप इति । ॥ ४४ ॥ त्रयोदशः ॥

ब्राह्मणो ह सोमार्थः शुक्लेन पिङ्गाक्षेण मूर्धभिन्नेन[1] विस्नवता पथि समाजगाम । तꣳ होवाच कथा[2] विद्वां भगवन्तमिति । सोमो राजास्मीति हैनं प्रत्युवाच । तं मा कदध्वर्युरनैक्षायनविद्भ्यसौषीद्यचो[3] मा कदध्वर्युरनैक्षायनविदभिषुणोतीत्यमहं[4] तत्र विस्नवाण्यमावसौ ब्राह्मणो नैक्षायनानि वेद । तं गमिष्यामि । स स[5] इमान्वर्णान्त्सꣳरोपयिष्यतीति[6] । ते यत्रावभृथमवयन्ति[7] तदौदुम्बर्या शाखया पलाशशाखया वा स्रुवेण वानाज्यमिश्रेण दध्ना पयसा वा मधुमिश्रेण नैक्षायनैर्ऋजीषमभिजुह्वति । यत्ते ग्रावणा चिच्छिदुः सोम राजन्नित्येतेनानुवाकेनाभिर्गीर्भिर्यदतो न ऊनमित्येतया

१ मूर्धभिन्नेन M Be; मूर्धाभिषिक्तेन the other MSS.

२ Thus M; कथं the other MSS.

३ The reading कदध्व° is my conjecture. M reads: हदध्व°, but a horizontal stroke has been put above the ह, cancelling this akṣara. कुदध्व° Be 7; क्रुदध्व° the other MSS.—यभ्यसौषीद् my conjecture; °भ्यशौषीद् M, °भ्यासौषीद् the other MSS.

४ कदध्व° M; कृदध्व° Be 7; क्रध्वध्व° or क्रुदध्व° the other MSS.

५ om. M.

६ ब्राह्मणान् i. s. o. वर्णान् M; °रोपयिष्यामीति M.

७ यत्रवावभृथ° M.

च चतुर्दशभिर्ऋजीषमभिजुह्वति । ते यत्रावभृथꣳ सꣳस्थिष्येयुस्तान्ब्रूयाद्ये[1] नु राज्ञस्त्वचं भित्त्वा क्रूरं कृत्वेह ग्रावभिः । ॥ ४५ ॥

अशमयित्वा नैध्वयनैर्यन्त्येवैवं[2] कृतागसः ॥ ये सोममसꣳस्थाप्यापः सꣳसाद्य सोमिनः[3] । सꣳस्थितो न इत्यायन्त्यमुत्रैनाञ्छिनत्ति सः ॥ असिशूलैस्तुदन्ति यमस्य प्रतिषादने । योऽशमयित्वा नैध्वयनैरथ नाकमधिरोहति ॥ वायुर्भूत्वा पवते त्रिदिवं नाकमुत्तमम् । यः शमयित्वा नैध्वयनैरथ नाकमधिरोहति ॥ अध्वर्योर्यजमानस्य प्रतिप्रस्थातुरग्नीधः[4] । ब्रह्मणो होतुरुद्गातू राजैषां लोकमादत्ते न चाहौषुश्चतुर्दश ॥ ये चतुर्दश जुह्वति दध्न[5] एताः स्रुवाहुतीः । नैषां राजा लोकमादत्ते न प्रजां नोत[6] वाजिनम् ॥ आप्याययन्तो राजानं ग्रावभिः क्रूरमृत्विजः । पयसा शमयन्तोऽस्य जुह्वतेव चतुर्दशेति । ॥ ४६ ॥ चतुर्दशः ॥

अथ वै भवति ब्रह्मवादिनो वदन्ति स त्वै दर्शपूर्णमासौ यजेत य एनौ सेन्द्रौ यजेतेति । वैमृधः पूर्णमासेऽनुनिर्वाप्यो

---

१ यो i. s. o. ये M.

२ My conjecture; ०नैर्यन्नैवैवं M; ०नैश्चान्येवं, जान्येवं, जात्येवं the other MSS.

३ सोमिनः M.

४ Thus Be 7; ०स्थातुराग्नीधः D Be; thus also but ०ध्रः Be; स्थातोर्नेताग्नीधः M.

५ दध्न Be 7, दध्ना the other MSS.

६ नोन M; नोइ the other MSS.

भवति । तेन पूर्णमासः सेन्द्र । ऐन्द्रं दध्यमावास्यायां । तेनामावास्या सेन्द्रेति । केनो खिदनीजानस्य सेन्द्रौ भवत इत्यैन्द्राग्नेन पुरोडाशेनेत्येव ब्रूयादित्यथ वै भवति देवा वै यज्ञेऽकुर्वत तदसुरा अकुर्वत । ते देवा एतामिष्टिमपश्यन्नाग्नावैष्णवमेकादशकपालꣳ सरस्वत्यै चरुꣳ सरस्वते चरुं । तां पौर्णमासꣳ सꣳस्थाप्यानुनिरवपन्ततो देवा अभवन्परासुरा । यो भ्रातृव्यवान्स्यात्स पौर्णमासꣳ सꣳस्थाप्यैतामिष्टिमनुनिर्वपेत्पौर्णमासेनैव वज्रं भ्रातृव्याय प्रहृत्याग्नावैष्णवेन देवताश्च यज्ञं च भ्रातृव्यस्य वृङ्क्त इति ब्राह्मणꣳ । स एष भ्रातृव्यवतो यथाकामप्रयोगो[1] । मिथुनान्पशूꣳस्सारस्वताभ्यां । यावदेवास्यास्ति तत्सर्वं वृङ्क्त इति ब्राह्मणमथ वै भवति ॥ ४७ ॥

पौर्णमासीमेव यजेत भ्रातृव्यवान्नामावास्यामिति । स[2] पौर्णमासीं पौर्णमासीमेव यजेत भ्रातृव्यवान्नामवास्याꣳ । हत्वा भ्रातृव्यं नाप्याययतीति ब्राह्मणं । तदेतत्स्मरणावगधं वापरोध्यावगधं[3] वेत्यथ वै भवति साकंप्रस्थायीयेन यजेत पशुकाम इत्यैतयेष्ट्या यक्ष्यमाण उपकल्पयत औदुम्बरं महत्पात्रं प्रभूतमाज्यमित्यथ देवस्य त्वा सवितुः प्रसव इति[4] प्रतिपदं कृत्वाग्नेयमष्टाकपालं निर्वपत्यैन्द्रमेकादशकपालमैन्द्रꣳ

---

१ यथाकामंप्र० M.

२ om. M.

३ परोध्यांवगधं M, omitting वा ; वापरोध्यावगधं all the other MSS.

४ इत्येनमेव M.

सांनाय्यं । प्रसिद्धमाग्नेयेन चरित्वाथेतरयोर्हविषोरौदुम्बरे सह्यति पात्रे समवद्यन्नाहेन्द्रायानुब्रूहीति महेन्द्रायेति वा यदि महेन्द्रयाजी भवति । सह्यता पूर्णꣳ होतव्यमित्यंत्याक्रम्याश्राव्याहेन्द्रं यजेति महेन्द्रमिति वा यदि महेन्द्रयाजी भवति । वषट्कृते सहैव पात्रेण जुहोति । इन्द्र एवैनमिन्द्रः प्रजया पशुभिस्तर्पयतीति ब्राह्मणमथ वै भवति दारुपात्रेण जुहोति । न हि मृन्मयमाहुतिमानश । औदुम्बरं भवत्यूर्ग्वा उदुम्बर ऊर्क् पशव । ऊर्जैवास्मा ऊर्जं पशूनवरुन्द्ध इति ब्राह्मणं । तदेतदभ्यावगधं[1] वा निर्वेदावगधं[2] वेत्यथ वै भवति ॥ ४८ ॥

नागतश्रीर्महेन्द्रं यजेत । त्रयो वै गतश्रियः शुश्रुवान्ग्रामणी राजन्यस्तेषां महेन्द्रो देवतेति । स[3] यो[3] ऽन्य[3] एतेभ्यो महेन्द्रमियक्षेत[4] स संवत्सरमिन्द्रमिष्ट्वाग्नये व्रतपतये पुरोडाशमष्टाकपालं निर्वपति । सा प्रसिद्धेष्टिः संतिष्ठते । ऽथ यामावास्यामागच्छति तस्यां महेन्द्रं यजते । सो ऽत ऊर्ध्वं महेन्द्रयाज्येव भवत्यथ वै भवति संवत्सरमिन्द्रं यजेत । संवत्सरꣳ हि व्रतं नाति । स्वैवैनं देवतेज्यमाना भूत्या इन्द्धे वसीयान्भवतीति ब्राह्मणमथ वै भवति संवत्सरस्य परस्तादग्नये व्रतपतये

---

१ Thus M ; °दभ्यावगतो Be ; °दच्चावगतो Be 7 UD ; °दच्चौवगतो B.

२ Thus M Be U ; °गंधं B Be 7 D.

३ M सर्वपान्य i. s. o. स यो ऽन्य ।

४ Thus, °क्षेत, all.

पुरोडाशमष्टाकपालं निर्वपेत्संवत्सरमेवैनं वृत्रं जघ्निवाꣳसमग्निर्व्रतपतिर्व्रतमालम्भयति । ततो ऽधि कामं यजेतेति ब्राह्मणमथ वै भवति ॥ ४९ ॥

नासोमयाजी संनयेदनागतं वा एतस्य पयो यो ऽसोमयाजी । यदसोमयाजी संनयेत्परिमोष एव सो ऽनृतं करोत्यथो परैव सिच्यते । सोमयाज्येव संनयेत्पयो वै सोमः पयः सांनाय्यं । पयसैव पय आत्मन्धत्त इति ब्राह्मणमथ वै भवति वि वा एतं प्रजया पशुभिरर्धयति वर्धयत्यस्य भ्रातृव्यं यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदेति । त्रेधा तण्डुलान्विभजेद्ये मध्यमाः स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्याद्ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधꣳश्चरुं । ये ऽणिष्ठास्तान्विष्णवे शिपिविष्टाय शृते चरुमिति । तस्या एता भवन्त्यग्ने दा दाशुषे रयिं दा नो अग्ने प्रदातारꣳ हवामहे प्रदाता वज्री प्र तत्ते अद्य किमित्ते विष्णो परिचक्ष्यं [1]भूदितीष्ट्वैवोजानस्याथानीजानस्य[1] । व्यापन्नयैव[3] पूर्वया यजते[3] ऽव्यापन्नयोत्तरया[3] । न द्वे यजेत । यत्पूर्वया संप्रति यजेतोत्तरया छम्बट् कुर्याद्यदुत्तरया संप्रति यजेत पूर्वया छम्बट् कुर्यान्नेष्टिर्भवति न यज्ञस्तदनु ह्रीतमुख्यपगल्भो जायत । एकामेव यजेत

---

१ भूदितोन्वीजान॰ all.

२ Thus MDU Be 7 ; ॰मस्याथा॰ Be.

३ Thus M ; यजेतव्यापन्नयैवोत्तरया BU ; यजेतान्यापन्नयोत्तरया Be, thus also but यजेते D. The avagraha added by me.

प्रगल्भो ऽस्य जायते । ऽनादृत्य तद्दै एव यजेत । यज्ञमुखमेव पूर्वयालभते । यजत उत्तरया । देवता एव पूर्वयावरुन्द्ध इन्द्रियमुत्तरया । देवलोकमेव पूर्वयाभिजयति मनुष्यलोकमुत्तरया । भूयसो यज्ञक्रतूनुपैतीति ब्राह्मणमथ वै भवत्येषा वै सुमना नामेष्टिर्यमद्येजानं पश्चाच्चन्द्रमा अभ्युदेत्यस्मिन्नेवास्मै लोके ऽर्धुकं भवतीति ब्राह्मणमथ वै भवति ॥ ५० ॥

दाक्षायणयज्ञेन सुवर्गकामो यजेत । पूर्णमासे संनयेन्मैत्रावरुण्यामिक्षयामावास्यायां यजेतेत्येतयेष्ट्वा यक्ष्यमाण उपकल्पयते ऽहतं वासो । ऽथ पौर्णमास्या उपवसथे ऽग्नये व्रतपतये पुरोडाशमष्टाकपालं निर्वपति । सा प्रसिद्धेष्टिः संतिष्ठते । ऽथास्यैतदहरिन्द्राय वत्सा अपाकृता भवन्त्यैन्द्रं पयो दोहयित्वोपवसति सांनाय्यस्य वावृता तूष्णीं वाथ प्रातराग्नेयमष्टाकपालं निर्वपत्यैन्द्रꣳ सांनाय्यꣳ । सा द्विहविरिष्टिः संतिष्ठते । ऽथैतदैन्द्रꣳ सांनाय्यꣳ समुपह्य भक्षयन्त्यथाहतं वासः परिधायापरपक्षं व्रतं चरति । तस्यैतद्व्रतं नानृतं वदति न माꣳसमश्नाति न स्त्रियमुपैति नास्य पल्पूलनेन वासः पल्पूलयन्त्यथ यामावास्यागच्छति[1] तस्या उपवसथे ऽग्नये व्रतपतये पुरोडाशमष्टाकपालं निर्वपति । सा प्रसिद्धेष्टिः संतिष्ठते । ऽथास्यैतदहर्मैत्रावरुणाभ्यां वत्सा अपाकृता भवन्ति । मैत्रावरुणं पयो दोहयित्वोपवसति सांनाय्यस्य वावृता तूष्णीं वाथ प्रातराग्नेय-

१ All the MSS. exc. M om. the relative pronoun.

मष्टाकपालं निर्वपति मैत्रावरुणीमामिक्षाꣳ । सा चिद्धविरिष्टिः संतिष्ठते । वाजिनस्य काले वाजिनेन चरति । निधत्ते वासो । विसृजते व्रतं । विसृष्टव्रत एतं[1] पूर्वपक्षं भवत्यथ पौर्णमास्यागच्छत्युत्सीदति व्रतपतिर्वै देवोर्ध्वं व्रतपतेस्तेन प्रतिपद्यते । तदेतत्संवत्सरावगधꣳ[2] सोमसꣳस्थम्[3] । ॥ ५१ ॥

अथेडादध इत्याचक्षते । समानं वाससश्च व्रतपतेश्च । तथैन्द्रं पयो दोहयित्वोपवसति सांनाय्यस्य वावृता तूष्णीं वाथ प्रातराग्नेयमष्टाकपालं निर्वपत्यग्नीषोमीयमेकादशकपालमैन्द्रꣳ सांनाय्यꣳ । सा चिद्धविरिष्टिः संतिष्ठते । ऽचैतदैन्द्रꣳ सांनाय्यꣳ समुपहूय भक्षयन्ति । तथाहतं वासः परिधायापरपक्षं व्रतं चरत्यागच्छत्यमावास्या । [4]तस्या उपवसथे यजते । तथा मैत्रावरुणं पयो दोहयित्वोपवसति सांनाय्यस्य वावृता तूष्णीं वाथ प्रातराग्नेयमष्टाकपालं निर्वपत्यैन्द्रमेकादशकपालं मैत्रावरुणीमामिक्षाꣳ । सा चिद्धविरिष्टिः संतिष्ठते[4] । वाजिनस्य काले वाजिनेन चरति । निधत्ते वासो । विसृजते व्रतं । विसृष्टव्रत एतं[5] पूर्वपक्षं भवत्यथ पौर्णमास्यागच्छत्युत्सीदति

१ स्वं M.

२ Thus M ; ०रावगंधं Be ; ०रावबाधं Be 7 BDU.

३ ०सꣳस्था M.

४...४ Thus M only ; the other MSS. are partly defective, partly corrupt.

५ स्वं M.

व्रतपतिर्यद्देवोर्ध्वं व्रतपतेस्तेन प्रतिपद्यते। तदेतत्संवत्सरावगधꣳ[1] सोमसꣳस्थम्[2]। ॥ ५२ ॥

अथ चतुश्चक्रो भ्रातृव्यवतो यज्ञः। समानं वाससश्चैव व्रतपतेश्च। तथैवैन्द्रं पयो दोहयित्वोपवसति सांनाय्यस्य वावृता तूष्णीं वाथ प्रातराग्नेयमष्टाकपालं निर्वपति सरस्वत उपाꣳशुयाजमग्नीषोमीयमेकादशकपालमैन्द्रꣳ सांनाय्यꣳ। सा चतुर्हविरिष्टिः संतिष्ठते। ऽथैतदैन्द्रꣳ सांनाय्यꣳ समुपहूय भक्षयन्ति। तथैवाहतं वासः परिधायापरपक्षं व्रतं चरत्यागच्छत्यमावास्या। नैवोपवसथे यजते। तथैव मैत्रावरुणं पयो दोहयित्वोपवसति सांनाय्यस्य वावृता तूष्णीं वाथ प्रातराग्नेयमष्टाकपालं निर्वपति सरस्वत्या उपाꣳशुयाजमैन्द्रमेकादशकपालं मैत्रावरुणीमामिक्षाꣳ। सा चतुर्हविरिष्टिः संतिष्ठते। वाजिनस्य काले वाजिनेन चरति। निधत्ते वासो। विसृजते व्रतं। विसृष्टव्रत एतं[3] पूर्वपक्षं भवत्यथ पौर्णमास्यागच्छत्युत्सीदति व्रतपतिर्यद्देवोर्ध्वं व्रतपतेस्तेन प्रतिपद्यते। तदेतत्संवत्सरावगधꣳ[1] सोमसꣳस्थम्[2]। ॥ ५३ ॥

स एष चतुश्चक्रो भ्रातृव्यवतो यज्ञः। स यथा ह वा इदमनश्चतुश्चक्रं व्यवस्थानमेत्येवꣳ[4] ह वा एष एतेन यज्ञक्रतु-

---

१ Thus M; ०संवत्सरावगंधं Be; ०संवत्सरावराध्यं the other MSS.

२ ०सꣳस्था M.

३ एवं M.

४ Thus M; व्यवस्थानं एत्ये० Be BU; व्यवस्थान एत्ये० Be 7 D.

नेद्वा पाप्मानं भ्रातृव्यं व्यवन्नान एति । स एष वसिष्ठयज्ञः केशियज्ञः सार्वसेनियज्ञो । वसिष्ठो ह यत्र सौदासानभिचचारैवꣳ हैनानभिचचार । केशी ह यत्र खाण्डिकमभिचचारैवꣳ हैनमभिचचार । सार्वसेनिर्ह यत्र भ्रातृव्यानभिचचारैवꣳ हैनानभिचचार । ॥ ५४ ॥ पञ्चदशः ॥

चातुर्मास्यैः सोमैर्यक्ष्यमाणो भवति । स इयान्त्संभारानुपकल्पयत आग्निष्टोमिकाꣳश्च वैश्वदेवसंभाराꣳश्च[1] । स[2] पुरस्तात्फाल्गुन्यै[2] वा चैत्र्यै वा पौर्णमास्या आमावास्येन हविषेष्ट्वा दीक्षते । तस्यापरिमिता[3] दीक्षास्तिस्र उपसदः । स तथा राजानं क्रीणाति यथा मन्यते पौर्णमास्ये मे यज्ञिये[4] ऽहन्सुत्या संपत्स्यत इति । तस्य तथा संपद्यते । प्रसिद्धेन कर्मणोपवसथादेत्यथास्यैतदहर्विश्वेभ्यो देवेभ्यो वत्सा अपाकृता भवन्ति । वैश्वदेवं पयो दोहयति सांनाय्यस्य वावृता तूष्णीं वाथ वसतीवरीः परिहृत्य पयाꣳसि विग्रिह्योपवसन्त्यथ प्रातस्त्रिवृद्बर्हिस्तदेकवदेव[5] स्तृणात्यथाग्नेयं पशुमुपाकरोति । तस्य वैश्वदेव उपालम्भ्यो भवति । तस्य प्रातःसवनीयाननुवर्तन्ते वैश्वदेवहवीꣳषि । प्रैषवन्तः सवनीया । अनुब्रूहि यजेतीतरे-

---

१ Thus MD Be 7; वैश्वदेविकसंभा॰ Be BU.

२ Thus M; स om. B Be; पुरस्तात् om. B Be 7 DU.

३ Thus M Be 7; तस्या अपरि॰ Be BUD.

४ Thus MDU; यज्ञीये the other MSS.

५ भवति Be BU ins. after बर्हिस्।

षाꣳ हविषामृजुधा त्रिवृदग्निष्टोमः संतिष्ठते । पुरस्ताद्धानासोमानां वाजिनेन चरन्ति । समानं कर्मावभृथात्प्रसिद्धो ऽवभृथ । उदयनीययेष्ट्वा मैत्रावरुणीं वशामुपाकरोति । तस्यै द्यावापृथिव्योपालम्भ्या भवति । तयोः प्रसिद्धं वपाभ्यां चरित्वा पशुपुरोडाशौ निर्वपति । संतिष्ठते यथा द्विपशुः पशुबन्धस्तथाथ पौर्णमासवैमृधाभ्यामिष्ट्वेत्युक्तमेतद्यथातश्चतुर्षु मासेषु ॥ ५५ ॥

वरुणप्रघासाभ्याꣳ सोमाभ्यां यक्ष्यमाणो भवति । दीक्षते । तस्यापरिमिता दीक्षा द्वादशोपसदः । स तथा राजानं क्रीणाति यथा मन्यते पौर्णमास्यै मे यज्ञिये[1] ऽहन्द्वितीयमहः संपत्स्यत इति । तस्य तथा संपद्यते । प्रसिद्धेन कर्मणोपवसथादेत्यथास्यैतदहर्मरुद्भ्यो वत्सा अपाकृता भवन्ति । मारुतं पयो दोहयति सांनाय्यस्य वावृता तूष्णीं वाथ वसतीवरीः परिहृत्य पयाꣳसि विशिष्योपवसन्त्यथ प्रातराग्नेयं पशुमुपाकरोति । तस्य मारुत उपालम्भ्यो भवति । तस्य प्रातःसवनीयाननुवर्तन्ते सप्त वरुणप्रघासहवीꣳषि । स यत्र प्रातःसवने धिष्ण्यान्विहरति तदन्तं मार्जालीयं करोति । समासन्नेषु हविःषु गार्हपत्ये करम्भपात्राण्यभिपर्यग्निकृत्वा तैर्मार्जालीये प्रचरति । प्रैषवन्तः सवनीयाः । अनुब्रूहि यजेतीतरेषाꣳ हविषामृजुधा पञ्चदश उक्थ्यः संतिष्ठते । ऽहीनसंततिं करो-

---

1 Thus MDU; यज्ञीये the other MSS.

त्यथास्यैतदहर्वरुणाय वत्सा अपाकृता भवन्ति । वारुणं पयो दोहयति सांनाय्यस्य वावृता तूष्णीं वाथ वसतीवरीः परिहृत्य पयाꣳसि विस्रिष्योपवसन्त्यथ प्रातराग्नेयं पशुमुपाकरोति । तस्य वारुण उपालम्भ्यो भवति । तस्य प्रातःसवनीयाननुवर्तते वारुणी च कायश्च[1] । प्रैषवन्तः सवनीया । अनुब्रूहि यजेतीतरयोर्हविषोर्ऋजुधा सप्तदश उक्थ्यः संतिष्ठते । पुरस्ताद्धानासोमानां वाजिनाभ्यां चरति । समानं कर्मावभृथादथैतस्मिन्नवभृथ उपाददते वारुण्यै निष्कासं तुषानिति । वारुणस्य वारुण्यामिक्षाभ्यवदानीया भवत्यृजीषेण सह तुषान्संप्रकिरन्ति । प्रसिद्धो ऽवभृथ । उदयनीययेष्ट्वा मैत्रावरुणीं वशामुपाकरोति । तस्यै कायोपालम्भ्या[2] भवति । तयोः प्रसिद्धं वपाभ्यां चरित्वा पशुपुरोडाशौ निर्वपति । संतिष्ठते यथा द्विपशुः पशुबन्धस्तथाथ पौर्णमासवैमृधाभ्यामिष्ट्वोत्क्रमेतदथातश्चतुर्षु मासेषु ॥ ५६ ॥

साकमेधैः सोमैर्यक्ष्यमाणो भवति । दीक्षते । तस्यापरिमिता दीक्षा द्वादशोपसदः । स तथा राजानं क्रीणाति यथा मन्यते पौर्णमास्ये मे यज्ञिये ऽहन्तृतीयसवः संपत्स्यत इति । तस्य तथा संपद्यते । प्रसिद्धेन कर्मणोपवसथादित्यथ वसतीवरीः परिहृत्य पयाꣳसि विस्रिष्योपवसन्त्यथ प्रातराग्नेयं पशुमुपाकरोति ।

१ काया च M.

२ Thus M Be 7 ; काय उपालंभ्यौ or कायोपालंभ्यौ the other MSS.

तस्यानीकवत उपालम्भ्यो भवति । तस्य प्रातःसवनीयाननुवर्तत आनीकवतः । प्रैषवन्तः सवनीया । अनुब्रूहि यजेत्यानीकवतस्य । माध्यंदिनीयाननुवर्तते सांतपनः । प्रैषवन्तः सवनीया । अनुब्रूहि यजेति सांतपनस्यर्जुधैकविꣳश उक्थ्यः संतिष्ठते । ऽहीनसंततिं करोत्यथ वसतीवरीः परिहृत्य पयाꣳसि विग्रिह्योपवसन्त्यथ सायं गृहमेधीयेन चरत्यथापररात्रे पूर्णदर्व्येण[1] चरत्यथ प्रातराग्नेयं पशुमुपाकरोति । तस्य क्रैडिन उपालम्भ्यो भवति । तस्य प्रातःसवनीयाननुवर्तते क्रैडिनः । प्रैषवन्तः सवनीया । अनुब्रूहि यजेति क्रैडिनस्यर्जुधा त्रिणव उक्थ्यः संतिष्ठते । ऽहीनसंततिं करोत्यथ वसतीवरीः परिहृत्य पयाꣳसि विग्रिह्योपवसन्त्यथ प्रातराग्नेयं पशुमुपाकरोति । तस्य प्राजापत्यस्तूपर उपालम्भ्यो भवति । तस्य प्रातःसवनीयाननुवर्तन्ते महाहवीꣳषि । प्रैषवन्तः सवनीया । अनुब्रूहि यजेतीतरेषाꣳ हविषां । तृतीयसवनीयाननुवर्तन्ते महापितृयज्ञहवीꣳषि । स यत्र तृतीयसवने धिष्णियान्विहरति तदजस्रं मार्जालीयं करोति । समासन्नेषु हविःषु गार्हपत्ये महापितृयज्ञहवीꣳषि श्रपयित्वा तैर्मार्जालीये प्रचरति । प्रैषवन्तः सवनीया । अनुब्रूहि यजेतीतरेषाꣳ हविषामृजुधा त्रयस्त्रिꣳश उक्थ्यः संतिष्ठते । पुरस्ताद्धानासोमानां त्रैयम्बकैश्चरति । समानं कर्मावभृथात्प्रसिद्धो ऽवभृथ । उदय-

---

1 Thus Be U ; °दर्वेण M Be 7 D.

नीयायेष्ट्वा मैत्रावरुणीं वशामुपाकरोति । तस्यै वैश्वकर्मण्युपालम्भ्या[1] भवति । तयोः प्रसिद्धं वपाभ्यां चरित्वा पशुपुरोडाशौ निर्वपति । तावनुवर्तेत आदित्यः । प्रैषवन्तौ पशुपुरोडाशावनुब्रूहि यजेत्यादित्यस्य । संतिष्ठते यथा द्विपशुः पशुबन्धस्तर्थाय पौर्णमासवैमृधाभ्यामिष्ट्वेत्युक्तमेतदर्यातश्चतुर्षु मासेषु ॥ ५७ ॥

शुनासीरीयेण सोमेन यक्ष्यमाणो भवति । दीक्षते । तस्यापरिमिता दीक्षास्तिस्र उपसदः । स तथा राजानं क्रीणाति यथा मन्यते पौर्णमास्ये मे यज्ञियेऽहन्सुत्या संपत्स्यत इति । तस्य तथा संपद्यते । प्रसिद्धेन कर्मणोपवसथादेत्यथ वसतीवरीः परिहृत्य पयांसि विशिष्योपवसन्त्यथास्यैताꣳ रात्रिं वायवे वत्सा अपाकृता भवन्ति । प्रातर्वायव्यं पयो दोहयति सांनाय्यस्य वाहृता तूष्णीं वायाग्नेयं पशुमुपाकरोति । तस्यैन्द्र ऋषभ उपालम्भ्यो भवति । तस्य प्रातःसवनीयाननुवर्तन्ते शुनासीरीयहवीꣳषि । प्रैषवन्तः सवनीया अनुब्रूहि यजेतीतरेषाꣳ हविषाम्प्रजुधा ज्योतिरग्निष्टोमः संतिष्ठते । समानं कर्मावभृथात्प्रसिद्धोऽवभृथ । उदयनीयायेष्ट्वा मैत्रावरुणीं वशामुपाकरोति । तस्यै[2] सौर्युपालम्भ्या[3] भवति । तयोः प्रसिद्धं वपाभ्यां चरित्वा पशुपुरोडाशौ

1 Thus Be 7; ॰कर्मण्योपा॰ Be; ॰कर्मण उपालंभ्यो M.
2 तस्यै MU Be; तस्याः Be 7 D; B om.
3 Thus Be 7; सौर्यापालंभ्या M; सौर्यं उपालंभ्यो Be U.

निर्वपति । संतिष्ठते यथा द्विपशुः पशुबन्धस्तथाथ पौर्णमासवैमृधाभ्यामिष्ट्वेत्युक्तमेतत् । ॥ ५८ ॥ षोडशः ॥

अथातो ज्योतिरयनमित्याचक्षते । वैश्वदेवेन सोमेन यक्ष्यमाणो भवतीति समानी प्रतिपदेतावदेव नाना । त्रिवृदस्याग्निष्टोमो । ज्योतिरिहाथातश्चतुर्षु मासेषु वरुणप्रघासेन सोमेन यक्ष्यमाणो भवति । दीक्षते । तस्यापरिमिता दीक्षाः षडुपसदः । स तथा राजानं क्रीणाति यथा मन्यते पौर्णमास्यै मे यज्ञिये ऽहन्सुत्या संपत्स्यत इति । तस्य तथा संपद्यते । प्रसिद्धेन कर्मणोपवसथादेत्याथास्यैतदहर्दया वत्सा अपाकृता भवन्ति मरुद्भ्यो वरुणायेति । द्वयं पयो दोहयति सांनाय्यस्य वाहृता तूष्णीं वाथ वसतीवरीः परिहृत्य पयाꣳसि विशिष्योपवसन्त्यथ प्रातराग्नेयं पशुमुपाकरोति । तस्य मारुतो वारुण इत्युपालम्भ्यौ भवतस्तस्य प्रातःसवनीयाननुवर्तन्ते सप्त वरुणप्रघासहवीꣳषि । स यत्र प्रातःसवने धिष्णियान्विहरति तदजसं मार्जालीयं करोति । समासन्नेषु हविःषु गार्हपत्ये करम्भपात्राण्यभिपर्यग्निकृत्वा तैर्मार्जालीये प्रचरति । प्रैषवन्तः सवनीया । अनुब्रूहि यजेतीतरेषाꣳ हविषां । माध्यंदिनीयाननुवर्तते[1] वारुणी च कायश्च । प्रैषवन्तः सवनीया । अनुब्रूहि यजेतीतरयोर्हविषोर्ऽनुधा ज्योतिरस्थ्यः संतिष्ठते । समानमुत्तरं कर्म यथा द्विरात्रे तथाथातश्चतुर्षु मासेषु ॥ ५९ ॥

१ Thus MDU ; °वर्तन्ते the other MSS.

शाकमेधेन सोमेन यक्ष्यमाणो भवति । दीक्षते । तस्यापरिमिता दीक्षाः षडुपसदः । स तथा राजानं क्रीणाति यथा मन्यते पौर्णमास्यै मे यज्ञियेऽहन्सुत्या संपत्स्यत इति । तस्य तथा संपद्यते । प्रसिद्धेन कर्मणोपवसथादेत्यथ वसतीवरीः परिहृत्य पयांसि विशिष्योपवसन्त्यथ प्रातराग्नेयं पशुमुपाकरोति । तस्यानीकवतः क्रैडिनः प्राजापत्यस्तूपर इत्युपालम्भ्या भवन्ति । तस्य प्रातःसवनीयाननुवर्तन्त आनीकवतः । प्रैषवन्तः सवनीया । अनुब्रूहि यजेत्यानीकवतस्य । माध्यंदिनीयाननुवर्तन्ते सांतपनः । प्रैषवन्तः सवनीया । अनुब्रूहि यजेति सांतपनस्य । तृतीयसवनीयाननुवर्तन्ते[1] गृहमेधीयप्रभृतीनि महाहवींषि । स यत्र तृतीयसवने धिष्णियान्विहरति तदजस्रं मार्जालीयं करोति । महाहविर्भिश्चरित्वा गार्हपत्ये महापितृयज्ञहवींषि श्रपयित्वा तैर्मार्जालीये प्रचरति[2] । प्रैषवन्तः सवनीया । अनुब्रूहि यजेतीतरेषां हविषामृजुधा ज्योतिरुक्थ्यः संतिष्ठते । समानमुत्तरं कर्म यथा त्रिरात्रे तथा । स उ एव[3] शुनासीरीयः । ॥ ६० ॥ सप्तदशः ॥

अथातो महायज्ञ[4] इत्याचक्षते । ज्योतिरतिरात्र इत्येक आहुर्दीक्षते । तस्यापरिमिता दीक्षा द्वादशोपसदः । स तथा

---

१ Thus MD; °वर्तते the other MSS.

२ °रन्ति Be Be 7 DU.

३ Thus M; खंडोन Be 7; खल्वेव Be BDU.

४ Thus M Be BU Keś.; महापितृयज्ञ Be 7 D.

राजानं क्रीणाति यथा मन्यते पौर्णमास्ये मे यज्ञिये ऽहन्सुत्या संपत्स्यत इति । तस्य तथा संपद्यते । प्रसिद्धेन कर्मणोपवसथादेत्यथास्यैतदहस्तया वत्सा अपाकृता भवन्ति विश्वेभ्यो देवेभ्यो मरुद्भ्यो वरुणायेति । त्रयं पयो दोहयति सांनाय्यस्य व्रतता तूष्णीं वाथ वसतीवरीः परिहृत्य पयांसि विग्रिष्योपवसन्त्यथ [1]प्रातस्त्रिवृद्बर्हिर्म्रदेकवदेव[2] स्तृणात्यथाग्नेयं पशुमुपाकरोति । तस्य वैश्वदेवो मारुतो वारुण आनीकवतः क्रैडिनः प्राजापत्यस्तूपर ऐन्द्र ऋषभ इत्युपालम्भ्या भवन्ति । तस्य प्रातःसवनीयाननुवर्तन्ते वैश्वदेवहवींषि । प्रैषवन्तः सवनीयाः । अनुब्रूहि यजेतीतरेषां हविषां । माध्यंदिनीयाननुवर्तन्ते सर्वाणि वरुणप्रघासहवींषि । ॥ ६१ ॥

स यत्र माध्यंदिनीये सवने धिष्णियान्विहरति तदजस्रं मार्जालीयं करोति । समासन्नेषु हविःषु गार्हपत्ये करम्भपात्राण्यभिपर्यग्निकृत्वा तैर्मार्जालीये प्रचरति । प्रैषवन्तः सवनीयाः । अनुब्रूहि यजेतीतरेषां हविषां । तृतीयसवनीयाननुवर्तन्त आनीकवतप्रभृतीनि महाहवींषि । स यत्र तृतीयसवने धिष्णियान्विहरति तदजस्रं मार्जालीयं करोति ।

---

१ Between प्रातस् and त्रिवृद् Be 7 has the following words: (प्रात)राग्नेयं पशुमुपाकरोति तस्यानीकवतः क्रैडिनः प्राजापत्यस्तूपर इत्युपालंभ्या भवंति तस्य प्रातःसवनीयाननुवर्तंत आनीकवतः प्रैषवंतः सवनीया अनुब्रूहि यजेत्यानीकवत(त्रिवृद्)।

२ Thus (एकवदेव) M Be 7; एकधैव Be U; एकवैव B; D om.

महाहविर्भिश्चरित्वा गार्हपत्ये महापितृयज्ञहवींꣳषि श्रपयित्वा तैर्मार्जालीये प्रचरति । प्रैषवन्तः सवनीया । अनुब्रूहि यजेतीतरेषाꣳ हविषाꣳ सुधा ज्योतिरतिरात्रः संतिष्ठते । पुरस्ताद्धानासोमानां वाजिनैश्चरित्वा त्रैयम्बकैश्चरति[1] । समानं कर्मावभृथादथैतस्मिन्नवभृथ उपाददते वारुण्यै निष्कासं तुषानिति । वारुणस्य वारुण्यामिच्चाध्यवदानीया भवत्यृजीषेण सह तुषान्संप्रकिरन्ति[2] । प्रसिद्धो ऽवभृथ । उदयनीययेष्ट्वा मैत्रावरुणीं वशामुपाकरोति । तस्यै द्यावापृथिव्या काया वैश्वकर्मणी सौरीत्युपालम्भ्या भवन्ति । तासां प्रसिद्धं वपाभिश्चरित्वा पशुपुरोडाशान्निर्वपति । ताननुवर्तन्त आदित्यप्रभृतीनि शुनासीरीयहवींꣳषि । प्रैषवन्तः पशुपुरोडाशा । अनुब्रूहि यजेतीतरेषाꣳ हविषाꣳ । संतिष्ठते यथा पश्चपशुः पशुबन्धस्तथाथ पौर्णमासवैमृधाभ्यामिष्ट्वा यजमानायतन उपविश्य चेष्टा अलक्ष्या लोहितायसस्य च क्षुरेण शीर्षं वि च वर्तयते परि च वपते पुरस्तादेवाग्रे ऽथ दक्षिणतो ऽथ पश्चादथोत्तरतो ऽथोपरिष्टात्संतिष्ठन्ते चातुर्मास्याः सोमाः संतिष्ठन्ते चातुर्मास्याः सोमाः । ॥ ६२ ॥ अष्टादशः ॥

॥ इति सप्तदशः प्रश्नः[3] ॥

---

१ त्र्यंबकै॰ MSS.

२ ॰किरति M.

३ अथ (r. इति) बौधायन उत्तरतन्त्रसूत्रे प्रथमः प्रश्नः U.

बृहस्पतिसवेन यक्ष्यमाणो भवति ' स उपकल्पयते ऽश्वचतुस्त्रिꣳशा दक्षिणाः कृष्णाजिनꣳ सुवर्णरजतौ च रुक्मौ पर्णमयं पात्रमाज्यमभिषेचनार्थाय वै ब्राह्मणं भवति परिस्रजी होता भवत्यरुणो मिर्मिरस्त्रिशुक्र इत्येष ह वै परिस्रजी यः खलतिः परिकेश्यो[1] ' ऽथ[1] हैष मिर्मिरो यः शुक्लो विक्लिधस्तिलकवान्पिङ्गाक्षो[2] ' ऽथ हैष त्रिशुक्लो यस्त्रिवेदो[3] ' दीक्षते ' तस्यैकरात्रीणस्य सोमं क्रीणन्ति ' तिस्र उपसदस्तायते त्रिवृदग्निष्टोमो रथंतरसामा प्रवर्ग्यवान्गायत्रीष्वेक स्तोमः ' प्रज्ञातं देवसुवाꣳ हविषां करणं ' तस्य बार्हस्पत्यो[4] ऽतिग्राह्यो[4] ' बार्हस्पत्यः पशुरुपालम्भ्यः ' समानमाभिषेकस्य कालादभिषेकस्य काले यजमानायतने कृष्णाजिनं प्राचीनग्रीवमुत्तरलोमोपस्तृणाति ' तद्यजमानं प्राञ्चमुपवेश्य सुवर्णरजताभ्याꣳ रुक्माभ्यां पर्युपास्य पर्णमये पात्र आज्यमानीयाभिषिञ्चति बृहस्पतिः प्रथमं जायमानो महो ज्योतिषः परमे व्योमन्। सप्तास्यस्तुविजातो रवेण वि सप्तरश्मिरधमत्तमाꣳसि ॥ देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ सरस्वत्यै वाचो यन्तुर्यन्त्रेण बृहस्पतिसवेनाभिषिञ्चामीति ' समुन्मृष्टे समुत्क्रोशन्तीति[5] समानमा मुखस्य विमार्जनात् ' ॥ १ ॥

१ Thus MB Be; परिकेश्यय the other MSS.

२ Thus D; तिलकावा॰ M Be 7 U; तीलकवा॰ Be; तीलकावा॰ B.

३ Thus M; त्रिवेदो the other MSS.

४ Thus M Be 7 D; ॰पत्यश्चातिग्रा॰ Be BU.

५ M reads: समुत्क्रोशंत्यभ्यषेचनायमसौ + बृहस्पतिसवेनेति।

तस्य प्रातःसवने सन्नेषु नाराशꣳसेष्वेकादश दक्षिणा नीयन्त। एकादश माध्यंदिने सवने सन्नेषु नाराशꣳसेष्वेकादशास्तृतीयसवने सन्नेषु नाराशꣳसेषु। माध्यंदिन एव सवने ऽश्वं दद्यादिति ह स्माह मौद्गल्यः। स वा एष[1] नैमार्जनो[1] यज्ञः। स यथा ह वा इयं गैरेयी[2] नदी[3] निम्रजत्येवꣳ[3] ह वा एष एतेन यज्ञक्रतुनेष्ट्वा पाप्मानं भ्रातृव्यं निम्रजन्नेति[4]। स एतस्मिन्नेव पूर्वपक्षे चतुष्टोमेनाग्निष्टोमेन यजेत पुरा भ्रेषाच्छान्त्यै। राजा राजसूयेनेजान इच्छति बृहस्पतिसवेनाभिषिच्येयेति[5]। तद् वा आहुर्न वै राजसूयाभिषिक्तो ऽन्येन यज्ञक्रतुनाभिषिच्येतांप्रत्यवरोही ह्[6] भवतीत्युभाभ्यां ब्रह्मवर्चाभ्यामभिषिच्य[7] इत्यभिषिच्येतैवेति[7]। दीक्षते। तस्य तिस्रो दीक्षास्तिस्र उपसदः। समानमाभिषेकस्य कालादभिषेकस्य काले माध्यंदिनीया एवैनं चमसा निम्रजन्तो यन्ति। चतुर्विंश एष भवति।

---

१ Thus M Be 7 D ; एषसवनैमार्जनो BU ; एष सवोषनिर्मार्जनो Be.

२ Thus M ; गौरेयी the other MSS. (U गौरेयौर्)।

३ नदी निम्रजंत्येवꣳ M ; नदीनिम्रंच्येत्येवꣳ B ; नदीनिंम्रंच्यनेत्येवꣳ Be 7 D ; नदीनिंम्रंचंत्येवं U ; नदीं तीत्वा पांस्रुष्विम्रंजंत्येवꣳ Be. Read perhaps: नदी निम्रजन्त्येत्येवꣳ *i.e.* निम्रजन्ती एति, *cp. infra* निम्रजन्नेति।

४ निम्रच्यन्नेति Be 7.

५ Thus MD Be 7 ; °भिषिच्यत्रेति Be U ; °भिषिच्येतेति B.

६ om. M.

७ Thus M only ; °भिषिच्यात इत्यभिषिच्येतैवेति U Be 7 D ; °भिषिच्यात इत्यभिषिच्येतेति B ; °भिषिच्याभिषिच्येतैवेति Be.

राजा राजसूयेन यक्ष्यमाण आध्यायति[1] त्रिषु वर्णेष्वभिषिक्तेष्वभिषिच्येय[2] पुरोहिते स्थपतौ सूत इति । पुरोहितो दीक्षते । तस्य तिस्रो दीक्षास्तिस्र उपसदः । समानमाभिषेकस्य कालादभिषेकस्य काले शुक्रामन्थिनोः सꣳस्रावेणाभिषिञ्चति । चतुष्टोम एष भवति । ॥ २ ॥

स्थपति[3] स्थपतिसवेन यक्ष्यमाणो भवति स उपकल्पयत आर्षभं चर्म सुवर्णरजतौ च रुक्मावौदुम्बरं पात्रं दध्यभिषेचनाय । दीक्षते । तस्य तिस्रो दीक्षास्तिस्र उपसद । आग्नेयस्य मारुती पृश्निः पष्ठौह्युपालम्भ्या भवति । सप्त हवीꣳषि प्रातःसवनीयाननुवर्तन्ते यदाग्नेयो भवत्यग्निमुखाह्यृद्धिरित्येतानि । समानमाभिषेकस्य कालादभिषेकस्य काले यजमानायतन आर्षभं चर्म प्राचीनग्रीवमुत्तरलोमोपस्तृणाति । तद्यजमानं प्राञ्चमुपवेश्य सुवर्णरजताभ्याꣳ रुक्माभ्यां पर्युपास्यौदुम्बरे पात्रे दध्नानीयाभिषिञ्चति देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ सरस्वत्यै वाचो यन्तुर्यन्त्रेण स्थपतिसवेनाभिषिञ्चामीति । समनुमृष्टे समुत्क्रोशन्तीति समानमा मुखस्य विमार्जनात्स एष स्थपतिसवः सप्तदशो ऽग्निष्टोम । एष एव स्थपतिसव । एष वैश्यसव[4] । एष माससवो । मासा ह्येनेनातः[5] पूर्वमीजिरे । ॥ ३ ॥

---

१ °ध्यायतीति M.
२ Thus MD Be 7; °षिच्येत् Be BU.
३ om. Be BU.
४ वैश्यस्य सव Be 7.
५ *i. s. o.* अतः Be 7 अथ, D अर्थं ।

सूतः[1] सूतसवेन यक्ष्यमाणो भवति स उपकल्पयते कृष्णाजिनꣳ सुवर्णरजतौ च रुक्मौ पर्णमयं पात्रꣳ हिरण्यं घृतमभिषेचनाय । दीक्षते । तस्य तिस्रो दीक्षास्तिस्र उपसदो । ऽष्टौ हवीꣳषि प्रातःसवनीयाननुवर्तन्ते यदाग्नेयो भवत्याग्नेयो वै ब्राह्मण इत्येतानि । समानमाभिषेकस्य कालादभिषेकस्य काले यजमानायतने कृष्णाजिनं प्राचीनग्रीवमुत्तरलोमोपस्तृणाति । तद्यजमानं प्राञ्चमुपवेश्य सुवर्णरजताभ्याꣳ रुक्माभ्यां पर्युपास्य पर्णमये पात्रे घृतमानीय हिरण्येनोत्पूयाभिषिञ्चति देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ सरस्वत्यै वाचो यन्तुर्यन्त्रेण सूतसवेनाभिषिञ्चामीति । समुन्मृष्टे समुत्क्रोशन्तीति समानमा मुखस्य विमार्जनात्सर्व एष सूतसवः सप्तदशो ऽग्निष्टोम । एष एव सूतसव । एष ग्रामणीसव[2] । एष ऋतुसव । ऋतवो ह्येनेनातः पूर्वमीजिरे । ॥ ४ ॥ प्रथमः ॥

सोमसवेन यक्ष्यमाणो भवति स उपकल्पयते सौमीꣳ सूतवशां कृष्णाजिनꣳ सुवर्णरजतौ च रुक्मौ पर्णमयं पात्रं पयो ऽभिषेचनाय । य वै ब्राह्मणं भवति यत्किंच राजसूयस्तते सोमं तत्सर्वं भवतीति । स आमावास्येन हविषेष्ट्वाष्टावहान्यानुमतप्रभृतिभिरेति संवत्सरं चातुर्मास्यैः सप्तेन्द्रतुरीयप्रभृतिभिरथ रत्निनाꣳ हविर्भिर्यजते । ऽथ देवसुवाꣳ हविर्भिर्यजते ।

१ om. M.

२ ग्रामणि° M Bc.

ऽथैतांꣳ सौमीꣳ स्थूलवशामालभते[1] । तस्या अमसुदिते यजमानायतने कृष्णाजिनं प्राचीनग्रीवमुत्तरलोमोपस्तृणाति । तद्यजमानं प्राञ्चमुपवेश्य सुवर्णरजताभ्यांꣳ रुक्माभ्यां पर्युपास्य पर्णमये पात्रे पय आनीयाभिषिञ्चत्यषाढं[2] युत्सु पृतनासु पप्रिꣳ सुवर्षामप्स्वां वृजनस्य गोपाम् । भरेषुजांꣳ सुक्षितिꣳ सुश्रवसं जयन्तं त्वामनु मदेम सोम ॥ देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यांꣳ सरस्वत्यै वाचो यन्तुर्यन्त्रेण सोमसवेनाभिषिञ्चामीति । समुन्मृष्टे समुत्क्रोशन्तीति समानमा मुखस्य विमार्जनादथ सꣳस्रुपांꣳ हविर्भिर्यजते । ऽथ पञ्चहविषा दिशामवेष्ट्या यजते । ऽथ द्विपशुना पशुबन्धेन यजते । ऽथ सात्यदूतानांꣳ हविर्भिर्यजते । ऽथ पूर्वैः प्रयुजांꣳ हविर्भिर्यजते । ऽथ पौर्णमासवैमृधाभ्यामिष्ट्वोत्तरैः प्रयुजांꣳ हविर्भिर्यजते । ऽथ देविकाहविर्भिर्यजते । ऽथ त्रैधातवीयया यजते । ऽथ सौत्रामण्या यजते । संतिष्ठते सोमसवो ऽर्धचतुर्दशैर्मासैः । ॥ ५ ॥

पृथिसवेन[3] यक्ष्यमाणो भवति स उपकल्पयते रोहितं चर्मानडुहꣳ सुवर्णरजतौ च रुक्मावौदुम्बरं द्रोणं चतुःस्रक्ति चतुष्टयीरपो दिग्भ्यः संभृता[4] । अथ वै ब्राह्मणं भवति

---

१ °भते MD Be UB ; °भेत Be 7.

२ The mantra is abbreviated in all the MSS.

३ पृथिवि° M, पृथिवी Be every time in this kh.

४ Thus M Be ; समाहृता the other MSS.

यत्किंच राजसूयमनुत्तरवेदीकं तत्सर्वं भवतीति । स आमावास्येन हविषेष्ट्वाष्टावष्टान्यानुमतप्रभृतिभिरेति सत्रेन्द्रतुरीयप्रभृतिभिरथ रत्निनाꣳ हविर्भिर्यजते । ऽथ देवसुवाꣳ हविर्भिर्यजते । ऽथैतां चतुर्हविषमिष्टिं निर्वपत्याग्नेयमष्टाकपालमैन्द्रमेकादशकपालं वैश्वदेवं द्वादशकपालं बार्हस्पत्यं चरुमिति । तस्या[1] श्वसमुदिते[1] यजमानायतने रोहितं चर्मानडुहं प्राचीनग्रीवमुत्तरलोमोपस्तृणाति । तद्यजमानं प्राञ्चमुपवेश्य सुवर्णरजताभ्याꣳ रुक्माभ्यां पर्युपास्यौदुम्बरे द्रोणे चतुष्टयीरपः समवनीयाभिषिञ्चति[2] ये मे पञ्चाशतं ददुरश्वानाꣳ सधस्तुतिः । द्युमदग्ने महि श्रवो बृहत्कृधि मघोनां नृवदमृत नृणाम् ॥ देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ सरस्वत्यै वाचो यन्तुर्यन्त्रेण पृथिसवेनाभिषिञ्चामीति । संसृष्टे समुत्क्रोशन्तीति समानमा मुखस्य विमार्जनादथ संसृपाꣳ हविर्भिर्यजते । ऽथ पञ्चहविषा दिशामवेष्ट्या यजते । ऽथोपातीत्य द्विपशुं पशुबन्धꣳ सात्यदूतानाꣳ हविर्भिर्यजते । ऽथ पूर्वैः प्रयुजाꣳ हविर्भिर्यजते । ऽथ पौर्णमासवैमृधाभ्यामिष्ट्वोत्तरैः प्रयुजाꣳ हविर्भिर्यजते । ऽथ देविकाहविर्भिर्यजते । ऽथ त्रैधातवीयया यजते । ऽथ सौत्रामण्या यजते । संतिष्ठते पृथिसवो ऽर्धर्धेन[3] मासेन[3] । ॥ ६ ॥

---

१ Thus M Be 7 DUB ; तस्यासमु° Be.

२ Thus Be 7 DU ; समानीय M Be B, but cp. XII. 8 (p. 98, 5).

३ Thus M ; ऽर्धं, र्धं, मासेन the other MSS.

गोसवेन यक्ष्यमाणो भवति स उपकल्पयतेऽयुतं दक्षिणाः सुवर्णरजतौ च रुक्मौ पर्णमयं पात्रं प्रतिधुगभिषेचनाय[1] । दीक्षते । तस्य षड् दीक्षाः षडुपसदः । समानमाभिषेकस्य कालादभिषेकस्य काले यजमानायतने कृष्णाजिनमात्रं वेदेरनुद्धृतं भवति । तद्यजमानं प्राञ्चमुपवेश्य सुवर्णरजताभ्याꣳ रुक्माभ्यां पर्युपास्य पर्णमये पात्रे प्रतिधुगानीय[2] इहत स्तोत्रं प्रत्यभिषिञ्चति रेवज्जातः सहसा वृद्धः क्षत्राणां क्षत्रभृत्तमो वयोधाः । महान्महित्वे तस्तभानः क्षत्रे राष्ट्रे च जागृहि । प्रजापतेस्त्वा परमेष्ठिनः स्वाराज्येनाभिषिञ्चामि ॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ सरस्वत्यै वाचो यन्तुर्यन्त्रेण गोसवेनाभिषिञ्चामीति । समुन्मृष्टे समुत्क्रोशन्तीति समानमा मुखस्य विमार्जनात् । एष गोसवः षट्त्रिꣳशः सर्व उक्थ्य उभयसामायुतदक्षिणः[3] । पवमाने कण्वरथंतरं कुर्वन्ति[4] । ॥ ७ ॥ द्वितीयः ॥

ओदनसवेन यक्ष्यमाणो भवति स उपकल्पयते रोहितं चर्मानडुहꣳ सुवर्णरजतौ च रुक्मौ शतमानं च प्रवर्तं चतुरो वर्णान्ब्राह्मणꣳ राजन्यं वैश्यꣳ शूद्रं चतुरो रसान्मधु सुरां

---

१ Thus M Be 7 D; प्रतियुग॰ the other MSS.

२ Thus M; प्रतिधुषमानीय all the other MSS., but cp. Maitr. S. II. 2. 7, where the word is also used as a neuter (sc. पयः).

३ Thus Be 7 D; ॰सामायुतंदक्षिणाः M; ॰सामायुतदक्षिणः the other MSS.

४ Thus M; भवति the other MSS.

पय अपश्चत्वारि[1] पात्राणि सौवर्णꣳ राजतं काꣳस्यं मृन्मयं चतस्रो दक्षिणाः शतमानꣳ हिरण्यं तिसृधन्वमश्वां माषैः पूर्णं कमण्डलुं चतुष्टयीः शलाकाः पर्णमय्यौ नैयग्रोध्यावाश्वत्थ्यौ फाल्गुनपाच्यौ[2] चत्वारि नानावृक्ष्याणि पात्राणि शकुꣳस्त्रीणि दर्भपुञ्जीलान्यौदुम्बरं द्रोणं चतुःस्रक्ति चतुष्टयीरपो दिग्भ्यः संभृताः शतं[3] च[3] रथं चैतेनोपक्लृप्तेन रोहिणीमायतीमुपरमत्यथ[4] रोहिण्येति पूर्वाग्निमन्ववस्यत्युत्तपनीयꣳ[5] प्राचीनोऽन्वाहार्यपचनमाहिताग्निरथाध्वर्युरपररात्र आद्रुत्य सꣳशास्तेकौदनꣳ[6] श्रपयतेति । तं तथा श्रपयन्ति यथा पुरादित्यस्योदयाच्छृतो[7] भवत्युद्यता सूर्येण कार्य इति ब्राह्मणमथैतमोदनꣳ श्रपयित्वाभिघार्योदञ्चमुद्वासयत्यथैतां पात्रीं निर्णिज्योपस्तीर्य तस्यामेनमसंभिन्नमिवोद्धरति । सर्पिरासेचनं कृत्वा प्रभूतमाज्यमानीयाथैताꣳश्चतुरो वर्णान्दक्षिणत उदङ्मुखाननुपवेशयत्यथान्वारब्धे यजमाने जुहोति सिꣳहे व्याघ्र उत या

---

1 चाप॰ all.

2 Thus M; फाल्गुनपाच्यौ Be B; फाल्गुनपाचो DU; फाल्गुन्यौ पात्रीं Be.

3 Uncertain; शतं च M; मतं च Be 7 D; वर्षं च BU; सितं (omitting च) Be.

4 Read perhaps अत्य i.s.o. अथ, cp. XIII. 36 (p. 145, 3), XV. 2 (p. 205, 10) and XVIII. 16.

5 ॰मनवस्यत्यु॰ M Be 7; ॰न्ववस्यत्यु॰ Be BUD.

6 Thus Be BU; एकौदनꣳ M; चौदनं Be BU.

7 Thus M Be 7 D; इत्स्यादादित्य॰ Be BU.

पृदाकाविति चतस्रः स्रुवाहुतीर्हुत्वाहुत्वैव संस्रावैः प्रवर्तमभिघारयति राडसि विराडसि सम्राडसि स्वराडसीत्ययैतं[1] प्रवर्तमपेणाहवनीयं[2] पर्याहृत्य दक्षिणतो निदधाति ' ॥ ८ ॥

अथैतत्सौवर्णं पात्रं याचति ' तस्मिंस्त्रिः पवित्रं मध्वानीय सक्तूनोप्य पर्णमयीभ्याꣳ शलाकाभ्यामुपमन्थतीन्द्राय त्वा तेजस्वते तेजस्वन्तꣳ श्रीणामीति ' तेजो ऽसीति ब्राह्मणाय प्रयच्छति ' तत्ते प्रयच्छामीति ब्राह्मणः प्रतिग्टह्णात्यथ यजमानो मुखं विमृष्टे तेजस्वदस्तु मे मुखं तेजस्वच्छिरो अस्तु मे। तेजस्वान्विश्वतः प्रत्यङ् तेजसा संपिपृग्धि मेति ' त्रिराचम्य प्रशꣳसति ' तस्मा एतच्चैव पात्रं ददाति शतमानं च हिरण्मयमथैतद्राजतं पात्रं याचति ' तस्मिंस्त्रिः पवित्रꣳ सुरामानीय सक्तूनोप्य नैयग्रोधीभ्याꣳ शलाकाभ्यामुपमन्थतीन्द्राय त्वौजस्वत ओजस्वन्तꣳ श्रीणामीत्योजो ऽसीति राजन्याय प्रयच्छति ' तत्ते प्रयच्छामीति राजन्यः प्रतिग्टह्णात्यथ यजमानो मुखं विमृष्ट ओजस्वदस्तु मे मुखमोजस्वच्छिरो अस्तु मे। ओजस्वान्विश्वतः प्रत्यङ्ङोजसा संपिपृग्धि मेति ' त्रिराचम्य प्रशꣳसति ' तस्मा एतच्चैव पात्रं ददाति तिसृधन्वं चाथैतत्कांस्यं पात्रं याचति ' तस्मिंस्त्रिः पवित्रं पय आनीय सक्तूनोप्याश्वत्थीभ्याꣳ शलाकाभ्यामुपमन्थतीन्द्राय त्वा पयस्वते पयस्वन्तꣳ श्रीणामीति ' पयो ऽसीति वैश्याय

1 •यैनं all exc. M.

2 •पेणाग्निं M.

प्रयच्छति। तत्ते प्रयच्छामीति वैश्यः प्रतिगृह्णात्यथ यजमानो मुखं विमृष्टे पयस्वदस्तु मे मुखं पयस्वच्छिरो अस्तु मे। पयस्वान्विश्वतः प्रत्यङ् पयसा संपिपृग्धि मेति। त्रिराचम्य प्रमृꣳशति। तस्मा एतच्चैव पात्रं ददात्यद्वा चांयैतन्मृन्मयं पात्रं याचति। तस्मिꣳस्त्रिरः पवित्रमप आनीय सक्तूनोप्य फाल्गुनपात्रीभ्याꣳ[1] शलाकाभ्यामुपमन्थतीन्द्राय त्वायुष्मत आयुष्मन्तꣳ श्रीणामीत्यायुरसीति शूद्राय प्रयच्छति। तत्ते प्रयच्छामीति शूद्रः प्रतिगृह्णात्यथ यजमानो मुखं विमृष्ट आयुष्मदस्तु मे मुखमायुष्मच्छिरो अस्तु मे। आयुष्मान्विश्वतः प्रत्यङ्ङायुषा संपिपृग्धि मेति। त्रिराचम्य प्रमृꣳशति। तस्मा एतच्चैव पात्रं ददाति माषैश्च पूर्णं कमण्डलुमथैतमोदनमभ्युक्ष्य प्राश्नाति। तस्य यत्र सहते तदप्सु प्रवेशयत्यथ हिरण्याहूतं निष्पिबति। निष्पिबन्तमनुमन्त्रयत इममग्न आयुषे वर्चसे कृधि प्रियꣳ रेतो वरुण सोम राजन्। मातेवास्मा अदिते शर्म यच्छ विश्वे देवा जरदष्टिर्यथासदित्यथैतं प्रवर्तमद्भिः प्रक्षाल्य दक्षिणे कर्ण आबध्नीत आयुष्टे विश्वतो दधदित्यथैनमनुपरिवर्तयत[2] आयुरसि विश्वायुरसि सर्वायुरसि सर्वमायुरसीत्यथैनं त्रिभिर्दर्भपुञ्जीलैः पवयति यतो वातो मनोजवा यतः क्षरन्ति सिन्धवः। तासां त्वा सर्वासाꣳ

१ फल्गुनपात्रिभ्यां M; फाल्गुनपात्रीभ्याꣳ Be 7 BUD; फल्गुनीभ्याꣳ Be.

२ Thus M; एतं i.s.o. एनं the other MSS.

हचाभिषिञ्चामि वर्चसेत्यथास्य दक्षिणमक्षिकटं[1] न्यचति[1] समुद्र इवासि गह्मना सोम इवास्यदाभ्यः । अग्निरिव विश्वतः प्रत्यङ् सूर्य इव ज्योतिषा विभूरिति[1] ॥ ९ ॥

यावदेवाचाध्वर्युश्चेष्टति तावदेव प्रतिप्रस्थातौदुम्बरे द्रोणे चतुष्टयीरपः समवनीय चतुरो ग्रहान्गृह्णात्यपां यो द्रवणे रसस्तमहमस्मा आमुष्यायणाय तेजसे ब्रह्मवर्चसाय गृह्णामीति पर्णमयेनापां य ऊर्मौ रसस्तमहमस्मा आमुष्यायणायौजसे वीर्याय गृह्णामीति नैयग्रोधेनापां यो मध्यतो रसस्तमहमस्मा आमुष्यायणाय पुष्ट्यै प्रजननाय गृह्णामीत्याश्वत्थेनापां यो यज्ञियो रसस्तमहमस्मा आमुष्यायणायायुषे दीर्घायुत्वाय गृह्णामीत्यौदुम्बरेणाथैतद्रोहितं चर्मानडुहं[2] प्राचीनग्रीवमुत्तरलोमोपस्तृणाति[1] तद्यजमानं प्राञ्चमुपवेश्य सुवर्णरजताभ्यां रुक्माभ्यां पर्युपास्याभिषिञ्चत्यपां यो द्रवणे रसस्तेनाहमिममामुष्यायणं तेजसे[3] ब्रह्मवर्चसायाभिषिञ्चामीति पर्णमयेनापां य ऊर्मौ रसस्तेनाहमिममामुष्यायणमोजसे वीर्यायाभिषिञ्चामीति नैयग्रोधेनापां यो मध्यतो रसस्तेनाहमिममामुष्यायणं पुष्ट्यै प्रजननायाभिषिञ्चामीत्याश्वत्थेनापां यो

१ Thus Be; दक्षिणमक्षिकटन्याचति M; दक्षिणे अक्षिकटे न्यचति BU; दक्षिणे अक्षिकोटं न्यचति Be 7 D.

२ All MSS. exc. M ins. अधनेनाग्निं ।

३ In Be here and infra all the Datives (॰वर्चसाय, ओजसे, वीर्याय etc.) are changed into Instrumentals; M has everywhere Instrum.

यज्ञियो रथस्तेनाहमिममामुष्यायणमायुषे दीर्घायुत्वायाभिषिञ्चामीत्यौदुम्बरेण । समुन्मृष्टे समुत्क्रोशन्तीति समानमा मुखस्य विमार्जनादुत्तरत एतद्रूपायितम् शतं[1] तिष्ठति रथश्च[1] । तदभिप्रैत्यभिप्रेहि वीरयस्वोग्रश्चेत्ता सपत्नहा । आतिष्ठ मित्रवर्धनस्तुभ्यं देवा अधिब्रवन्नित्यथ रथस्य पक्षसी संमृशत्यङ्कौ न्यङ्कावभितो रथं याविति । रथमातिष्ठत्यातिष्ठ वृत्रहन्निति प्रतिपद्यायं पृणक्तु रजसी उपस्थमित्यातो ऽप्यैतच्छतं[2] त्रिः प्रदक्षिणं परियाय[3] पुरस्तात्प्रत्यायाति । तदध्वर्यवे ददाति । स एष ओदनसवो राज्ञो वा ब्राह्मणस्य वा वैश्यस्य वा पुष्टिकामस्य यज्ञः । ॥ १० ॥ तृतीयः ॥

पञ्चशारदीयेन यक्ष्यमाणो भवति । स उपकल्पयते सप्तदश निरष्टान्वत्सतरानेकहायनांस्तं पुरस्तान्मार्गशीर्ष्यै[4] पौर्णमास्या आमावास्येन हविषेष्ट्वा सप्तदश मारुतीः पृश्नीर्वत्सतरीरालभते । ऽभिप्रोक्षणतो वत्सतरान्व्यापयित्वोत्सृजन्त्यथैतराभिः संस्थां कुर्वन्ति । संवत्सरे पर्यवेते मरुद्भ्यः सांतपनेभ्यः सप्तदश पृषतीर्वत्सतरीरालभते । ऽभिप्रोक्षणतो वत्सतरान्व्यापयित्वोत्सृजन्त्यथैतराभिरेव संस्थां कुर्वन्ति । द्वितीये संवत्सरे

---

१ Uncertain again, cp. p. 350, 6.; शतं ति° रथं च M; शतं ति° रथं च Be 7 D; शतं ति° रथस् (omitting च) UB; शितस्ति° रथस् Be.

२ Thus M sec. m., °तं त्रिर्ष pr. m.; °तछत' Be 7 BDU; °तद्यं Be.

३ पर्यायं M; परियाय B; परीयाय the other MSS.

४ Thus M Be; °शीर्षाः Be 7; °शीर्षं DU; °शीर्षां B.

पर्यवेते मरुद्भ्यो गृहमेधिभ्यः सप्तदश कल्माषीर्वत्सतरीरालभते । ऽभिप्रोक्षणतो वत्सतरान्स्थापयित्वोत्सृजन्त्यथैतराभिरेव सङ्ख्यां कुर्वन्ति । तृतीये संवत्सरे पर्यवेते मरुद्भ्यः क्रीडिभ्यः सप्तदशावलिप्ता वत्सतरीरालभते । ऽभिप्रोक्षणतो वत्सतरान्स्थापयित्वोत्सृजन्त्यथैतराभिरेव सङ्ख्यां कुर्वन्ति । चतुर्थे संवत्सरे पर्यवेते मरुद्भ्यः स्वतवद्भ्यः सप्तदश राजीवा[1] वत्सतरीरालभते[1] । ऽभिप्रोक्षणतो वत्सतरान्स्थापयित्वोत्सृजन्त्यथैतराभिरेव सङ्ख्यां कुर्वन्त्येतदेवाहर्दीक्षते । संवत्सरमुख्यं[2] बिभर्ति । द्वादशोपसदस्तस्याहानि त्रिवृदग्निष्टोमः पञ्चदश उक्थ्यः सप्तदश उक्थ्यः पञ्चदश उक्थ्यः सप्तदशो ऽतिरात्रस्तस्य मारुत स्तोमो भवत्यथैतेषां पशूनां त्रयः प्रथमे ऽहन्यैन्द्रामारुता उक्षाणः सवनीया आलभ्यन्त । एवं द्वितीय एवं तृतीय एवं चतुर्थे । पञ्चोत्तमे ऽहन्यालभ्यन्ते । वर्षिष्ठमिव ह्येतदहर्मन्यन्ते वर्षिष्ठः समानानां भवतीति ब्राह्मणमथैतेषां पशूनां यदि नश्यति म्रियते वा यास्वमेधे प्रायश्चित्तिस्तां कृत्वाथान्यं तद्देवत्यं[3] तद्वर्णं तद्वयसं तद्रूपं[4] तज्जातीयं[4] पशुमालभन्ते । स एष पञ्चशारदीयो राज्ञो वा ब्राह्मणस्य वा । यः कामयेत

१ Thus Be 7; राजीर्वा D; राजीवं U; राजीवंवत्स॰ Be; राजीवत्स॰ B; उक्थ्यो राजीवंवत्स॰ M.

२ ॰मुख्यां M.

३ तद्देवत्यं MSS.

४ om. M.

बहोर्भूयान्स्यामिति स एतेन यज्ञक्रतुना यजेत ' बहोरेव भूयान्भवति ' ॥ ११ ॥

अग्निष्टुता यक्ष्यमाणो भवति ' तस्य सर्वमेव समानं ' पुरोरुच एवान्या ' अस्याजरासो दम आयूꣳषि पवस इत्यैन्द्रवायवस्य ' यज्ञा नो मित्रावरुणेति मैत्रावरुणस्याश्विना पिबतꣳ सुतमित्याश्विनस्य ' द्वे विरूपे चरतः पूर्वापरं चरतो मायचैताविति शुक्रामन्थिनो'स्तोषि ग्रता वो सहस्राण्यग्निमित्याग्रयणस्य ' नियुनक्त्युक्थ्यस्य ' नित्या ध्रुवस्याग्निनाग्निः समिध्यत इत्यैन्द्राग्नस्याग्निर्देवानां जठरमिति वैश्वदेवस्याग्निस्त्रियो यदुत्तम ईडे अग्निꣳ स्ववसमिति तिस्रो मरुत्वतीयानाꣳ ' श्रुधि श्रुत्कर्ण वह्निभिरिति माहेन्द्रस्य ' विश्वामदितिर्यज्ञियानां त्वे अग्ने त्वामग्न इति तिस्र आदित्यस्य[1] ग्रहस्य[1] ' नि त्वा यज्ञस्य साधनमिति सावित्रस्य ' नित्या पात्नीवतस्य ' नियुनक्ति हारियोजनस्य ' स एष त्रिवृदग्निष्टुत्पवित्रं ' यथा ह वा इदं[2] दावादभिदूना[2] अभिदुष्टाः[2] पुनर्णवा[3] ओषधयो समुत्तिष्ठन्त्येवꣳ ह वा एष एतेन यज्ञक्रतुनेष्ट्वा शुचिः पूतो मेध्यो भवति ' स यदि मुखेन पापकमन्येन चित्तं कुर्वीते ' स ह वै

---

१ आदित्यग्रहस्य M.

२ My conjecture; इयं दवादभिदुनादभिदष्टा M; इदमभिदुनादभिदग्धाः B Be 7 (pr. m.) D (pr. m.) U Be (pr. m.); इयं दावादभिदुग्धोदं Be 7 D in margin; इदं देवा अभिदुनादभिदग्धाः Be (sec. m.).

३ Thus Be 7 BDU; पुनर्नवा Be M.

मुखेन पापं करोति यो ऽनूचानस्य वा श्रुतेर्वा दुरवगतमवगच्छति । यदि बाहुभ्यां पञ्चदशं कुर्वीतैष ह वै बाहुभ्यां पापं करोति यो ब्राह्मणायोद्यच्छते । यद्युदरेण सप्तदशं कुर्वीतैष ह वा उदरेण पापं करोति यो ऽनाश्यान्नस्यान्नमश्नाति । यदि पद्भ्यामेकविंशं कुर्वीतैष ह वै पद्भ्यां पापं करोति ॥ १२ ॥

य[1] आरट्टान्वा[1] गान्धारान्वा[2] सौवीरान्वा करस्करान्वा[3] कलिङ्गान्वा गच्छति । स यदि सर्वश एव पापहमन्येत चतुष्टोमेनाग्निष्टोमेन यजेत । तेन हैतेनर्तुपर्णो भाङ्गाश्विन[4] ईजे[4] शफालानां[4] राजा । तेन हेष्ट्वा मृगयामभिप्रययौ । तं ह्येन्द्रो ऽनुख्यायैवेर्चां[5] चक्रे ऽहमु त्वा तद्यातयेय[6] यन्मा[7] यज्ञक्रतोरन्तराय[7] इति । स ह स्विन्न उदकमभ्यवेयाय[8] । तं ह तत्रैव स्त्रियं चकार । सा सुदेवला नामास । सा हैतदेव राष्ट्रमभ्याध्यरोह । सा स्त्री सती पुत्राञ्जनयां चकार । तेभ्यो हेन्द्रः समदं दधौ । ते हता विदूढाः शिश्यिरे[9] । तानुभया-

---

१ Thus Be 7 D; योराट्टान्वा M Be; योराट्टान्वा B; योरा-न्वा U.

२ गन्धा॰ M.

३ Thus M Be 7 D; कार॰ Be BU.

४ ॰श्विनं रंजनीयानां M.

५ ॰र्चां M Be 7 U; ॰र्चां Be B.

६ तद्ख्यातयेय M.

७ i.s.o. यन्मा यज्ञ॰ Be D: यः संशयात्मा यज्ञ॰ ।

८ Thus M Be 7 D; ॰मभ्युपेयाय Be B.

९ Corrected; शि (or श्चि?) श्यिरे M: शिशिरे the other MSS.

न्तरेण सुदन्त्यासां चक्रे । ऽथो हैन्द्र आजगाम । तामु[१] हाभ्युपेयाय[१] । ताꣳ होवाच सुदेवला३[२] इति[२] । भगव इति । प्रियं तवैतदिति[३] । किं मे भगवः प्रियं भविष्यतीत्येवं वै मम तदप्रियमासीद्यन्मा यज्ञक्रतोरन्तरायो वृणीष्व नु यतरे ते पुत्रा जीवेयुरिति । यानेव भगव स्त्री सत्यध्यगममिति होवाच । तस्मादाहुः स्त्रियाः पुत्राः प्रेयाꣳसो भवन्तीति । स एतस्मिन्नेव पूर्वपक्षे चतुष्टोमेनाग्निष्टोमेन यजेत पुरा भ्रेषाच्छान्त्यै । ॥ १३ ॥

इन्द्रस्तुता यक्ष्यमाणो भवति । तस्य सर्वमेव समानं पुरोरुच एवान्यास्तिस्रो हरी कस्य वृषा सुते सचेत्यैन्द्रवायवस्यैन्द्रं वयं महाधन इति मैत्रावरुणस्य । दिता यो वृत्रहन्तम इत्याश्विनस्य । स सूर आजनयज्ज्योतिरिन्द्रमुत त्यदाश्वश्व्यमिति शुक्रामन्थिनोर्भरेष्विन्द्रमित्याग्रयणस्य । नित्योक्थ्यस्य । नियुनक्ति[४] ध्रुवस्य । मह्नि चेत्त्वं पुरु चन्द्रमित्यैन्द्राग्नस्योरुं नो लोकमनुनेषि विद्वानिति वैश्वदेवस्य । नित्या मरुत्वतीयानां । नित्या

---

१ My conjecture; नामयोभ्युपेयाय B Be; नानभ्युपेयाय M; नाभ्युपेयाय Be 7 D; नामभ्युपेयाय U.

२ सुदेवलाश्च इति (this is the way in which Nandināgarī expresses the pluti) M; सुदेवला इति Be Be 7 D; सुदेवलाति BU. Properly speaking we expect सुदेवला३ इति, pluti from सुदेवले।

३ तवैतादिति all the MSS. exc. M, which reads तवैतादन्यदिति; is pluti contained again in तवैतात्?

४ नित्या M only.

माहेन्द्रस्यां नो विश्वाभिरूतिभिः कदाचन स्तरीरसीन्द्राय गाव आशिरमिति तिस्र आदित्यस्य[1] ग्रहस्येमां[1] ते धियमिति सावित्रस्य । नियुनक्ति पात्नीवतस्य । निव्या हारियोजनस्य । स एष पञ्चदश इन्द्रस्तुदिन्द्रियकामस्य । यो वा[2] ज्येष्ठबन्धुरपभूतः स्यात्स एतेन यज्ञक्रतुना यजेताश्नुते हैव ज्यैष्ठताम् । ॥ १४ ॥

अप्तोर्यामेण यक्ष्यमाणो भवति । दीक्षते । तस्यापरिमिता दीक्षा द्वादशोपसदस्त्रिवृद्बहिष्पवमानः पञ्चदशꣳ होतुराज्यꣳ सप्तदशं मैत्रावरुणस्यैकविꣳशं ब्राह्मणाच्छꣳसिनस्त्रिणवमच्छावाकस्य । त्रयस्त्रिꣳशो माध्यंदिनः पवमानश्चतुर्विꣳशꣳ होतुः पृष्ठꣳ रथंतरं च वैराजं च सामनी अन्यतरेणान्यतरत्परिष्टुवन्ति । चतुश्चत्वारिꣳशं मैत्रावरुणस्य वामदेव्यं च शाक्वरं च सामनी अन्यतरेणान्यतरत्परिष्टुवन्त्यष्टाचत्वारिꣳशं ब्राह्मणाच्छꣳसिनो नौधसं च वैरूपं[3] च सामनी अन्यतरेणान्यतरत्परिष्टुवन्त्येकविꣳशमच्छावाकस्य कालेयं च रैवतं च सामनी अन्यतरेणान्यतरत्परिष्टुवन्ति । तमेतमष्टापृष्ठ इति छन्दोगा आचक्षते । त्रिणव आर्भवः पवमानस्त्रयस्त्रिꣳशमग्निष्टोमसामैकविꣳशान्युक्थानि[4] सषोडशिकानि पञ्चदशानीतराणि

---

१ आदित्यग्रह° M Be.

२ om. Be 7 DU.

३ Thus (and cp. S'ānkh. XV. 7. 4) M Tr U Be Keś.; वैराजं वैराच्यं or वैषम्यं the other MSS.

४ °न्युक्थ्यानि M Tr; °न्युक्थानि all the other MSS.

त्रिवृद्राथंतरः सन्धिस्तंच्छुद्राः पशवो ऽतिषेदुः[1] । सोमो वा एतदतिरिच्यमान इयाय[2] । ते[2] देवा[2] अब्रुवन्नप्तोर्वा अयमत्यरेचि तस्य को याम इति । तदप्तोर्यामस्याप्तोर्यामत्वं । तस्मा एतान्यतिरिक्तस्तोत्राण्यवकल्पयन् चतुस्त्रिवृद्धोतुर्जराबोधीयं पञ्चदशं मैत्रावरुणस्य सौहविषं[3] सप्तदशं[3] ब्राह्मणाच्छंसिन उद्वंशीयमेकविंशमच्छावाकस्य वारवन्तीयं । तद् वा आहुर्यदच्छावाकचमसमनु यज्ञः संतिष्ठेतान्तं यज्ञं गमयेद्यो ह्यन्तं यजमानो गासुकः[4] स्याद्धोत्र एव स्तुवीरन्होतानुशंस्यात्तथा मध्यतो यज्ञः समाधीयत[5] इति । तद् वा आहुः सर्वाण्येवाश्विनानि स्तुतशस्त्राणि स्युर्यद्ध[6] किंच[7] रात्रिमुपातिरिच्यते सर्वं तदाश्विनमिति[8] नैकमंथापरं त्रिवृ-

---

१ The MSS. of the text seem all to be corrupt: °तिषेदु Tr; तिष्ठेतुः M (if I see right!); तिषेतुः all the other MSS.; अतिसेदुरतिक्रामन्नीत्यर्थः Bhav. (read °क्रामन्नी°).

२ Thus M; इयायवेतंदेवा BUD; इयायतंदेवा Be; इयायवेतंदेवा H; इयायवेतं Tr.

३ सौहविषं सप्त° MH; सौभरम्बिहविषं सप्त° UD; सौ (भो) भरन्बिहविंशसप्त° Be Be 7; सौभरंन्बिहविंशिसप्त° B; सौषध्वं सप्त° Tr.

४ Thus M only; कासुकः all the other MSS.

५ Thus MHTr Keś.; समापयत the other MSS.

६ Thus all the MSS.; यत्र (i. s. o. यद्ध) Karmānta (one MS. यद्धि) Keś. and Rudr. on Āp. XIV. 4. 15.

७ किंचन M.

८ Some of the MSS. again इतो; read perhaps °मितीत्येक° ।

त्पञ्चदशꣳ[1] सप्तदशमेकविꣳशमथैतेषां देवता अग्निरिन्द्रो विश्वे देवा विष्णुरिति ॥ १५ ॥ चतुर्थः ॥

मृत्युसवेन यक्ष्यमाणो भवति स उपकल्पयते शार्दूलचर्म सुवर्णरजतौ च रुक्मौ वैयाघ्रावुपानहौ[2] चार्मपक्षावुपानहौ वृष्णिवाससं च क्षौमं च तिसृधन्वमासन्दीꣳ शाधीवाणां दुन्दुभिं विमितमौदुम्बरं द्रोणं चतुःस्रक्ति चतुष्टयीरपो दिग्भ्यः संभृताः शतं[3] च[3] रथं[3] चैतेनोपक्लृप्तेन चित्रामायतीसुपरमत्यथ[4] चित्रयेति पूर्वाग्निमन्ववसत्युत्तपनीयꣳ शालीनोऽन्वाहार्यपचनमाहिताग्निरथान्वारब्धे यजमाने जुहोति व्याघ्रोऽयमग्नौ चरति प्रविष्ट इति षट् स्रुवाहुतीरथ यजमानायतने शार्दूलचर्म प्राचीनग्रीवमुत्तरलोमोपस्तृणाति यत्ते शिल्पं कश्यप रोचनावदिन्द्रियावत्पुष्कलं चित्रभानु। यस्मिन्सूर्या अर्पिताः सप्त साकं तस्मिन्राजानमधिविश्रयेममित्यथ वैयाघ्रावुपानहावुपमुञ्चते[5] द्यौरसीति दक्षिणे पादे पृथिव्यसीत्युत्तरे

१ ॰दशं and the following, neutra HTr; पंचदशः सप्तदश एकविꣳशम॰ M; nominatives masc. the other MSS.; cp. also Rudr. on Āp. l. c.

२ वैयाघ्रौपानु॰ M.

३ Uncertain again, cp. supra p. 354, 3; शतं च रथं चै॰ M; सतं च रथं चै॰ Be 7 D; वचं च रथं चै॰ BU; मितं च रथमे(तेनो॰) Be.

४ Probably M reads चय, perhaps rightly, i.s.o. चय, cp. supra p. 350, 7.

५ वैयाघ्राव॰ Be U; वैयाघ्रियाव॰ M Be 7; वैयाघ्रियाव॰ D; वैशाघ्राव॰ B.

ऽथ दक्षिणं जान्वाच्याभिमर्षति व्याघ्रो वैयाघ्रे ऽधि विश्रयस्व दिशो महीः । विशस्त्वा सर्वा वाञ्छन्तु मा त्वद्राष्ट्रमधि भ्रशदित्यथास्मै धनुः प्रयच्छति यथा राजसूये तथा' तद्यजमानं प्राञ्चमुपवेश्य सुवर्णरजताभ्याꣳ रुक्माभ्यां पर्युपास्यौदुम्बरे द्रोणे चतुष्टयीरपः समवनीयाभिषिञ्चति ॥ १६ ॥

या दिव्या आपः पयसा संबभूवुर्या अन्तरिक्ष उत पार्थिवीर्याः । तासां त्वा सर्वासाꣳ रुचाभिषिञ्चामि वर्चसा ॥ अभि त्वा वर्चसासिचं दिव्येन पयसा सह । यथासा राष्ट्रवर्धनस्तथा त्वा सविता करत् ॥ इन्द्रं विश्वा अवीवृधन्समुद्रव्यचसं गिरः । रथीतमꣳ रथीनां वाजानां सत्पतिं पतिम् ॥ वसवस्त्वा पुरस्तादभिषिञ्चन्तु गायत्रेण छन्दसेति पुरस्तादेता एव तिस्रो ऽनुद्रुत्य रुद्रास्त्वा दक्षिणतो ऽभिषिञ्चन्तु त्रैष्टुभेन छन्दसेति दक्षिणत' एता एव तिस्रो ऽनुद्रुत्यादित्यास्त्वा पश्चादभिषिञ्चन्तु जागतेन छन्दसेति पश्चादेता एव तिस्रो ऽनुद्रुत्य विश्वे त्वा देवा उत्तरतो ऽभिषिञ्चन्त्वानुष्टुभेन छन्दसेत्युत्तरत' एता एव तिस्रो ऽनुद्रुत्य बृहस्पतिस्त्वोपरिष्टादभिषिञ्चतु पाङ्क्तेन छन्दसेत्युपरिष्टादथास्योर ऊर्ध्वमुन्मृज्यते ऽरपां त्वा हकमुपं सुजंकरमित्यथास्य बाहू अनुमार्ष्टि प्र बाहवा सिसृतं जीवसे न इत्यथैनावुपावहरतीन्द्रस्य[1] ते वीर्यकृतो बाहू उपावहरामीत्यथास्मै धनुः प्रयच्छति यदि पुरस्तादप्रत्तं भवति' समुन्मृष्टे समुत्क्रोशन्तीति समानमा सुखस्य विमा-

१ °वुपावहरो° B; °वुपावहरंती Be Be 7 UD; °वुपावरोहती° M.

ग्नेरुत्तरत एतद्रूपायितꣳ शतं[1] तिष्ठति रथस्य[2] । तदभिप्रैत्यभिप्रेहि वीरयस्वोग्रश्चेत्ता सपत्नहा । आतिष्ठ वृत्रहन्तमस्तुभ्यं देवा अधिब्रुवन्नित्यथ रथस्य पक्षसी संमृशत्यङ्कौ न्यङ्कावभितो रथं यौ ध्वान्तं वाताग्रमनु संचरन्तौ । दूरेहेतिरिन्द्रियावान्पतत्री ते नो ऽग्नयः पप्रयः पारयन्त्वित्यथ रथमुपतिष्ठते[2] नमस्त आयुधे गदेत्यथ रश्मीनादत्त एवा ब्रह्मन्तवेदस्तु तिष्ठा रथे अधि यद्वज्रहस्तः । आ रश्मीन्देव युवसे स्वश्व इति रथमातिष्ठत्यातिष्ठ वृत्रहन्रथमातिष्ठन्तं पर्यनु लेन्द्रो मदत्विन्द्रं विश्वा अवीवृधन्नित्यातो[3] ऽत्र[4] धनुरधिज्यं[5] कुरुते परि मा सेन्या घोषास्तन्मे ऽनुमतिरनुमन्यतामिति द्वाभ्यामथैतच्छतं[6] त्रिः प्रदक्षिणं परियाय[7] पुरस्तात्प्रत्याययात्यथास्मै प्रत्यवरोहणात[8]

---

१ Uncertain again; शतं ति॰ रथस्य M; अन्नं ति॰ रथस्य Be 7 BUD; (॰पायितः) चितश्चि॰ रथस्य (omitting अ) Be.

२ Thus M Be BU; रथमुखं i.s.o. रथं Be 7 D.

३ Thus Be U; ॰वृधन्नित्यामित्यातो B; ॰वृधन्नित्यस्य यतो Be 7 D; M om. आतो।

४ Thus M Be 7 D; अ Be UB.

५ अधिज्यं M, प्रज्यं the other MSS.

६ ॰तच्छतं M; ॰तच्छ्यं Be 7 BUD; ॰तद्दयं Be.

७ Thus D; पर्याय M; परीयाय Be 7; परीयाय Be; परियायाय BU.

८ Although this reading is presented by M only, I did not hesitate to put it in the text as lectio difficilior; the other MSS. all प्रत्यवरोहन; it seems we have in प्रत्यवरोहणतः an ablat. of the same signification as प्रोहणतः X. 10. s. f.; cp. also अभिप्रोहणत XVIII. 11 and above all XI. 12 (p. 81, 2).

आमन्दीं निदधाति । तां तथा प्रत्यवरोहति यथा राजसूये तथा । ॥ १७ ॥

यावदेवाचाध्वर्युरवेष्टति तावदेव प्रतिप्रस्थाता वारुणेन मृतेनोपरमति । वारुणस्य[1] वारुण्यौ भवतः स्विष्टवतः स्विष्टवत्यावं वाचाम्मा[2] एतच्छतं[3] ददात्यथैनं विमितेनाभिविष्नन्ति[4] । तस्योत्तरार्धे दुन्दुभिमाघ्नयति । तमस्तंयात्यादित्य आघ्नन्त्यथैनꣳ संशास्ति यजमान वाचं यच्छ राष्ट्रे च[5] मास्मवीति[5] । सो ऽत ऊर्ध्वं वाचंयमो भवति । स यत्किंच[6] व्याहरति ददामीत्येव व्याहरत्युपसंगच्छन्त एनमेते राजगृहाः सूतग्रामण्यः[7] क्षत्तसंग्रहीतारः कारुविद्या इति । तेभ्यः पष्ठौहीं वेहतं ददाति । तां ते पचमाना रमयन्तो जागरयन्त आसते । ऽथाध्वर्युरपरराच आहुत्य चतुष्टयीनामपां प्रत्येकं मन्थमुपमथ्यावघ्राय[8] वानवघ्राय वा प्रयच्छति । तꣳ स[9] भक्षयति तूष्णीमथैनं नवनीतेनाभ्यनक्त्येना व्याघ्रं परिषस्वजाना इत्यथादित्यमुद्यन्त-

---

१ वह॰ all MSS. exc. M.

२ खिष्टवत्या॰ all exc. M.

३ Uncertain again ; एतच्छं Be 7 BUD ; एतच्छितं Be ; M has a blank of two akṣaras.

४ Thus M ; ॰भिविघ्नंति the other MSS.

५ Thus M ; चराजम॰ Be BU ; चमांस॰ Be 7 D.

६ ॰किंचिद् M.

७ ॰ग्रामण्यः M.

८ उपमंथ्य i.s.o. उपमथ्य all MSS.

९ Thus M Be ; वच the other MSS.

मुपतिष्ठत उदसावेतु सूर्य उदिदं मामकं वचः। उदिहि देव सूर्य सह वग्नुना मम। अहं वाचो विवाचनं मयि वागस्तु धर्णसिरिति' राजस्थाग्निप्रव्रजतो ऽनुमन्त्रयते यन्तु नद्यो वर्षन्तु पर्जन्याः सुपिप्पला ओषधयो भवन्तु। अन्नवतामोदनवतामामिक्षवतामेषाꣳ राजा भूयासमिति' ॥ १८ ॥

अथैतद्द्वादशाहं[1] व्रतं चरति' स यदि प्राङ् वोदङ् वोचरति चार्मपक्षीभ्यां क्षौमं वसानो' ऽथ यदि दक्षिणतः पश्चाद्वा वैयाघ्रीभ्यां कृष्णवाससं वसानो' ऽथ द्वादशसु व्युष्टासु द्वे स्रुवाहुती जुहोति ये केशिनो नर्त इति द्वाभ्यामथ प्रोष्ठमारोहत्यारोह प्रोष्ठं विषहस्व शत्रूनित्यथास्य शिरः प्रमन्दयति[2] यत्क्षीमन्तं कद्रुतस्ते किलेख्येत्यथास्य केशान्वपति येनावपत्सविता क्षुरेणेति' प्रवपतो ऽनुमन्त्रयते मा ते केशाननुगाद्वर्च एतदित्यथैनान्समुचित्य दर्भस्तम्बे निदधाति तेभ्यो निधानं बहुधा व्यैच्छन्नित्यथैनमुष्णोदकेनाप्लावयति वर्चं ते चाङ्गवोः सविता दधात्विति' तेन हैतेन मृत्युरीजे प्रजानामैश्वर्यमाधिपत्यꣳ राज्यं परीयामिति' ततो वै स प्रजानामैश्वर्यमाधिपत्यꣳ राज्यं पर्यैद्यः कामयेत समानानामैश्वर्यमाधिपत्यꣳ राज्यं परीयामिति स एतेन यज्ञक्रतुना यजेत' समानानामैश्वर्यमाधिपत्यꣳ राज्यं पर्यैत्यथ हैतेन सुरथः श्रैब्य[3] ईजे

१ अथैतद्द्वा॰ M.
२ प्रमदयति M.
३ श्रैब्यं M.

आतिष्ठ्यं परमतामियामिति । ततो वै स आतिष्ठ्यं परमतामैद्यः कामयेतातिष्ठ्यं परमतामियामिति स एतेन यज्ञक्रतुना यजेतातिष्ठ्यꣳ हैव[1] परमतामेति । ॥ १९ ॥ पञ्चमः ॥

मद्यस्क्रिया यक्ष्यमाणो भवति । स यूपं च वृचं छेदयति लाङ्गल्यं चैषां यूपस्य कारयति लाङ्गलं लाङ्गल्यस्य । तौ सꣳस्वत्य क्षुद्रते वा नि[2] वा[2] दधत्यथास्यैतत्पुरस्तादेव जुष्टे देवयजने वेदिस्संमितं विमितं[3] कारितं भवति । तदेतेन लाङ्गलेन[4] परिहार्य[4] कर्षयति । तस्मिञ्जघन्यवाधान्यवान्वापयित्वा[5] परिघातयत्यथास्यैते रथा उपकॢप्ता भवन्ति चतुर्युक्प्रष्टिवाही द्वियोग[6] स्थूरिरिति[6] । तेषु काल एव दधिविनालानासञ्जयन्ति । स ग्रीष्मस्य जघन्याहःसु प्रजहितेषु यवेष्वृत्विजः पदेनाज्ञापयतीक्षा वा मा याजयिष्यथ भक्तं वा वः कारयिष्यामीति[7] । तेषूपसमेतेषु काल एव प्रातरग्निहोत्रं जुहोत्युपसंगच्छन्त एनमेत ऋत्विजो । ऽथैनानाह मद्यस्क्रिया मा याजयतेति । तं तथेतीतरे प्रत्याक्रमन्तस्मै तदानीमेव

१ एव om. M.

२ Thus M only; न वा दधत्य॰ Be; न वा दधात्य॰ BU; निदधाति वा Be 7 DU (bis).

३ om. M.

४ Thus MUDB Be 7; ॰लेनापरि॰ Be U (bis).

५ Thus M; तस्मिन्नौदीन् यवान्वापयित्वा Be 7 DU; तस्मिन् जघन्यवाधान्यवान्वापयित्वा Be; तस्मिन्नौदीन्यवान्वापयित्वा B.

६ Thus M; द्वियुक्स्थूरि॰ the other MSS.

७ Thus M; करिष्यामीति the other MSS.

मध्यस्थायाꣳ[1] शालां कुर्वन्ति । तं[2] तदानीमेव तीर्थादानीय पत्रयित्वा दीक्षणीयामिष्टिं निर्वपति । तस्याꣳ संस्थितायां मुष्टी चैव न करोति वाचं च न यच्छति । निदधत्यस्मा[3] एतद्धविरुच्छिष्टं व्रतभाजनमथ[4] प्रायणीयामिष्टिं निर्वपति । हविष्कृता वाचं विसृजते । ऽथास्मा एतद्धविरुच्छिष्टं प्रयच्छन्ति[5] व्रतभाजनमेतत्संस्थिता एवैते रथा आजिं धावन्ति । योजनं प्राक् चतुर्थं क्रोशपदं[6] दक्षिणा प्रष्टिवाही । गव्यूतिं पश्चाद्द्वियोगः[7] । क्रोशमुदङ् सूरिरिति । ते येनयेन संगच्छन्ते तस्मा आवेदयन्ते यजते ऽयममावामुष्यायणो ऽमुष्य पुत्रो ऽमुष्य पौत्रो ऽमुष्य नप्ता मध्यस्थिकायेत्यायन्ति रथा । आगतेषु रथेषु यदिनाक्तेषु नवनीतमुत्क्षीदति तदिक्षाय्योत्पूयाज्यकुम्भे[8] प्रत्यस्यति मध्यस्थायाः[9] इति । ॥ २० ॥

---

१ Thus M Be U (bis); मध्यस्थिकायां BDU ; मध्यस्थिकोथा Be 7.

२ तं only given by M.

३ Thus M Be U (bis); निदधात्य॰ B Be 7 DU.

४ Thus M Be U (bis); ॰भोजन॰ B Be 7 DU.

५ ॰यच्छति M Be.

६ Corrected; चतुर्थं क्वैनंपदं Be U (bis); चतुर्थं क्रोपदं MBUD; चतुर्थं क्रोचिक्रोशं पदं Be 7.

७ पश्चाद्दियोकः MDUB; पश्चाद्दिक्रोशः Be 7; पश्चाद्दियुक् Be.

८ Thus MU (bis); ॰शाज्यकुम्भे the other MSS.

९ मध्यस्थाया Be U (bis), cp. Lāṭy. VIII. 4. 7; मध्यस्थायास्थायां M; मध्यस्थिकया Be 7 BDU.

अथ प्रायणीयेन चरति । प्रायणीयेन चरित्वा पद्येन चरति । पद्येन चरित्वा त्रिवत्सेन माण्डेन वत्सतरेण राजानं क्रीत्वोह्यातिथ्यं निर्वपत्यातिथ्येन प्रचर्यैकगणा उपसदो भवन्ति । [1]मध्यमयोपसदा प्रचर्योत्तरवेद्यै काले खलेवाल्यौ[2] मापयत्यथानडुहः संयुज्य यवान्प्रकृत्य[3] घ्नन्ति[3] । यवपुरीषैवोत्तरवेदिर्भवत्यथ मध्ये ऽनडुहः संयुज्य प्राचो यवान्प्रघ्नन्तो[4] यन्ति । यवबर्हिरेवैषा महावेदिर्भवत्यथाहवनीयं प्रणयत्याहवनीयं प्रणीय सदोहविर्धाने संमिनोति । सदोहविर्धाने संमित्याग्नीषोमौ प्रणयत्यग्नीषोमौ प्रणीय वसतीवरीर्गृह्णाति । तास्तदानीमेव परिहृत्य प्रातरनुवाकमुपाकरोति । परिहिते प्रातरनुवाके ऽपो ऽच्छैत्यङ्गिरुदैत्यग्निष्टोमं क्रतुमुपैति । प्रसिद्धो ऽभिषवः । प्रसिद्धं यथा गृह्यन्ते । समानं कर्माश्विनाद्ग्रहादाश्विनं ग्रहं गृहीत्वा तिस्रो रशना आदाय खाङ्गल्यामभ्येति । तस्यै कटे परमिव चषालभाजनं भवति । प्रकषान्तां[5] खाङ्गल्यामुत्सृज्याथै-

---

1 All the MSS. exc. M have नन् before मध्यमयो॰ ।

2 M reads कर्तां i.s.o. खलेवाल्यौ; are we to correct उत्तरवेद्यै काले कर्तां मापयति ? But then somewhere the words खलेवाली यूपो भवति must have fallen out, cp. the Karmānta.

3 Thus M; प्रकृत्यघ्नंति B; प्रगृत्यखषंति Be; प्रगृत्यघ्नंति U; प्रहषंति U (bis); Be 7 D om. this passage.

4 प्रघ्नंतो M; प्रघ्नांतो all the other MSS; read perhaps प्रघ्नन्तो ?

5 Uncertain reading; प्रकषांतां M Be U (bis); मधषाषांतां Be 7 DU; मधरषाषांता B.

तान्पशूनुपाकरोत्यग्नीषोमीयमाग्नेयमनूबन्ध्यमिति । तेषामनूचीनं[1] वपाभिराद्रवन्ति । ॥ २१ ॥

अग्नीषोमीयस्याध्वर्युर्वपया प्रथमया प्रपद्यते[2] ।ऽनूची इतरे आहरन्ति । परिहितासु स्तोकीयासु हुतासु वपास्वग्नीषोमीयस्य वपया प्रचरति । परीतरे शाययन्ति । प्रातःसवनीयानामग्नीषोमीयस्य पशुपुरोडाशो मुख्यो भवति । स्तुते माध्यंदिने पवमाने ऽग्नीषोमीयेण चरत्यनन्तर्हित[3] आग्नेयस्य[3] वपया चरति । स्वे धामन्नाग्नेयेन[4] चरत्यनन्तर्हित[5] एवानूबन्ध्यस्य[6] वपया चरति । तृतीयसवनीयानामनूबन्ध्यस्य पशुपुरोडाशो मुख्यो भवत्यस्तमुदिते ऽनूबन्ध्येन चरति । संतिष्ठते सद्यस्क्री । तस्य यदसद्यस्क्रियते वृद्धमेवास्य तत्पुनर्यज्ञ[7] एवास्य[7] तद्यादित्याश्च[7] ह वा अङ्गिरसश्च सुवर्गे लोके पस्पृधिरे । ते

१ ०नूचीनां M.

२ प्रतिपद्यते M.

३ Thus M; ०र्हितमाग्नेयस्य the other MSS.

४ Thus M Be B U U(bis) D (pr. m.) Be 7 (pr. m.); ०ग्नेयस्य Be 7 (sec. m.) D (sec. m.).

५ चरत्य० M Be 7 BD; चरंत्य० Be U U(bis).

६ च ins. Be 7 BD.

७ Thus my conjecture; तत्पुनर्यज्ञ एवास्य च तथादित्याश्च MU (bis); तद्ध्रुवमेवास्य तत्पुनर्यज्ञ एवास्य च तथादित्याश्च Be; तस्याद्ववयज्ञस्य यदथादित्याश्च B; तस्यान्ववयज्ञ एवास्य तदथादित्याश्च Be 7 DU.

ऽङ्गिरस आदित्यानभिप्रजग्मुरग्निना[1] दूतेन श्वःसुत्या न इत्यथास्माकमद्यसुत्येति ॥ २२ ॥

आदित्याः प्रोचुस्तेषां नस्त्वꣳ होतेति। ते ऽमुमादित्यमश्वꣳ श्वेतं भूतं दक्षिणां निन्यिरे[2] हिरण्याभिभूतरश्मिं[3]। तस्मात्सद्यस्क्रियै श्वेताश्वो दक्षिणा हिरण्याभिभूतरश्मिनो। यच्छ्वेताश्व आदित्यस्य तद्रूपमथ यद्धिरण्याभिभूतरश्मिनो रश्मीनां तत्तस्य त्रिवृतः सतश्चतुर्विंशौ माध्यंदिनार्भवौ भवतश्चतुश्चत्वारिꣳशꣳ होतुः पृष्ठं। चतुर्विंशमग्निष्टोमसाम। त्रिवृदन्यत्सर्वꣳ। श्वेतमश्वं ददात्यनुक्रिया यक्ष्यमाणो[4] व्रीहिषु दीक्षते। स द्व्यहेन संतिष्ठत औपवसथ्यादेकमहः[5] सुत्यमेकमहस्तस्य त्रिवृत एव सतश्चत्वारिꣳशौ माध्यंदिनार्भवौ भवतश्चतुश्चत्वारिꣳशꣳ होतुः पृष्ठं। चतुश्चत्वारिꣳशमग्निष्टोमसाम। त्रिवृदेवान्यत्सर्वꣳ। श्वेतां वडवां ददाति। परिक्रिया यक्ष्यमाणो माषेषु दीक्षते। स त्र्यहेण संतिष्ठत आ क्रयादेकमहरौपवसथ्यादेकमहः[6] सुत्यमेकमहस्तस्य त्रिवृत एव सतो ऽष्टाचत्वारिꣳशौ माध्यंदिनार्भवौ भवतो। ऽष्टाचत्वारिꣳशꣳ होतुः पृष्ठमष्टाचत्वारिꣳ-

---

१ ०ग्र० found in M only.

२ Thus M; all the other MSS. more or less corrupt.

३ Thus here and infra all the MSS.; are we to read अभिश्रित० i.s.o. अभिभूत० ?

४ All MSS. exc. M ins. भवति।

५ औपवसथाद्० or औपवसथ्याद्० MSS.

६ Thus M; औपवसथाद्० the other MSS.

श्रमग्निष्टोमसाम । चित्रदेवान्यत्सर्वं । यथाश्रद्धं ददात्यंतिक्रिया यक्ष्यमाणस्तिलेषु दीक्षते । स चतुरहेण संतिष्ठत एषा क्रयादेकमहरोत्तरवेदेरेकमहरौपवसथ्यादेकमहः[1] सुत्यमेकमहश्चतुष्टोम एव भवति । ॥ २३ ॥ षष्ठः ॥

व्रात्यस्तोमेन यक्ष्यमाणो भवति । ते राजनि वा ब्राह्मणे वा प्रतिग्रहमिच्छन्ते मांसाय वर्तवे वा । ते यमभिसंजानते तꣳ स्थपतिं कुर्वन्ति । स एषां व्रतानि चरति । सो ऽधःसंवेश्यमाꣳसाश्यस्त्र्युपायी भवति । तद्धि दीक्षितव्रतमथ यत्कृष्णं वासः कृष्णतूषं परिधत्ते दीक्षितवसनस्य[2] तद्रूपमथ यत्कृष्णावलक्षावजिने धारयति कृष्णाजिनयोस्तद्रूपमथ यत्सुवर्णरजतौ रुक्मौ बिभर्ति परिचर्म्ययोस्तद्रूपमथ यत्कृष्णमुष्णीषं धारयति दीक्षितोष्णीषस्य तद्रूपमथ यच्चर्ममयैर्बाणवद्भिर्विसृष्टधन्वं धारयति दीक्षितदण्डस्य तद्रूपमथ यद्व्रात्यवादं वदति दीक्षितवादस्य तद्रूपमथ यत्पुर्यांवुपानहौ[3] धारयति नेद्दीक्षितः सन्नमेध्यमधितिष्ठानीति[4] तत्तस्य ह वा एतद्रूपस्य यज्ञस्य प्रतोददण्ड एव यूपः । प्रतोदपरिषेवणं[5] चषालꣳ । रथमुखमा-

---

१ Thus M ; °रौपवसथाद° the other MSS.

२ Thus M ; °वसनौषस्य D ; °वसनौषस्य Be 7 ; the other MSS. still more corrupt.

३ Thus M ; यत्पुर्यांनाउपानहौ Be 7 D ; यत्पुरुपाउपानहौ B Be U.

४ Thus Be 7 ; °तिष्ठानीति M.

५ °परिषेवणं M.

हवनीय । ईषे[1] वेदिर्युगमुत्तरवेदिरुत्तरयुगमुत्तरनाभिर्धनुर्धौ[2] हविर्धाने । पक्षमौ आग्नीध्रीयमार्जालीयौ । कूबरꣳ सदः । किंकरावतानौ[3] धिष्णिया । वन्धुरं[4] पत्नीशालꣳ । रथोपस्थो गार्हपत्यो । ऽधिष्ठानं पुराणगार्हपत्यस्तं यमजं प्रमाथं[5] पचन्ते स एषां पशुर्यमपूपꣳ स्थालीपाकꣳ स चरुपशुपुरोडाशौ । यां परिष्कन्दꣳ[6] कूयति सा पुरोनुवाक्या । यदाहरति सा याज्या । यदश्नन्ति स वषट्कारो । यां कुम्बां[7] विमते सा पुरोनुवाक्या । यामधीवाक्याꣳ[8] सा याज्या । यां विगणꣳ[9] कूयति स प्रस्तस्य[10] प्रतिगरो[10] । यदभिक्रोशन्ति स उद्गीथस्तं य एवमेतं यज्ञक्रतुं परोक्षमुपेत्य[11] प्रत्यक्षं नोपेयुः ॥ २४ ॥

यथा दीक्षितावकीर्णा विच्छिन्नसोमपीथा अनाम्नाता एवꣳ स्युस्तस्माद्व्रात्यावस्थितस्य[12] व्रात्यस्तोमेनानीजानस्य नाश्नं ।

---

१ Thus corrected; ईषो M; ईषा the other MSS.

२ Thus M; धनुषी the other MSS.

३ Thus M; किंक (or कु)रायतना the other MSS.

४ बंधुरं M; बधुरं Be.

५ Thus M; प्रमाथं Be; प्रमाथ Be 7 BUD.

६ प्रस्कंदं MSS. exc. M.

७ कुंभ्यां MSS. exc. M.

८ ॰मधिवाक्यां MSS. exc. M.

९ गणं MSS. exc. M.

१० प्रस्तप्रतिगरो MSS. exc. M.

११ परोक्षमुपेत्य Be BU; परोक्षादुपेत्य Be 7; पुरोक्षादुपेत्य M.

१२ ॰व्रात्याव॰ i.s.o. ॰व्रात्याव॰ M.

विच्छिन्नसोमपीथ इव ह्येषो ऽनाश्यार्थंस्तेषां ये ऽनाहिताग्नयस्ते यथागृहं विपरेत्याग्नीनाधाय त्रयस्त्रिꣳशतात्रयस्त्रिꣳशता दक्षिणाभि स्थपतिमुपसमायन्ति ' तेषां ब्रह्मबन्धुरमागधो मागधवाक्यो ब्रह्मबन्धुरपुꣳश्चलू पुꣳश्चलूवाक्या जरत्कक्ष्यो जरत्प्रयोग्याभ्यां[1] युक्तो ' वृद्धो वा एष यो ब्रह्मबन्धुरमागधो मागधवाक्यो ' वृद्धा ब्रह्मबन्धुरपुꣳश्चलू पुꣳश्चलूवाक्या ' वृद्धो जरत्कक्ष्यो जरत्प्रयोग्याभ्यां[1] युक्तो ' वृद्धेनैव वृद्धं निरवदयते तदेतद्व्रात्यधनꣳ समवशान्तं दण्डोपानहꣳ शामूलाजिनꣳ[2] ' रथे तिष्ठन्सुब्रह्मण्यः सुब्रह्मण्यामाह्वयति ' दक्षिणानां काल एतदेवास्य भवत्यृत्विजो दक्षिणा विभजन्ते ' तस्य प्रातःसवनीयाननुवर्तन्ते संज्ञान्यै हवीꣳष्यसंज्ञातमिव वा एते चरन्ति ये व्रात्यं चरन्ति ' समेवैनाञ्ज्ञापयन्ति ' माध्यंदिनीयाननुवर्तत[3] ऐन्द्रामारुत[4] एकादशकपालस्[5] ' ऐन्द्रो वै व्रात्यो मारुतो ग्रामो ' ग्रामेणैवैनान्समीचो दधाति ' तृतीयसवनीयाननुवर्तत आदित्येभ्यो भुवद्वद्भ्यश्चरुर्भूता इव वा एते चरन्ति ये व्रात्यं चरन्ति ' भूतिमेवैनाङ्गमयन्त्यनूबन्ध्यस्य पशुपुरोडाशमनुवर्तत आदित्य-

---

१ ०प्रयोगाभ्यां MSS. exc. M.

२ शाम्बूकाजिनं M; शार्दूलाजिनं the other MSS, but cp. Karmānta.

३ ०वर्तंत all.

४ ०मारुता all.

५ ०कपालं M; ०कपाला the other MSS.; this passage is missing in Be 7 D.

यवरंप्रतिष्ठिता इव वा एते चरन्ति ये व्रात्यं चरन्तीयं वा अदितिरस्यामेव प्रतितिष्ठन्ति । ॥ २५ ॥

स एष ज्येष्ठानामग्निष्टोमस्तस्य चत्वारि षोडशानि द्वौ पवमानावुभे एवाच्छावाकस्य स्तोत्रे । एष एव[1] सन्कनीयसामुक्थ्यस्तस्य षट् षोडशानि सर्वे पवमानाः सर्वाण्यच्छावाकस्य स्तोत्राणि । तेन हैतेन मरुत ईजिरे । तेषां विष्णु स्थपतिरासीद्यो[2] हैतेन दैव्या व्रात्या ईजिरे । तेषां बुधः सौम्य स्थपतिरासीद्यो हैतेन कुरुपञ्चालानां पुत्रा ईजिरे । तेषामौपोदितिर्गौपालायनो वैयाघ्रपद्य स्थपतिरास । तेन हैष्ट्वा पञ्चालान्व्रात्या अभिप्रययुस्तान्ह पितर ऊचुर्मा पुत्रकाः पञ्चालान्यासिष्टोपवादिनो वै पञ्चाला उप वो वदिष्यन्तीति । तान्हानादृत्यैव प्रययुस्ते ह केशिनो दार्भ्यस्योपवसथमाजग्मुस्तान्ह श्वो भूते बहिष्पवमानं सर्पतो[3]ऽभ्यालेभिरे पवित्रं वै बहिष्पवमान आत्मानं पवयिष्यामह इति वदन्तो । ऽथ ह पञ्चालेषु गन्धर्वायणो वालेय आग्निवेश्यो ऽनूचान आस । तान्ह[4] सह[4] सर्पतः पप्रच्छ के सर्पन्तीति[5] । वयं मरुत इति । तेषां वः क स्थपतिरित्यहं विष्णुरित्यौपोदितिर्गौपालायनो वैयाघ्रपद्यः प्रत्युवाच । यत्किं चकर्थ कस्तच्चचारेतीति ह परोचामतमनु-

१ om. M.

२ स्थपतिरास तेषो Be.

३ संसर्पन्तो MSS. exc. M.

४ तान्हस्थ सह M; तान्सह UB Be; न्सह Be 7 D.

५ Thus M; प्रसर्पन्तीति the other MSS. Read perhaps सर्पथेति?

निर्दिदेशेति[1] । तान्होवाचाविदुषो व उपावादिष्टाप यो कुमह इति । पिता वै[2] तत्पुत्रानुपावादीदिति हैनमूचुः पापीयसी ते प्रजा भविष्यतीति । तथा[3] हैवास[3] । ततो[3] ह वा एतत्पञ्चालेषु गन्धर्वायणा वालेया आग्निवेश्याः पापायिता इव । महाकुलं ह[4] तत्पुरा[4] बभूव । स यो व्रात्यमुपवदेदेवमेवैनमुपवदेदथ यो व्रात्यो ऽलं प्रतिवचनाय स्यादेवमेवैनं प्रतिब्रूयात् । ॥ २६ ॥

अथातो भाल्लविलोमा इत्याचक्षते । त्रिवृदभ्यावर्ति पञ्चदशमग्निष्टोमसाम सर्वे षोडशाः पवमानाः । पञ्चदशमभ्यावर्ति सप्तदशमग्निष्टोमसाम सर्वे षोडशाः पवमानाः । सप्तदशमभ्यावर्त्येकविंशमग्निष्टोमसाम सर्वे षोडशाः पवमाना । एकविंशमभ्यावर्ति त्रिणवमग्निष्टोमसाम सर्वे षोडशाः पवमानास्त्रिणवमभ्यावर्ति त्रयस्त्रिंशमग्निष्टोमसाम सर्वे षोडशाः पवमानास्त्रयस्त्रिंशमभ्यावर्ति त्रिणवमग्निष्टोमसाम सर्वे षोडशाः पवमानास्त्रिणवमभ्यावर्त्येकविंशमग्निष्टोमसाम सर्वे षोडशाः पवमाना । एकविंशमभ्यावर्त्ति सप्तदशमग्निष्टोमसाम सर्वे षोडशाः पवमानाः । सप्तदशमभ्यावर्ति पञ्चदशमग्निष्टोमसाम सर्वे षोडशाः पवमानाः । पञ्चदशमभ्यावर्ति त्रिवृदग्निष्टोमसाम सर्वे षोडशाः पवमानाः । ॥ २७ ॥ सप्तमः ॥

---

१ Conjecturally; परोक्षावततमनूदिदिनिर्देशेति M; परोक्षादवततमनुनिर्दिशेति Be 7 DU; परोक्षादवततमनुदिदिशेनिने B; परोक्षाद् ववमनुदिदिशेनि Be.

२ All MSS. exc. M ins. the akṣara स्वां ।

३ तथा हैवस्माखतो MSS.

४ Thus M; हैतत्पुरा the other MSS.

अथ वै भवति देवा वै यद्यज्ञे ऽकुर्वत तदसुरा अकुर्वतेति । स ईक्षां चक्रे प्रजापतिः कथं[1] न्वहमसुरैर्देवान्व्यावर्तयेयमिति । स एतं यज्ञक्रतुमनिरुक्तमुपहव्यमपश्यत्तंस्विष्टिनानुपाक्रयतेति । स यदाह प्रातर्यावभ्यो देवेभ्य इति मरुद्भ्यः प्रातर्यावभ्यो देवेभ्य इति तदाहांय यदाह सोमः पवत इतीन्दुः पवत इति तदाहांय यदाहेन्द्राय पुरोडाशानामिति शक्राय पुरोडाशानामिति तदाहांय यदाह वायव इन्द्रावायुभ्यामिति नियुत्वते शक्रनियुद्भ्यामिति तदाहांय यदाह मित्रावरुणाभ्यामित्यृतायुभ्यामिति तदाहांय यदाहाश्विभ्यामिति नासत्याभ्यामिति तदाहांय यदाहेन्द्राय सोमानिति शक्रायेन्दूनिति तदाहांय यदाहेन्द्राग्निभ्यामिति शक्रजातवेदोभ्यामिति तदाहांय यदाह विश्वेभ्यो देवेभ्य इति मरुद्भ्यो विश्वेभ्यो देवेभ्य इति तदाहांय यदाहेन्द्राय मरुत्वत इति शक्राय गणवत इति तदाहांय यदाह महेन्द्रायेति महते शक्रायेति तदाहांय यदाहादित्येभ्य इति मरुद्भ्य आदित्येभ्य इति तदाहांय यदाह वनस्पतय इति वनर्नृपायेति[2] तदाहांय यदाह देवाय सवित्र इति मरुते[3] देवाय सवित्र इति तदाहांय यदाह विश्वेभ्यो देवेभ्य इति मरुद्भ्यो विश्वेभ्यो देवेभ्य

१ कथन्वहमसु॰ M; कथमन्वहमसु॰ Be 7 D; कथयन्कथमसु॰ Be BU.

२ Conjecturally; वनेर्पांपायेति M; वनेनचवयेति Be 7 D; वनेनचवयेति B U; वनेनर्पांपायेति Be.

३ Thus M; यमरुते Be 7 Be D; समरुते BU.

इति तथाहाय यथाह देवानां पत्नीभ्य इति महतीभ्यो देवानां पत्नीभ्य इति तथाहाय यथाहेन्द्राय हरिवत इति शक्राय मघवत इति तथाह । धाना इन्दुभ्य[1] इत्यु हैके संप्रदिशन्ति । ॥ २८ ॥

तदेतदवगिव यज्ञायज्ञियस्य[2] स्तोत्रं यज्ञायज्ञियस्य वाव[3] स्तोत्रे स तां निरुवाच । तं ह स्मासुरा उपेक्षामेव चक्रिरे किं वा वै करोति[4] किं वा नेति । स यदा विदां चकार न वा इम एतर्हि पापभद्रयोरीशत इति तदेनां निरुवाच देवो वो द्रविणोदा इति । प्रजापतिर्वै देवो द्रविणोदाः । पूर्णां विवष्ट्वासिचमिति । पूर्णां व्युदचत्यासिचमिति[5] तदुद्वा सिञ्चध्वमुप वा पृणध्वमित्यास्य कामंकामं पूरयाध्वा इति तदादिद्वो देव ओहत इति । साध्येभ्यो देवेभ्यः प्रजापतिः कामंकाममूहते[6] । सप्तदश स्तोमो[7] भवति[7] । सप्तदशः प्रजापतिः । प्रजापतेराप्त्या । अश्वो ऽमितज्ञुर्दक्षिणा[8] । प्राजा-

---

१ Thus M Be; इंदुभ्य the other MSS.

२ °यज्ञीयस्य M Be.

३ om. all exc. M.

४ करोतती (sic!) M; indication of pluti?

५ व्युदचत्य° B Be U; व्युदचत्य° Be 7; व्युदचत्य° D; व्युदर्चत्य° M.—°आसिच° BUD; °आशिच° M; °आशिष° Be 7 (pr. m.) Be; °आसिचय° Be 7 (sec. m.).

६ Uncertain reading. °मूहतं M; मूहतः the other MSS.

७ स्तोमा भवंति M; स्तोमो भवति the other MSS.

८ °ज्ञिनाग्नुर्दक्षि° i.s.o. °मितज्ञुर्दक्षि° all the MSS. exc. M.

पत्यो वा[१] ऽभ्वः[१] । प्रजापतेरनुरूपत्वाय । यः पाप्मना भ्रातृव्येण व्याविह्वलेत[२] स एतेन यज्ञक्रतुना यजेत । व्येव पाप्मना भ्रातृव्येणावर्तत । इन्द्रो वृत्रꣳ हत्वा परां परावतमगच्छदपाराधमिति मन्यमानस्तं देवा यज्ञेनान्वैषुस्ते[३] व्रतमाशिरं[४] दुग्धं[४] चक्रिरे[४] भूयो भागधेयं भूयसीं प्रीतिमभ्युपावर्त्स्यतीति[५] वदन्तः । स ह प्रातःसवने नाजगाम । ते[६] सर्व एव प्रातःसवनस्य भक्षयां[७] चक्रुः[७] । को ह्यपेन्द्रस्य[८] सोमस्य भक्षयिष्यतीति । तꣳ संतिष्ठमाने प्रातःसवनेऽच्छावाकस्य ग्रहं प्रति[९] जहुस्ते[१०] सर्व एव चमसाध्वर्यव आनन्दिनो

---

१ Thus M; वाभ्वः the other MSS.

२ Thus corrected (cp. S'at. Br. XII. 4. 4. 2); व्याविह्वलेति all exc. M, which has व्याविवर्तेत् ।

३ अन्वेषुस्ते M; अन्वेपुस्ते the other MSS.

४ आशिरं दुदुहं चक्रिरे Be 7 Be D; आशिरं दुदुहे चक्रिरे B; आशीर्दुग्धं चक्रिरे M; cp. on this passage Pañc. Br. XVIII. 5. 12.

५ °पावर्तिष्यतीति M.

६ I.s.o. ते (thus M Be B), ततः Be 7 D.

७ Thus M; नाभक्षयां चक्रुः or नाभक्षयांचक्रुः the other MSS. (in Be 7 the passage is missing). Probably the negation has fallen out somewhere.

८ ह्यपेंद्रस्य M.

९ प्रतिप्रति M.

१० Thus my conjecture; जक्षुस्ते M; जच्छुस्ते or जचुस्ते the other MSS.; cp. Āp. śrs. XXII. 10. 13.

ऽच्छावाकस्य ग्रहं प्रत्यागर्तु[1] दध्रिरे[2] । सेन्द्रा इव ह्यमन्यन्त । तस्मात्तीव्रसोमे सर्व एव चमसाध्वर्यव आनन्दिनो ऽच्छावाकस्य ग्रहं प्रत्यागृणन्ति[3] । सेन्द्रा इव हि मन्यन्ते । तर्हि वाव तदासीत्तद्दु वा आहुः सर्व एवैतर्हि यज्ञः सेन्द्र इति । तꣳ हाभिषुषुवुः[4] ॥ २९ ॥

इहा इहा इहेतीहेहीहेहीहेहीति[5] ह वा एनं तदूचुरिह-इहद्इहदितीदं[6] ते इहदन्नाद्यं तदभ्युपावर्तस्वेति ह वा एनं तदूचुस्तदेतन्माध्यंदिनस्य सवनस्यान्यचापि निदानꣳ । स° ञ्चतकलशमेकधनानां[7] प्रातःसवने ऽवनयेद्दधि माध्यंदिने सवने । विमथितं तृतीयसवने । साऽस्य तीव्रता । सप्तदश स्तोमो भवति । सप्तदशः प्रजापतिः । प्रजापतेराप्त्यै । गर्भिणी वडवा ललामी दक्षिणेन्द्रियं वै गर्भ । इन्द्रियं ललामः । सेन्द्रियत्वाय[8] । यो ज्यान्या वोपतपता वाभिमानं नीतः स्यात्स एतेन यज्ञक्रतुना यजेताश्नुते हैव तीव्रतामिन्द्रो ऽकामयत वि पाप्मानꣳ हनीय

---

१ Thus M only; प्रत्यावर्तं or ॰गर्तं the other MSS.

२ M ins. न before दध्रिरे ।

३ प्रतिगृ॰ MSS. exc. M.

४ Thus M; ह वा अभि॰ U; हवाभि॰ Be B; यवाभि॰ Be 7 D.

५ Thus M Be B; इहे तीहे इहे इहेहीति U; Be 7 D (which write only once इहा): इहेतिहेहिहेहिहेहीति ।

६ Before इदं M has once more इहद् ।

७ Uncertain; M reads as above given; संचितकलशं Be 7 UDB; संचितंकलशं Be.

८ Thus M Be BU; सेंद्रत्वाय Be 7; सेंद्रात्वाय D.

श्रैष्ठ्यं देवानां गच्छेयमिति । स एतं यज्ञक्रतुमपश्यत्तमाहरत्तेनायजत । ततो वै स वि पाप्मानमहत श्रैष्ठ्यं देवानामगच्छद्यः कामयेत वि पाप्मानꣳ हनीय श्रैष्ठ्यꣳ समानानां गच्छेयमिति स एतेन यज्ञक्रतुना यजेत । व्येव पाप्मानꣳ हते श्रैष्ठ्यꣳ समानानां गच्छति । तस्यातिग्राह्यो वि न इन्द्र मृधो जहि नीचा यच्छ पृतन्यतः। अधस्पदं तमीं कृधि यो अस्माꣳ अभिदासत्युपयामगृहीतो ऽसीन्द्राय त्वा वैमृधाय जुष्टं गृह्णामीति । परिमृज्य सादयत्येष ते योनिरिन्द्राय त्वा वैमृधायेति । तस्य त्रिवृत्पञ्चदशौ विपर्यासꣳ स्तोमौ भवतस्ताः षड् गायत्र्यो गायत्री[1] वै[1] छन्दसां[1] वि पाप्मानमहत । गायत्र्यैव तद्यजमानो वि पाप्मानꣳ हते । ॥ ३० ॥

इन्द्रो ऽकामयतौद्भिद्यꣳ[2] श्रैष्ठ्यं देवानां गच्छेयमिति । स एतं यज्ञक्रतुमपश्यत्तमाहरत्तेनायजत । ततो वै स औद्भिद्यꣳ श्रैष्ठ्यं देवानामगच्छद्यः कामयेतौद्भिद्यꣳ श्रैष्ठ्यꣳ समानानां गच्छेयमिति स एतेन यज्ञक्रतुना यजेतौद्भिद्यꣳ हैव[3] श्रैष्ठ्यꣳ समानानां गच्छति । तस्यातिग्राह्यो ऽयं वेनुरगृभीतो[4] विश्वजिदुद्भिदित्सोमः। ऋषिर्विप्रः काव्येनोपयामगृहीतो ऽसीन्द्राय त्वोद्भिदे जुष्टं गृह्णामीति । परिमृज्य सादयत्येष

---

१ Thus M only ; गायत्र्येव वै छंदांसि all the other MSS.

२ All MSS. ins. ह वै exc. M.

३ हवै MB.

४ M ins. (against Taitt. Br.) बयोधाः।

ते योनिरिन्द्राय त्वोद्भिद इति। तस्य पञ्चदशैकविंशौ विपर्यासꣳ स्तोमौ भवतस्तां॑ षड् बृहत्यो। बृहती वै छन्दसामुदभिनद्बृहत्येव[1] तद्यजमान उद्भिनत्तीन्द्रो ऽकामयत वलं[2] भित्त्वा पशून्सृजेयेति। स एतं यज्ञक्रतुमपश्यत्तमाहरत्तेनायजत। ततो वै स वलं[2] भित्त्वा पशूनसृजत। यः कामयेत वलं[2] भित्त्वा पशून्सृजेयेति स एतेन यज्ञक्रतुना यजेत। वलमेव[2] भित्त्वा पशून्सृजते। तस्यातिग्राह्य इन्द्र ओषधीरसनोदहानि वनस्पतीꣳरसनोदन्तरिक्षम्। बिभेद वलं नुनुदे विवाचो ऽथाभवद्दमिताभिक्रतूनामुपयामगृहीतो ऽसीन्द्राय त्वा वलभिदे जुष्टं गृह्णामीति। परिमृज्य सादयत्येष ते योनिरिन्द्राय त्वा वलभिद इति। तस्य सप्तदशैकविंशौ विपर्यासꣳ स्तोमौ भवतस्तां॑ षड्गायत्र्यो। गायत्री[3] वै[3] छन्दसां[3] वलमभिनद्गायत्र्येव[3] तद्यजमानो वलं भित्त्वा पशून्सृजते। ॥ ३१ ॥ अष्टमः ॥

वाजपेयेन यक्ष्यमाणो भवति। स यदन्नानां कामयते तस्याग्नितो भूत्वा दीक्षते यदा[4] लभते[4] तस्य। स एकाहं नाश्नात्यथाश्नाति। द्व्यहं नाश्नात्यथाश्नाति। त्र्यहं नाश्नात्यथाश्नाति। सो ऽन्वेव विराजमाप्नोति[5]। राजानं क्रीत्वोह्यातिथ्यं

---

१ बृहतीत्येव M.

२ वलं most of the MSS.

३ Thus M; गायत्र्या व छंदसां वलभिद्गायत्र्येव the other MSS.

४ यद्दलभते M.

५ Thus my conjecture; विराजाप्नोति M; विराजा यजतेति the other MSS.

निर्वपति। यद्यु वा एतदुपात्येति चतुरहं नाश्नात्यथाश्नाति। पञ्चाहं नाश्नात्यथाश्नाति। षडहं नाश्नात्यथाश्नाति। तिस्र उपसदस्त्रिꣳशत्संपद्यन्ते[1]। त्रिꣳशदक्षरा विराडन्नं विराड्विराजैवान्नाद्यमवरुन्द्धे। ऽथ य एकादश स्तन एवास्यै स। दुह एवैनां तेनाथ य एकत्रिꣳश स्तन एवास्यै स। दुह एवैनां तेन। स उपसत्स्वाज्यव्रतो भवति। शीतस्य[2] सर्पिषस्त्रिसृभिरङ्गुलीभिरुपहन्त्यथ द्वाभ्यामथैकया। शीतस्य[3] वैव[3] सर्पिषस्त्रिभिः पर्वभिरुपहन्त्यथ द्वाभ्यामथैकेन। विलीने वा सर्पिषि त्रीणि पक्ष्मꣳस्यवदधात्यथ द्वे अथैकं त्रिस्तनद्विस्तनैकस्तनव्रतस्य रूपाणि कुर्वन्स्स नादित्याद्दिवा पर्यावर्तते नाग्नेरधि नक्तमौदुम्बरः सोमचमसश्चतुःस्रक्तिर्नद्धा[4] त्रिवेदाः[5] सगोचः। ॥ ३२ ॥

सप्तदश स्तोमो भवति। सप्तदशः प्रजापतिः। प्रजापतिमन्नाद्यं नोपानमत्तं देवा व्रतसत्याभ्यामन्वैषुः[6]। स यदश्नाति यदेवाश्नेनावरुद्धं तस्यावरुद्ध्या इति तद्य यन्नाश्नाति यदेवानश्नेनावरुद्धं तस्यावरुद्ध्या इति तद्य यदुपसत्स्वाज्यव्रतो भवत्येतद्वै देवानां प्रियं धाम यदाज्यं। देवानामेव प्रियं धामावरुन्द्ध इति तद्य यन्नादित्याद्दिवा पर्यावर्तते नाग्नेरधि

---

१ ०पद्यते Be 7 BD; ०पद्यंते M Be U.

२ Thus M; विलीनस्य the other MSS.

३ Thus M; विलीनस्य वैव Be U; विलीनस्यैव Be 7 D; विलीनस्य वै B.

४ नद्ध M.

५ Thus M B U; त्रिवेदः Be Be 7 D.

६ ०मन्वैषुः all the MSS. exc. Be which has: ०रन्वैषुः।

नक्तमेते वै देवानामृतमत्ये । नेद्देवानामृतमत्ये पृष्ठतः करवाणीति तद्ध यदौदुम्बरो भवत्यूर्ग्वा अन्नाद्यमुदुम्बर । ऊर्ज एवान्नाद्यस्यावरुद्धा इति तद्ध यत्सोमचमसो भवत्येतद्वै देवानां परममन्नं यत्सोमः । परमेणैवास्मा अन्नाद्येनावरमन्नाद्यमवरुन्द्ध इति तद्ध यच्चतुःस्रक्तिर्भवति यदेव दिशो ऽन्नाद्यं प्राविशंस्तस्यावरुद्धा इति तद्ध यत्त्रिवेदा[1] भवति न ह्येतामेकवेदा दक्षिणामुद्यन्तुमर्हतीति तद्ध यत्सगोत्रो भवत्यात्मा वै सगोत्र आत्मन्नेव यज्ञस्य यशो ऽन्नाद्यं प्रतिष्ठापयानीति तत् । ॥ २३ ॥

तं माध्यंदिनीयैश्चमसैः सहोन्नीय जुह्वति । तमृत्विजो हुतं दक्षिणानां काले ब्रह्मण उपातिदिशन्ति । तं ब्राह्मणाः सन्तं[2] पर्युपविश्य भक्षयन्ति यद्धुतं मन्यन्ते तेन । यद्धुतेन भक्षयन्ति तद्धुतपेयस्य हुतपेयत्वं ॥ दिशो ऽकामयन्तान्नाद्यः स्यामान्नाद्यमवरुन्धीमह्यन्नाद्यमस्मासु प्रतितिष्ठेदिति । ता एतं यज्ञक्रतुमपश्यंस्तमाहरंस्तेनायजन्त । ततो वै ता अन्नाद्यो ऽभवन्नन्नाद्यमवारुन्धतान्नाद्यमासु प्रत्यतिष्ठद्यः कामयेतान्नादो मे प्रजा स्यादन्नाद्यमवरुन्धीतान्नाद्यमस्यां प्रतितिष्ठेदिति स एतेन यज्ञक्रतुना यजेतान्नाद्येवास्य प्रजा भवत्यन्नाद्यमवरुन्द्धे ऽन्नाद्यमस्यां प्रतितिष्ठति । तस्य चतस्रषु बहिष्पवमानो[3] ऽष्टाश्वष्टाश्वान्यानि[3]

---

१ त्रिवेदो M.

२ Thus corrected according to the Karmānta; सर्नतं all the MSS.

३ °मानोऽष्टाष्टान्याश्वानि M; °मानोऽष्टाष्टाश्वानि Bo; °मानमष्टाश्वाश्वानि B Be 7 UD; cp. supra XV. 18 (p. 222, 12).

द्वादशो माध्यंदिनः पवमानः षोडशानि पृष्ठानि सविꣳश[1] आर्भवः पवमानश्चतुर्विꣳशमग्निष्टोमसाम ' तं दिशां चतुष्टोम इत्याचक्षते " छन्दाꣳस्यकामयन्त यशो ऽश्नुवीमहि यशो ऽवरुन्धीमहि यशो ऽस्मासु प्रतितिष्ठेदिति ' तान्येतं यज्ञक्रतुमपश्यꣳस्तमाहरꣳस्तेनायजन्त ' ततो वै तानि यशो ऽश्नुवत यशो ऽवारुन्धत यश एषु प्रत्यतिष्ठद्यः कामयेत यशो ऽश्नुवीय यशो ऽवरुन्धीय यशो मयि प्रतितिष्ठेदिति स एतेन यज्ञक्रतुना यजेत ' यश एवाश्नुते यशो ऽवरुन्द्धे यशो ऽस्मिन्प्रतितिष्ठति ' तस्य स्तोमा अस्तुवतैकस्यामथ तिसृष्वेकस्यामथ तिसृषु ' तमेतं छन्दसामेकत्रिक इत्याचक्षते " स्तोमा अकामयन्तेति समानः परिवादस्तस्य[2] स्तोमास्त्रिवृदथ त्रयः पञ्चदशास्त्रिवृदथ त्रयः सप्तदशास्त्रिवृदथ त्रय एकविꣳशास्तमेतꣳ स्तोमानामेकत्रिक[3] इत्याचक्षते " ॥ ३४ ॥

इन्द्राग्नी वा अकामयेताꣳ समानलोकौ स्याव समानं लोकमियावेति ' तावेतं यज्ञक्रतुमपश्यतां ' तमाहरतां ' तेनायजेतां ' ततो वै तौ समानलोकावभवताꣳ समानं लोकमैताꣳ समानलोकावर्ध्यय[4] यौ कामयेताꣳ राजा च पुरोहितश्च

---

१ Thus all the MSS (only संविंश D); in Be 7 स has been cancelled.

२ परोवाद॰ M.

३ Thus MD Be 7; एकंत्रिक BU; एकत्रिंश Be.

४ Thus M; ॰लोकानघज Be 7 BUD; ॰लोकावघढ Be.

समानलोकौ स्याव समानं लोकमियावेति तावेतेन यज्ञक्रतुना यजेयाताꣳ[1] समानलोकावेव भवतः समानं लोकमितो । ऽश्वरथो यज्ञायुधः प्रासङ्ग्यसमसः सा ब्राह्मणस्य दक्षिणाश्वतरीरथः सर्वायुधो ऽप्रासङ्गः काꣳस्यस्थूणीवन्धः[2] सा राजन्यस्य दक्षिणा । तस्य त्रिवृत्पञ्चदशौ विपर्यासꣳ स्तोमौ भवतस्त्रिवृदेव ब्राह्मणस्य पञ्चदशो राजन्यस्य । तमेतमिन्द्राग्नियोः कुलाय इत्याचक्षत । एष एव सन्पितापुत्रीय एष सख्योर्यज्ञ एष भ्रात्रोः ॥ ॥ ३५ ॥ नवमः ॥

अभिचरणीयैः सोमैर्यक्ष्यमाणो भवति । स इयानि यज्ञायुधान्युपकल्पयते बाधकानि च तैल्वकानि च शवानसो[3] ऽधिषवणे फलके पुरुषास्थस्य[4] दृषणौ । स यत्राध्वर्युरुपाꣳशुं ग्रहीष्यन्नाजानमभिषुणोति तस्य यो ऽꣳशुः परापतति तमेतस्मिन्पात्र आधायोपसंरुह्याथाहासुं जह्यथ त्वा होष्यामीत्यातमितोरास्ते । ऽथैतं भङ्गमाहवनीये ऽनुप्रहरतीदमहममुमामुष्यायणं परिस्रुना[5] भङ्गेन[5] विध्यामीत्यथ यं यजमानो द्वेष्टि

---

१ यजेतां all exc. M.

२ °स्थूणीवंधः Be; °स्थूणिवंधः U; स्थूणीवंधः M; °स्थूणिवंधः B; वौषिवंधः Be 7 D.

३ Thus M Be; शवनभ्ये Be 7 D (cp. Āp. XXII. 4. 17, S'āṅkh. XIV. 22. 18, Ṣaḍv. br. III. 8); शवाननभ्ये U; शवाननभोग्यो B; cp. the Dvaidhasūtra.

४ Thus M; all the other MSS. corrupt.

५ Thus M; परिस्रुनाभंग्येन Be U B; परिषानाभंग्येन Be 7 D.

तं मनसा ध्यायत्यथैतत्पात्रं स्वरे यथायतनꣳ सादयत्यमुष्य त्वा प्राणे सादयामीति । स यं कं च ग्रहं गृह्णात्येवमेवैनं गृह्णाति । यद्[1] किं[1] च[1] पात्रꣳ सादयत्येवमेवैनत्सादयति । स एष त्रिवृदग्निष्टोम एकस्तोम[1] एकहविर्धानस्तꣳ श्येन इत्याचक्षते ॥ ऽथेषुः[3] । समानमभिचरणीयꣳ शिल्पं । तिसृषुतिसृषु[4] स्तुवते । रथो हविर्धानमथ संदꣳशः । समानमभिचरणीयꣳ शिल्पं । द्वौ त्रयस्त्रिꣳशौ मध्यत स्तोमौ भवतो । द्वे[5] हविर्धाने ॥ अथेन्द्रवज्रः । समानमभिचरणीयꣳ शिल्पं । पञ्चदश एष भवति ॥ ॥ ३६ ॥

दुरशेन[6] यक्ष्यमाणो भवति । स उपकल्पयते षष्टिꣳ शतमानानि हिरण्यानि त्रिꣳशतꣳ सुवर्णानि त्रिꣳशतꣳ रजतानि[7] बह्वन्यद्धिरण्यꣳ । स आमावास्येन हविषेष्ट्वा सौर्यं चरुं निर्वपति । तस्मिन्सुवर्णꣳ शतमानं ददात्यथ सायꣳ हुते ऽग्निहोत्रे चान्द्रमसं चरुं निर्वपति । तस्मिन्रजतꣳ[7] शतमानं ददाति । स एवमेवैताभ्यामिष्टिभ्यामहरहर्यजमानो मासमेत्यथ दीक्षते । दीक्षणीयायां द्वादशमानꣳ हिरण्यं ददाति ।

---

१ यत्किंच M.

२ This word twice in Be 7 B U D.

३ Thus M only; वेषु all the other MSS.

४ तिसृषु once in M, which adds also च after स्तुवते ।

५ द्वेद्वे M.

६ Thus M U B Be; दुराशेन D; दुराश्वेन Be 7.

७ राजत॰ M.

प्रायणीयायां चतुर्विंशतिमानं ददात्यातिथ्यायां द्वे[1] चतुर्विंशतिमाने[1] ददाति[1]। प्रथमायामुपसदि चत्वारि ददाति। द्वितीयस्यामुपसद्यष्टौ ददाति। तृतीयस्यामुपसदि षोडश ददाति। चतुर्थ्यामुपसदि द्वात्रिंशतं[2] ददाति। पञ्चम्यामुपसदि चतुःषष्टिं ददाति। षष्ठ्यामुपसद्यष्टाविंशं शतं चतुर्विंशतिमानानां[3] ददात्यथातः शतसंख्यैवाग्नीषोमीयस्य हुतायां वपायां द्वे शते ददात्याग्नेयस्य हुतायां वपायां चत्वारि ददाति। प्रातःसवनीयेष्वष्टौ[4] ददाति। माध्यंदिनीयेषु षोडश ददाति। दक्षिणानां काले द्वात्रिंशतं ददाति। तृतीयसवनीयेषु चतुःषष्टिं ददात्यनूबन्ध्यस्य हुतायां वपायामष्टाविंशं शतानां[5] ददाति। स यदेताभ्यामिष्टिभ्यामहरहर्यजते सूर्याचन्द्रमसोरेव तत्सायुज्यं सलोकतामाप्नोति। ॥ ३७ ॥

[6]अथ यद्धिरण्यदक्षिणो[7] भवति हिरण्मयमेव तद्यजमान

१ Thus M; विंशतिमानं ददात्यथ Be B; in the other MSS. this passage is missing.

२ Thus M U; विंशतं Be; in the other MSS. this passage is missing.

३ Thus M; °शतिमानं the other MSS.

४ °सवनीयेष्टौ Be 7 D.

५ Thus M Be 7; शतमानानां Be B U.

६ During the printing I was so happy as to obtain, for the remaining part of this praśna, from Mr. Muthu Dikshitar of Lalgudi (Manakkāl, Madras) a copy (designed by me as L) from a MS. in his possession. This MS. is in Grantha and independent from my MSS., but, on the whole, not much better.

७ Thus M; यद्धिरण्यं दक्षिणा the other MSS.

आत्मानꣳ सꣳस्कुरुते। तस्य यदूर्ध्वं नाभेस्तत्सुवर्णमवाङ्[1] रजतं। यदा ह वै हिरण्मयो भवत्यथामृतो भवति। हिरण्मया ह वै देवास्तस्मात्ते ऽमृताः। सप्तदशस्तोमो भवति। सप्तदशः प्रजापतिः। प्रजापतेराप्त्यै। उभे सामनी भवतश्छन्दोमयावेतत्पक्षौ[2] यजमान आत्मानꣳ सꣳस्कुरुत। एतस्य लोकस्य जित्यै। स यदेतेन[3] यज्ञक्रतुना यजते सूर्याचन्द्रमसोरेव तत्सायुज्यꣳ सलोकतां जयति। तेन दुरशो। दुरश इव ह्येतयोर्देवतयोर्लोको॥ ऽथ दुर्णाशेन[4] यक्ष्यमाणो भवति। स उपकल्पयते ऽनडुह्वतं च त्रयस्त्रिꣳशतं[5] च निष्काꣳस्तेन हैतेनानडुहो लोकं जयति। तेन हैतेन ज्योतिष्मन्तं लोकं जयति। तेन हैतेन ज्योतिषो ऽधि स्वर्गं लोकं जयति। सप्तदशस्तोमो भवति। सप्तदशः प्रजापतिः। प्रजापतेराप्त्यै। उभे सामनी भवतश्छन्दोमयावेवैतत्पक्षौ[6] यजमान आत्मानꣳ सꣳस्कुरुत। एतस्य लोकस्य जित्यै। स यदेतेन यज्ञक्रतुनेष्ट्वा न नश्यति तेन

---

१ Instead of अवाङ् (thus M Be B U) Be 7 D : अधो; अर्वा L.

२ Thus Be B; °मयावेवतत्पक्षौ M; °मयावेतत्तृतीयेपक्षौ L; the other MSS. deficient.— Here and infra (l. 13) Be after °पक्षौ ins. तृतीये पक्षे।

३ यद् only given by M.

४ दुर्ण° or दुर्न° all MSS. exc. M L which have here and infra each time दूर्ण°।

५ त्रयस्त्रिꣳशां M.

६ Thus Be; °मयावेवतत्पक्षौ M L; °मयायैवतत्पक्षौ the other MSS.

दुर्णाशस्तद्दुर्णाशस्य[1] दुर्णाशत्वं[2] ॥ केशी ह दार्भ्यो ऽपचितिकामो ऽपचितिनेजे न[3] नो[3] नामानि[3] परिहरन्ता[4] इति। ततो ह वा एतत्पञ्चालराजानां[5] नामानि परिहरन्ते[6] ॥ ३८ ॥

शीर्षण्या इति केशानाचक्षते। कुशा इति दर्भांस्त्वंधाविति[7] गैरेयकविमत्यौ[8]। ततो वै सो ऽपचितिमानभवद्यः कामयेतापचितिमान्स्यामिति स एतेन यज्ञक्रतुना यजेतापचितिमानेव[9] भवति। तस्य चतुर्विंशो बहिष्पवमानस्त्रिवृत्पञ्चदशान्याज्यानि। ताखिस्रो गायत्र्यश्चतुर्विंशो माध्यंदिनः पवमानः पञ्चदशसप्तदशानि[10] पृष्ठानि। ते द्वे त्रिष्टुभौ। त्रिणव आर्भवः पवमान एकविंशमग्निष्टोमसाम। सैका जगत्येतानि वै छन्दसामपचिततमान्यपचितिमानेव भवति य एवं वेदांसावादित्यो ऽकामयत त्विषिमान्स्यामिति। स एतं यज्ञक्रतु-

---

१ दुर्नश॰ Be, दूर्णाश॰ M L; the other MSS. om.

२ Most of the MSS. दुर्णश॰ or दूर्णाश॰ (both times).

३ Thus M; L om. नो; नंननामानि Be; नन्नोनामानो Be 7 U D; नंनोनामनो B.

४ Thus M Be 7 D; ॰हरंत Be B U L.

५ Thus M; ॰पांचाल॰ the other MSS.

६ Thus M Be L; ॰हरंत्या Be 7 D U; ॰हरत्या B.

७ Uncertain; दर्भानस्त्वाविति M; दर्भांस्त्वधाविति L; दर्भांनविद्याविति Be B.

८ Uncertain reading; गैरेयकविमंथो (or मेथो?) M; गैरेयकविमत्यो Be 7; गौरेयकविमत्यो Be B; गेरेय॰ D; गैरयकचितिमत्यो L.

९ Thus M L; एधु instead of एव all the other MSS.

१० Thus M Be U; पंचदशःसप्त॰ B L; Be 7 om. पंचदश।

मपश्यत्तमाहरत्तेनायजत। ततो वै स त्विषिमानभवद्यः कामयेत त्विषिमान्स्यामिति स एतेन यज्ञक्रतुना यजेत। त्विषिमानेव भवति। तस्य[1] सौर्यो ऽतिग्राह्यः। सौर्यः[2] पशुरुपालम्भ्य। एकविꣳश एव भवति॥ ॥ ३९ ॥ दशमः ॥

इन्द्रो ऽकामयतर्षभ इव पशूनामैश्वर्यमाधिपत्यꣳ राज्यं देवानां परीयामिति। स एतं यज्ञक्रतुमपश्यत्तमाहरत्तेनायजत। ततो वै स ऋषभ इव पशूनामैश्वर्यमाधिपत्यꣳ राज्यं देवानां पर्यैद्यः कामयेतर्षभ इव पशूनामैश्वर्यमाधिपत्यꣳ राज्यꣳ समानानां परीयामिति स एतेन यज्ञक्रतुना यजेतर्षभ इव पशूनामैश्वर्यमाधिपत्यꣳ राज्यꣳ समानानां पर्यैति। तस्यातिग्राह्यो वृषा सो अꣳशुः पवते हविष्मान्सोम इन्द्रस्य भाग ऋतयुः शतायुः। स मा वृषाणं वृषभं कृणोतु प्रियं विशाꣳ सर्ववीरꣳ सुवीरमुपयामगृहीतो ऽसीन्द्राय त्वर्षभाय जुष्टं गृह्णामीति। परिसृज्य सादयत्येष ते योनिरिन्द्राय त्वर्षभायेति। तस्य पञ्चदशस्य सत एकविꣳशꣳ होतुः पृष्ठं ककुदो[3] रूपमिन्द्रेण ह स्म वै पूर्वे समाजिगमिषन्तो वसिष्ठसवेन यजन्ते[4] हन्तो[4] न[4] इन्द्र[4] आविर्भविष्यति तस्मै[5] कामान्वक्ष्याम

१ तस्याः Be 7 D.

२ om. all MSS. exc. M L Be.— After the tenth adhyāya M breaks off.

३ ककुभो L.

४ Thus Be L; यजंतेमुपैतमिंद्र Be 7; यजंत उपतानिंद्र B; यजंत उपैतामिंद्र U; यजंतेमुपैतान इंद्र D.

५ तस्मात् MSS. exc. L which has तस्मिन्।

इति[1] वदन्तो । वनिष्ठुसवेन यक्ष्यमाणो भवति । स उपकल्पयते शतमुद्यवेहतः[2] शतं दार्वाचितानि शतꣳ सर्पिष्पात्राञ्छतं पयःपात्राञ्छतं दधिपात्राञ्छतं वसापात्रानौदुम्बरीं नावमुभयतोऽभिपतनां[3] परिगृहीतामथ प्रणेष्ठन्नेतेनोपक्लृप्तेन चित्रामायतीमुपरमत्यंच चित्रयेति पूर्वाग्निमन्ववस्यत्युत्तपनीयꣳ शालीनो ऽन्वाहार्यपचनमाहिताग्निरथैतानि दार्वाचितानि प्रदोष एवाग्नावादधाति[4] । तेषु[5] प्रज्योतिषूद्यवेहतो[5] निघ्नन्त्यथैषामभ्यर्धान्वनिष्ठून्मेदाꣳसीति[5] अपयन्त्यथोदित आदित्य आयातयत्यौदुम्बरीं[6] नावमुभयतोऽभिपतनां[7] परिगृहीतां प्रणेष्ठभिस्तीर्णामुपस्तृणीते पञ्चाशता सर्पिष्पात्रैः पञ्चाशता पयःपात्रैः पञ्चाशता दधिपात्रैः पञ्चाशता वसापात्रैस्तीर्णां वनिष्ठून्मेदाꣳसीति संप्रकीर्याथाभिघारयति पञ्चाशता वसापात्रैः पञ्चाशता दधिपात्रैः पञ्चाशता पयःपात्रैः पञ्चाशता सर्पिष्पात्रैरथ पुरोऽनुवाक्यामन्वाह ॥ ४० ॥

---

१ Thus Be L ; वक्ष्यामीति Be 7 B U D.

२ Thus L ; °मुद्यवेहत: Be 7 D ; °मुद्यवेनिहतान् Be B U.

३ Uncertain reading ; उभयतोपतनां Be 7 B ; उभयतोभिपतनां Be U ; उभयतोवतानां (or °वतारं) D ; उभयतोभिपद्यमानं L.

४ °दधति L.

५ तेन प्रज्योतिषू एवहतोनिघ्नन्ति L ; तेषु प्रत्योषिढं (or ढ)यवैहतो घ्नंत्य° Be 7 D ; तेन प्रज्योतिषुद्यवेहतानिघ्नंत्य Be B U. अभ्यर्धाद् i. s. o. अभ्यर्धान् L.

६ Uncertain r. ; आयातयत्य° U B ; आयापयत्य° D ; आधापयत्य° Be 7 ; आयाभौतयत्य° B ; आधानयति L.

७ °पतानां B ; °वतानां Be 7 ; °भिपतानां Be U. °मुभयतस्त्वभिपतनां L.

इन्द्रो यातो ऽवसितस्य राजा शमस्य च शृङ्गिणो वज्रबाहुः। सेदु राजा क्षेति[1] चर्षणीनामरान्न नेमिः परि ता बभूवेति। यजतीन्द्रो राजा जगतश्चर्षणीनामधि क्षमि विषुरूपं यदस्ति। ततो ददातु दाशुषे वसूनि चोदद्राध उपस्तुतश्चिदर्वाक् स्वाहेति। वृत्र एवास्मा इन्द्र आविर्भवति। तस्मै[2] कामान्नुवते॥ कामान्स्थꣳ[3] ह[3] वाध्र्यश्वं बृहस्पतिराङ्गिरसो याजयां चकार। तस्य होपवसथीये ऽहञ्छ्रद्धा[4] वीयाय[4]। स होवाचाध्वर्यो[5] वि[5] वै[5] मे श्रद्धागात्सं मे यज्ञꣳ स्थापयेति। तꣳ होवाचान्यद्वै तदुपवसथः[6] श्वो यज्ञः सꣳस्थातेति[7]। स होवाच समेव मे स्थापयेति। तस्य[8] ह तावद्विदित्वाग्रेण[9] हविर्धाने

---

१ क्षेति (as TBr. II. 8. 4. 3) Be B D U; क्षयति (as RV. I. 32. 15) Be 7.

२ तस्मिन् Be L.

३ Corrected; कामानाव B U Be (pr. m.); कामानार्द्देव Be 7; कामा-नार्द्देवं D; कानीयवांव Be (sec. m.); कनीयवान्दव L.

४ My conjecture; वन्त्र्वाविधाय B U L; वन्त्र्वाविधाय Be; वन्-पंचाद्दपिधाय Be 7 D.

५ Thus Be; all the other MSS. corrupt.

६ Uncertain r.; होवाचान्यद्वैतदु॰ Be 7 D; होवाचाध्वर्यवेतदु॰ Be B U; होवाच कर्ध्वंयवेत उप॰ L.

७ ॰स्थातेति Be B U; ॰स्थाहेति Be 7 D; ॰स्थायेति L.

८ तस्मा MSS. exc. L.

९ तावद् only in Be (sec. m.); भवद् L; instead of विदित्वा (thus L Be) विदिंत्वा the other MSS.

चर्मण्युलूखलमुसले निधायाऽऽशून्समवचुदां[1] चकार[1] यच्चिद्धि त्वं गृहेगृह उलूखलक युज्यसे । इह द्युमत्तमं वद जयतामिव दुन्दुभिरित्यथ होढचमसे वसतीवरीभ्यो ऽध्यपो[2] निःषिच्य समुदायुत्य जुहवां चकार यथा जना मऽऽस्तथे व्रतानि[3] को-व्रतिनां[4] व्रतमालोभयाति[5] । कानान्धस्य[6] प्रस्थितं[7] वाभ्रवस्य[8] नीवसुतऽऽ[8] श्रवदिन्द्र[9] जुषस्व स्वाहेति । स एष उन्मत्तस्य वा वीतश्रद्धस्य वा[10] नीतस्य[10] वा यज्ञः । स[11] यदागता[12] स्यादथ चतुष्टोमेनाग्निष्टोमेन यजेत पुरा श्रेयाच्छान्त्यै" ॥ ४१ ॥

मनुर्वैवस्वतो ऽकामयत प्रजाऽऽ सृजेय प्रजामवरुन्धीय प्रजां विन्देया[13] मा[11] प्रजया चचौरन्निति[12] । स एतं

१ ॰समवसूयाश्चकार L.

२ चपो only in Be L.

३ हतानि MSS. exc. L : व्रतानि ।—जनामस्थवे L.

४ व्रतिनां Be ; व्रतीनूपं L ; हतीनां the other MSS.

५ व्रतमालोभयाति Be, ॰यति L ; व्रतमामालोपयति the other MSS.

६ Thus Be L ; the other MSS. corrupt.

७ प्रस्थितं all exc. Be which has प्रस्थितं ।

८ वाभ्रवस्यौवसुतं Be B ; वाभ्रवःस्यौदसुतं U ; वाभ्यवेवीदसुत Be 7 ; वाभ्य-वेवीदसुत D, वाध्व्रंवस्थिवसुतं L.

९ श्रवदिंद्रां Be 7 D ; भिंद्रवदिंद्रा Be ; भिवपनींद्रा B ; निवपंतींद्रा U ; निवदिन्द्रो L.

१० Thus Be L ; वनितस्य BUD ; वर्जंतस्य Be 7.

११ म MSS.

१२ यदागत Be L ; यदागता B Be 7 DU.

१३ Conjecturally ; विन्देय मा प्रजयाचचोरन्निति BU ; विंदेय माप्रजमाच॰ Be ; विंदेय माप्रजयाचचरंनीति Be 7 D ; विन्देयप्रजयाचचो॰ L.

यज्ञक्रतुमपश्यत्तमाहरत्तेनायजत। ततो वै स प्रजामसृजत प्रजामवारुन्द्ध प्रजामविन्दतैनं प्रजयाचचत[१]। यः कामयेत प्रजाᳲ सृजेय प्रजामवरुन्धीय प्रजां विन्देया[२] मा प्रजया चचौरन्निति[२] स एतेन यज्ञक्रतुना यजेत। प्रजामेव सृजते प्रजामवरुन्द्धे प्रजां विन्दत[३] ऐनं[३] प्रजया चचते। तस्य[४] प्राचीनस्तोमास्त्रयस्त्रिवृतस्त्रयः पञ्चदशास्त्रयः सप्तदशास्त्रय एकविंशाः॥ सो ऽकामयतान्नादी मे प्रजा स्यादन्नाद्यमवरुन्धीतान्नाद्यमस्यां प्रतितिष्ठेदिति। स एतं यज्ञक्रतुमपश्यत्तमाहरत्तेनायजत। ततो वै तस्यान्नादी प्रजाभवदन्नाद्यमवारुन्द्धान्नाद्यमस्यां प्रत्यतिष्ठद्यः कामयेतान्नादी मे प्रजा स्यादन्नाद्यमवरुन्धीतान्नाद्यमस्यां प्रतितिष्ठेदिति स एतेन यज्ञक्रतुना यजेतान्नाद्येवास्य प्रजा भवत्यन्नाद्यमवरुन्द्धे ऽन्नाद्यमस्यां प्रतितिष्ठति। तस्य दश स्तोमा। दशदशस्तुवते विराजो रूपं॥ वागाम्भृण्यकामयतापरिमितं यशो ऽश्नुवीयेति। सैतं यज्ञक्रतुमपश्यत्तमाहरत्तेनायजत। ततो वै सापरिमितं यश आश्नुत। यः कामयेतापरिमितं यशो ऽश्नुवीयेति स एतेन यज्ञक्रतुना यजेतापरिमितमेव यशो

---

१ °चचते all exc. Be L.

२ विंदेय मा प्रजामाचचरंनिति Be D; विंदेय प्रजयाचचरंतीति B Be 7 U विन्देय मा प्रजामाचचौरन्निति L.

३ Thus corrected; विंदत एवं Be L; विंदेतैनं the other MSS.

४ Only in Be L.

ऽश्नुते । तस्य द्वयस्य बहिष्पवमानः शते सहस्रे ऽयुते प्रयुते ऽर्बुदे न्यर्बुदे समुद्रे मध्ये ऽन्ते परार्धे" ॥ ४२ ॥

यमो वैवस्वतो ऽकामयत पितॄणामैश्वर्यमाधिपत्यꣳ राज्यं परीयामिति । स एतं यज्ञक्रतुमपश्यत्तमाहरत्तेनायजत । ततो वै स पितॄणामैश्वर्यमाधिपत्यꣳ राज्यं पर्यैद्यः कामयेत समानानामैश्वर्यमाधिपत्यꣳ राज्यं परीयामिति स एतेन यज्ञक्रतुना यजेत । समानानामैश्वर्यमाधिपत्यꣳ राज्यं पर्येति । तस्य शते बहिष्पवमानः सहस्रे ऽयुते नियुते प्रयुते ऽर्बुदे न्यर्बुदे समुद्रे मध्ये ऽन्ते परार्धे पदे पक्वे । नित्यस्तुत्वा मनसैव स्तुवानो मन्यत एतावति[1] मे[1] स्तुतमित्यथ[1] सक्तप्रवर्ग्य । आतिथ्येन प्रचर्य गार्हपत्ये प्रवर्ग्यं प्रवृणक्ति । तेनाहवनीये प्रचरति । तं काल उदासयति । शिरो वा एतद्यज्ञस्य यदातिथ्यं । यशः प्रवर्ग्यः । शीर्षन्नेव यज्ञस्य यशो दधातीति नु सकृत्प्रवर्ग्यो । ऽथ स्तुते प्रवर्ग्यः । पवमानेन चरित्वाग्नीध्रे[2] प्रवर्ग्यं प्रवृणक्ति । तेनाहवनीय एव प्रचरति । तं तदानीमेवोदासयति । शिरो वा एतद्यज्ञस्य यत्पवमानो । यशः प्रवर्ग्यः । शीर्षन्नेव यज्ञस्य यशो दधातीति नु सुत्याप्रवर्ग्यो । ऽथ सकृत्प्रवर्ग्यो । ऽथ स्तुते प्रवर्ग्यो । ऽथ सुत्याप्रवर्ग्यः[3]" ॥ ४३ ॥ एकादशः ॥

---

१ Uncertain r.; एतावतीमेस्तुतमित्यथ Be; एतावत्ति मे स्तुत॰ L; एतावती (ति) मेत्यथ the other MSS.

२ MSS. exc. L ins. वै ।

३ The close of this chapter must contain several corruptions.

'पुरूरवा ह पुरा ऐडो राजा कल्याण आस' तꣳ होर्वश्यप्सराभिदध्यौ' तꣳ संवत्सरं कामयमानानुचचार' तꣳ ह स वै[1] पूर्वं ऽभिश्राम्यन्ति' तद्धातिचिरं मेने' तस्य ह धावतः पुरो रथं कर्तं दर्शयामास' तꣳ ह दृष्ट्वा राजावतस्थौ' तꣳ हावस्थाय न ददर्शाथो ह पुनरातस्थौ' तꣳ हास्थायेव ददर्श' स ह सारथिं पप्रच्छ सारथे किं पश्यसीति' त्वां भगव इति होवाच रथमश्वान्पन्थानमिति' स हेचां चक्रे दृष्यामि वै किलेति' तꣳ ह वागभ्युवाच न वै दृष्यस्यहं वै त्वामेतं[2] कर्तमदीदृशमित्यथ कस्त्वमित्यहमुर्वश्यप्सरेति होवाच' सा त्वा संवत्सरं कामयमानान्वचारिषं' तां मा जायां विन्दस्वेति[3]' दुरुपचारा ह वै भवति[4] देवा[4] इति[4] होवाच' का त[5] उपचर्येति[5]' शतं[6] ममोपसदः[6] सुः[6]' शतꣳशतं मा सर्पिष्कुम्भा

१ This and the following adhyāyas are found also in a badly corrupted tradition. I did not note all the various readings nor all my emendations; the list of them would fill more space than the text itself.

२ Thus L only; चेव or देव the other MSS.

३ कर्तं or कर्तम॰ MSS.

४ L Be sec. m. विन्त्स्वेति।

५ Thus L U Be 7; भवति देवा इति B Be (pr.m.); भवतो देवीति Be (sec. m.).

६ Thus L Be (sec. m.); तवाचार्येति the other MSS.

७ Instead of these three words given thus by Be and L (which only gives म instead of मम), the other MSS.: सं ज्ञानीम-सदस्सु or संज्ञानीय इति सदस्सु।

अपररहरागच्छेयुस्तदाग्नना स्यां । न त्वा नग्नं पश्येयमिति । सर्वमेवैतद्भगवति सुकरमिति होवाच । कथा त्वपि[1] जाया पतिं नग्नं न पश्यतीत्यन्तर्वासं वसीथा[2] इति होवाचानग्नो भवेति[3] । तया सहोवासान्तर्वासं वसानः । सा ह स्म जाताञ्जातानेव पुत्रानपविध्यति । ताꣳ ह राजोवाच पुत्रकामा ह वै भगवति वयं मनुष्याः स्मो जाताञ्जातान् त्वमपविध्यसीति । सा होवाच पर्यवेतरात्रयो भवन्ति क्षीणायुषो ऽन्ये । भूयः प्रियं करवावहा इति । आयुं[4] चामावसुं च जनयां चकार । सा होवाचेमौ बिभृतेमौ[5] सर्वमायुरेष्यत इति । प्राङायुः प्रवव्राज । तस्यैते कुरुपञ्चालाः[6] काशिविदेहा इत्येतदायवं प्रव्राजं । प्रत्यङ्ङमावसुस्तस्यैते गान्धारयः[7] स्पर्शवो ऽराट्टा इत्येतदामावसवम्[8] । ॥ ४४ ॥

अथो हास्या एषा पूर्वचित्तिरप्सरा स्वसा बभूव । सा हेक्षां चक्रे ज्योग् वै मे स्वसा मनुष्येष्ववात्सीद्धन्तैनामच्छाया-

---

१ त्वथि L, त्वयि the other MSS.

२ वसीथा L Be (sec. m.) वाचोत्याम the other MSS.

३ भवति MSS. exc. L, which has देव ह वासनो भवतीति ।

४ प्रायुं Be (sec. m.).

५ बिभृते॰ Be L; the other MSS. om. these words.

६ ॰पांचाला: L B.

७ The proper names given acc. to Be (sec. m.); the other MSS. गांधारा (or री) पर्शवोदारा (or त्व) ह्रा (or षा)।

८ इत्येतन्मावसुम् or इत्येतन्मामवसुम् or इत्येतन्मामावसम् MSS.

नौति । तया सहागत्यैव संगमं न लेभे । ऽथो हास्या अविपूयमुपस्थापदासैवꣳ[१] ह स्म वै पूर्वासां महिषीणाꣳ रूपं[२] भवति । तद्दकरूपं हत्वा प्रमाथं[३] चिकायायो[४] हास्या वरणः चौरप आमन्दौपादे बद्ध आस । तꣳ सा प्रममाथ । तस्मिन्ह्रि-यमाणे रुरुवे[५] ऽयमवीरज[६] इति । तच्छ्रुत्वा राजोत्पपात । तामभ्यानग्र[७] तामभ्युपेयाय । तꣳ[८] सा[८] नकुलौ[८] भूत्वा प्रत्युपेयाय । तस्य हान्तर्वासमवलुञ्चोपाय ह सा विद्युतं जनयां चकार[९] । [१०]तꣳ सा विद्युति नग्नमनुचख्यावथो ह राजाजगामास्थारुहं वा अहमजीत वरुणमत्यमारुहंहि नूनमिति[११] प्रत्यहं प्रजहिष्यामीति । किं व्यभूदिति । नग्नं त्वादर्शमिति[१२] होवाच । तस्यां प्रव्रजितायामप्रियविद्धः

---

१ Thus (only अपि० or अवा०) MSS.

२ Only in Be (sec. m.).

३ Thus Be L (sec. m.); प्रथं the other MSS.

४ विख्यायायो Be (sec. m.); धिक्ायायो or चिवयायायो or विख्यायायो the other MSS.

५ रुदेने Be (sec. m.); रुदेने L; रुत्रे the other MSS.

६ Corrupt; यमवीरजा Be (sec. m.) L; यमविराजा the other MSS.

७ ०भ्यानरस MSS.

८ Conj.; नंकुलौ Be (sec. m.); तमंनेकुलौ the other MSS.

९ Thus L Be (sec. m.); जनयामास the other MSS.

१० Be 7 ins. साक्षे चकार, B Be (orig.) ins. सचिदोषकार।

११ These corrupted words without any var. r. in all MSS.

१२ त्वादर्शमिति MSS.

शोचꣳश्चचार[१] । तꣳ होवाच बृहस्पतिराङ्गिरसो हन्त त्वा शर्देन[२] याजयिष्याम्यापयि त्वा पुनर्जिन्विष्यामीति[३] । तꣳ शर्देन[४] बृहस्पतिराङ्गिरसो याजयां चकार । ताꣳ हावभृथादेवोदेत्य प्रतिददर्श । ताꣳ ह पुत्रौ प्रतीत्योचतुरिह नौ नय यत्र ते गतिर्वल्गिनौ[५] वां[५] पितरमशूशुच[५] इति । सा[६] होवाच सं वां[७] पुत्रकौ जनेय मामिह तिस्र एव रात्रीर्वत्स्यामि नो ब्राह्मणस्य वचो मोघमसदिति । तया सह तिस्र[८] एव[८] रात्रीरुवासान्तर्वासं वसानस्तस्याꣳ रेतः सिषिचे । सा होवाच[९] कथमिदꣳ स्यादिति । कथꣳ हि नूनाꣳ३मिति[१०] राजा प्रत्युवाच । सा होवाच नवां कुम्भीमाहरेति । तस्यामेनन्निःषिषेचाथ[११] ह कुरुक्षेत्रे बिसवत्यो[१२] नाम पुष्करिण्यस्तासामुत्तरार्ध्या सुवर्ण-

---

१ Conj.; शोभं चकार or चक्कार MSS.

२ दर्शने MSS.

३ °जिन्विषा° MSS.

४ शर्वेन MSS.

५ Thus Be (sec. m., only °शूशुच); °वल्गिचैनाम्पितरं शूशूच or °वल्गिचैनामपित° the other MSS.

६ From सा unto होवाच (p. 399. 8) only in Be L.

७ वा Be.

८ om. Be.

९ cp. p. 399, n. 6.

१० नूनाꣳमिति L, नूनामिति the other MSS.

११ Thus L; तस्यामेनं° Be (sec. m.); तस्यामेषं the other MSS.

१२ बिसवत्यो Be (sec. m.); बिवस्वत्येनाः the other MSS.

सवनौ । तस्यामेनच्चिचखान । तदश्वत्थो जज्ञे शम्या परिवृतो रेतसो ऽश्वत्थ आशयाच्छम्येषैव शमीगर्भस्य सृष्टिरेतद्विदान-मथ[१] वै भवति सर्वेण[२] वै देवाः सुवर्गं लोकमायन्निति । स यत्र हैतद्यज्ञो देवेभ्यो ऽधि मनुष्यान्प्रत्यवरुरोहाश्वत्थं[३] हैव तत्प्रत्यवरुरोह । तस्यारणी चक्रिरे[४] ऽयं वाव स यज्ञ इत्यथो खलु य एव कश्चाश्वत्थः[५] स शमीगर्भः । स यदा-होर्वश्यस्यायुरसि पुरूरवा इत्येतेषामेवैतत्पितापुत्राणां नामानि गृह्णात्यथो सामान्यमेवैतद्दूहेत[६] । तस्यां प्रव्रजितायां पुनरेवा-प्रियविद्धः[७] शोचंश्चचार । तं होवाच बृहस्पतिराङ्गिरसो हन्त त्वौपशदेन[८] याजयिष्यामि वि वै ते ऽप्रियमेष्यतीति । तमौपशदेन बृहस्पतिराङ्गिरसो याजयां चकार । ततो वै तस्याप्रियं[९] विनिनाय । तौ ह वा एतौ पौरूरवसौ नाम शदौपशदौ । स यो वित्तं सिषाधयिषेत्तं शदेन याजयेत्तस्य

---

१ °निधानमथ MSS exc. L.

२ cp. TS., I. 7. 1. 2.

३ °वरोहाश्वत्थं or °त्थ MSS.

४ वधिरे L Be (sec. m.); चक्रिरे the other MSS.

५ Thus L; खलु य एवाश्वत्थः Be (sec. m.); खल्वेवकश(च)ाश्वत्थः the other MSS.

६ Thus L; सामान्यमेवैतत्पूहते Be (sec. m.); °मेवैश्च चहते the other MSS.

७-९ only in L Be (sec. m.).

८ त्वा om. MSS.

दशस्तु बहिष्पवमान । एकैकोपशीयत[1] ऐकविंशत्यै[2] सुनोतीहैवाय[3] यो ऽप्रियं विनिनीषेत्तमौपशदेन[4] याजयेत्तस्यैकविंशत्यां बहिष्पवमान । एकैकावशीयत आ दशभ्यो ॥ ऽथ प्राजापत्यौ नाम शदौपशदौ । तस्य तिसृषु बहिष्पवमानस्तिस्रस्तिस्र उपशीयन्त आ षट्त्रिंशतः । षट्त्रिंशतस्तु बहिष्पवमानस्तिस्रस्तिस्रो ऽवशीयन्त आ तिसृभ्यो ॥ ऽथ नैध्रुवस्य[5] कश्यपस्य शदौपशदौ । तस्य चतसृषु बहिष्पवमानश्चतस्रश्चतस्र उपशीयन्त आष्टाचत्वारिंशतो । ऽष्टाचत्वारिंशतस्तु बहिष्पवमानश्चतस्रश्चतस्रो ऽवशीयन्त आ चतसृभ्यः ॥ ॥ ४५ ॥

द्वादशः ॥

देवासुरा ह यत्र महासंग्रामं[6] संयेतिरे[7] तद्धेमानि[8] भूतानि द्वेधैव[9] व्यपचक्रमुर्देवानेवान्वन्यान्यसुरानेवान्वन्यानि[10] ।

---

१ Thus L; एकैक उप॰ Be (sec. m.); एकेनोप॰ the other MSS.

२ Corrected; एकविंशत्यौ L; एकविंशत्यै Be (sec. m.); एकविंशते (or ने)त्य the other MSS.

३ सुनोति इहैवाय L; सुनोनीहैवाय Be (sec. m.); सुनोति एवाय the other MSS.

४ Thus L; विनीर्निषे॰ Be (sec. m.); विनीनिषे॰ or विनिनिषे॰ the other MSS.

५ ॰ध्रुव L Be.

६ महा॰ only in L and Be (sec. m.).

७ सं only in Be (sec. m.); श॰ L.

८ तयेमानि L and Be (sec. m.); तं भुमानि the other MSS.

९ Thus L; द्वेधे Be; द्वैद्वे the other MSS.

१० व्यपच॰ L Be; ववच॰ the other MSS.

बृहस्पतिर्देवानां पुरोहित आसीदुशना[1] काव्यो ऽसुराणां। ब्राह्मणन्तो देवा आसन्ब्राह्मणन्तो ऽसुरास्ते बहुसंग्रामानविजयमाना आसां चक्रिरे। तेषां न कतरे चन भविष्यदाजज्ञुर्गन्धर्वो हैव सूर्यवर्चा भविष्यदाजज्ञे। तस्यो हेन्द्रो जायाया[2] उपहास्य[2] आस। तां होवाचासुदिताङ्गि[3] त्वमिदं गन्धर्वं पृच्छ किमर्थमिदं देवासुरा न विजयन्तीति। तं तथेति होवाच त्वमपि स्व आगच्छतादिति। स हान्तः समुद्रे हिरण्मय्या[4] नावया मह्जानि कुमार्यां[5] चक्रे। ऽथो हेन्द्र आजगाम। स ह सौवर्णः पटरो भूत्वा नौमण्डं[6] उपशिश्लेष[7]। तां हागतमेव विदित्वा[8] पप्रच्छासुदिताङ्ग[9] त्वमिदं ब्रूहि किमर्थमिदं देवासुरा न विजयन्तीति। मोघैरिति होवाच कर्णिनो वै नौराप[10] इति। ब्राह्मणन्तो देवा इति होवाच ब्राह्मणन्तो ऽसुरा इति। तच्छ्रुत्वेन्द्रो हरिशुकरूपं[11] कृत्वोत्पपात।

---

१ Thus MSS.

२ Thus L and Be (sec. m.), which has, however, ॰हास्यमास; आजायद्वाप उपहास्य आस the other MSS

३ ॰सुदितांगि or ॰तांघि MSS.

४ हिरण्मया MSS. exc. B.

५ Uncertain; मह्जानिकुमार्यां L; r. मह्जानिः? cp. TS. III. 2. 8. 5.

६ नोमंण्ड L; नौमंडप Be (sec. m.); नैमंण्डे the other MSS.

७ ॰शिश्लेष MSS. exc. Be which has: ॰शिश्ले।

८ विदित्वा L.

९ ॰सुतांग L Be (rightly?) ; ॰सुदितांघि the other MSS.

१० Thus L; नौरूप Be (sec. m.); नोराप the other MSS.

११ Emended; हरिः शुकोरूप L; हरिः शुकरूपं the other MSS.

तꣳ ह दृद्वैवाह[1] मघवन्नो[2] इति यतरेषाꣳ[3] हरिस्ते जेष्यन्तीति । स ह गल्वैवोशनसं[4] काव्यमुपमन्त्रयां चक्रे जयन्त्यास्[5] दुहिता चतसृभिश्च कामदुघाभिः । स हाशनो ऽसुरेभ्यो ऽधि देवानुपसमियाय[6] । ततो ह वा एतद्देवा असुरान्महासंग्रामं जिग्युः । ॥ ४६ ॥

स ह गुरुरिव मेने गरमिव गीर्त्वा वसु वित्तमसुराणां प्रतिगृह्य । स होवाच गुरुरिवास्मि गरमिव गीर्त्वा वसु वित्तमसुराणां प्रतिगृह्य हन्त मा याजयेति । तं द्वादशस्तोमेनाग्निष्टोमेन बृहस्पतिराङ्गिरसो याजयां चकार । तेन हैवोर्ध्वꣳ हिरण्यमुज्जगार । तद्ध[7] दृद्वेधां[7] चक्रे हन्ताहमिदमसुरेभ्यो निर्हराणीति । तद्धेन्द्र[8] आज्ञायैव शिलां[9] चकार । ते ह वा एत[10] औशनसा नाम कुरुक्षेत्रे पर्वतगाः[11] ॥

---

१ Uncertain; दद्वैवजदो L; दद्वैवाचो Be; दद्वैवपश्च the other MSS.

२ Thus Be; मघवर्येम्मघवन्निति L; मघवान्नूमघवना the other MSS.

३ Thus L; यतर र्षां Be; यद्तरेषां the other MSS.

४ Thus MSS. exc. Be which has स चाश° and L: स चागल्वो° ।

५ My conjecture; जयंतश्च Be; जयन्तच L; जायत्याच or यत्याच the other MSS.

६ Thus L; °समौयाव Be; °समौपय or °समौयाप the other MSS.

७ तंदद्वे° Be; तददद्वो° L; तद्वतेदद्वे° the other MSS.

८ Thus L; तथेंद्र Be; तथेंद्रे or तद्र्थेंद्रे the other MSS.

९ शिलोश् L.

१० Only in L and Be.

११ पर्वतेश्राः L.

स ह लघुरिवाचरदप्रतिष्ठितः[1] । स होवाच लघुरिव वा अस्म्यप्रतिष्ठितो[2] । हन्त मा याजयेति । तमेकविंशतिस्तोमेनाग्निष्टोमेन बृहस्पतिराङ्गिरसो याजयां चकार । ततो वै स प्रतितस्थावथो[3] हेन्द्रः[4] कामदुघा अवरुरुधे[5] । तꣳ ह सायमेतमुवाच प्रातरेतादिति । प्रातरेतमुवाच सायमेतादिति । स एवमेव संवत्सरं नेनीयामास । स होवाच प्रातरेतादिति । मा सायमात्थ सायमेतादिति । मा प्रातरात्थ को ऽयमेतः कतमो ऽयमेतो । यमेनमेतं[6] मघवन् ब्रवीषीति[7] होता प्रवव्राजाथो हेन्द्र उक्थानि कामदुघाश्चकार । ताꣳ ह स वरुणाय प्रददाविदं तव[8] मम[8] चेदममुष्य[8] च नौ सहेति । बृहस्पतय आङ्गिरसायेदं नावाख्यास्ता विधारयानावहस्येदमव्यमीति[9] विष्णवे शिपिविष्टाय चेत्यैषैवोक्थानाꣳ

---

१ °ाचरद° only in L and Be.

२ °वास्मिन्नप्रति° Be; वा अस्मिन्नप्रति° L; °वस्म्याप्रति° the other MSS.

३ Emended; प्रत्यतस्थानथो L; प्रत्यवस्थापयदथो the other MSS.

४ हेंद्रं MSS.

५ अभिवरुधे L; अभिवरोधे Be; आवरोद्धे the other MSS.

६ यमेनमेतं (or °तत्) L Be; यमेवमेतरम् or पयमेवमेतरम् the other MSS.

७ Thus L; ब्रवीषि इति Be; ब्रवीति the other MSS.

८ तवचमम इदममुष्य Be; तवचममेवेदममुष्य L; नोच (नचि) मम चेदमुष्य the other MSS.

९ Thus (hopelessly corrupted as it seems) Be; नावाख्यास्वदिधारयाम्नावदहस्येदमव्यमसीति L; नावाख्याचा (or ख्या) पिधारयाचा (or या) पदस्येदमंब्रवीति the other MSS.

सृष्टिरेतच्चिदानमथो हास्यैव मनुर्वैवस्वतः शून्यमानः सस्वस्वास[1] । तस्मै चतुर्थौ प्रददौ । ताꣳ सो ऽस्यां न्यदधात्सेयं[2] कृष्टिरेवैष[2] कृष्टेः[2] सृष्टिरेतच्चिदानं । तौ ह वा एतावौशनसौ नाम पुनस्तोमौ भवतः । स यो गुरुरिव मन्येत गरमिव गीर्त्वायाज्यं वा याजयित्वाप्रतिग्राह्यस्य वा प्रतिगृह्य तं द्वादशस्तोमेनाग्निष्टोमेन याजयेदश्नुते हैव लघुतामथ यो लघुरिव चरेदप्रतिष्ठितस्तमेकविꣳशतिस्तोमेनाग्निष्टोमेन याजयेत्प्रत्येव तिष्ठति ॥ ॥ ४७ ॥ त्रयोदशः ॥

अथ प्रणोदः । समानमभिचरणीयꣳ शिल्पं । प्रातःसवनीयाननुवर्तते ऽग्नये प्रवते पुरोडाशो ऽष्टाकपालस्त्रिवृद्देष भवत्यथ विबाधः । समानमभिचरणीयꣳ शिल्पं । माध्यंदिनीयाननुवर्तते ऽग्नये विबाधवते पुरोडाशो ऽष्टाकपालस्त्रिवृद्देवैष भवत्यथ प्रतिनोदः[3] । समानमभिचरणीयꣳ शिल्पं । तृतीयसवनीयाननुवर्तते ऽग्नये प्रतीकवते पुरोडाशो ऽष्टाकपालस्त्रिवृद्देवैष भवत्यथाग्नेरतिव्याधः । समानमभिचरणीयꣳ शिल्पमनूबन्ध्यस्य पशुपुरोडाशमनुवर्तते ऽग्नये वसुमते पुरोडाशो ऽष्टाकपालस्त्रिवृद्देवैष भवत्यथैन्द्रवज्रः । समानमभिचरणीयꣳ शिल्पं । पञ्चदश एव भवति ॥ शुनस्कर्णो ह

१ Thus L Be; सस्व (or स्व) हास the other MSS.

२ सेयं कृषिरेवैषकृषे L; सोयं कृषिरेवैष कृषेः Be; सेय्येकृषिरेय्यैवतुष्टेः the other MSS.

३ प्रतीनोदः L.

वै ग्रैब्यो राजा पुण्यकृद्दक्षयाञ्चकार । स ह पापीयाञ्जनतां[1] प्रतिहितां[1] प्रतिख्यायर्त्विजः[1] पप्रच्छास्ति स्वित्स यज्ञक्रतुर्येनाहमिहैव प्रयायामित्यस्ति[2] हीति[2] हैनमृत्विजः प्रत्यूचुस्तस्या अध्वर्युरयोनौनपुरोरुक्कान्[3] ग्रहाञ्जग्राह । स्वराण्युद्गाता सामान्यनैडान्यनिधनानि[4] । पराङ्घेवर्ग्निमयम्[5] होतानूवाच । स हावभृथादेवोदेत्य ममार । यं द्विष्यात्तस्यैवं यज्ञं[6] कुर्यादुपस्तुतं[7] वा याजयेत्क्षिप्रं हैवास्माल्लोकात्प्रैतीत्य॥थ राष्ट्रिमराया-वित्याचक्षते । चतुष्टोमे राष्ट्रिकृतं[8] धान्यं ददाति । स राष्ट्रिश्चतुष्टोम एव मरायकृतम् । स मरायो ॥ ऽयाञ्जनाभ्यञ्जना-वित्याचक्षत । आक्ताक्ता[9] अलंकृता[9] ऋत्विजः प्रचरन्ति । स

1 पापो (पापा) जनतां etc. as above Be L; पापीयांजानता प्रतिहितां प्रतिखा (or ख्यां) यर्त्विजः the other MSS.

2 प्रययामी(मि)त्यस्ति चाह (हा) इति Be L; प्रायाणमित्यास्ति हीह इति the other MSS.

3 Conjecture; °योनौनपुरोरुक्कान् Be; अयोनान्पुरोरुक्कान् L; अयोनपुरोरुक्नान् the other MSS.

4 सामान्यनैनत्निनिध° Be; सान्यनैनन्यनिध° L; सामान्यनैडास्य° (डास्य°) the other MSS.

5 पराङ्घेवर्ग्य Be; पराञ्चवर्ग्य L; परां (or परा) इति (or इव) द्रु (or द्र) वर्ग्य the other MSS.

6 यज्ञे MSS.

7 °दुपाहृतं L.

8 राष्ट्री° Be; राष्ट्रि° the other MSS.

9 आंक्ताचालंकृता Be; आक्ताक्तकालंकृता L; आक्ताचालंकृता the other MSS.

आञ्जनो ॥ ऽभ्यक्ताः[1] आमूलवाससः[1] । सो ऽभ्यञ्जनो ॥ ऽथ विषूचीनशालो भ्रातृव्यवतो यज्ञः । स तथा देवयजनं जोषयते यथा प्राचीनमाहवनीयात्प्रवणꣳ स्यात्प्रतीचीनं गार्हपत्यादिति । तदेते विषूचीनशाले मापयन्ति[2] । प्रचरन्ति प्राञ्चः प्रत्यञ्चः प्रचरन्ति । मध्ये गार्हपत्यो भवति । मध्यत आसीनाय भक्षानाहरन्त्यनुदिशꣳ स्तोमौ स्यातामित्येतदेकमेकविꣳशौ[3] स्यातामित्येतदेकमनादृत्य तच्चतुष्टोमावेव कुर्वन्ति ॥ ॥ ४८ ॥

[4]देवासुरा ह यत्र महासंग्रामꣳ[5] संयेतिरे तद्ध शिबिरौशीनरो देवानां वर्गादसुराञ्जिगाय[6] । तस्मै हेन्द्रो जितवरं ददौ । स होवाच शिबिर्नैष्ठ्य[7] भयं न गच्छेदिति । तं वर्षिष्ठीयप्रस्थे[8] सर्वतोमुखेन याजयां चकार । ततो ह वा एतच्छिबिं नैष्ठ्यं[7] भयं न गच्छति । यं कामयेतानपजय्यं जयेदिति तं वर्षिष्ठीयप्रस्थे[8] सर्वतोमुखेन याजयेदनपजय्यमेव

१ ऽभ्यक्तोऽभ्यामूलवासः L Be ; ऽभ्यक्ताः समूलवासः the other MSS.

२ °यंति Be ; °यति the other MSS.

३ °मेकविंशौ L Be ; विंशौ the other MSS.

४ For the following cp. also Eggeling, Catal. of the MSS. of the India Office vol. I, p. 87 (designed by me as E).

५ महा° om. all exc. E L.

६ Thus (°सुरांजि°) Be L only ; °सुरायाञ्जिगाय° or °सुरायांजि° the other MSS.

७ नैष्ठ्यं L Be ; चैष्ठ्यं or च्यैष्ठ्यं the other MSS.

८ Thus L Be ; °प्रस्थेन the other MSS.

जयति। तदेतास्वतस्रः शाला अनुदिशं मापयन्ति। प्रचरन्ति
प्राञ्चः प्रचरन्ति दक्षिणा प्रचरन्ति प्रत्यञ्च उदञ्चः प्रचरन्ति।
मध्ये गार्हपत्यो भवति। मध्यत आसीनायाश्वतरीरथैर्भक्षा-
न्संवहन्त्यनुदिशꣳ स्तोमाः स्युरित्येतदेकमेकविꣳशाः स्युरि-
त्येतदेकमनादृत्य तच्चतुष्टोमानेव कुर्वन्ति॥ पार्थः। पार्थो[1] ह
स्थपतिर्दैवानैषात्स[2] ह[2] सुतसोमान्सहस्रदक्षिणान्सहस्रमसुनोत्स
ह[3] देवानाप[3]। स[3] एतान्सोमानाहरिष्यन्नुपकल्पयते[3] शालाः[4]
सहस्रꣳ सहस्राणि सहस्रमश्वतरीरथाꣳस्तदेताः शाला अनु-
दिशं मापयन्ति द्वे च शते पश्चाच्छतं च पुरस्तादेवं दक्षि-
णत एवं पश्चादेवमुत्तरतः। प्रचरन्ति प्राञ्चः प्रचरन्ति दक्षिणा
प्रचरन्ति प्रत्यञ्च उदञ्चः प्रचरन्ति। मध्ये गार्हपत्यो भवति।
मध्यत आसीनायाश्वतरीरथैर्भक्षान्संवहन्त्यनुदिशꣳ स्तोमाः
स्युरित्येतदेकमेकविꣳशाः स्युरित्येतदेकमनादृत्य तच्चतुष्टोमा-
नेव कुर्वन्ति॥ ॥ ४९ ॥ चतुर्दशः ॥

यमाभ्याꣳ स्तोमार्धां यक्ष्यमाणो भवति। स तया देवय-
जनं जोषयते यथान्तरेण चात्वालोत्करावुदकसंचारी स्यादिति।
तदेते प्रवाहुक् शाले मापयन्ति। स दक्षिणार्ध्याꣳ[5] शालामध्यव-

१ Thus Be; पार्थे and पार्श्वे the other MSS.

२ Instead of सह Be सन, L सङ्ग; सवन the other MSS.

३ Thus my conjecture; सचति एतान्सोमानाचरि॰ MSS. exc. Be which has only सोमानाचरि॰ and L, which has सचेनिमचातान्सोमा॰।

४ शाला Be; शालार्ध L; शालापि the other MSS.

५ Thus L Be; दक्षिणस्यां the other MSS.

साय मथित्वाग्नीन्विहृत्य दीक्षणीयामिष्टिं निर्वपत्यथोत्तरार्धꣳ शालामध्यवसाय मथित्वाग्नीन्विहृत्य[1] दीक्षणीयामिष्टिं[1] निर्वपति[1] । तयेह प्रचर्याथामुत्र प्रचरतीह दीक्षाहुतीर्जुहोत्यथामुत्रेह प्रायणीयामिष्टिं निर्वपत्यथामुत्र । तयेह प्रचर्याथामुत्र प्रचरतीह पदेन चरित्वा राजानं क्रीत्वोह्यातिथ्यं निर्वपत्यथामुत्र । तेनेह प्रचर्याथामुत्र प्रचरतीह प्रथमाभ्यां प्रवर्ग्योपसद्भ्यां प्रचरत्यथामुत्रेह मध्यमाभ्यां प्रवर्ग्योपसद्भ्यां प्रचरत्यथामुत्रेह महावेद्यै पूर्वं परिग्राहं परिगृह्णात्यथामुत्रेहोत्तमाभ्यां प्रवर्ग्योपसद्भ्यां प्रचरत्यथामुत्रेहाहवनीयं प्रणयत्यथामुत्रेह सदोहविर्धाने संमिनोत्यथामुत्रेहाग्नीषोमौ प्रणयत्यथामुत्रेह[2] यूपस्याहृता यूपमुच्छ्रयति स्वर्वन्तं यूपमुत्सृज्याग्नीषोमीयं पशुमुपाकरोत्यथामुत्र । तस्येह प्रसिद्धं वपया चरित्वा वसतीवरीर्गृह्णात्यथामुत्रेह पशुपुरोडाशं निर्वपत्यथामुत्र । तेनेह प्रचर्यायमुत्र प्रचरतीहाग्नीषोमीयेण प्रचरत्यथामुत्रेह[3] वसतीवरीः परिहृत्य पयाꣳसि विशिष्योपवसन्त्यथामुत्रेह त्वेव संविशन्तीह राजानमुपावहृत्य प्रातरनुवाकमुपाकरोत्यथामुत्रेहानुपूर्वꣳ सवनानि[4] संतिष्ठन्त्या समुदितादेवमेवोत्तरस्याꣳ शालायाꣳ सवनानि[4] संतिष्ठन्त्या समुदितादिहावभृतेन प्रचरत्यथामुत्रेहोदयनीयामिष्टिं

---

१ These six words, indicated by ∘ in Be, are given only by L.

२ प्रणयत्य० L Be; प्रवर्त्य० the other MSS.

३ चरत्य० MSS.

४ Thus L Be; सवनीयानि the other MSS.

निर्वपत्यथामुत्र ' तयेह प्रचर्यामुत्र प्रचरतीत्येव मैत्रावरुणीं वशामुपाकरोत्यथामुत्र ' तयेह प्रचर्यामुत्र प्रचरति ' समान्युदवसनीयेष्टिरथ[1] यत्प्राक्[2] सवनेभ्यो[2] ऽधि व्यतिषक्तानि कर्माणि क्रियन्ते तस्माद्यमावन्तरुदरे व्यतिषक्तौ सह[3] शयाते ' अथ यदनुपूर्वं सवनानि संतिष्ठन्ते तस्मादनुपूर्वौ जायेते ' अथ यदूर्ध्वं[4] सवनेभ्यो ऽधि व्यतिषक्तानि कर्माणि क्रियन्ते तस्मात्सहाशयन्ति सह पाययन्ति सह चरतो ' ऽथ यत्समान्यरणिस्तस्मात्समानौ[5] योनिरग्निश्च ह वा आदित्यश्च समानलोकं[6] जिगीषमाणावेतं यज्ञक्रतुमपश्यतां तमाहरतां तेनायजेतां ' ततो वै तौ समानलोकावभवतां समानं लोकमैतां[7] ' यः कामयेताग्नेश्चादित्यस्य च समानं लोकमियामिति स एतेन यज्ञक्रतुना यजेताग्नेश्चैवादित्यस्य च समानं लोकमेति ॥ ५० ॥ पञ्चदशः ॥

वाजयाजी ह वा अन्यो भवत्यन्य उ वाजपेययाज्येष ह वै वाजयाजी यः पेयैरनिष्ट्वाथ वाजेन यजत एष उ वाजपेययाजी यः पेयैरिष्ट्वाथ वाजेन यजते ' तस्मादु पेयैरेवेष्ट्वाथ

---

१ Thus L Be; समान्योदव॰ the other MSS.

२ यत् only in L; प्रातः instead of प्राक् L; सवनीयेभ्यो L Be.

३ Only in L and Be.

४ यदनुपूर्वं MSS. exc. and Be.

५ यत् om. L Be; यत्समान्यरणी the other MSS.

६ समानं L Be; समानलोका the other MSS.

७ After ऐतां L Be have समानलोकावयत्; the other MSS. read समानंलोकावयवहन्त्य or ॰कावयहन्त्य।

वाजेन यजेत । पेयैर्यक्ष्यमाणो भवति । सो ऽनिष्ट्वैव पौर्णमास्यां दीक्षते । तस्यापरिमिता दीक्षा द्वादशोपसदः । स तथा राजानं क्रीणाति यथा मन्यते ऽमावास्यायै[1] मे यज्ञिये ऽहन्सुत्या संपत्स्यत इति । तस्य तथा संपद्यते । प्रसिद्धेन कर्मणोपवसथादेत्यथ वसतीवरीः परिहृत्य पयांसि विशिष्योपवसन्त्यथैतां सवनेष्टिं निर्वपत्याग्नेयमष्टाकपालमैन्द्रमेकादशकपालं वैश्वदेवं द्वादशकपालं । तथा द्वादशाहानि यजते । ऽथ त्रयोदशे ऽह्नि पौर्णमासेन हविषा यजते येनास्यानिष्टं भवत्यथ चतुर्दशे ऽहन्यामावास्येन हविषा यजते येनास्यानिष्टं भवत्यथैतेषां यज्ञक्रतूनामेकेन यजते । ऽथ पुनर्दीक्षते । स एवमेव संवत्सरं यजते । तस्याहानि त्रिवृत्पञ्चदशो[2] ऽथ त्रिवृत्सप्तदशो ऽथ त्रिवृदेकविंशो ऽथ त्रिवृत्त्रिणवो[3] ऽथ त्रिवृत्त्रयस्त्रिंशो ऽथ त्रिवृच्चतुष्टोमो[4] । मासानामेव रूपं पेयाः[5] । संवत्सरस्य रूपं वाजः । एवमस्यैव[6] संवत्सरः परीष्ट एवमाप्तो भवत्यथाहीनविधिस्तस्याहानि[7] त्रिवृत्पञ्चदशः[8] सप्तदशश्चतुष्टोमस्त्रिवृदेवाथैकविंशो[8] ऽथ त्रिणवो ऽथ चतुष्टोम-

---

१ ऽमावास्यै Be, मावास्यै L (the other MSS. om. this passage).

२ Thus L Be; °पंचदशः सप्तदशः the other MSS.

३—४ Thus L Be; the other MSS. have only त्रिवृच्चतुष्टोमौ ।

५ Thus L Be; रूपमपेयान् or °पेयान् the other MSS.

६ Thus L Be; स एव the other MSS.

७ °विधस्तस्या° Be.

८ Thus L Be; °पंचदशश्चतुष्टो° the other MSS.

त्रिवृद्देवाय त्रयस्त्रिंशो ऽथ चतुष्टोमस्त्रिवृद्देवाय[१] चतुश्चत्वारिंशो ऽथ चतुष्टोमो ऽथातिरात्रो ' द्वादश[२] मासाः सप्तदश क्रतवो ' नवसु मासेषु नव क्रतूनुपैत्यथातिशिष्यन्ते त्रयश्च मासा अष्टौ च क्रतवः ' स द्वौ त्रिरात्रौ कुरुत एकं च द्विरात्रं ' यद्यु वा एतदुपात्येति चतुष्टोमेनाग्निष्टोमेन यजेत ' मासानामेव रूपꣳ स्तुतशस्त्राणि संवत्सरस्य रूपमग्निष्टोमो[२] वाज[२] ' एवमस्यैव[२] संवत्सरः परीष्ट एवमाप्तो भवत्यथातो ऽयुजश्चैव[३] युग्माश्चैकस्याꣳ स्तुवते ऽथ तिसृष्विति त्वयुजो ' ऽथ युग्मार्थंतसृषु स्तुवते ऽथाष्टास्विति युग्मा ' अयुजां चैव[४] युग्मानां चैव सायुज्यꣳ सलोकतामाप्नुवन्ति य एतेनायनेन यन्ति य उ चैनदेवं विदुः '' ॥ ५१ ॥

अथातो दिशामेव ' त्रिवृत्प्राच्यै ' पञ्चदशो दक्षिणायै ' सप्तदशः प्रतीच्या ' एकविंश उदीच्यै ' त्रिणव इत[६]

१—१ Wholly uncertain; चतुष्टोमैर्विꣳशो थ चतुष्टोमस्त्रिवृद्देवाय चतुश्चत्वारिꣳशोथाष्टाचत्वारिꣳशोथ चतुष्टोमोथातिरात्रोद्वादश L Be; चतुष्टोमस्त्रिवृद्देवाय चतुश्चत्वारिꣳशोथ चतुष्टोमोथातिरात्रोथ द्वादश the other MSS., partly incomplete.

२ Thus MSS. exc. Be, which reads °ष्टोमस्यैव and L, which omits वाज ।

३—४ Thus, on the whole, L; युजश्चैकस्यां स्तुवते थ तिसृष्विती त्वायुजो थ युग्मांश्चतसृषु स्तुवते थाष्टासुरिति युग्मा अयुजांश्चैव Be; युजश्चैव युग्मां (or था-) श्चैकस्यां स्तुवते (ति) थ तिसृष्विति त्वयुजो थ युग्मांश्चतसृषु स्तुवते थाष्टासुरित्यथ युग्मा अयुजश्चैव the other MSS.

६ Only in Be.

ऊर्ध्वायै । त्रयस्त्रिꣳशो ऽमुतो ऽर्वाच्यै । सर्वासामेव चतुष्टोमो । दिशामेव सायुज्यꣳ सलोकतामाप्नुविन्ति य एतेनायनेन यन्ति य उ चैनदेवं विदुर् ॥ अथात ऋतूनामेव । त्रिवृद्वसन्तस्य । पञ्चदशो ग्रीष्मस्य । सप्तदशो वर्षाणामेकविꣳशः शरदस्त्रिणवो हेमन्तस्य । त्रयस्त्रिꣳशः शिशिरस्य । सर्वेषामेव चतुष्टोम । ऋतूनामेव सायुज्यꣳ सलोकतामाप्नुवन्ति य एतेनायनेन यन्ति य उ चैनदेवं विदुर् ॥ अथात ऋषीणामेव । त्रिवृद्वसिष्ठस्य । पञ्चदशो भरद्वाजस्य । सप्तदशो विश्वामित्रस्यैकविꣳशो जमदग्नेस्त्रिणवः कश्यपस्य[1] । त्रयस्त्रिꣳशो गौतमस्यागस्त्यस्य[2] चतुष्टोम । सर्वेषामेव चतुष्टोम । ऋषीणामेव सायुज्यꣳ सलोकतामाप्नुवन्ति य एतेनायनेन यन्ति य उ चैनदेवं विदुर् ॥ अथातो देवतानामेव । त्रिवृदग्नेः । पञ्चदश इन्द्रस्य । सप्तदशः प्रजापतेरेकविꣳशो ऽमुष्य[3] तपतस्त्रिणवश्चन्द्रमसस्त्रयस्त्रिꣳशो विश्वेषां देवानाꣳ[4] । सर्वासामेव चतुष्टोमो । देवतानामेव सायुज्यꣳ सलोकतामाप्नुवन्ति य एतेनायनेन यन्ति य उ चैनदेवं विदुः ॥ ॥ ५२ ॥

अथातो दर्शपूर्णमासयोरयनमित्याचक्षते । सूर्याचन्द्रमसोरयनमित्येक आहुः । पौर्णमासेन[5] सोमेन यक्ष्यमाणो भवति । दीक्षते । तस्यापरिमिता दीक्षाः षडुपसदः । स तथा राजानं

---

१ कश्य° Be, काश्य° the other MSS.

२ Thus L and Be; all the other MSS. om. अग°।

३ Instead of मुष्य Be: ष्प, L मु।

४ Thus L Be; the other MSS. have सर्व after देवानां।

५ पूर्ण° MSS. exc. L.

क्रीणाति यथा मन्यते पौर्णमास्यै मे यज्ञिये ऽहन्सुत्या संपत्स्यत इति । तस्य तथा संपद्यते । प्रसिद्धेन कर्मणोपवसथादेत्यथ वसतीवरीः परिहृत्य पयाꣳसि विग्रथ्योपवसन्त्यथ प्रातराग्नेयं पशुमुपाकरोति । तस्याग्नीषोमीय उपालम्भ्यो भवति । तस्य प्रातःसवनीयाननुवर्तन्ते पौर्णमासहवीꣳषि । प्रैषवन्तः सवनीया अनुब्रूहि यजेतीतरेषाꣳ हविषाम्संजुधा ज्योतिरुक्थ्यः संतिष्ठत ॥ आमावास्येन सोमेन यक्ष्यमाणो भवति । दीक्षते । तस्यापरिमिता दीक्षा द्वादशोपसदः । स तथा राजानं क्रीणाति यथा मन्यते ऽमावास्यायै मे यज्ञिये ऽहन्सुत्या संपत्स्यत इति । तस्य तथा संपद्यते । प्रसिद्धेन कर्मणोपवसथादेत्यथास्यैतदहरिन्द्राय वत्सा अपाकृता भवन्त्यैन्द्रं पयो दोहयन्ति सांनाय्यस्य वावृता तूष्णीं वाथ वसतीवरीः परिहृत्य पयाꣳसि विग्रथ्योपवसन्त्यथ प्रातराग्नेयं पशुमुपाकरोति । तस्यैन्द्र ऋषभ उपालम्भ्यो भवति । तस्य प्रातःसवनीयाननुवर्तन्त आमावास्यानि हवीꣳषि । प्रैषवन्तः सवनीया अनुब्रूहि यजेतीतरेषाꣳ हविषाम्संजुधा ज्योतिरतिरात्रः संतिष्ठते । सूर्याचन्द्रमसयोरेव तस्यायुज्यꣳ सलोकतामाप्नुवन्ति य एतेनायनेन यन्ति य उ चैनदेवं विदुर्य उ चैनदेवं विदुः ॥ ५३ ॥ षोडशः[१] ॥

॥ इत्यष्टादशः प्रश्नः ॥

---

१ इत्युत्तरा ततिः समाप्ता MSS.

सावित्रꣳ स्वर्गकामश्चिन्वीत । पशुवन्धे चेच्चीयते षड्ढोतारꣳ हुत्वा यूपाहुतिꣳ हुत्वा यूपꣳ सयजुषं कृत्वा वेदिं विमिमीते । वेदिष्ठतीर्थे यजेतेति विज्ञायते । तस्याः सौमिकं मानमेतावदेव नाना । सौमिकात्प्रक्रमात्तृतीयो ऽꣳशः प्रक्रमः स्यात्तेन वेदिं विमिमीते । ऽपि वा पदात्तृण्या[1] पार्श्वमानी पदं तिरः पशुमानेन तयोर्यः कर्णसंमितः प्रक्रमः स इष्यते । पदादा नवमस्तदत्तृण्या[2] तयोस्तु यः कर्णसंमितः स प्रक्रमार्धस्तेन[3] सैषा सौमिकी वेदिरग्नेरन्वादध्याद्धृतमुपेयादिध्मावर्हिः संनह्य[4] स्तम्बयजुर्हरतीदमेव प्रसिद्धं पौरोडाशिकं चित्यंशुषा तूष्णीं चतुर्थं पूर्वं प्ररिग्राहं परिगृह्णाति करणं जपत्युद्धन्त्युद्धृतादाग्नीध्रश्चिर्हरति । यदाग्नीध्रश्चिर्हरत्यथैतमग्निं प्रत्यञ्चं यूपावटीयाच्छङ्कोर्विमिमीते । पक्षःसंमितश्चेतव्य इति रथचक्रमात्र एवैष उक्तो भवत्यथाप्युदाहरन्ति शुल्बविदः[5] प्रथमं चक्रं द्वौ सार्धौ मध्यमं त्रिभागोनास्त्वय उत्तममिति । तेषामन्यतममाचीꣳ रज्जुमुभयतःपाशां कृत्वोत्तरवेदिदेशस्य मध्ये शङ्कुं निहत्य तस्मिन्पाशौ प्रतिमुच्य तस्मिन्नन्ते ऽन्यꣳ शङ्कुं

---

१ Thus MHBU; यद° Be Ben.

२ Thus M Ben.; नवमात्सस्यात्तृण्या U; नवमस्तस्यात्तृण्या H; नवमस्तत्तृण्या Be; B om. the whole phrase.

३ Thus MHU; °मार्धस्तेन Be Ben.

४ Thus MHUB; संस्तृत्य Be Ben.

५ °रज्ञि M.

प्रास्य तेनैनं प्रदक्षिणं परिमण्डलं[1] परिलिखत्यपोद्धृत्य स्फ्यां कर्षूः खानयन्त्युच्छ्रयन्त्यपस्था[2] । दक्षिणतश्च पश्चाच्च वर्षीयसीः कुर्वन्त्यथ याचत्याज्यस्थालीꣳ स्रुवाꣳ स्फ्यं दर्भस्तम्बमुदपात्रमौत्तरवेदिकाꣳश्च[3] संभारान्दधि मधुमिश्रꣳ हिरण्यं च शर्कराः[4] सिकताश्च[4] दर्भानित्येतत्समादायोत्तरार्धे सꣳसादयन्त्यथ द्वाभ्यामात्मन्यग्निं[5] गृह्णीते मयि गृह्णाम्यग्रे अग्निं यो नो अग्निरिति । स्वयंचितिं जपति यास्ते अग्ने समिधो यानि धामेति । श्वेतमश्वमभिमृश्यान्तःशर्करमिमामुपदधाति प्रजापतिस्त्वा सादयतु तया देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यथ शङ्कुमुद्धृत्योदपात्रमुपनिनीय दर्भस्तम्बमुपदधाति वाक्त्वा समुद्र उपदधात्विति वा तूष्णीं वाथैनꣳ स्रुवाहुतिभिरभिजुहोति मजूरब्दो ऽयावभिरिति पञ्चभिस्तयादेवतं कृत्वा सूददोहसं करोति । ॥ १ ॥

अथ चात्वालस्याहृता चात्वालं परिलिखत्युत्तरवेदेराहृतोत्तरवेदिं निवपत्युत्तरनाभिमुत्खाय यूपावटं[6] खात्वा[6] प्रोक्ष्य व्याघार्यालङ्कृत्य सिकता निवपत्यग्ने तव श्रवो वय इति

१ परि० om. M. and some of the other MSS.

२ खानयन्त्य० M.

३ च om. M.

४ सिकताः शर्कराश्च M.

५ Thus MHUB; ०त्मन्नग्निं Be Ben.

६ Om. M Be Ben.; M om. also प्रोक्ष्य ।

षड्भिरनुष्टुप्छन्दसमंयोर्ध्वचित उपदधाति चित स्थ परिचित ऊर्ध्वचितः श्रयध्वं तया देवतयाङ्गिरस्वद्ध्रुवाः सीदतेत्यथानुव्यूहत्याप्यायस्वेति गायत्र्या ब्राह्मणस्य सं ते पयांसीति त्रिष्टुभा राजन्यस्य । यथासुखं यथाशर्करमनुव्यूहति । तस्यां[1] नव[1] परिमण्डला[1] लेखा लिखत्यथ[2] दध्ना मधुमिश्रेण शर्कराः समज्य सायमग्निहोत्रं हुत्वाग्नीन्परिस्तीर्योपवसत्यथ प्रातर्हुते ऽग्निहोत्रे याचत्युदपात्रं भस्म पुरीषमूषान्सिकता यावदुत्तममङ्गुलिकाण्डं यजमानस्य संमितं तावन्मात्रीः[3] पञ्चाशीतिशतं हिरण्येष्टकाः शर्करा वा एतावन्मात्रास्तावत्यो[4] लोकंपृणा अपरिमिता वा चतस्रः स्वयमातृण्णाः सहस्रं हिरण्यशल्कानूर्ध्वं त्रिभ्यो । ऽपरिमितानित्येक आहुस्ते यदि सहस्रं भवन्ति द्वे द्वे शते पञ्चमाडीयोते[5] भवतो । ऽथोदित आदित्ये द्वाभ्यामात्मन्यग्निं[6] गृह्णीते मयि गृह्णाम्यग्रे अग्निं यो नो अग्निरिति । स्वयंचितिं जपति यास्ते अग्ने समिधो यानि धामेति । श्वेतमश्वमभिमृश्याधिद्रवणं जपत्यपामिदं न्ययनं नमस्व इति द्वाभ्यामंथापरार्धे उदपात्रमुपदधाति वाङ्मा

१ Thus Ben. UH (the last तस्या); तस्यां नव मंडला Be; तस्मिन्नेव परिम° MB.

२ लिखित्वा MB.

३ °मात्रं M.

४ एतावन्मात्रा° M.

५ Thus MHU; °माडीयोते B; °माडीयीते Be Ben.

६ Thus MBHU; °मग्निं Be Ben.

समुद्र उपदधे सुप्रजावनिꣳ रायस्पोषवनिं मह्यं यजमानायेति । तयादेवतं कृत्वा सूददोहसं करोत्यथ संभारान्निवपत्यग्नेर्भस्मासीति भस्माग्नेः पुरीषमसीति पुरीषꣳ संज्ञानमसि कामधरणमित्यूषान्मयि ते कामधरणं भूयादिति सिकता । अथैनान्त्संप्रयौति सं या वः प्रियास्तनुवः सं प्रिया हृदयानि वः । आत्मा वो अस्तु संप्रियः संप्रियास्तनुवो ममेत्यथैनान्कल्पयति कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधीः । कल्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रता इति । तांꣳस्तथा कल्पयति यथा न लेखाः संलोपयन्ति[1] । सद्यो वा सर्वं क्रियते सद्यस्काले । ॥ २ ॥ प्रथमः ॥

अथान्तमायां लेखायां पूर्वपक्षस्य दिनेष्टका उपदधाति संज्ञानं तया देवतयाङ्गिरस्वद्ध्रुवा सीद विज्ञानं तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति पञ्चदश । तासामन्तरालेष्वेतेषामेव दिनानां मुहूर्तेष्टका उपदधाति चित्रस्तया देवतयाङ्गिरस्वद्ध्रुवा सीद केतुस्तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति पञ्चदश । सर्वासां पारे सूददोहसः करोत्यथाभ्यन्तरायां लेखायां पूर्वपक्षस्य क्षपेष्टका उपदधाति दर्शा तया देवतयाङ्गिरस्वद्ध्रुवा सीद दृष्टा तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति पञ्चदश । तासामन्तरालेष्वेतासामेव[2] क्षपाणां मुहूर्तेष्टका उपदधाति दाता तया देवतयाङ्गिरस्वद्ध्रुवा सीद प्रदाता तया देवतयाङ्गि-

१ संयोपयंते Be Ben.

२ Thus MU ; एतेषामेव the other MSS.

रस्वद्ध्रुवा सीदेति पञ्चदश । सर्वासां पारे सूददोहसः करोत्यथाभ्यन्तरायां लेखायामपरपक्षस्य दिनेष्टका उपदधाति प्रस्तुतं तया देवतयाङ्गिरस्वद्ध्रुवा सीद विष्टुतं तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति पञ्चदश । तासामन्तरालेष्वेतेषामेव दिनानां मुहूर्तेष्टका उपदधाति सविता तया देवतयाङ्गिरस्वद्ध्रुवा सीद प्रसविता तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति पञ्चदश । सर्वासां पारे सूददोहसः करोत्यथाभ्यन्तरायां लेखायामपरपक्षस्य क्षपेष्टका उपदधाति सुता तया देवतयाङ्गिरस्वद्ध्रुवा सीद सुन्वती तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति पञ्चदश । तासामन्तरालेष्वेतासामेव क्षपाणां मुहूर्तेष्टका उपदधात्यभिशास्ता तया देवतयाङ्गिरस्वद्ध्रुवा सीदानुमन्ता तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति पञ्चदश । सर्वासां पारे सूददोहसः करोत्यथाभ्यान्तरायां लेखायां पूर्वपक्षेष्टका उपदधाति पवित्रं तया देवतयाङ्गिरस्वद्ध्रुवा सीद पवयिष्यꣳस्तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति द्वादश । सर्वासां पारे सूददोहसः करोत्यथाभ्यन्तरायां लेखायामपरपक्षेष्टका उपदधाति सहस्वाꣳस्तया देवतयाङ्गिरस्वद्ध्रुवा सीद सहीयाꣳस्तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति द्वादश । सर्वासां पारे सूददोहसः करोत्यथाभ्यन्तरायां लेखायां मासेष्टका उपदधात्यरुणस्तया देवतयाङ्गिरस्वद्ध्रुवा सीदारुणरजास्तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति त्रयोदश । सर्वासां पारे सूददोहसः करोत्यथाचैके[1]

---

१ Thus Be HUB ; ॰थाचैकेक Ben. ; थचैके M.

लेखान्तरालेषु[1] सिकता निवपन्त्येजत्का ओवत्का इत्यथाभ्यन्तरायां लेखायां मुहूर्तानां मुहूर्तेष्टका उपदधातीदानीं तया देवतयाङ्गिरस्वद्ध्रुवा सीद तदानीं तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति पञ्चदश ' सर्वासां पारे सूददोहसः करोत्यथाभ्यन्तरायां लेखायां ऋत्विष्टकास्तुर्लिष्टकाश्चोपदधात्यग्निष्टोमस्तया देवतयाङ्गिरस्वद्ध्रुवा सीदोक्थ्यस्तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति षडग्निर्ऋतुस्तया देवतयाङ्गिरस्वद्ध्रुवा सीद सूर्य ऋतुस्तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति तिस्रः ' सर्वासां पारे सूददोहसः करोत्यथ मध्ये[2] नाभ्याꣳ संवत्सरेष्टका उपदधाति प्रजापतिस्तया देवतयाङ्गिरस्वद्ध्रुवा सीद संवत्सरस्तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति चतस्रः ' सर्वासां पारे सूददोहसः करोति ' ॥ ३ ॥

तदेतास्ततः स्वयमातृण्णा याचति ' ता दिक्षूपदधाति भूरग्निं च पृथिवीं चेति पुरस्ताद्भुवो वायुं चान्तरिक्षं चेति दक्षिणतः स्वरादित्यं च दिवं चेति पश्चाद्भूर्भुवः स्वश्चन्द्रमसं च दिशश्चेत्युत्तरतः ' सर्वासां पारे सूददोहसः करोत्यथ लोकंपृणा उपदधाति लोकं पृण छिद्रं पृणाथो सीद शिवा त्वम्। इन्द्राग्नी त्वा बृहस्पतिरस्मिन्योनावसीषदन्निति ' तयादेवतं करोति तया देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यथ सूददोहसं करोति

---

१ Thus Be Ben.; लेखाभ्यंतरेषु M; लेखांतरेषु HU; लेखायां B.

२ मध्यमे M.

ता अस्य सूददोहसः सोमꣳ श्रीणन्ति पृश्नयः । जन्मन्देवानां विशस्त्रिष्वा रोचने दिव इति । प्राच्याञ्च लोकंपृणया प्रत्यौत्यग्निं प्राचीभिः संप्रच्छादयन्ति । संप्रच्छन्नं पलाशशाखया परिकर्षति लोकं पृण छिद्रं पृणेत्यथानभिमृष्टं चितिकॢप्त्या भवत्यथाग्निमभिमृशति[1] यत्ते ऽचितं यदु चित्तं ते अग्न इति द्वाभ्यामथ चितिकॢप्त्याभिमृशति चित्तिमचित्तिं चिनवद्वि विद्वानित्यग्ने देवाꣳ इहावहेत्याग्नेय्या गायत्र्यैनां चितिमभिमृश्य द्वे[2] अवद्रवणे[2] जपति[2] वाङ्म आसन्प्राणदा इत्यथ[3] कृष्णमश्वमभिमृश्य तत्पुरीषमुपदधाति पृष्टो दिवीति । तथादेवतं कृत्वा सूददोहसं करोत्यथ पात्र्यामप आनीय हिरण्यशकलान्संप्रकीर्य द्वाभ्यांद्वाभ्याꣳ[4] शताभ्यां प्रोक्षति सहस्रस्य प्रमा असीति पुरस्तात्सहस्रस्य प्रतिमा असीति दक्षिणतः सहस्रस्य विमा असीति पश्चात्सहस्रस्योन्मा असीत्युत्तरतो । ऽथ मध्ये[5] द्वाभ्याꣳ शताभ्यां प्रोक्षति साहस्रो ऽसि सहस्राय त्वेत्यथोत्तरार्धे तिष्ठन्निष्टका धेनूः कुरुत इमा मे अग्न इष्टका धेनवः सन्त्वित्यान्तादनुवाकस्याथैवै ऽर्कपर्णेनाजवीरेण[6] चरमायामिष्टकायां जुहोति । स[7] यदद्वैनं[7]

१ परि instead of अभि M.

२ Thus HUB; द्वे अधिद्रवणे ज॰ Be Ben; द्वाभ्यामधिद्रवति M.

३ अथ instead of अथ M Ben. U.

४ द्वाभ्यां twice in BU only.

५ om. M.

६ जं॰ om. B Be H.—॰माजाची॰ Be Ben.

७ Thus M; सयदुवैनं B; दुयेवैनं Ben; यदुवैनं Be; सयचवैनं HU.

करिष्यन्भवत्यथैतस्यार्कपर्णस्य[1] पुटमन्तरवस्राविणं कृत्वोदङ् तिष्ठन्मुखदघ्ने धारयन्नाहाहरानयेति । स यत्र धारेष्टकां[2] प्राप्नोति तत्प्रतिपद्यते त्वमग्ने रुद्र इत्यान्तादनुवाकस्याथैतदर्कपर्णं यं द्वेष्टि तस्य संचरे पशूनां न्यस्यति । यद्यु वै न द्वेष्याखट्वटे न्यस्यत्यथैनमुपतिष्ठते त्वमेव त्वां वेत्थ यो ऽसि सो ऽसीत्येतेनानुवाकेनाथ सꣳहारविहाराभ्यामुपतिष्ठते संवत्सरो ऽसि परिवत्सरो ऽसीत्येतेनानुवाकेनाथाह होतरग्नेरुक्थ्येनाग्निमनुशꣳसेति । [3]यदि होता न कामयते यजमान एव जघनेनाग्निं तृणानि सꣳस्तीर्य तेषूपविश्याग्नेरुक्थ्येनाग्निमनुशꣳसति । भूर्भुवः स्वरित्येताभ्यामृग्भ्यां[4] त्रिस्त्रिरेकैकामन्वाह प्रणवेनाभिसंधानमेवमन्यत्राप्यृगुपसंधाने प्रणवेनैवाभिसंधानमत्र[5] ये ब्राह्मणा बहुविदस्तेभ्यो यद्दक्षिणा न नयेद्दुरिष्टꣳ स्यादग्निमस्य वृञ्जीरन्तेभ्यो यथाश्रद्धं दद्यात्स्विष्टमेवैतत्क्रियते । नास्याग्निं वृञ्जत इति ब्राह्मणम् । ॥ ४ ॥ द्वितीयः ॥

अथाभ्याधानप्रभृति पाशुबन्धिकं कर्म तायते । सिद्धमाग्निप्रणयनात्कृत्वाग्निं प्रणीयोपसमाधायाध्वराकृतिभिरभिहूय[6] नानाचतुर्गृहीतैरेता[6] आकूतीर्जुहोति । त्वमग्ने रुद्र

१ °त्यथैतदर्क° Be Ben.

२ °रेष्टकाग्निं M.

३ Before यदि Be HU ins. स ।

४ हाभ्यां instead of ग्भ्यां M.

५ प्रणवेनैवचाभि° M.

६ Thus HU (only °कूतीभि°); °ध्वराकूतीभिरभिहूयमानां चतु° M; °ध्वराकूतीरभिहूयमानानां चतु° Be Ben; °ध्वराकूतिभिर्हुत्वा नानाचतु° H.

इति शतरुद्रीयस्य रूपमग्नाविष्णू इति वसोर्धाराया अन्नपत इत्यन्नहोमः सप्त ते अग्ने समिधः सप्त जिह्वा इति विश्वप्रीरित्यथ स्रुवेणोपघातमेकविंशतिमाहुतीर्जुहोत्यसवे स्वाहा वसवे स्वाहेति हुत्वाहुत्वैव संस्रावान्यजमानस्याञ्जलावावपति[१] तैर्यजमानो मुखं विमृष्टे राज्ञी विराज्ञीत्येतेनानुवाकेनोत्तरपरियाणप्रभृति पाशुबन्धिकं कर्म तायते सिद्धमा मनोतायाः हुत्वा मनोतामनुद्रुत्य पशोरवदानानि संस्रुत्यौदुम्बरे[२] पात्रे[२] धृष्णो मृत्युग्रहं गृह्णाति विपश्चिते पवमानाय गायतेत्यनुद्रुत्योपयामगृहीतो ऽसि मृत्यवे त्वा जुष्टं गृह्णामीति दर्भैः परिमृज्योत्तरवेद्याꣳ सꣳसादयत्येष[३] ते योनिर्मृत्यवे त्वेत्यथ पशुना चरत्यथ वनस्पतिना चरत्यथ पुरस्तात्स्विष्टकृतो ऽथैनं सꣳहोत्वप उपस्पृशति[४] विद्युदसि विद्य मे पाप्मानमित्यथ जुहोत्यप मृत्युमप क्षुधमपेतः शपथं जहि। अधा नो अग्न आवह रायस्पोषꣳ सहस्रिणम्॥ ये ते सहस्रमयुतं पाशा मृत्यो मर्त्याय हन्तवे। तान्यज्ञस्य मायया सर्वानवयजामहे स्वाहेत्यथ हुत्वोपस्पृशेद्वृष्टिरसि वृश्च मे पाप्मानमित्यथ स्विष्टकृता चरत्युपहूयमानायामिडायामुप-

---

१ Thus (°वापति) M Be Ben BU (sec. m.); °वानयति HU (pr. m.).

२ Thus all exc. B, which has °वरेषु पात्रेषु।

३ सं om. HU.

४ Thus M Be Ben; °स्पृशेद् BHU.

ह्वयन्ति[1] ग्रहमुपहूतं[2] ग्रहं यजमानो भक्षयति भक्षो ऽस्यमृतभक्षस्य ते मृत्युपीतस्यामृतवतः स्वगाकृतस्य मधुमत उपहूतस्योपहूतो भक्षयामीति । भक्षयित्वात्मानं प्रत्यभिमृशते मन्त्राभिभूतिः केतुर्यज्ञानामित्यान्तादनुवाकस्यानूयाजप्रभृति पाशुबन्धिकं कर्म तायते । सिद्धमा दक्षिणानां कालाद्दक्षिणानां काले धेनुमृषभमनड्वाहं दत्त्वैकविंशतिर्दक्षिणा[3] ददाति । शतं ददाति । सहस्रं ददात्यंभिष्टकं दक्षिणा ददाति । यदि न विन्देत मन्यानेतावतो दद्यादोदनान्वा । पष्ठौहीं त्वन्तर्वतीं दद्याद्धिरण्यं ददाति । वासो ददाति । तेनायुः प्रतिरत इति ब्राह्मणं । तं चेत्सौम्ये ऽध्वरे चिन्वीत प्रथमायामुपसदि क्षेत्रकरणं । मध्यमोत्तमे उपसदावन्तरेणोपधानं । काले ऽग्निप्रणयनं । दक्षिणानां काले दक्षिणाः । सवनीयस्य पूष्णो मृत्युग्रहश्चेदहीने सत्त्रे वा चिन्वीत प्रथमे ऽहनि दक्षिणाः प्रथमे ऽहनि पूष्णो मृत्युग्रहो । न सत्त्रे दक्षिणा नीयन्ते । नाचिकेत एव मृत्युग्रहः स्यादित्येतदपरमग्निं चित्वा सौत्रामण्या यजेत मैत्रावरुण्यामिक्षया वेति । तस्यै सायमग्निहोत्रे हुते सायंदोहः प्रातरग्निहोत्रे हुते प्रातर्दोहः । पशुपुरोडाशेन सह अपपर्मसमुदिते चर्या । संतिष्ठते सावित्रः । ॥ ५ ॥ तृतीयः ॥

---

१ उपप्रस्थांति M.

२ ग्रहमित्योपहूतं M.

३ ददाति instead of दत्त्वा M.

अथ नाचिकेतस्य[1] । प्रसिद्धं चेत्रकरणं यथा सावित्रस्यैतावदेव नाना । नात्र लेखा भवन्त्यथ याजुषीरुपदधाति लोको ऽसि स्वर्गो ऽसीत्यसञ्चितेनैकविंशतिं यथा निपतन्ति[2] तांस्तत्रतत्रोपदधाति । तदेतदन्यत्रापि[3] प्रकीर्णानामुपधानस्य[4] निदानं । यदि[5] पाङ्क्तः पञ्च पुरस्तात्पञ्च दक्षिणतः पञ्च पश्चात्पञ्चोत्तरत एकां मध्ये । ऽथ यदि त्रिवृत्सप्त पुरस्तात्तिस्रो दक्षिणतः सप्त पश्चात्तिस्र उत्तरत एकां मध्ये । ऽथ यदूर्ध्वाः[6] पश्चात्कोट्याः[7] प्रभृत्यूर्ध्वाः[8] स्वयमातृण्णावकाशादथ यदि प्राचीः स्वयमातृण्णावकाशात्प्रभृति[9] प्राचीः । स्वयमातृण्णाभ्यः प्रभृति सिद्धमत ऊर्ध्वं । स यदीच्छेत्तेजस्वी यशस्वी ब्रह्मवर्चसी स्यामिति प्राङ् होतुर्धिष्ण्यादुत्सर्पेदित्याहवनीयसकाशाद्येयं प्रागाद्यशस्वती सा मा प्रोर्णोतु तेजसा यशसा ब्रह्मवर्चसेनेति । तेजस्व्येव यशस्वी ब्रह्मवर्चसी भवतीत्यथ यदीच्छेद्भूयिष्ठं मे श्रद्दधीरन्भूयिष्ठा दक्षिणा नयेयुरिति

---

१ नाचिकेतस्य Be Ben.

२ निपर्तन्ति HUB ; निपतन्ति Be ; निवर्पन्ति M ; निवपन्ति Ben.

३ नैरन्तद॰ M.

४ Thus H Be ; प्रकीर्णानामुपदधा॰ U ; प्रकीर्णानुपधा॰ Ben ; प्रकीर्णानुपधा॰ B ; प्रकीर्णानामुपधा॰ M.

५ स यदि M.

६ Thus MB ; यदूर्ध्वं H ; या ऊर्ध्वाः Be Ben ; यदूर्ध्वं U.

७ Thus BH ; कोट्याः U ; कोष्ठा H Ben ; कोटरा Ben ; कोष्ठ M.

८ ॰र्ध्वा वा ।

९ ॰काशप्र॰ M.

दक्षिणासु नीयमानासु प्राच्येहि प्राच्येहीति प्राची जुषाणा वेत्वाज्यस्य स्वाहेति स्रुवेणोपहत्याहवनीये जुहुयाद्भूयिष्ठमेवास्मै श्रद्दधते। भूयिष्ठा दक्षिणा नयन्तीति ब्राह्मणम्। संतिष्ठते नाचिकेतः। ॥ ६ ॥ चतुर्थः ॥

अथ ब्रह्मचितः[1]। प्रसिद्धं क्षेत्रकरणं यथा सावित्रस्यैतावदेव नाना। नात्र लेखा भवन्त्यथ पुरस्तादुदीचीर्दशहोत्रीष्टका उपदधाति चित्तिः स्रुक्तया देवतयाङ्गिरस्वद्ध्रुवा सीद चित्तमाज्यं तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति दशाथ हृदयेष्टकामुपदधाति सुवर्णं घर्मं परिवेद वेनमित्यनुद्रुत्य देवैः स मानसीन आत्मा जनानामित्यातो। ऽथ यजुरिष्टके उपदधात्यग्निर्यजुर्भिस्तया देवतयाङ्गिरस्वद्ध्रुवा सीद सविता स्तोमैस्तया देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यथ पत्नीष्टके उपदधाति सेनेन्द्रस्य तया देवतयाङ्गिरस्वद्ध्रुवा सीद धेना बृहस्पतेस्तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति। सर्वासां पारे सूददोहसः करोत्यथ दक्षिणतः प्राचीश्चतुर्होत्रीष्टका उपदधाति पृथिवी होता तया देवतयाङ्गिरस्वद्ध्रुवा सीद द्यौरध्वर्युस्तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति चतस्रो। ऽथ हृदयेष्टकामुपदधाति ब्रह्मेन्द्रमग्निमित्यनुद्रुत्य यज्ञमेतं चतुर्होतॄणामात्मानं कवयो निचिक्युरित्यातो। ऽथ यजुरिष्टके उपदधातीन्द्र उक्थामदैस्तया देवतयाङ्गिरस्वद्ध्रुवा सीद मित्रावरुणावाशिषा तया देवत-

१ ब्रह्मचितस्य M Be.

याङ्गिरस्वद्ध्रुवा सीदेत्यथ पत्नीष्टके उपदधाति पथ्या पूष्णस्तया देवतयाङ्गिरस्वद्ध्रुवा सीद वाग्वायोस्तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति । सर्वासां पारे सूददोहसः करोत्यथ पश्चादुदीचीः पञ्चहोत्रेष्टका उपदधात्यग्निर्होता तया देवतयाङ्गिरस्वद्ध्रुवा सीदाश्विनाध्वर्यू तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति चतस्रो । ऽपि वाश्विनाध्वर्यू इत्येतेनैव मन्त्रेण द्वे इष्टके समानतथादेवते उपदधाति । तया देवतयाङ्गिरस्वद्ध्रुवे सीदतमिति[1] मन्त्रꣳ संनमयत्यथ[1] हृदयेष्टकामुपदधाति शतं नियुतः परिवेदेत्यनुद्रुत्य प्राणमुक्थं तेन क्लृप्तो ऽमृतेनाहमस्मीत्यातो । ऽथ यजुरिष्टके उपदधात्यङ्गिरसो धिष्णियैरग्निभिस्तया देवतयाङ्गिरस्वद्ध्रुवा सीद मरुतः सदोहविर्धानाभ्यां तया देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यथ पत्नीष्टके उपदधाति दीक्षा सोमस्य तया देवतयाङ्गिरस्वद्ध्रुवा सीद पृथिव्यग्नेस्तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति । सर्वासां पारे सूददोहसः करोत्यथोत्तरतः प्राचीः षड्ढोत्रेष्टका उपदधाति वाग्घोता तया देवतयाङ्गिरस्वद्ध्रुवा सीद दीक्षा पत्नी तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति सर्वाथ हृदयेष्टकामुपदधाति सुवर्णं कोशꣳ रजसा परीवृतमित्यनुद्रुत्येन्द्रस्यात्मानꣳ शतधा चरन्तमित्यातो । ऽथ यजुरिष्टके उपदधात्यापः प्रोक्षणीभिस्तया देवतयाङ्गिरस्वद्ध्रुवा सीदौषधयो बर्हिषा तया देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यथ

१ इत्यथ संनमयत्य॰ M; इति मंत्रं संनमयत्य॰ H Be Ben. U (pr. m.); संनमय्य॰ BU (sec. m.).

पत्नीष्टके उपदधाति वसूनां गायत्री तया देवतयाङ्गिरस्वद्ध्रुवा सीद रुद्राणां त्रिष्टुब्भया[1] देवतयाङ्गिरस्वद्ध्रुवा सीदेति । सर्वासां पारे सूददोहसः करोत्यथोपरिष्टात्प्राचीः सप्तहोत्रेष्टका उपदधाति महाहविर्होता तया देवतयाङ्गिरस्वद्ध्रुवा सीद सत्यहविरध्वर्युस्तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति षडपि वानाष्ट्रस्याप्रतिधृष्यस्य यज्ञस्याभिगरावित्येतेन मन्त्रेण द्वे इष्टके समानतयादेवते उपदधाति । तया देवतयाङ्गिरस्वद्ध्रुवे सीदतमिति मन्त्रः संनमयत्यथ[2] हृदयेष्टकामुपदधातीन्द्रो राजा जगतो य ईश इत्यान्तादनुवाकस्याथ यजुरिष्टका उपदधात्यदितिर्वेद्या तया देवतयाङ्गिरस्वद्ध्रुवा सीद सोमो दीक्षया तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति त्रयोदशाथ पत्नीष्टका उपदधात्यादित्यानां जगती तया देवतयाङ्गिरस्वद्ध्रुवा सीद विष्णोरनुष्टुब्भया[3] देवतयाङ्गिरस्वद्ध्रुवा सीदेत्यष्टादश । सर्वासां पारे सूददोहसः करोत्यथ यथावकाशं षड्ढेष्टका उपदधाति वाचस्पते विधे नामन्निति दशहोतुर्वाचस्पते वाचो वीर्येणेति चतुर्होतुः सोमः सोमस्य पुरोगा इति पञ्चहोतुर्भूर्भुवः सुवरिति षड्ढोतुर्वाचस्पते हृदिधे नामन्निति सप्तहोतुः । सर्वासां पारे सूददोहसः करोत्यथ यथावकाशमेव प्रतिग्रहेष्टका उपदधाति । देवस्य त्वा सवितुः प्रसव इत्यनुद्रुत्यैषा ते

१ त्रिष्टुप्भया M.

२ Thus MH; संनमय्य॰ the other MSS.

३ ॰नुष्टुप्भया

काम दक्षिणोत्तानस्त्वाङ्गिरसः प्रतिगृह्णात्वित्येकाचविꣳशमपि वा गन्धर्वाप्सराभ्यः स्वगाकरणे इत्येतेन मन्त्रेण द्वे इष्टके समानतयादेवते उपदधाति । तया देवतयाङ्गिरस्वद्ध्रुवे सीदतमिति मन्त्रꣳ संनमयति[1] । स्वयमातृण्णाभ्यः प्रभृति सिद्धमत ऊर्ध्वꣳ । संतिष्ठते ब्रह्मचित् । ॥ ७ ॥ पञ्चमः ॥

अथ समस्तस्य । प्रसिद्धं चैत्रकरणं यथा सावित्रस्यैतावदेव नाना । सावित्रो ऽग्निः प्रथमा चितिर्लोकंपृणा[2] द्वितीया । नाचिकेतस्तृतीया । लोकंपृणा[3] चतुर्थी । ब्रह्मचित्पञ्चमी । सर्वासु चितिषु स्वयमातृण्णा[3] । पुरीषान्ताश्चितयो । ऽग्ने देवाꣳ इहावहेत्येताभिः पञ्च[4] चितीरभिमृशति[4] । तं चेत्सौम्ये ऽध्वर उत्तम[5] एव चक्रे चिन्वीत प्राग्दीक्षणीयायै दिवः श्येनीभिर्यजेतोदवसानीयाया[6] अपाघाभिः[6] । सहप्रयुज्य[7] समस्यति । संतिष्ठते समस्तः । ॥ ८ ॥ षष्ठः ॥

---

१ Thus U (pr. m.); संनमति the other MSS.; M om. this passage.

२ •ष्णाभिर् (•भिस्) M Be UH, but cp. Ap. xix. 15. 11.

३ •ष्णाः M.

४ Thus H; पंचभिः पंच चितीर• U; पंच चितयो भिमृशति Be Ben; पंच चितयोभिमृशंते M; पंचभिश्चितीरभिमृशति B.

५ उत्तमे U; instead of उत्तम एव चक्रे M has उत्तरवेद्यां ।

६ Thus HU (sec. m.); •सानीयायापा• M Ben Be U (pr. m.); •सायायापा• B; cp. Sāyaṇa on T Br., vol. iii, p. 815; अपाघाभिः MU Be; the other MSS. indistinctly (घ or द्य).

७ प्रयुज्येकं UH; प्रयुज्य न M.

अथ वैश्वसृजस्य । प्रसिद्धं क्षेत्रकरणं यथा सावित्रस्यैतावदेव नाना । तिस्रो लेखा भवन्त्यथान्तमायां लेखायामुपदधाति यच्चामृतं यच्च मर्त्यमित्यष्टादश । सर्वासां पारे सूददोहसः करोत्यथाभ्यन्तरायां[1] लेखायामुपदधाति सर्वा दिशो दिक्ष्विति पञ्चदश । सर्वासां पारे सूददोहसः करोत्यथाभ्यन्तरायां लेखायामुपदधाति सर्वान्दिवꣳ सर्वान्देवान्दिवीति नव । सर्वासां पारे सूददोहसः करोति । स्वयमातृण्णाभ्यः प्रभृति सिद्धमत ऊर्ध्वं । तं चेदहीने[2] सत्त्रे[2] वा चिन्वीत शतरात्रे[3] विश्वजिति सर्वपृष्ठे दक्षिणानां काले ब्रह्मा सदस्यासीनो वैश्वसृजान्व्याचष्ट[4] ऋचां प्राची महती दिगुच्यत इति[5] पच्छो ऽर्धर्चशो ब्राह्मणे[6] वाक्यशस्तस्मा अध्वर्युः प्रतिगृणात्यों बृहदृतं[7] बृहत्सत्यं बृहदरात्म बृहदिति । तस्योत्तमे पर्याये ऽरात्म[8] बृहत्संपद्यते[8] । संतिष्ठते वैश्वसृजः । ॥ ९ ॥ सप्तमः ॥

---

१ ॰थान्तमायां M.

२ चेदुदीचीसावित्रे Be Ben.

३ सहस्रसरात्रे ins. M.

४ वैश्वसृजान् Be Ben ; विश्वसृजान् UHB ; वैश्वसृजं M.

५ इत्यृचु M.

६ ब्राह्मणं B.

७ Thus BUH ; Be Ben have each time नद् after बृहत् and M reads everywhere ब्रह्मन् instead of बृहत् ।

८ परात्मब्रह्मसंप॰ M.

एतेनारुणकेतुको व्याख्यातो । यावन्मन्त्रमवीष्टका[1] । लोकंपृणास्थ स्वयमातृण्णास्थाप एव । पुष्करपर्णꣳ रुक्मꣳ हिरण्मयं[2] पुरुषं कूर्ममित्यातपति वर्ष्या इति यथासमाम्नातं[3] । पत्न्यस्था इत्यविशोष्या[4] इत्यर्थं । उत्तरवेद्यावपनकाले तां तूष्णीं जानुदघ्नीं[5] खालान्यव मृदं निवपति । विदेरग्निरित्यादि लुप्यते । ध्रुवासीति प्रतिपद्यते । इमा याहमवीष्टका उपदध्यादिन्द्रं कर्णेभिरिति द्वाभ्याꣳ शान्तिं कृत्वा ताभ्यामुपदधात्यापमापामिति पञ्चभिर्महानाम्नीभिरुष्णोदकꣳ । शिवा न शन्तमेति सौषध्योर्[6] ऽपो[6] ऽध्वर्यवे ददाति । स ताः प्रतिगृह्य शिवा न इत्युपदधाति । सुमृडीकेति भूमिवतीमुपदध्यादेताः पुरस्तात्स्तुतिः प्रत्यञ्चमित्यष्टौ मध्ये शुक्रं ते अन्यदिति च । साकंजानामित्येकादश पुरस्ताद्दक्षिणतो ऽक्षिदुःखोत्थितस्यैवेति षड्विंशेह वः स्वतपस इति चातितानशाणीति चतस्रो मदन्तीस्तप्ताः प्रवर्ग्यवदाद्यन्तयोः शान्तिं कृत्वात्यूर्ध्वांच इति चौष्टतुमण्डलान्यव द्रप्स इति चारोग इत्यष्टौ[7] सूर्यनामभिः[7] पदशो

---

१ यावन्मात्रम० MU.

२ om. MB Be Ben.

३ ०म्नाता M.

४ इत्यशोष्या MU BH.

५ ०दघ्नं MU (sec. m.).

६ त्योषध्योपो B; सोषध्या अपो UH; सोषध्य आपो M; त्योषध्या आपो Be; सोषध्या आपो Ben.

७ Thus B Ben; इति षट्र सूर्य० Be; इत्यष्टौ षट्र सूर्य० HU; M om. सूर्यनामभिः ।

यत्ते शिल्पमिति च। व्याहृतीर्जपित्वापो व इति यजमान उपतिष्ठत। एवमुत्तरैरुपस्थानं व्याहृतीर्जपित्वा। सप्त सूर्याः सप्त दिशो नानासूर्या यद् द्यावश्चित्रं देवानामिति चतस्रः सौरीः पुरस्तात्केदमभ्रमित्येकामर्धमासा इत्युपरिष्टात्काला अप्सु निविशन्त इति[1] दक्षिणतः। किं स्विदत्रेति पञ्च वैष्णवीः[2]। पृच्छामि त्वा परं मृत्युमिति चतस्रो मृत्युमतीः। पृच्छामि त्वा पापकृत इति चतस्रो निरयवतीरा[3] यस्मिन्नग्ने नयेति द्वे। अग्निश्च जातवेदाश्चेत्यष्टौ दिश्या दिशो व इति यजमानः। प्रभ्राजमाना इत्येकादश रुद्राः। प्रभ्राजमान्य इत्येकादश रुद्राण्यः पदशो मध्ये। रूपाणि व इति यजमानः। स्वानभ्राडित्येकादश गन्धर्वगणाः पदशः पश्चाद्गौरी मिमायेत्येका[4]। वराहवः स्वतपस इति सप्त वाताः पदशः। समानमेतदिति वृष्टिमती[5]। यदक्षरमिति श्लोको। जमदग्निरित्याप्यायितस्तच्छंयोरिति शंयुः। महस्त्वदित्यष्टौ संयानीः। स संग्राम इति द्वे च[6]। पवित्रवन्तः पवित्रं ते ब्रह्मा देवानामसतः सद्यः इति चतस्रः पवित्रवत्य उत्तरतो। ऽमी य स्वचा इति सप्त मध्ये। ऽभ्यो मणिमिति पञ्च

---

१ द्वे ins. M.

२ Thus BHU ; वैष्णव्यः M Be Ben.

३ निरयवती॰ B ; पवमतीर॰ Ben ; यमवतीर॰ Be.

४ सर्वा H Be Ben U.

५ ॰मती HU ; इष्टिभिर् M ; Be Ben om. the word.

६ om. B.

वैश्वदेवीरुत्तरत । आ तमग्ने रथमिति तिस्र । आतनुष्वेति चतस्र । आ मन्द्रैरित्येकां यजमान उपदध्यादंणुभिश्चेति द्वे । सुब्रह्मण्योमित्येकामंवणाश्वा इति चतस्रो रेवतीर्ब्रह्मण उदरणमसीति चतस्रो ब्रह्मसदना । ऋष्टयोनीमित्यष्टौ दिश्या । मित्रश्च वरुणश्चेत्यष्टौ दिश्याः । पुष्करपर्णꣳ रुक्मꣳ हिरण्मयं पुरुषं कूर्ममिति महाग्निवदेव[1] । तान्युपधाय हꣳसः शुचिषदिति द्वे दूरोहणे पुरुषमभितस्तंदित्पदमिति द्वे मध्ये । वसूनाꣳ रुद्राणामित्यष्टावुत्तरतो । रश्मयो व इति यजमान । आरोगश्चेत्यष्टावुपरिष्टादापो व इति यजमानः । प्रभ्राजमानानामित्येकादश प्रभ्राजमानीनामिति चैकादश मध्ये । रूपाणि व इति यजमानो । अग्नेः पूर्वदिश्यश्चेत्यष्टौ दिश्या । दिशो व इति यजमानो । दक्षिणपूर्वस्यामिति चतस्रो नरकवतीर्यथालिङ्गमां यस्मिन्निन्द्रियाणि शतक्रताविति द्वे दक्षिणत । इन्द्रघोषा वः संज्ञानमिति षड् दिश्या । आदित्य सर्वं इति पञ्च दिश्या । एवा ह्येवेति षड् दिश्या । आपमापामिति नवोपरिष्टादपाꣳ रसमित्येकां । कामस्तदग्र इति संकल्पवतीमापो हि यदित्योघवतीं । विधाय लोकानिति स्तम्भनवतीं । केतव इत्येकामिमा नु कमिति तिस्र । आप्लवस्वेति सप्तदश चपण्णो । विशीर्ष्णींमिति द्वे । पर्जन्यायेति

---

१ Thus H Be; ॰वदेव B; M Ben U om. एव, but M has एतानि instead of the following तानि।

तिस्रः। पुनर्मामैत्विति च तिस्रः[१]। स्वयमातृण्णादि समानमुत्तरꣳ सावित्रेण। स्वयमातृण्णा लोकंपृणाश्चैता आपः पञ्च चितयो भवन्ति। प्रतिदिशं चितीः[२] पुष्करपर्णादिभिः प्रच्छादनं। लोकं पृणयैव द्वितीयामन्याः प्रथमचितिवच्च पुष्करपर्णादय। उत्तरतो[३] लोकंपृणयापवर्गो। दीर्घदारुभिर्मञ्चं[४] कृत्वा पृष्ठो द्विवीति पुरीषव्यूहनमन्त्येष्टके[५] शतरुद्रीयहोमो। ऽनुशꣳसनान्ते ऽग्निप्रणयनꣳ। ह्रयमानायां[६] वैश्रवणयज्ञो ब्राह्मणेन[७] व्याख्यातो ऽन्नकामस्य सर्वकामस्य[८] वा पर्वणिपर्वणि वैश्रवणयज्ञः। सोत्तरवेदिषु क्रतुषु चिन्वीतेति यथाब्राह्मणं[९]। तस्यैतद्व्रतमिति यथाब्राह्मणं संमितास्य[१०] व्रतसमुच्चया[१०]। आपो न बीभत्स्या यथाब्राह्मणमेककामः[११]

१ चतस्रः M ; चतिस्रः the other MSS.

२ चितिं H चितिः U.

३ उत्तर Be Ben.

४ °मञ्चं M.

५ °मन्त्येष्टकोर्ध्वं MUH.

६ Uncertain reading ; ह्रयमानायां U Be BU ; ह्रियमाणायां M ; ह्रीयमाणायां Ben.

७ Thus Sāyaṇa (comm. on Taitt. Ār.) ; ब्राह्मण MUH ; ब्राह्मणे Be Ben ; B om. the word.

८ सर्व° M.

९ चेतव्यम् ins. M.

१० Uncertain reading ; HU read as given in the text ; संमितं व्रतसमुच्चय B ; समभितस्य व्रतसमुच्चय Be Ben ; संमितव्रतसमुच्चय M.

११ यथाब्राह्मणमेककामः Be Ben ; यथाब्राह्मणकामः HBUM.

सर्वकामो वा। आपो[1] वा इदꣳ सर्वमिति ब्राह्मणं[2] विज्ञायते ब्रह्म वा आपो यदाप[3] उपधीयन्ते ब्रह्म[4] वै[4] तदात्मन्धत्ते ब्रह्मणः सायुज्यꣳ सलोकतामाप्नोति य एतमग्निं[5] चितुत इति। संतिष्ठत आरुणकेतुकः संतिष्ठत आरुणकेतुकः। ॥ १० ॥ अष्टमः ॥[6]

॥ इत्यत्यैकोनविꣳशः प्रश्नः ॥

~~~~~~~~~~~~~~~~~~~~

१ वापो UBH वा वापो Be.

२ om. M.

३ Thus MU (pr. m.); यदप all the other MSS.

४ ब्रह्मैव M.

५ Be Ben ins. चित्वा।

६ Adhyāya numbers for this praśna are found only in M.; the MSS. agree all in designing this praśna as काठकसूत्रम् or काठकम्।
~~~~~~~~~~~~~~~~~~~~

CORRIGENDA.

Page	20,	l. 8,	*read*	नद्धः	*instead of*	नद्ध
,,	70,	l. 12	,,	॰धारयन्त्य॰	,,	॰धारयत्य॰
,,	96,	l. 10	,,	षोडशतय्य	,,	॰तयं
,,	187,	l. 4	,,	अवो॰	,,	अन्नो॰
,,	200,	l. 1	,,	उवेवैव[1]	,,	उ[1]वैवैव[1]
,,	226,	l. 5	,,	सुवर्णमहैः		
,,	336,	note ६	,,	॰ब्बारि॰		

INDEX.

Agnicayanam	Praśna X.		
Vājapeyaḥ	„ XI.		
Rājasūyaḥ	„ XII.		
Iṣṭikalpaḥ	„ XIII.		
Aupānuvākyam	„ XIV.		
Aśvamedhaḥ	„ XV.		
Dvādaśāhaḥ	„ XVI.	1-12	(adhy. 1-3).
Gavām ayanam	„ „	13-23	(„ 4-6).
Ahīnāḥ	„ „	24-fin.	
dvirātraḥ, trirātraḥ	„ „	24-27	(„ 7).
catūrātraḥ	„ „	28	(„ 8).
pañcarātraḥ, sārasvatam ayanam	„ „	29	
munyayanam	„ „	30	
saptarātraḥ-daśarātraḥ ...	„ „	31	(„ 9).
ekādaśarātraḥ-trayodaśarātraḥ	„ „	32	
caturdaśarātraḥ-viṃśatirātraḥ	„ „	33	(„ 10).
caturviṃśatirātraḥ-catustriṃśadrātraḥ	„ „	34-35	(„ 11).
ṣaṭtriṃśadrātraḥ-sahasrarātraḥ	„ „	36	(„ 12).
Uttarā tatiḥ	Praśnas XVII and XVIII.		
atirātraḥ	Praśna XVII.	1-10	(adhy. 1).
ekādaśinī	„ „	11-16	(„ 2-3).
punaścitiḥ	„ „	17	(„ 4).
sarpasattram	„ „	18	(„ 5).
viśvasṛjāṃ sattram	„ „	19	(„ 6).
kuṇḍapāyinām ayanam ...	„ „	20, 21	(„ 7)
utsargiṇām ayanam	„ „	22	(„ 8).
tapaścitām ayanam	„ „	23	(„ 9).
aharahaścayanam	„ „	24	
upariṣṭānmāsam ...	„ „	25	
purastānmāsam	„ „	26	
brahmaṇo 'yanam	„ „	27	
kāmyāś citayaḥ	„ „	28-30	(„ 10)
sautrāmaṇī	„ „	31-38	(„ 11).
samāvartanam	„ „	39-44	(„ 12,13).
naiṣṭyayanāni	„ „	45-46	(„ 14).
kāmyā darśapūrṇamāsāḥ ...	„ „	47-54	(„ 15)
cāturmāsyāḥ somāḥ	„ „	55-58	(„ 16).
jyotirayanam	„ „	59-60	(„ 17).
mahāyajñaḥ	„ „	61-62	(„ 18).
Ekāhāḥ	„ XVIII.		
bṛhaspatisavaḥ	„ „	1-2	(„ 1).
sthapatisavaḥ	„ „	3	
sūtasavaḥ	„ „	4	

somasavaḥ	Praśna XVII,	5	(adhy. 2).
pṛthisavaḥ	,, ,,	6	
gosavaḥ	,, ,,	7	
odanasavaḥ	,, ,,	8-10	(,, 3).
pañcaśāradīyaḥ	,, ,,	11	(,, 4).
agniṣṭut	,, ,,	12-13	
indrastut	,, ,,	14	
aptoryāmaḥ	,, ,,	15	
mṛtyusavaḥ	,, ,,	16-19	(,, 5).
sadyaskri, anukri, parikrī, atikri	,, ,,	20-23	(,, 6).
vrātyastomāḥ	,, ,,	24-26	(,, 7).
bhāllavistomāḥ	,, ,,	27	
upahavyaḥ	,, ,,	28	(,, 8).
tīvrasomaḥ, vighanaḥ	,, ,,	29-30	
udbhid, valabhid	,, ,,	31	
ṛtapeyaḥ, diśāṃ catuṣṭomaḥ, chandasām ekatrikaḥ, stomānām ekatrikaḥ, indrāgnyo stomāḥ	,, ,,	32-35	(,, 9).
śyenaḥ, iṣuḥ, indravajraḥ ...	,, ,,	36	(,, 10).
durāśaḥ, durṇāśaḥ, apacitiḥ, tviṣiḥ	,, ,,	37-39	
ṛṣabhaḥ, vaniṣṭhusavaḥ, kānāndhayajñaḥ	,, ,,	40-41	(,, 11).
manuyajñaḥ, vāca stomaḥ ...	,, ,,	42	
yamastomaḥ	,, ,,	43	
śadopaśadau paurūravasau, prājāpatyau, naidhruvasya kaśyapasya	,, ,,	44	(,, 12).
punastomau	,, ,,	45-47	(,, 13).
praṇodaḥ, vibādhaḥ, pratinodaḥ, agner ativyādhaḥ, indravajraḥ, śunaskarṇayajñaḥ, rāśimarāyau, āñjanābhyañjanau, viṣūcīnaśālaḥ, sarvatomukhaḥ, sahasraśālaḥ	,, ,,	48-49	(,, 14).
yamau stomau, agnyādityayo stomaḥ (?)	,, ,,	50	(,, 15).
peyāni, diśāṃ stomaḥ, ṛtūnāṃ st., ṛṣiṇāṃ st., devatānāṃ st., darśapūrṇamāsayor ayanam	,, ,,	51-53	(,, 16).
Kāṭhakam ...	XIX.		
sāvitraḥ	,, ,,	1-5	(adhy. 1-3).
nāciketaḥ	,, ,,	6	(,, 4).
brahmacit	,, ,,	7	(,, 5).
samastaḥ	,, ,,	8	(,, 6).
vaiśvasṛjaḥ	,, ,,	9	(,, 7).
āruṇaketukaḥ	,, ,,	10	(,, 8).



